This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M805 विषय धर्मशास्त्र
नाव. दानपारिजातम् Mss. (प्रथम पृष्ठ [illegible])
लेखक/लिपीकार अनंताचार्य विरचितम्
पृष्ठ 218 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधान पारिजात / ३ दानप्रकरणम् (स्तबकः)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोच्यते ज्ञानसिद्धये ॥ आदौ दानप्रशंसे हत तत्स्वरूपनिरूपणं ॥ १२ ॥ ततश्च दानदोषाणां तद्व्रदानां निरूपणं ॥ दानांगानां त
था दातुरथ यात्र निरूपणं ॥ १३ ॥ अपात्रोक्तिरथ श्रद्धादेयद्रव्यनिरूपणं ॥ ग्रास्यद्रव्यमथाग्रास्यमदेयं च निरूप्यते ॥ १४ ॥
दानदेशाश्च तत्कालानि विरुद्धा अपि तत्र च इति कर्तव्यता दाने परिभाषा ततः परं ॥ १५ ॥ तत्राधिकारी मंत्रार्थज्ञानादि निय
माश्रये ॥ प्रतिमाद्रव्यमानं च कलशादेश्च लक्षणं ॥ १६ ॥ दर्भादिलक्षणं चान्यनियमानां निरूपणं ॥ अनुक्तो दक्षिणादा
ननिर्णयः प्रोच्यते तथा ॥ १७ ॥ द्रव्यमानं धनमानं मानं दिक्षाणकस्य च ॥ क्रमाननं मंगलादीनां भेदाः सविनियोगकाः ॥ १८
प्राच्यादिज्ञः साधनं तु प्रोच्यते वास्तु निर्णयः ॥ सतोरणपताकादेर्मंडपस्याथ लक्षणं ॥ १९ ॥ कुंडानां विनियोगोथ तन्नि
र्माणं सविस्तरं ॥ मेखलायोनिकुंडादि लक्षणं योग्य स्थितिः ॥ २० ॥ तुलापुरुषपर्वाणि महादानानि षोडश ॥ अथ प
र्वतदानानि धान्यादीनां क्रमेण हि ॥ २१ ॥ सुवर्णादानानि तथा तथा नंदनिधेर्विधिः ॥ ततो भद्रनिधेर्दानं दानं चक्रात मानकं ॥
२२ ॥ हेमदानं रूप्यदानमश्वदानमतः परं ॥ तिलदानानि दानं च कांस्यपात्रस्य कीर्त्यते ॥ २३ ॥ तिलशैलस्ततो दानं तिलप
द्मस्यैव पुनः ॥ रुद्रैकादशदानं च दानं च तिलगर्भकं ॥ २४ ॥ गजदानं देवताभ्यो गजदानं द्विजाय च ॥ दासीदानं रथस्या
पि त्रिविक्रमभूमिवेश्मनां ॥ २५ ॥ मठप्रतिश्रयस्यापि दानपाःप्रमकस्य च ॥ कन्यादानं च कपिलादानं दशभिर्दानसंयुतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध॰दा॰प्रो॰वि ॥२६॥गोदानंचततोहेमशृंगीगोदानमेवच॥समानवत्सगोदानंस्वर्णवर्णगवांततः॥२७॥त्रिरात्रगोदानमथोमे॰दाने
॥२॥ दैवतेषुच॥दानंचाभयतोमुख्यावैतरण्यास्ततःपरम्॥२८॥ततोवृषभदानंचगुडधेन्वादयोदश॥विद्यादानेचवेद
नांस्मरणानामितरस्यच॥२९॥दानंत्रिपुरुषाणांचग्रहाणांदानमीर्यते॥दशावतारदानंचचक्षुरन्नादिसदानकं॥३०॥चंद्रा
दिसप्रतिकृतेःकालाख्यपुरुषस्यच॥आत्मप्रतिकृतेर्दानमुदकुंभस्यचैवहि॥३१॥अंतकप्रतिमायाश्चलोकपा
लाष्टकस्यच॥मेषजामहिषीमहिषदानेकृष्णाजिनस्यच॥३२॥ऋषिकृष्णाजिनस्योक्तामार्ईकृष्णाजिनस्यच॥मेष
जामहिषीमतिथिवारर्क्षयोगमासत्वयनदानकं॥३३॥दानंसंवत्सरस्यापिप्रकीर्णानांचदानकं॥जलाशयाराम
वापीकूपादीनांप्रतिष्ठिभिः॥उच्यतेहिनिबंधेस्मिन्विदुषांप्रीतयेमया॥ ॥इतिदानपारिजातेनुक्रमणिकाः॥ ॥
श्री॥ ॥विश्वस्ययोनिंविश्वेशंविश्वस्याप्यमकारणं॥विश्वरूपमनंतंमेकुलदेवंनमाम्यहम्॥१॥अथेदानींचतु
र्थस्तबक आरभ्यते॥तत्रप्रकीर्णकानिविधानानिकथ्यंते॥तत्रादौदानानि॥अथदानप्रशंसातैत्तिरीयश्रुतौ॥दाने
नद्विषंतोमित्राभवंतिदानेनसर्वंप्रतिष्ठितंतस्माद्दानपरमंवदंतीति॥वाजसनेयकेशतपथेपि॥तदेतत्त्रयंशिक्षे दा॰प॰
दमंदानंदयामिति॥नंदिपुराणेपि॥दानंपरंप्रशंसंतिदानमेवपरायणं॥दानंबंधुर्मनुष्याणांदानंकोशोस्त्यनुत्तमः॥दान ॥३॥

कामफलावृक्षादानंचिंतामणिर्नृणां॥दानंपुत्रःपरंचार्थंदानंमातापितातथा॥नदानेनविनाकिंचित्सारमस्तिजगत्त्रये
॥दानेनप्राप्यतेस्वर्गःश्रीर्दानेनैवलभ्यते॥दानेनशत्रून्जयतिव्याधिर्दानेननश्यति॥दानेनप्राप्यतेविद्यादानेनयुवती
जनः॥धर्मार्थकाममोक्षाणांदानंतत्परमंस्मृतमिति॥मात्स्येपि॥न्यायेनार्जनमर्थानांवर्द्धनंचाभिरक्षणं॥सत्पात्रेप्रति
पत्तिश्चसर्वशास्त्रेषुपठ्यते॥अप्यधर्मसमायुक्तंपतंतंनरकेभुचे॥त्रायतेदानमेकंतुपात्रभूतेद्विजेर्पितं॥तथासर्वगु
णोपेतमुक्तंदोषैश्चवर्जितं॥कामधुग्धेनुवद्दानंफलमात्मेप्सितंफलं॥इहाकीर्तिंचदास्याम्यामीस्फीतानन्भोगांस्त्रिवि
ष्टपे॥दानेप्रशंततीयेपिजन्मनिप्रसवोन्नमेइति॥प्रसवोन्नमे॥उन्नमेकुलेइत्यर्थः॥आग्नेयेपि॥ग्रासार्द्धमपिग्रास
मर्थिभ्यःकीन्नदीयते॥इच्छानुरूपोविभवःकदाकस्यभविष्यति॥कुटुंबंपीडयित्वातुब्राह्मणायमहात्मने॥दातव्यं
भिक्षवेप्यन्नमात्मनोभूतिमिच्छता॥कौर्मेतु॥दानधर्मात्परोधर्मोभूतानांनेहविद्यते॥इहलोकेपरेलोकेनास्त्येतेमुप
तिष्ठते॥तस्माद्विप्रायदातव्यंश्रोत्रियायकुटुंबिनइति॥ ॥अथदानस्वरूपं॥आदित्यपुराणे॥अर्थानामुदितेपात्रे
श्रद्धयाप्रतिपादनं॥दानमित्यभिनिर्दिष्टंव्याख्यानंतस्यवक्ष्यते॥नित्यंनैमित्तिकंकाम्यंविमलंचेतिकथ्यते॥अहन्य
हनियद्दानंतन्नित्यमितिकीर्त्यते॥यत्तु॥पापोपशांत्यर्थंदीयतेविदुषांकरे॥तन्नैमित्तिकमुद्दिष्टंदानंसद्भिरनुष्ठितं॥
अपत्यविजयैश्वर्यस्वर्गार्थंयत्प्रदीयते॥दानंतत्काम्यमाख्यातमृषिभिर्धर्मचिंतकैः॥यदीश्वरप्रीणनार्थंदीयतेविदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दा॰प्रो॰वि
॥३॥

पाकरे॥चेतसा भक्तियुक्तेन तद्दानं विमलं विदुः॥भगवता तु सात्त्विकादिभेदत्रयमुक्तं दानस्य॥श्रीगीतायां॥दातव्यमिति य
द्दानं दीयतेऽनुपकारिणे॥देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतं॥यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः॥दीयते
च परिक्लिष्टं तद्दानं राजसं स्मृतं॥अदेशकाले यद्दानमपात्रेभ्यश्च दीयते॥असत्कृतमवज्ञातं तत्तामसमुदाहृतं॥येन
येन हि भावेन यद्यद्दानं प्रयच्छति॥तेन तेन हि भावेन तत्तत्प्राप्नोति पूजितः॥हेमाद्रावपि॥तामसानां फलं भुंक्ते तिर्यक्त्वे म
नवः सदा॥बाल्ये वा दासभावे वा नात्र कार्या विचारणा॥अतो यथा तु मानुष्ये राजसानां फलं भवेत्॥सात्त्विकानां फलं भुंक्ते
देवत्वे नात्र संशय इति॥कायिकं वाचिकं दानं मानसं च त्रिधा मतं॥अर्हणेभ्यस्तु वर्णादि दानं तत्कायिकं मतं॥आर्त्ता
नामभयं दद्यात्सेतद्वाचिकं स्मृतं॥विद्ययाभ्याच्यपापो गीत यद्धनं मानसं स्मृतमिति॥ ॥अथ दानांगानि॥तत्रैव॥
प्रतिग्रहीता श्रद्धा च कालो देशश्च पावनः॥श्रद्धा च सात्त्विकी ज्ञेयं दानानामंगपंचकं॥देशकालावुपायेन द्रव्यं श्रद्धास
मन्वितं॥पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणं॥उपाय इति कर्त्तव्यता॥ ॥अथ दातृस्वरूपं॥अपापरोगी धर्मात्मा
दित्सुरव्यसनः शुचिः॥अनिंद्यजीवकर्मा च षड्भिर्दाता प्रशस्यते॥भारते॥क्रियावान्श्रद्धधानश्च दाता प्राज्ञोनसूय
कः॥धर्माधर्मविशेषज्ञः सर्वत्र इति ह स्मृतं॥यस्मात्तु कर्मणां यस्य त्रिविधा कर्मा जो जीविका॥याजनाध्यापने चैव विशु
द्धाच्च प्रतिग्रहादिति मनुः॥प्रभासखंडे॥आत्मपुत्रः पुरोधाश्च भ्राता पत्नी सखा पिता॥पात्राणां धर्मकार्ये पुत्रायं ते प्रति

दाम॰
॥३॥

हस्तकाः॥एभिः कृतं महादेव स्वयमेव कृतं भवेदिति॥ ॥अथ पात्रलक्षणं॥मदनरत्ने॥ब्राह्मणाः प्रतिगृह्णीयादि सर्वे सा
धुतः सदा॥अश्रमश्रमणि भातं गतिर्लोलो हार्श्च वर्जयेत॥याज्ञवल्क्यः॥तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये॥तृप्त्यर्थं
पितृदेवानां धर्मसंरक्षणाय च॥सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः॥तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्त
माः॥वसिष्ठः॥स्वाध्यायाढ्यं योनिमंतं प्रशांतं वैतानस्थं पापभीरुं बहुज्ञं॥स्त्रीषु क्षांतं धार्मिकं गोशरण्यं व्रतैः क्लांतं तादृशं पा
त्रमाहुः॥योनिमंतं सत्कुलीनं॥वैतानस्थमग्निहोत्रादिकर्मपरं॥स्त्रीषु क्षांतं स्त्रीषु न आसक्तं॥गोशरण्यं गोशुश्रूषापरं॥
भविष्यत्पुराणे॥क्षांतिः स्पृहा दया सत्यं दानं शीलं तपः श्रुतं॥एतदष्टांगमुद्दिष्टं परमं पात्रलक्षणं॥मात्स्ये॥शीलं संव
सतां तेयं शौचं संव्यवहारतः॥प्रज्ञा संकथनात्ते पात्रैस्त्रिभिः पात्रं परीक्षयेत॥कौर्म्ये॥स्वाध्यायवंतो ये विप्रा विद्यावंतो जितें
द्रियाः॥सत्यसंयमसंयुक्तास्तेभ्यो दद्याद्द्विजोत्तम॥श्रोत्रियाय कुलीनाय विनीताय तपस्विने॥व्रतस्थाय दरिद्राय प्रदेयं
भक्तिपूर्वकं॥श्रोत्रियमाह यमः॥ॐकारपूर्विकां शाखामधीते स श्रोत्रियो भवेदिति॥व्यासः॥किंचिद्वेदमयं पात्रं किंचित्पा
त्रं किंचित्पात्रं तपोमयं॥असंकीर्णं तु यत्पात्रं तत्पात्रं तारयिष्यति॥असंकीर्णो योन्यादिसंकररहितः॥यमः॥दत्त्वा द्विजाय
शूद्राय सतां याति भुमं गतिं॥विद्यातपःशीलवंशश्च संतारयति ते नरः॥याज्ञवल्क्यः॥न विद्यया केवलया तपसा वापि पात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दा॰औ॰वि ता॥यत्रर्त्विग्भिः स चोभेत धिया चं प्रकीर्तितं॥विष्णुधर्मोत्तरे॥आत्मनस्तु भवेसांतं नाम्नस्य स्यात्पुरोहितः॥पुरोहितस्य स्वेदत्तं
॥४॥ दानमक्षय्यमुच्यते॥उपाध्यायर्त्विजौ श्चैव गुरोश्चापि च मानचे॥वर्णापेक्षानकर्त्तव्या पितरं मातरं प्रति॥गुरुपाध्यापस्व
रूपं च वक्ष्यते॥मातृष्वसा स्वसा चैव तथैव च पितृष्वसा॥मातामही भागिनेयी भागिनेय स्तथैव च॥दौहित्रो विट्पतिश्चैव
तेषु दत्तमथाक्षयं॥व्यासः॥यत्कन्यासु पिता कुर्याद्दानं पूजनमर्चनं॥तत्सूतेषु कृतं विद्यात्तद्दत्तं दत्तमक्षयं॥पूजनं सत्कारः
॥भारते॥पंचविंशविधिराम रूकाम्याधिनोपहताश्च ये॥ननेव्यास्त महाराज न तु देयः प्रतिग्रहः॥बौधायनः॥विद्यातपश्च योनिश्च
एतद्ब्राह्मण्यलक्षणं॥विद्यातपोभ्यां यो निर्हीनो जातिब्राह्मण एव सः॥शीलं संवृत्ता ज्ञेयं शौचं संव्यवहारतः॥प्रज्ञा संकथना
त्रैपात्रिभिः पात्रं परीक्षयेत्॥क्षमा दया दानं धर्मः सत्यं भूतेषु च घृणा॥यमः॥स संदानं क्षमा शीलमामर्षो स्पर्शपाध्य
णा॥विद्याविनयमात्रिकामेतद्ब्राह्मणलक्षणं॥भारतेपि॥सत्यं दानं क्षमा शीलमानृशंस्यं मतः परं॥मातृश्च ब्राह्मणाश्चैव
वश्रोत्रियश्च ततः परं॥अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः॥इत्येते ष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ॥तेषां
परः परः श्रेष्ठो विद्यावृत्तविशेषतः॥एवं लक्षणानि यथा हारीतदेवलः॥ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्॥अनुपे राम॰
तः क्रियाहीनो मात्र इत्यभिधीयते॥१॥एकदेशमतिक्रम्य वेदस्याचारवानृजुः॥एकांशाखां सकल्पां वा षड्भिरंगैरधीत्य वा॥ ॥४॥

षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥२॥ सकलां कल्पमात्रसहितां॥मंत्रस्य वा ब्राह्मणस्य वेत्ता ब्राह्मण उच्यते॥३॥वे
दवेदांगतत्वज्ञः क्रियावाञ्छ्रोत्रियो भवेत्॥वेदवेदांगतत्वज्ञः शुद्धात्मा पापवर्जितः॥श्राद्धवानः क्रियावांश्च अनूचानः स
उच्यते॥शेषं श्रोत्रियवत्स्मातः सेचान इति स्मृतः॥शेषमपरमेकत्वा स्वाध्ययनादिकं श्रोत्रियवत्स्मातः॥उक्तश्रोत्रियलक्षण
युक्तश्चैव सर्वथः॥अनूचानगुणोपेतो यागस्वाध्याययंत्रितः॥स्वाध्यायकर्मसंपन्नः भ्रूणयानगुरुत्पकः॥भ्रूण इत्युच्यते शिष्टै
:शेषभोजीति तेद्विजः॥शेषभोजी पंचमहायज्ञशेषभोजननशीलः॥वैदिकं लौकिकं चैव सर्वज्ञानमवाप्य यः॥आश्रमस्थो वशी
नित्यमृषिकल्प इति स्मृतः॥लौकिकमर्थार्जनादेविषये॥आश्रवस्थो गृहाश्रमस्थः॥ऋषिवधर्त्तमानो यो ऋषिकल्पः स उच्य
ते॥ऊर्ध्वरेतास्तपस्युग्रो नियताशी च संयमी॥शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः॥निग्रहानुग्रहे दक्षो ऋषिरित्यभिधीयते
॥निर्वृत्तः सर्वतत्वज्ञः कामक्रोधविवर्जितः॥ध्यानस्थो निष्क्रियो दांतस्तुल्यमृत्कांचनो मुनिः॥ब्रह्मनिष्ठो ब्रह्मवेत्ता मुनिरित्येव
धैः॥मनुः॥सांतानिकं यक्ष्यमाणमध्वगं सर्ववेदसं॥गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः॥नवैतान्स्नातकान्विद्याद्ब्राह्म
णान्धर्मभिक्षुकान्॥निःस्वेभ्यो देयमेतेभ्यो दानं चैव विशेषतः॥तेभ्योन हि हिता ग्रेभ्यो देयमन्नमदक्षिणां॥इतरेभ्यो बहिर्वेदि कृतान्
नं तु विधीयते॥संतानप्रयोजनप्रयोजन विवाहवान्सांतानिकः विवाहार्थास्ति यावत्॥अध्वगस्तीर्थार्थं प्रचलितः॥सर्ववेदाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दा॰ ओ॰ वि सर्वस्वदक्षिणायायागंकृत॥सर्ववेदाःसयेनेष्टोयागः॥सर्ववेदाश्चिरागाऽसन्निधानात्॥गृहक्षेत्रगोवलीवर्दस्यापेनमातापितृ
व्यतिरिक्तः॥उपतापीरुग्णाः॥विद्याविशेषतइत्यल्पविद्यापात्रंबहुविद्यावद्भिःसर्थः॥दक्षः॥व्यसनापदर्थार्थंचकुटुंबार्थं
॥५॥ चयाचितः॥एवमन्विष्यदातव्यंसर्वदानेष्वयंविधिः॥व्यसनंराजचोरादिपीडा॥आपद्दुर्भिक्षादिकृता॥भारते॥स्नातस्याहूतेदा
राश्चद्येविप्रादेशाविप्लवा॥अथार्थमभिगच्छेतितेभ्योदत्तंमहाफलं॥विष्णुधर्मोत्तरेपि॥यक्ष्मतोतथादत्तंव्यसनंतर्तुमिच्छता॥
दुःखान्वितानीदृशीनानांलक्षणांपरिचोदितं॥विवाहेमेलावंधेप्रतिष्ठादिषुकर्मसु॥आपन्नेषुचयद्दत्तमक्षयंतदुदाहृतं॥
दक्षः॥द्विगुणासाहस्रमनंतंचयथाक्रमं दानेविशेषःस्याद्विद्यायामेवहिसमब्राह्मणोदानंमाद्विगुणंब्राह्मणानुवेसहस्र
गुणमाचार्येत्वनंतंवेदपारगे॥ब्राह्मणोब्रुवाणाःकृतोपनयनादिसंस्कारःभारते॥अध्यापयेत्तुयःशिष्यंकृतोपनयनंद्वि
जः॥सरहस्यंसकल्पंचवेदंभारतसत्तम॥तमाचार्यंमहाबाहोप्रवदंतिमनीषिणः॥याज्ञवल्क्यः॥सगुरुर्यःक्रियाःकृत्वावे
दमस्मैप्रयच्छति॥एकदेशमुपाध्यायऋत्विग्यज्ञकृदुच्यतेइति॥बृहस्पतिः॥समदूसमगुणांदानंवैश्येपत्नद्विगुणांमतं॥क्षत्रि
येत्रिगुणांप्राहुःषड्गुणांब्राह्मणेस्मृतं॥श्रोत्रियेचैवसाहस्रमाचार्येद्विगुणंमतं॥आत्मत्तेज्ञातसाहस्रमनंतंचाग्निहोत्रिणि॥ रामः
अमात्रुषेसमंदानंवेदाध्ययनतत्परे॥ज्ञातग्रंथस्तद्विनिर्दिष्टंप्रधीनेसंख्यसंमितं॥अनंतंचवतदेवोक्तंब्राह्मणोवेदपारगे॥ज्ञातग्रं ॥५॥

थातगुणं॥अथश्रूद्रादीनांपात्रत्वनिरूपणामत्रमभयादिदानेवोद्धव्यं॥अत्रदानेनकर्तव्यंपात्रावेक्षणामेवपि॥अत्रंचसर्वत्रदात
व्यंधर्मकामेननैवहिनाइति॥विष्णुधर्मोत्तरेविशेषोक्तेः॥कृतात्रमितरेभ्यइत्तिगोतमोक्तेः॥भूतामयप्रदानेनसर्वान्कामानवाप्नु
यातइतिसंवर्त्तेस्मरणाच्चैतस्तंनप्रपंचनेसुपरम्यतेयमः॥एवमन्वयविद्याभ्यांहृत्तेनचसमुच्छ्रिताः॥त्रिशुक्रानामविप्रेद्राःस
र्मतेसवनादिषु॥सवनादिषुयज्ञादिषु॥सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे॥अधीतेज्ञातसाहस्रमनंतंवेदपारगे॥प्रधीते
ऽप्यारब्धेवेदाध्ययनेमत्रिवृष्टमधीयानंब्राह्मणंयोव्यतिक्रमेत॥भोजनेचैवदानेचदहत्यासप्तमंकुलं॥यस्त्वासन्नमतिक्र
म्यब्राह्मणांश्रोत्रियंशुचिं॥दूरस्थंभोजयेत्पितृसर्वकं॥ ॥अथगृहीतधर्मः॥ॐकारमुच्चरन्प्राप्तोदूर्विशांसकुशोदकं॥गृही
त्वाज्ञेयद्विप्रगुणायंनरकंब्रजेत॥इदंतुद्वयोःसाम्ये॥असाम्येतु॥ब्राह्मणातिक्रमोनास्तिमूर्खेमंत्रविवर्जिते॥ज्वलंतमग्निमुत्सृ
ज्यनेहिभस्मनिहूयते॥तथा॥संवधिनस्तथासर्वान्देहिंत्वेविरूपतिंतथा॥भागिनेयंविशेषेणतथावंधुंबहापयेत॥विरूपति
जामाता॥अब्राह्मणास्तेषट्प्रोक्ताऋषिभिःशौनकादिभिः॥आद्योराज्ञाभृतस्तेषांद्वितीयःक्रयविक्रयी॥ततीयोवहु
याज्यःस्याच्चतुर्थोग्रामयाजकः॥पंचमस्तुभृतस्तेषांग्रामस्यनगरस्यच॥अनागतांतुयःपूर्वांसादिसांचैवपश्चिमां नोपा
सीतद्विजःसंध्यांसषष्ठइतिकीर्तितः॥अर्थनिषेधोदानविशेषपरः॥मंत्रंरंचयद्दानममंत्रायप्रयच्छति॥दाताचनिकृसहस्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा॰प्रो॰वि॰ तज्ञोत्कुर्लिङ्गं निङ्क्तती ति ॥ दानं दद्यात्स्वपत्नेन श्रद्धापूतमनं द्विजः ॥ अश्रद्धया हुतं दत्तं न च तत्प्रेत्य नो इह ॥ यद्यदिष्टं विशिष्टं
॥६॥ च न्यायप्राप्तं च यद्भवेत् ॥ तत्तद्गुणवते देयमित्येतद्दानलक्षणं ॥ तथा ॥ सदा विज्ञानमाधर्माः ह्योयोलाभः कायोजयः ॥ प्रयोगः
कर्मयोगश्च सत्पति ग्रह एव च ॥ प्रयोगः शास्त्रीयमार्गो णा कुसीदं ॥ कर्मयोगश्चार्त्विज्यं ॥ इदमपि यथावर्णो द्रष्टव्यं ॥ एतत्स्व
वस्था माहणो तमः ॥ वासनग्रासाधिकं लब्धं क्षत्रियस्यापि वर्जितं ॥ निर्विष्टं वैश्यशूद्रयोरिति ॥ यमः ॥ कुटुंबभक्तवसना
द्देयं यदतिरिच्यते ॥ मध्वास्वादो विषं पश्चाद्दातुर्धर्मोन्यथा भवेत् ॥ कुटुंबं पीडयित्वापि सावरूप कत्वार्थं चेद्दितव्यं ॥ कावि
भो पुरुषोत्को के सूर्यमंडलभेदिनौ ॥ दाता लब्ध न सद्दुर्भिक्षे सुभिक्षे हेमवस्त्रदः ॥ भारते ॥ संयुतसपोनदित्तेसत याचित्वाय
श्च नेच्छति ॥ उभावन्ति कावतो हि यथा पापमवाप्नुतः ॥ अदेयमाह मनुर्याज्ञवल्क्यश्च ॥ सामान्यं याचितं न्यासं आधिर्दा
राश्च तद्धनं ॥ अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति ॥ आपत्स्वपि न देयानि नव वस्तूनि पंडितैरिति ॥ देवलः ॥ षट्कम
म्नेगृहस्थस्य वानप्रस्थस्य गोरसः ॥ वृत्तिश्च भैक्षवृत्तीनां न देयं पुत्रमिच्छा ॥ दुर्भिक्षे दारुरोगार्ते कुटुंबं सीदति क्षुधा ॥ अ राम॰
साधोरपि ग्रहीत्वापि दयापाकरणार्थकं ॥ ॥ अथ ग्राह्यस्वामिः ॥ अजिनं मत्स्यपाण्यं च मेघीचोभयतोमुखीं ॥ कुरुक्षेत्रे च गृ ॥६॥
हीत्वा दयाप्यपाकरणार्थकं ॥ नो नमः यः पुरुषो भवेत् ॥ आग्नेये ॥ हस्त्यश्वरथयानानि मत्स्यात्मासनादयः ॥ कृष्णाजिने च गृ

विफलं तद्विजानीयाद्भस्मनीव हुतं हविः ॥ षड्गुणमते ॥ अश्रद्धया कृतं भुक्तं विर्दातो दानं दद्यात्स दक्षिणां ॥ अदक्षिणां तु यद्दानं तत्स
र्वं निष्फलं भवेत् ॥ गत्स्वपरिशिष्टे ॥ दक्षिणालाभे मलानां फलानां मध्यात्सांदक्षिणां दद्याती नि विशेषविहितगोवस्त्रादिद
क्षिणादाने व्यतिरिक्तेषु सामान्यतो विहितदक्षिणासु गवादिदानेषु तु व्यासः ॥ सुवर्णापरं मद्दानं सुवर्णादक्षिणायुविधीयते ॥
सुवर्णं येप्रयच्छति सर्वदानं तु भवेत्सुतः ॥ भविष्योत्तरे ॥ कांस्यं यदीयते किंचिन्नत्समग्रं सुखावहे ॥ असमग्रं तु दोषाय भवतीह पर
त्र च ॥ तस्मात्रदक्षिणाहीनं विधानविकलं न च ॥ देयं दानं महाराज समग्रफलकांक्षया ॥ दक्षिणा यज्ञानुक्तो विशेषः ॥ स्कांदे
देयद्रव्यततीयांशं दक्षिणां यां प्रकल्पयेत् ॥ अनुक्ते दक्षिणादाने दशांशं वापि शक्तितः ॥ लैंगेतथादिकमभिधायोक्तं ॥ अष्टष
ष्टिपलोन्मानात् द्यौह्व दक्षिणां गुरोः ॥ होतृणां चैव सर्वेषां त्रिंशत्पलमुदाहृतं ॥ अथैतेषां तदर्द्धं तु द्वारपानां तदर्द्धतः ॥ इति ॥
अयं दक्षिणाविभागोऽनुक्तो विभागविशेषेषु दानांतरेष्वप्यवगंतव्यः ॥ तत्रैव तुलापुरुषादिप्रकम्योक्तं ॥ दक्षिणां च गुरोस्तद्वार्द्ध
तदर्धं वा प्रदापयेत् ॥ कल्पितां चैव सर्वेषां दशनिष्कान्प्रदापयेत् ॥ भविष्योत्तरे ॥ ज्ञेयं निष्कशतं पार्थ दानेषु विधिरुत्तमः ॥ मध्य
मस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः ॥ मेष्यां च कालपुरुषे तथास्येषु महत्सु चेति ॥ अन्येषु तिलगोमादिषु ॥ एवं वक्षेरथेऽङ्ग वधे
नो हेमाज्ञीनेपि च ॥ अग्रान्येष्वपि ग्रामेषु पंचसैव शिकोविधिः ॥ अतोऽन्ये न पोदद्यान्महादानेन राधमः ॥ अक्तिगत्वा क्तिवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा॰प्रो॰वि॰ तस्य दुःखं नो कावहं भवेत्॥ अयं चास्य शास्त्र विषयो ज्ञेयः॥ ज्ञातनिष्कसमोपेतं तत्स्वर्णं मथापि वा॥ अतो ऽन्यूनं न दातव्यम
॥१२॥ धिकफलप्रज्ञितमिति गरुडपुराणोक्तेः॥ व्यासः॥ सुवर्णं रजतं ताम्रं तंडुलाधान्यमेव च॥ नित्यश्राद्धे देवपूजा सर्वमेतद्द
क्षिणा॥ नित्यं देयानि राजेंद्र गावः पृथ्वी सरस्वती॥ दातारं तारयंत्येते पापवाहर्दो हनैरिति॥ अत्र सुवर्णादिदानानि पानि सुव
र्णादिधातुर्जनितरूप्यादि सादिरूपेण विहितानि तान्येव ज्ञेयानि न तु सुवर्णनिर्मितवस्त्रमोडभद्रनिष्कादिदानानि तत्र दक्षिणा
विधानात्॥ मात्स्ये॥ पित्र्याणां रजतं पात्रमथवा रजतान्वितं॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं॥ अमंगलं च यत्नेषु दे
वकार्येषु वर्जितं॥ रजतं दक्षिणामाहुः पितृकार्येषु सर्वदेति दक्षिणानिरूपणं॥ अथ द्रव्यमानम्॥ तत्र सुवर्णपरिमा
णमाह मनुः॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥ त्रसरेणवो ष्ट विज्ञेया लि
क्षैका परिमाणतः॥ ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः॥ सर्षपाः षड्यवो मध्यस्त्रियवं त्वेककृष्णलं॥ पंचकृष्णलको मा राम॰
षस्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पलानि धरणं दश॥ एककृष्णलरूपेण गुंजा ते सुवर्णस्तु षोडशेति॥ ते यं च ॥१२॥
कृष्णलकाः षोडश माषकाः सुवर्णाः स्मृताः॥ असौ एव कर्ष इति संज्ञांतरं॥ तथा च विष्णुगुप्तः तेषोडश स्युः सुवर्णाः॥ एवं प्रमाण
सिद्धस्य क्षितिपानां सकर्ष इति॥ चतुःकर्षं पलमिति॥ ते पूर्वोक्ताश्च पंचकृष्णलकामाषाः॥ दश हस्त राजेरे॥ पंचगुंजो भवेन्मा

षः कर्षो षोडश अभिधीयते॥ तैश्चतुर्भिः करं प्रोक्तं दानमाने च पंचशः॥ पंचशः सुवर्णस्य॥ याज्ञवल्क्यः॥ कृष्णलैः पंच ते माष
स्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितमिति॥ अत्र पंचानां सुवर्णानां पलत्वं समरणविषयं॥ सु
वर्णचतुष्टयनिष्कसंज्ञापि॥ तथा च विष्णुः॥ पंच च यं कृष्णलं तत्संच माषस्तद्वादश माषकाः सच तु माषकं तत्सुवर्ण
स्तच्चतुः॥ सौवर्णिको निष्क इति॥ ब्रह्मप्रोक्ते॥ पलानां विंशतिविंशी पंचविंशत्तुलास्मृताः॥ उक्तो लिंकः मरुव सापादो विंश
तितौ तिलकैः॥ अथ रूप्य परिमाणं॥ विष्णुगुप्तः॥ रूप्यस्य सुवर्णाद्भिन्नमानमभिधीयते॥ अष्टाशीतिर्गौरसर्षपाः रूप्य
माषकः॥ ते षोडश धरणं निष्का च विंशतिर्वा रूप्यपलं चत्वारि धरणिकं॥ तत्पलानां तत्शतं तु विंशतिर्भार इति मनुश्च॥ द्वे कृष्ण
ले समधृते विज्ञेयो रूप्यमाषकः॥ ते षोडश स्याद्धरणं पुराणश्चैव राजतः॥ धरणानि दश ज्ञेयः॥ शतमानस्तु राजतः॥ च
तुः सौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः॥ धरणस्यैव संज्ञांतरं पुराण इति॥ चतुः सौवर्णिको निष्क इत्यत्र सुवर्णशब्दे
सुवर्णपरिमाणं प्राप्यार्थं॥ ततश्च सुवर्णचतुष्टयपरिमितं रजतं राजतो निष्क इत्युक्तं भवति॥ याज्ञवल्क्योपि॥ द्वे कृष्णले
रूप्यमाषो धरणं षोडशैव ते॥ शतमानं तु दशभिर्धरणैः पलमेव तु॥ निष्कं सुवर्णाश्चत्वार इति॥ अत्रापि सुवर्णपदं पूर्ववद्
व्याख्येयं॥ अथ ताम्रपरिमाणं॥ मनुः॥ कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥ कर्षिकः कर्षपरिमितस्ताम्रिकोय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा०वि० पणः स कार्षापणाइत्यर्थः॥ याज्ञवल्क्योपि॥ कार्षिकस्ताम्रिकः पणः इति। कर्षमितं ताम्रं ताम्रपणः इत्यर्थः॥ कर्षशब्देन सु
वर्णपरिमाणमुच्यते तेन षोडशमाषः। कर्षो स्त्रीपलं कर्षचतुष्टयमिति निघंटुवचनात्॥ ते सर्वस्मृताः पंचगुंजा माषाः षो
॥१३॥ डशमाषः स एव कर्षः इत्यर्थः॥ बृहस्पतिः॥ ताम्रकर्षकृता मुद्रा विज्ञेया ताम्रिकः पणः॥ स एव साविकाते यावाताश्च तत्स्य सं
धानकइति॥ नारदः॥ कार्षापणस्तु सर्वस्यां दिक्षिणोप्यप्रवर्तते॥ पणो निबद्धः सर्वस्यां षोडशैव पणाः सतु॥ एतत्स्मृतः स्मृत्यं
गुस्तंस्तते षोडशपणान्पुराणाः॥ पणो भवेत्काकिनीच तुष्केण पंचाहतैश्चतुर्भिर्वराटकैः॥ काकिनीत्येका॥ एकादिस
मुद्रंतानां संख्यानां स्वरूपमुक्तमादिस पुराणे॥ एकं दशं शतं चैव सहस्रं चैव सत्तम॥ यथोत्तरं दशगुणं सहस्राणि दशा
युतं॥ शताहतं सहस्रं तु प्रोच्यते नियुतं बुधैः॥ तथा शतसहस्राणि दशप्रयुतमुच्यते॥ शतं शतसहस्राणि कोटिरित्यभि
धीयते॥ अर्बुदं दशकोषस्ताद्दशकोटिशतं विदुः॥ सहस्रं कोटयश्चापि खर्वं माहुश्चतस्त्विदः॥ दशकोटि सहस्राणि नि
खर्वमिति संज्ञितं॥ शतकोटिसहस्राणि शंकुरित्यभिधीयते॥ सहस्रं कोटिसाहस्रं पद्ममात्रं तु तत्त्विदः॥ सहस्रं तु सह राम०
स्राणां कोटीनां दशधा पुनः॥ गणितं तु समुद्रं वै प्राहुः संख्याविदो जनाः॥ इति द्रव्यमान॥ ॥ अथ कात्यायनोक्तपरिभाष ॥१३॥
मत्स्याध्याये निरूप्यते॥ वराटकानां दशकद्वयं तु सा काकिणी ताश्च पणश्चतस्त्र इति॥ ते द्वित्रिंशत्सहितेः काणाचश्चतुः कार्ष

पणोवरः॥ तेषु षट्कार्षापणका अष्टावनुडहि स्मृताः॥ गोदशकार्षापणो धेनोरश्वे पंचदशैव तु॥ हिरण्ये कार्षापण
काः पण नवतथाधिकाः॥१॥ वस्त्रे कार्षापणाश्चाष्टौ षट्पणा च दशाविके॥ हयस्यमल्पमथ्यं चाशन्मूल्यं कार्षापणाः स्मृ
ताः॥३॥ निष्के पंचाशदेवस्यात्फलेजे पंचदशा तानि तु॥ पंचकार्षापणाः प्रोक्ता दोलायां षट्प्रथेत तथा॥४॥ गृहे षष्टिकार्षापण
काता म्रेकर्षपणाः स्मृताः॥ ताम्रकर्ष पिचपणाः इति स्वल्पप्रकल्पना॥५॥ अधिकं कल्पयेन्मूल्यं नो न्यूनं वित्तानुसारतः इति
मूल्यं दक्षिणाविषयक आवश्यकत्वेन मुख्यासंभवे ग्राह्यं॥ अधमोत्स्यपक्षः सतिवित्ते नाश्रयणीयः॥ वित्तसंभवेप्य
तो न्यूनं न कुर्यात॥ स्मृत्यावप्युक्तं॥ धेनुं पंच पुराणिका॥ तथा धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः॥ निष्काः पंचशत
ध्या धेनोः पंचपुराणिकाः॥ धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः॥ निष्कं निकार्द्धं पादं तत्स्वर्धं मथापि वा॥ तुरीयांशं शत
त्वः पंचकार्षापणानि च॥ त्रयः कार्षापणा यद्वा शक्तितो मूल्यकल्पना॥ निष्को दीनारः॥ दीनारस्तु भवेत्स्वर्णैः शतैः कार्षापुरा
स्तथा॥ दीनारो रूप्यकैरशाविंशत्या परिकीर्तिताः॥ सुवर्णसप्तति तमो भागो रौप्य कइष्यते॥ सुवर्णाश्च॥ कृष्णलः पंच
ते माषास्ते सुवर्णस्तु षोडश॥ पणः कार्षापणः॥ षोडशमाषाः कर्षः॥ सुवर्णस्य सुवर्णाः षोडशापणाः पुराणं भवत्का
किनीच तुष्केण॥ पंचाहतैश्चतुर्भिर्वराटकैः काकिनी चैका इति॥ पंचगुंजो भवेन्माषः सो सुवर्णस्तु षोडशमाषः॥ कर्षः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध०वि० षराटकानां द्रोणकद्वयं च या काकिनी ताश्च पणाश्च तस्मः ॥ ते षोडशाद्यस्य इत्त्वं गाम्भो द्रव्येस्तथा षोडशाभिश्च स निष्कः ॥ सु
॥१४॥ वर्णाय समाश्रित्य सुवर्णादिमथापि वा ॥ वाजः पंचकर्षाणा निवातुक्तं कार्षापणाः क्रमात् ॥ शराइति पर्यायः ॥ सुवर्णो वा
थ शतस्य निष्कं वा पृथक्कल्पयेत ॥ तथा तद्वद्धमथापि वा निष्कं पंचशतस्याधेनोः पंचपणाणी कार्दीनारस्तु भवेत्कर्षै
श्चतैः कार्षापणोस्तथा इति मत्स्याध्यायः कात्यायनोक्तः ॥ इति द्रव्यमानं ॥ ॥ अथ धान्यादिमानं ॥ भविष्यत्पुराणे ॥
पलं लोके टंकद्वयमितं चतुःषष्टिपलात्मकः ॥ शास्त्रे ॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं ॥ चतुर्भिः कुडवैः प्रस्थः
प्रस्थाश्चत्वार आढकः ॥ आढकैस्तैश्चतुर्भिस्तु द्रोणश्च कथितो बुधैः ॥ कुंभो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश ॥ द्रो
णद्वयस्य च संज्ञातां शूर्प इति ॥ वराहपुराणे ॥ पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतं ॥ अष्टमुष्टि भवेत्किंचित्किंचिद
ष्टौ च पुष्कलं ॥ पुष्कलानि च चत्वारि स्यादाढकः परिकीर्तितः ॥ चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणं ॥ विष्णुधर्मोत्त
रेपि ॥ पलं च कुडवं प्रस्थ आढको द्रोण एव च ॥ धान्यमानेषु बोद्धव्याः क्रमशोमी चतुर्गुणाः ॥ द्रोणैः षोडशभिः खारी
विंशत्या कुंभ उच्यते ॥ कुंभैस्तु दशभिर्वाहो धान्यसंख्याः प्रकीर्तिताः ॥ विंशत्यास्त्र द्रोणैर्भरः स तु षष्ट्यतेन कुंभो द्रोणद्व रा०
यमिति पूर्वोक्तपक्षाद्विगुणितद्रोणमितिः ॥ कुंभ इत्यपरः ॥ विंशतिमहस्वपरिमितः कुंभ इति केचित ॥ एते धान्यचपक्षाणां ॥१४॥

देशकालवशात्त्वाद्यपेक्षयाप्यवस्थाप्या ॥ स्कांदेपि ॥ पलद्वये प्रसृतं द्विगुणं कुडवं मतं ॥ चतुर्भिः कुडवैः प्रस्थ आढकैस्ते
श्चतुर्गुणैः ॥ चतुराढको भवेद्द्रोणः इत्येतद्धान्यमानकं ॥ द्रवद्रव्यमानमप्येवं ॥ ग्रंथांतरे ॥ लोहापात्रस्तनालिकेरसलि
ले सत्येव जलेकं तिकेवत्रिंशत्सलिकः पलैर्घतिमितः प्रस्थो गुडसंमतः तैलक्षौद्रघृतेषु विंशतिपलैरिष्यतां पंचाशद्भिः
प्रस्थः ॥ क्षीराणां तोयचैर्निगदितास्त्रिंशत्पलैरेव तु ॥ धनिरष्टादश ॥ गोपथब्राह्मणे ॥ पंचकृष्णलको माषस्तैश्चतुःष
ष्टिभिः पलं ॥ पलैर्द्वात्रिंशता प्रस्थो मागधः परिकीर्तितः ॥ आढकैस्तैश्चतुर्भिस्तु द्रोणस्याच्चतुराढक इति ॥ ॥ अथ प्र
मानं ॥ आदित्यपुराणे ॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः ॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ त्रसरेणस्तु वि
ज्ञेया अष्टौ ये परमाणवः ॥ त्रसरेणवस्तु ते चाष्टौ रथरेणुस्तु स स्मृतः ॥ रथरेणवस्तु ते चाष्टौ वालाग्रं तत्स्मृतं बुधैः ॥
वालाग्राणष्टलिक्षस्तु पुनः कालिक्षाष्टकं बुधैः ॥ अष्टौ लिक्षा यवं प्रोक्तं रंगुलं तु यवाष्टकं ॥ द्वादशांगुलमानो वै वितस्ति
स्तु प्रकीर्तितः ॥ अंगुष्ठस्य प्रदेशिन्या च ध्यस्सः प्रादेश उच्यते ॥ तालः स्मृतो मध्यमया गोकर्णश्चाप्यनामया ॥ कनिष्ठया वि
तस्तिस्तु द्वादशांगुलमानिकः ॥ रत्निः स्यात्पुलिपर्वाणि विज्ञेयस्त्वेकविंशतिः ॥ चत्वारि विंशतिश्चैव हस्तः स्यादंगुलानि तु
॥ किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदंगुलः ॥ षण्णवत्यंगुलश्चैव धनुर्दंडः प्रकीर्तितः ॥ धनुर्दंडयुगं नाली त्युच्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा.वि.
॥१५॥

यवांगुलैः॥ धनुर्धानां लिंगांतीनल्वमाहुः संख्याविदो जनाः॥ धनुःसहस्रे द्वे चापि गव्यूतिः परिकथ्यते॥ अष्टौ धनुःसहस्राणि
योजनं तु प्रकीर्तितं॥ विष्णुधर्मोत्तरे॥ यदुत्क्रमं तथा भ्राति नरः संवत्सरं द्विजः॥ एकं गोचर्ममात्रं तु ज्ञेयः प्रोक्तं विचक्षणैः
॥ बृहस्पतिः॥ दशहस्तेन दंडेन त्रिंशद्दंडैर्निवर्तनं॥ दशतान्येव गोचर्म दत्वा स्वर्गे महीयते॥ मात्स्ये॥ दंडेन सप्तहस्तेन
त्रिंशद्दंडैर्निवर्तनं॥ त्रिभागहीनं गोचर्ममानमाह प्रजापतिः॥ सिद्धांतशेखरे॥ परमाणुमारभ्याथ तं॥ जालांतरगते भानौ दृश्य
ह्स्वं तु यद्रजः॥ परमाणुः स उद्दिष्टो वालाग्रं तैरथाष्टभिः॥ वालाग्रैरष्टभिर्लिक्षा यूका लिक्षाष्टकेन च॥ यूकाष्टकं च यवं प्राहु
र्यवानामुदरे स्तथा॥ अष्टभिश्चांगुलं तिर्यग्यवानामुत्तमं मतं॥ सप्तभिर्मध्यमं प्रोक्तं षड्भिः स्यादधमांगुलं॥ व्रीहिभिर्वा
त्रिभिः सार्द्धैरधमांगुलमीरितं॥ मध्यक्षीमध्यमं प्रोक्तं षड्भिः स्यादधमांगुलं॥ व्रीहिभिर्वा त्रिभिः सार्द्धैरधमांगुलमीरितं॥
मध्यमं तु त्रिभिः सार्द्धैश्चतुर्भिस्तत्तथोत्तमं॥ मानांगुलमिति ख्यातं मात्रांगुलमथोच्यते॥ कर्तुः स्यान्मध्यमांगुल्या मध्यमं
पर्वदैर्घ्यतः॥ मात्रांगुलं च तच्छ्रेष्ठं यागादौ नमध्यमं मतं॥ पर्वार्द्धमधमं तेषां लक्ष्यांगुलमथोच्यते॥ गृहीत प्रतिमायां मत
तालांगुलसंख्यया चिमम्य तेषु भागो कं तदाहुर्लक्ष्यमंगुलं॥ प्रासादादिषु लिंगेषु मानांगुलमुदाहृतं॥ मानांगुलं तु कु राम.
ण्डादौ ग्रहोपकरणादिषु॥ लक्ष्यांगुलेन कुर्वीत प्रतिमावयवं बुधः॥ एवं मंगुलमाख्यातं धनुरंगुलकं मतं॥ अंगुलं तु ॥१५॥

कलाज्ञेया भागस्याच्चतुरंगुलः॥ पावकं चाष्टभिर्भागैः मुखं द्वादशभिर्मतं॥ तालं च तत्समं ज्ञेयं हस्तलक्षणमुच्यते
॥ चतुर्विंशतिमात्राघः किष्कुर्हस्त इति स्मृतः॥ पंचविंशतिमात्रोच्चः प्राजापत्यः करो मतः॥ मात्रमंगुलषड्विंशं
गुलो हस्तो धनुर्मुष्टिरिति स्मृतः॥ सप्तविंशतिमात्रोच्चो धनुर्ग्रहः इतीरितः॥ किष्कुहस्तेन कुर्वीत शयनासनमान
कं॥ गृहप्रासादलिंगानि प्राजापत्येन कारयेत्॥ ग्रामखेटपुरादीनि धनुर्मुष्टिकरेण च॥ धनुर्ग्रहेण कुर्वीत क्षेत्रमानं
च योजनं॥ अंगुलस्य च हस्तस्याप्येवमीरितमिति भूमिमाने॥ ॥ अथ मंडपाद्युपयुक्तं प्राचीसाधनमुच्यते॥ तत्र
नारदः॥ एवं लक्षणसंयुक्ते क्षेत्रे सम्यक् समीकृते॥ दिक्साधनाय तन्मध्ये समं मंडलमालिखेत्॥ पूर्वोक्तलक्षणं शं
कुं तन्मध्ये स्थापयेत्ततः॥ तच्छायाग्रस्पृशो घत्रस्वत्ते पूर्वापरास्यायोः॥ तत्र कार्यौ उभौ विंदू ज्ञेते पूर्वापरावधी॥ स
मंमंडलं शंकुमानपरिमिति व्यासार्द्धं पूर्वोक्तलक्षणं नु तुलादिलक्षणोपेतं॥ सूक्ष्माग्रः सरलः शंकुः पद्मर्मलध
तः स्थिरः॥ द्वादशांगुलमानः स्यान्निहितः प्रविशेद्भुवीति॥ सुल्वसूत्रे कात्यायनः॥ समे शंकुं निखाय शंकुसंमित या
रज्ज्वा मंडलं परिलिख्य यत्र लेखयोः शंक्वग्रछाया निपतति तत्र शंकू निहंति सा प्राची॥ अथ वास्तुबलिः॥ प्रपंचसारे
॥ शुभकर्मणि दीक्षायां मंडपकरणे गृहादिविधिषु॥ तथा विहितो वास्तुबलिः स्याद्रक्षाविघ्नोपशांति संपदः॥ वरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हसंहितायां मात्स्ये च॥ ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः॥ आहारो वैश्वदेवांते नंत वभविष्यति॥ वास्तुप
त्रमनीयतस्तवाहारो भविष्यति॥ यत्नोत्सवादौ च बलिस्तवाहारो भविष्यति॥ वास्तुसज्ञामकुर्वाणास्तवाहारो भविष्य
ति॥ एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा॥ वास्तुयज्ञः समुद्दिष्टस्ततः प्रभृति ज्ञायते॥ देवतायतनाद्यधिष्ठाने ध्रुवा स्तु
विज्ञेयास्तत्प्रमाणानि चोक्तानि ज्ञानरत्नावल्यां॥ चतुःषष्टिपदं वास्तु देवानां परमहितं॥ एकाशीतिपदं वास्तु गृहाणां
तु प्रकीर्तितं॥ निःसंशतपदं विद्धि सुस्थिराणं सुसिद्धिदं॥ पथि दुर्गपुरद्वारालननगरः ग्रामखेटके॥ ग्राम्यासनविमाने
षु तथा बलिगृहेषु च॥ सिद्धिस्थाने तथा हर्म्यप्राकारोपरि कल्पयेत॥ वापीकूपतडागादौ वनेषूपवनेषु च॥ उक्तानु
क्तेषु सर्वत्र कार्यं शतपदं शुभं॥ गृहे गृहप्रमाणां च वास्तुदेवं प्रकल्पयेत॥ ग्रामदेशादिसंस्थाने वापीकूपे चतुष्करं॥
उष्करं॥ उक्तानुक्तेषु सर्वत्र पंचहस्तं प्रकल्पयेत॥ प्रपंचसारे॥ कृत्वाऽवनिं समतलां चतुरस्रसंस्थामष्टाष्टकोष्टकप
दं च समकोणसूत्रां तस्यां चतुष्पदसमुचितमध्यकोष्ठे ब्रह्मा तु साधकवरेण समर्चनीयाः॥ अष्टाष्टकोष्टके सादिना चतुः
षष्टिकोष्टकयुतं चतुरस्रं मंडलं कृत्वा तत्र कोणसूत्रद्वयं दत्वा मध्यमकोष्ठचतुष्टये ब्रह्मा॥ र्चनीय इत्यर्थः॥ आपाप्यवत्सौ रम॰ ॥१६॥
रोगदिक्कोष्ठयेथा समभियजेत॥ अर्यमणं सविवस्वंतं सेंद्रमित्रं महीधरं क्रमेणाः॥ कोणाद्यर्धकोष्ठद्वयोः सावित्रस

वितृकाख्याः सेंद्रजयं तं रुद्रं नक्षया सत्वेशाद्येधाकृते भुकोणासूत्रे कपार्श्वे स्यार्द्धकोष्ठद्वये रकमितरपार्श्वे स्थार्द्धको
ष्ठद्वये द्वितीयमित्यादिक्रमेण सावित्रीशीनष्ठावाग्नेयादीशानांतकोष्टार्द्धद्वयाष्टके प्रदक्षिणाक्रमेण पूजयेदित्यर्थः॥
नक्तयो रुद्रजयः अग्नेः पार्श्वात्थ्यपदद्वंद्वे शर्वग्रहार्यमणो च॥ जंभकपिलिपिच्छाख्यो चरविविदार्यौ च पूतना प्रोक्ताः॥
ततः सा चित्राद्यधिष्ठितकोणार्द्धद्वयपार्श्वस्थितान्येपादिक्कोष्ठद्वयचतुष्के प्रदक्षिणाक्रमेण शर्वादीनष्टौ पूजयेदित्यर्थः
अर्द्धपराद्धं तासु च वतसृषु दिक्षु क्रमेण बहिरर्च्याः वासवयमवरुणशशिनामष्टावष्टौ च मंत्रिणा विधिना॥ ततो वास्तुप
दविधिस्थेशानकोणकोष्टार्द्धमारभ्य पुनरीशानकोष्टापरार्द्धपर्यंतं प्रतिदिशामष्टाविसेव मीशानपर्जन्यादीन्द्वात्रिंश
द्देवतान्पूजयेदित्यर्थः॥ तानेवाह॥ ईशानाख्यः सपर्जन्यो जयंतः शक्रभास्करौ॥ सत्यो भृशोंतरिक्षो देवताः प्राच्युदीरिताः
॥ अग्निः पूषा च वितथो यमश्च गृहरक्षकः॥ गंधर्वोऽत्र गणो भृशो मृगो दक्षिणदिग्गताः॥ वायुर्नागश्च मुख्यश्च सोमो
भल्लाट एव च॥ अर्गलाख्योऽदितिस्तद्वद्दितिः सौम्यदिग्गताः॥ इतीरितानामपि देवतानां चित्रादिनिःकृत्वा सापयानि
॥ पयोऽन्धसा साधु बलिः प्रदेयो द्रव्यैश्च वांते त्वविशेषसिद्धैः॥ तत्र विशेषः कपिलपंचरात्रस्तद्विहितैरित्यर्थः॥ एतच्च सर्वं
वास्तुपूजाहोमबलिदानादिकं प्रयोगश्च गृहदानप्रकरणे वक्ष्यते॥ इति वास्तुनिरूपणं॥ ॥ अथ मंडपादिनिरूपणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं॰प्र॰टी॰ पंचारत्नेकनीयान्दशहस्तः स्यान्मध्यमो द्वादशोन्मितः तथा षोडशभिर्हस्तैर्मंडपस्याद्विहोत्तमः॥ विश्वकर्मवास्तुशास्त्रे
॥१८॥ ॥दशद्वादशहस्तौ वा कलाहस्तोथवा पुनरिति॥ कलाहस्तः षोडशहस्तः प्रतिष्ठादीपके मंडपप्रक्रमः॥ हस्तान्षोड
शकुर्वीत द्वादशान्दश वा यो मध्ये वेदिकापार्श्वे चतुरस्रं समंततः॥ प्रतिष्ठासारसंग्रहे तु॥ षोडशहस्तं मंडपमुत्कृष्टमभि
हितं॥ दशद्वादशहस्तौ वा हि हि द्वितीयास्ततः क्रमादिति॥ अत्र दशहस्तो द्वादशहस्तो वेति कनीयांसो मंडपावुक्तौ॥ ततः
परं द्विद्विवृध्येति दशहस्तकनीयोमंडपापेक्षया द्विवृध्या द्वादशहस्तो मध्यमः॥ द्वादशहस्तापेक्षया द्विवृध्या चतुर्दश
हस्तो मध्यमः॥ तथा च द्वादशहस्तश्चतुर्दशहस्तश्च मध्यमौ॥ षोडशहस्तस्तु साक्षादुक्त एवं द्विद्विवृध्येति वीप्सास्व
रसोक्तेतोपि द्विहस्तवृध्याष्टादशैकरोलभ्यते॥ तथा च षोडशहस्तोष्टादशहस्तश्चोत्तमाविसर्थः॥ अत्र द्वादशहस्तस्या
धमत्वं चतुर्दशहस्तापेक्षया द्वादशहस्तापेक्षया तु मत्वमित्युभयत्रूपत्वं तेदेवं संग्रहकारमते पंचमंडपा उक्ताः॥ लिंगपुराणे
तुतुलापुरुषमधिकृत्य विंशतिहस्तमंडप उक्तः॥ विंशद्धस्तप्रमाणेन मंडपं कूटमेव वा॥ अथाष्टादशहस्तेन कलाहस्तेन राम॰
वा पुनरिति॥ नवदशहस्तमंडपं यत्रो नवेदो व्याख्याः॥ उभयत्रैवैकहस्तमात्रमवशिष्यते॥ तत्रैकलिंगादीनामुपवे ॥१५॥
शनादेः सौकर्याभावः॥ मेखलापंचककरणापक्षे तु मुत्तमसौकर्यमिति नायं पक्षः साधीयानिति विवाच्यं॥ एकमेखलकुं

पक्षेएकापि विधानपक्षे च दशहस्तमंडपस्योपयोगात॥ अत्र समचतुरस्रसाधनमाह विश्वकर्मा॥ कृत्वा प्राक्सू
त्रमेकं कदक्षिणोत्तरमंतयोः मत्स्यसूत्रं ततः कोणार्कं कितैश्चतुरस्रकमिति॥ अस्यार्थः॥ इष्टप्रमाणां प्राचीसूत्र
मास्फाल्य तन्मध्ये मंकल्पयित्वा प्राचीसूत्रं संपादितैरेखापूर्वांतेसूत्रस्यादिं निधायरेखामध्यकालिंचिह्नविंसूत्र
कृत्वा तत्प्रमाणेन प्राचीसूत्रस्यैव पश्चिमार्द्धे हस्तार्द्धः कुर्यात॥ एवं प्राचीसूत्रस्यापरांते सूत्रस्यादिं निधाय पूर्वप्र
माणेन वस्तुत्रेणा प्राचीसूत्रस्य प्राग्भागे पूर्ववत्कृतद्वैता सौभिमुखं परस्परमभेदेन निःसृतमाग्रद्वयं हस्तार्द्धं कुर्यादे
वं परस्परसंभिन्नरेखाद्वयरूपौ दक्षिणोत्तरमत्स्यौ संपाद्यतो मध्यमांकेन च स्पृष्टदक्षिणोत्तरायतं प्राचीसूत्रप्रमा
णंसूत्रंमसेत॥ ततस्तत्सूत्रार्द्धप्रमाणेन दक्षिणसूत्रांतात्सूर्वसूत्रांताग्निकोणमत्स्यं कुर्यात॥ एवं नैर्ऋत्यादिको
णत्रये मत्स्यान संपाद्य प्राग्दादिदिक्षु कोणमत्स्यद्वयद्वयस्पृष्टाग्रसूत्रचतुष्टययोगाच्चतुरस्रसिद्धिरिति॥ ईदृशचतु
रस्रसाधनाद्यक्तौ॥ पार्तिकप्रसिद्धरज्जुमानेन वा चतुरस्रं कुर्यात॥ यथाहं डल्वककारिकाकारः॥ यावत्प्रमाणा रज्जुः
स्यात्तावान्वेणार्मो भवेत॥ आयामार्द्धमेवंच्य कुः शंकार्द्धेनिनिरंछनं॥ अस्यार्थः॥ मंडपादिव्यासप्रमाणा रज्जुस्तस्मै
नामसंहृतेके न द्वितीयेन भागेन वर्द्धयेत॥ तेन द्विगुणप्रमाणा रज्जुः संपद्यते॥ तामेवोन्नयतः पाशाभ्यां सह तावतीमेवक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ श॰प्रो॰नि॰ त्वातामष्टधाविभज्यपंचमांशांतेकर्षणांयंषष्ठांशांतेचशंकुंस्थेचचिन्हद्वयंकृत्वामंडपादेःप्राचीसूत्रंप्रांतद्वयेशंकुद्व
॥१८॥ यंनिखायरज्जुवंतपाशौतयोरासज्यकर्षणाच्चिन्हमहत्स्यत्रांकुद्वयंनिहन्यात॥ततईशानाग्नेयादिद्वंकुष्ठप्रादक्षिण्ये
नरज्जुवेष्टनान्मंडपादिषुचतुरस्रंप्रसाधयेदितिमलागमे॥ततोमंडपस्तत्तुत्रिगुणंपरिकल्पयेत॥पूर्वादिषुत्रि
भागस्यमध्यगर्भेतुवेदिका।वेदिकोणेषुविन्यसेत स्तंभान्वेदस्वरूपकान्॥आग्नेयादिक्रमेणैवलोकेशांदिग्वि
दिक्षुच॥इष्टकाभिर्मृदावापिवेदीदर्पणसंन्निभा॥राजहस्तोच्छ्रयाकार्याविदुषासिद्धिमिच्छता॥मंडपस्तत्रमिति॥
प्राग्पश्चायतंदक्षिणोत्तरायतंत्रिगुणंत्रिभागमित्यर्थः॥तेननवनवभागोमंडपःसंपद्यते॥मध्यभागइतिमध्यमेनव
मेंशोतन्मानावेदिःकार्येत्यर्थः॥राजेति॥राजाश्रयजमानःतद्धस्तोच्छ्रयेत्यर्थः॥पंचरात्रे॥कुर्याद्वैस्तंभपादेषुचतुर्दि
तंभ्रमंडपान्॥सारदारुमयांस्तंभान्त्रशंकुर्याद्दृढसमान्॥मंडपार्धोच्छ्रितान्वेदस्तंभांश्चउच्चितांस्तथा॥वलिको
ऊर्ध्वलतस्तंभास्तंभद्वारशाकंपुनः॥बाह्यपीठप्रमाणेनतत्रसूत्रविभागतः॥कल्पयेद्विकरंद्वारंचतुरंगुलवृद्धितः॥ राम
मध्यमोत्तमयोर्वेदीमंडपस्यत्रिभागतः॥चतुर्थांशोच्छ्रितास्त्वाद्विसप्तपंचतोपिवा॥नवैकादशहारवाङ्षट्काभिः ॥१८॥
प्रकल्पयेत॥वेदस्यस्थानतःसंस्थाप्यचऊर्ध्वत्रिनशिरोभाजुलान्॥वलिकाऊर्ध्वतःइतितेषांचतुर्णांस्तंभानांशिरस्त्वा

भिःप्रोतरंध्राणिऊर्ध्वयोरंध्रद्वययुक्तानिवलिकासंतानितिर्यक्काष्ठानिस्थाप्यानीत्यर्थः॥बाह्येवेदिकास्तंभवाह्येबाह्यप
रिधावितियावत॥पीठप्रमाणेनपीठस्यचतुरस्त्रीकृतस्यमंडपक्षेत्रस्यप्रमाणेनतत्रसूत्रविभागतःमंडपक्षेत्रविस्तारप
रिमितसूत्रतृतीयांशेनबहिःपरिधौद्वारद्वाचिन्हानितुल्यांतराणिकृत्वातत्रद्वारद्वास्तंभाःस्थाप्यंचमांशेननिखेयाइति
पिंडितोर्थः॥उक्तंहि॥मंडपप्रमितारज्जुःसर्वकार्याचतुर्गुणापश्चात्कार्यात्रिभागासारज्ज्वाग्रेषुर्वक्रांकवइति॥तदेवंषो
डशस्तंभोमंडपःसंपद्यते॥अत्रवाह्यस्तंभद्वादशकेचऊर्ध्वःवलिकाश्चननियताः॥अनभिधानात॥वाम्येद्विकरमित्या
दिमध्यमोत्तमयोरितिचतुरंगुलवृद्धितइत्यनेनसंबध्यते॥ततश्चकनीयसमंडपेद्विकरप्रमितएकैकंहस्तंप्रकीर्त्या
द्विहस्ताविस्तृतानिद्वाराणिकार्याणि॥मध्यमेचतुरंगुलाधिकद्विकराणिकार्याणि॥अतश्चद्वादशहस्तमंडपस्योत्तम
यत्वपक्षेद्वाराणिचतुरंगुलाधिकद्विहस्तानिद्विहस्तमात्राणिवाकार्याणि॥उत्तमेत्वष्टांगुलाधिकद्विकराणि
कार्याणीत्यर्थः॥त्रिभागतइतिपूर्वोक्तन्यायेनमध्यमत्रिभागस्यनवमांशात्मकत्वान्नावश्यमानावेदिरितिफलतःपर्य
वस्यतित्रिसप्तपंचतइत्यादिस्वविस्तारस्यततीयेनपंचमेननवमेनेकादशेनवाभागेनतत्स्याःवेद्याउच्छ्रितिरित्यर्थः॥
हियतइतिहारोभागः॥त्रिपाविशेषणं॥बाह्यस्तंभपरिमाणमुक्तंशारदातिलके॥षोडशस्तंभसंयुक्तंचतोरस्तेषुमध्यमाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्र॰प्रो॰टी॰ ॥ अष्टहस्तसमुच्छ्रायाः संस्थाप्या द्वारशाखिनः ॥ पंचहस्तप्रमाणास्ते निखिद्धास्तवः शुभा इति षोडशस्तंभसंयुक्तमिति
॥१९॥ मंडपस्य विशेषणं ॥ सर्वेषां स्तंभानां स्वपंचमांशेन भूमौ निखननं ॥ पंचमांशस्य सेकौ सर्वसाधारणो विधिरिति वास्तु
शास्त्रात् ॥ तत्रैव ॥ कैश्चित् सद्भिस्तु संख्यादि विज्ञयाधास्तु मंडपा इति ॥ तोरणानुक्तानि मात्स्ये ॥ द्वारेषु का कार्याणि चतोर
णानि चत्वार्यपि क्षीरवनस्पतीनामिति ॥ विशेष उक्तो वास्तुशास्त्रे ॥ अश्वत्थोदुंबर प्लक्ष वटशाखाकृतानि तु ॥ मंडप
स्य प्रति दिक्षु द्वाराण्येतानि कारयेत् ॥ पंचहस्तप्रमाणास्ते विस्तारेणाद्धिहस्तका ॥ षडंगुलाभिरुद्धीस्तस्तमहस्ता यथो
त्तमा ॥ मस्तके द्वारशाखानां शेनत्रु खचक्र गदांबुजं ॥ प्रागादिक्रमयोगेन मसेत्तेषां स्वहारतं ॥ पंचमांशन्मसेदूमौ सर्वसाधार
णो विधिरिति ॥ द्वारशीति तितोरणानि वा द्वाराकारत्वाद्वारशाद्वेनोच्यते ॥ ननु मंडपस्य द्वाराणि तेषां मध्यमोत्तमं मंडपं मंड
पयोस्तोरणापेक्षया ल्पपरिमाणस्योक्तत्वात मात्स्ये तोरणत्वेन पृथगुपदेशाच्चेरणानां च कनीयसि मंडपे पंचहस्त
त्वाभिधानादुत्तमे च सप्तहस्तत्वाभिधानान्मध्यमे षट्हस्ता भवंतीत्यर्थसिद्धं ॥ अत एव कनीयसादि मंडपे पंचहस्तता
भिधानाय प्रकरणानि प्रक्रम्य त्रिकांडयां ॥ पंचषट्सप्तहस्तानीस्तुत्तं ॥ षडंगुलाभिरुद्धास्त्विति कनीयसि मंडपे द्विहस्तं श्राम॰
तरालामध्यमे षडंगुलाधिकद्विहस्तांतरालात्तमे द्वादशांगुलाधिकद्विहस्तांतराला तोरणाः स्थानिखेयाई त्यर्थः ॥ म ॥१९॥

स्तक इति तिर्यक्फलकस्य मस्तके द्वारशाखांसेन तिर्यक्फलकद्वारशाखांशेन प्रथमादि मंडपेषु यथाक्रमं चतुरंगुलपंचांगु
लपरिमितानि शंखचक्रगदांबुजानि कृत्वा निवेश्यानीत्यर्थः ॥ एतेषामेव विशेषणं स्वहस्तजमिति यद्यद्यमंयपतोर
णांतमुक्तातीयहस्तमयमेत्रं स्वादिकं तत्र कार्यमित्यर्थः ॥ शेवया गेनं शंखचक्रादिस्थाने परिमाणांतरमुक्तं त्रिशूलमेव
कार्यमित्युक्तं पिंगलागमे ॥ शूलेन चिह्निताः कार्या द्वारशाखास्तु मस्तके ॥ शूलेन वांगुलं दैर्घ्यं तु रीयांशेन विस्तृतिः ॥
सेतु वैमध्य शृंगस्यालिंचिह्नं च पक्षयोः ॥ प्रथमं तत्समाख्यातं द्व्यंगुलं रोपयेत्ततः ॥ शेषाणां द्व्यंगुलाहि रिर्विशूल्यांगु
लहृद्धितः ॥ तुरीयांशेन ॥ शूलदैर्घ्यचतुर्थांशेन पार्श्वगुलादिना ॥ पक्षयोः पार्श्वकीलयोः प्रथमं कनीयो मंडपस्य त्रिशू
लं द्व्यंगुलं रोपयेदिति त्रिशूलस्य मूलभागीयांगुलद्वयं पट्टिकाबिले निवेशयेदित्यर्थः ॥ शेषयोर्मध्यमोत्तमयोस्तोरणत्रिशूल
स्य द्व्यंगुलाहृद्धिः मध्यमस्य तोरणांगुलदीर्घं उत्तमे त्र्यंगुलदीर्घं त्रिशूलमित्यर्थः ॥ वेत्रशूल्यांगुलहृद्धित इति मध्यम
लभागीयांगुलत्रयं पट्टिकायां निवेश्यं ॥ उत्तमे चांगुलचतुष्टयमित्यर्थः ॥ तेमतावि षये विशेषांतरमुक्तं सिद्धांतशेखरे ॥
लक्षणं तोरणानां च वक्ष्ये संक्षेपतः क्रमात् ॥ न्यग्रोधतोरणं पूर्वयाम्ये तौडुंबरं मतं ॥ पश्चिमे श्वत्थसंभूतं तु उत्तरे प्लक्षतो
रणं ॥ एवं वा प्लक्षसंभूतं स्योद्वा चोत्तरे मतः ॥ एकमेषाम लाभे स्यात्तेद्भावेशमीदुमः ॥ अंव खदिरशाखाश्च शालो वा ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्व०प्रो०वि रणोस्य प्रतादिति॥ तोरणस्थापने मंत्रा उक्ताः मत्स्यागमे॥ मंडपेषाग्निमीळे इति विन्यसेत्पूर्वतोरणं॥ इषे त्वोर्जे इति मंत्रेण द
॥२०॥ क्षिणे च निवेशयेत॥ अग्न आयाहि मंत्रेण पश्चिमे विनिवेशयेत॥ शन्नो देवी इति मंत्रेण सौम्ये संस्थापयेत्तोरणमिति॥ मंडपे
पताकायुक्ताः॥ मात्स्ये॥ लोकेशवर्णाः पताका मध्ये ध्वजः किंकिणीकायुतः स्यादिति सूत्रसंग्रहेपि॥ सप्तहस्ताः पता
काः सुः सप्तमांशेन विस्तृताः॥ लोकपालानुवर्णेन नवमा तु हिमप्रभा॥ पीतरक्तादिवर्णाश्च पंचहस्ताध्वजाः स्मृ
ताः॥ द्विपंचहस्तैर्दंडैश्च वंशजैः संयुतास्तथेति॥ द्विपंचहस्तैर्दशहस्तैः॥ लोकपालवर्णा उक्ताः॥ स्मृतौ॥ इंद्रः पी
तोपमः श्यामो वह्निः स्फटिकप्रभः॥ कुबेरश्च सुवर्णाभोत्यग्निश्चापि सुवर्णाभः॥ तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्र
शस्यते॥ ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमाद्दिमानिति॥ क्वचित्त्वग्निः रक्तवर्णास्तु तेन गारुडे तु पताकानां वर्णांतरमुक्तं॥
पंचहस्ताध्वजाः कार्या वैपुल्येन द्विहस्तकाः॥ सप्तहस्ताः पताकाः स्युर्विंशांगुलविस्तृताः॥ हस्ताः पताकानां दंडाः पं
चाशद्वैविष्णुताः॥ सिंदूराः कर्बुरा धूम्रा धूसरा मेघसन्निभाः॥ हरिताः पांडुवर्णाश्च शुक्लाः पूर्वादितः क्रमात्॥ एवं वर्णाः प्र
भाः कार्याः पताकाः पाकशासनेति॥ मंडपे कुंभस्थापनमुक्तं मात्स्ये॥ द्वारेषु कुंभद्वयमत्र कार्यं स्रग्गंधधूपांबरसंयु
तं॥ मत्स्यागमे॥ गंधपुष्पाक्षतोपेतान्कुंभांस्तत्र निवेशयेत॥ ध्रुवंधरं वाक्पतिं विघ्नेशं तेषु पूजयेत॥ मंडपस्तु कोणेषु क ॥२०॥

लशेषु कुंभाः स्मृती॥ अमृतो दुर्जयश्चैव सिद्धार्थो मंगलस्तथा॥ एवमाधारस्थकुंभेषु ब्रह्माद्या घातस्तन्मन्त्रैरिति तितन्मन्त्रैस्तैर्मे
स्त्रेषां भवेः॥ ॥अथ कुंडानि॥ भविष्योत्तरे॥ वेदीपार्श्वतस्तस्य कुंडानि नव पंच वा॥ वेदाश्राणि पवर्तानि सुवृत्तलाभ्यथ
वार्द्धचित॥ वेदाश्राणि चतुरस्राणि॥ आग्नापरहस्ये॥ कुंडानि चतुरस्राणि हस्तमात्राणि तानि वा॥ नव पंचाथ चैकं वा क
र्तव्यं लक्षणान्वितं॥ नवकुंडविधाने तु दिक्षु कुंडाष्टके स्थिते॥ नवमं कारयेत्कुंडं पूर्वेशानदिगंतरे॥ विधाने पंचकुंडानामी
शाने पंचमं भवेत॥ शांतिरत्नावल्यां॥ दिक्षु वेदास्रहस्तानि पंचमं लीशगोचरे॥ मात्स्ये॥ कुर्यात्कुंडानि चत्वारि प्राच्यादिषु विच
क्षणाः॥ नारदीये॥ यत्रोपदिश्यते कुंडं चतुष्कं तत्र कर्मणि॥ वेदास्रमर्धचंद्रं च वृत्तं पद्मनिभं तथा॥ कुर्यात्कुंडानि चत्वारि प्रा
च्यादिषु विचक्षणाः॥ कुंडवेद्यंतरं चक्रकर्मणि॥ वेदास्रमर्धचंद्रं च वृत्तं पद्मनिभं तथा॥ कुर्यात्कुंडानि चत्वारि प्राच्यादिषु वि
चक्षणाः॥ कुंडवेद्यंतरं चैव सपादैकरसंमितमिति॥ प्रतिष्ठादीपके॥ वेदिभित्तिं परित्यज्य योन्यग्राभिरंगुलैः॥ हस्तमा
त्राणि कुंडानि चतुरस्राणि सर्वतः॥ समेखलानि कुर्वीत योनिवक्रयुतान्यपीति॥ अत्र केचन योन्यग्रांगुलांतरत्वं सपा
दहस्तव्यवधानस्य च मंडपाल्पमहत्त्वापेक्षोयं व्यवस्थितो विकल्पः॥ सर्वतंत्रे शस्तु दिक्षु तन्नौ दिग्भेदेन कुंडा
कृतिभेदः॥ फलविशेषभेद उक्तः कामिके॥ ऐंद्र्यां तु भे चतुष्कोणं सम्यग्भोगे भगाकृतिं॥ चंद्रार्द्धं दक्षिणे याम्ये नैर्ऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रो॰प्रो॰वि॰ तेयेत्रिकोणार्कं॥वारुण्यांपद्मांतिके इंन्नेषडस्त्रमुच्चाटनेनिले॥उदीच्यांपौष्टिकेपद्मंरौद्र्यामष्टास्त्रिकोणकं॥दिग्भेदेनकुंडा
॥२१॥ नीतिभेदयुक्तः॥सिद्धांतशेखरे॥चतुरस्त्रंतुयोन्याभमर्द्धचंद्रंत्रिकोणकं॥वृत्तंषडस्त्रकुंडंचपद्माभंचाष्टकोणकं॥
ऐंद्र्यादीशानपर्यंतमिति॥नवमंकुंडमाचार्यस्येतिविशेषउक्तस्तत्रैव॥पूर्वरेखायोर्मध्येवृत्तंवाचतुरस्त्रकं॥तदाचार्य
विनिर्दिष्टंनवकुंडक्रमोस्त्वयमिति॥वर्णभेदेनापिकुंडभेदउक्तः॥शारदातिलके॥विप्राणांचतुरस्त्रंस्याद्राज्ञावर्तुलमि
ष्यते॥वैश्यानामर्द्धचंद्राभंशूद्राणांत्र्यस्त्रमीरितं॥चतुरस्त्रंतुसर्वेषांकेचिदिच्छंतितांत्रिकाइति॥सर्वेषुचैतेषुकुंडेषुहोम
संख्यानुसारेणहस्तादिमानंक्षेत्रफलंकल्पनीयं॥तथाहिभविष्यपुराणे॥मुष्टिमानंशतार्द्धेतुशतेचारत्निमानकं॥सह
स्रेत्वथहोतव्येकुर्यात्कुंडंकरात्मकं॥द्विहस्तमयुतेतत्स्याल्लक्षहोमेचतुष्करं॥अष्टहस्तात्मकंकुंडंकोटिहोमेषुनाधिकं
॥मुष्टिमानमितिबद्धमुष्टिहस्तमात्रमित्यर्थः॥सिद्धांतशेखरे॥शतार्द्धंमुष्टिमात्रंस्याच्छतेचारत्निमात्रकं॥हस्तमात्रंस
हस्रेस्याद्द्विहस्तंचायुतेमतं॥लक्षार्द्धेत्रिकरंकुंडंलक्षेतामेचतुष्करं॥कुंडंपंचकरंप्रोक्तंदशलक्षावधिक्रमात्॥षड्हस्तंल राम॰
क्षविंशत्यांकोट्यर्द्धेसप्तहस्तकं॥कोटिहोमेष्टहस्तंकुंडंनोक्तंतदूर्ध्वतः॥यत्तुशारदातिलके॥एकहस्तमितंकुंडमेकलक्षे ॥२१॥
विधीयते॥लक्षाणांदशकंयावत्तावद्धस्तेनवर्द्धयेत्॥दशहस्तमितंकुंडंकोटिहोमेपिशस्यतइति॥यत्तुस्कांदे॥कोटि

होमेचतुर्हस्तंचतुरस्त्रंसमंततः॥योनिवक्त्रद्वयोपेतंतदप्याहुस्त्रिमेखलमितिच॥मिथोविरुद्धंतल्लक्षादिहोमेषुकहस्ता
दिकुंडविधानेकोटिहोमेचदशहस्तादिमहाकुंडविधानेचयथायथंप्रशस्तादिशीघ्रदाहित्वद्रव्यविषयंचिरदाहित्वद्रव्या
दिस्थूलद्रव्यविषयंचद्रष्टव्यं॥एतेषांचतुरस्त्रादिकुंडानांमध्येचतुरस्त्रकुंडेसमचतुरस्त्रक्षेत्रनिर्माणप्रकारोमंडपनिर्मा
णप्रकरणोक्तोद्रष्टव्यः॥योनिकुंडनिर्माणमुक्तंकामिके॥पंचमांशाग्रतोप्यस्यमध्येवेदांशमानतः॥अग्रमारभ्यवत्स्यपत्राभंकुंड
माग्नेयमुच्यतइति॥वेदांशाश्चतुर्थांशाः॥योन्यादिकुंडप्रकृतिभूतस्येष्टप्रमाणस्यसमचतुरस्त्रस्यमध्यमांप्राचीरेखांस्वपं
चमांशेनपुरस्ताद्वर्द्धयेत॥वेदांशमानतःकोणसूत्रस्येतिशेषः॥तेनचतुरस्त्रक्षेत्रकोणसूत्रेणैवकर्णसूत्रेणास्यचतुर्थांशा
दिदेशेलांछयित्वातल्लांछनेकोणसूत्रेचतुर्थांशपरिमितस्यसूत्रस्यदक्षिणरेखामध्यात्पश्चिमरेखामध्यंप्रापय्यविधायत
स्यसूत्रकोणंतेरेणाग्रमणाद्बहिर्भेणार्द्धरचयेत॥एवमेवपश्चिमरेखामध्यादुत्तररेखामध्यंयावच्छत्रार्द्धंरचयेत॥ततोसि
शारेखामध्यादुत्तररेखामध्याच्चसूत्रद्वयंवर्द्धनीयाद्यावत्स्पष्टंवर्धितपंचमांशाप्राचीरेखाग्रंयावत्रिपातयेत्तेनरेखाद्वयकर
णादश्वत्थपत्राभमाग्नेयांदिशियोनिकुंडंकुर्यादित्यर्थः॥इदमेवस्पष्टीकृतंशारदातिलके॥चतुरस्त्रीकृतेक्षेत्रेपंचधाविभजे
त्सुधीः॥न्यसेत्पुरस्तादेकांशंकोणार्द्धार्द्धप्रमाणतः॥अग्रमध्येलकोणमानेनतथापदपिमंत्रवित्॥सूत्रद्वयंभ्रमतोदद्यात्कुंडंयोनिभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठ०प्र०वि संभवेदिति॥इदमुदग्ग्रं कर्तव्यं॥योन्याख्यमुच्यते कुंडमाग्नेय्यामुत्तरामुखमिति॥सिद्धांतशेखरोक्तेः॥उदगग्रत्वं च उदी
॥२२॥ च्यामध्यरेखायाः पंचमांशाद्बहिर्धा संपादनीयं॥अर्धचंद्रकुंडनिर्माणमुक्तं कामिके॥चतुरस्रे त्र्यंशे हैर्धक्षेत्रे सम्यक्त्वाघं तोत्तरं त्र्यंशौ॥
मध्ये प्रान्तांशमानेन कुंडं खंडंडवच्च भ्रमादिति॥इष्टप्रमाणसमचतुरस्रक्षेत्रस्य मध्यमां प्राचीरेखां नवधा विभज्य प्रथमांति
मो भागौ परित्यज्य भागसप्तकपरिमितरेखा प्रागग्र दक्षिणोत्तरपर्यंतं तिर्यग्रूपा सूत्रपातः तत्र भागसप्तकपरिमित सूत्रस्या
द्यमध्ये रेखप्रागग्रे निधाय दक्षिणाय स्थितमारेखां सम्यक्कोणेनैव सूत्रेणामध्यरेखा पश्चिमांते स्पृशता उत्तरावस्थि त
आरेखा यावत् भ्रमता धनुराकारमर्धचंद्रं कुंडं कुर्यादित्यर्थः॥इदमपि दक्षिणासांदिग्विधीयमान कुंडं उत्तराग्रं कर्तव्य
॥उदगग्रत्वं चोदीच्यापानवधा विभागेन संपादनीयं॥तदुक्तं सिद्धांतशेखरे॥याम्यतस्मारतोग्रत्वमुत्तराभिमुखं सरा॥न
वधा भाजिते क्षेत्रे चतुर्त्वे समेतसा॥दक्षिणोत्तरेऽर्धांशमेकेकं चपरित्यजेत्॥सभागं सम सूत्रेणाभ्रमणार्धचंद्रकमिति॥
शारदातिलके तु दशधा विभक्तस्य मध्यमसूत्रस्य भागद्वयं पश्चिमस्य पूर्वस्य भागाष्टकमिति सूत्रं भ्रमणार्धचंद्रं कुर्यादि
त्युक्तं॥चतुरस्रे कृतक्षेत्रे दशधा विभजेत्ततः॥एकमेकं पक्षेभ्यः मध्ये उर्ध्वं च मंत्रवित्॥मध्यसूत्रं पातयेद्द्यतस्मान्नाभ्रामयेत्ततः राम०
॥अर्धचंद्रनिभं कुंडं रमणीयमिदं भवेदिति॥त्रिकोणकुंडनिर्माणमुक्तं कामिके॥त्रिभागैकं क्षिप्तं पश्चिमे प्राचं ॥२२॥

भवेदिति॥इष्टप्रमाणचतुरस्रक्षेत्रस्य प्राचीरेखां त्रिधा विभज्य तृतीयांशेनांतरेखा पुरस्ताद्वर्धयेत्॥क्षेत्रस्य तिर्यक्त्वेन पश्चि
मरेखां च तृतीयभागेन दक्षिणोत्तरयोर्वर्धयित्वा मध्यरेखाप्राक्प्रांतस्तस्य पश्चिमरेखाप्रांतद्वयं यावत् सूत्रद्वयनिपात
नात्कोणरूपमस्य त्रयं पयुक्तं त्रिकोणं कुंडं भवेदित्यर्थः॥शारदातिलके तु मध्यरेखां चतुर्धा विभज्यैकैकमंशं पूर्वोक्ते पु
त्रिषु स्थानेषु वर्धयित्वा त्रिकोणकुंडं कुर्यादित्युक्तं॥चतुर्धा भाजितक्षेत्रे म्यसेदुभयपार्श्वयोः॥एकैकं मन्तस्मानादग्रतो
लांछयेत्ततः॥सूत्रत्रयं यथा बधः कुर्यान्यस्त्र कुंडमुदाहृतमिति॥इदं तु कुंडं प्रागग्रं कर्तव्यम्॥निर्ऋते दिक्स्थितं कुर्यादुदपर
र्वदिगग्रकमिति सिद्धांतशेखरोक्तेः॥ ॥वृत्तं कुंडनिर्माणप्रकारः कामिके॥कर्णार्धमष्टांशसंन्यासाद्वृत्तं कुंडमिहोदितमि
ति॥समचतुरस्रस्य क्षेत्रस्य कोणात्सुत्रं कर्णः॥तस्यापरार्धं तस्याष्टधा विभक्तस्याष्टमांशेन चतुरस्रक्षेत्रस्य प्राचीमध्यरेखां
पुरस्ताद्वर्धयेत्॥ततः क्षेत्रमध्ये सूत्रादिं निधाय वर्धितरेखाग्रं यावत् सूत्रप्रसार्य तन्मानेन सूत्रेण सर्वतो भ्रमणाद्वृ
त्तं कुंडं कुर्यादित्यर्थः॥शारदातिलके तु॥मध्यमां प्राचीरेखां स्वाष्टादशांशेन पुरस्ताद्वर्धयित्वा क्षेत्रमध्ये सूत्रं निधाय वर्धि
तरेखाग्रं यावत् प्रसार्य तेन सूत्रेण सर्वतो भ्रमणाद्वृत्तं कुर्यादित्युक्तम्॥अष्टादशांशे क्षेत्रस्यान्यसेदेकं बहिर्बुधः॥भ्रामयेत्ते
न मानेन वृत्तं कुंडमनुत्तममिति॥ ॥षडस्रकुंडनिर्माणप्रकारः कामिके॥षड्गुणाग्र्वहिततो मत्स्यैश्चतुर्भिः स्यात्षडस्रकमिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰प्रो॰वि समचतुरस्रोयमक्षेत्रं षोडशादिभक्तस्य मध्यमाद्दक्षिणोत्तरायतरेखामेकैकेनांशेनोभयतो वर्द्धयेत्॥ ततः क्षेत्रमध्याद्व
र्द्धितरेखाद्दक्षिणाग्राद्वर्द्धितदक्षिणोत्तरायतरेखार्द्धपरिमितमेकैकं सूत्रं निपात्य पश्चिमवायव्यांतरालेमत्स्यमुत्पादयेत्तेनै
॥२३॥ वप्रकारेणेशानपूर्वदिगंतरालेपि मत्स्यमुत्पादयेत्॥ पुनः क्षेत्रमध्याद्वर्द्धितरेखाद्दक्षिणाग्राद्दक्षिणोत्तरपरिमाणमेकैकं
सूत्रं निपात्य पश्चिमनैर्ऋत्यांतरालेमत्स्यमुत्पादयेत्तेनैव प्रकारेणाग्नेयपूर्वदिगंतरालेपि पूर्ववन्मत्स्यमुत्पादयेत्॥ ततश्चतु
रस्रसंबंधि पूर्वपश्चिमरेखयोस्तन्मत्स्यचतुष्टयानुसारेणालांछनचतुष्टयं कुर्यात्॥ ततो वर्द्धितरेखाग्रद्वयालांछनचतुष्
टयं यावत्सूत्रचतुष्टयं निपातयेत्॥ एवं च लांछनचतुष्टयांतरालवर्त्ति प्राक्पश्चिमरेखांशासहरेखाद्वयमेलनात् षट्कोणकुं
डं कुर्यादित्यर्थः॥ ॥पद्मकुंडप्रकारोपि कामिके॥ चतुरस्राष्टभागेन कर्णिकास्याद्द्विभागतः॥ तद्बहिस्त्वेकभागेन केसराणि
प्रकल्पयेत्॥ ततोयद्दलमध्यानि चतुर्थे दलकोटयः॥ दलकोटयोर्दलोन्नरभागशः॥ अमरशास्त्रे पद्मकुंडस्य दलाग्रं दर्शयेद्बहि
रिति विभागत्राइति विभागविभागेनेति संबध्यते॥ बहिरिति॥ क्षेत्राद्बहिः पंचमेष्टत्र इति यावत्॥ ततश्चायमत्रार्थः॥ इष्टप्र
माणाच्चतुरस्रक्षेत्रस्य मध्यमां प्राचीरेखामष्टधा विभज्याष्टमांशपरिमितेन सूत्रेणाक्षेत्रमध्यान्निम्नावृत्तं रचयेत्॥ पुनः क्षेत्रम राम॰
ध्यबिन्दुस्थैककोटिनाष्टमांशद्वयपरिमितेन सूत्रेण तद्बहिर्द्वितीयं वृत्तं रचयेत्॥ तत्र केसराणि दलमूलानि प्रकल्पयेत्॥ पुन ॥२३॥

स्तस्मिन्नेव सूत्रे तृतीयमष्टमांशं संवर्ध्य तद्बहिः क्षेत्रमध्यात्तृतीयवृत्तं रचयेत्॥ तत्र दलमध्यानि प्रकल्पयेत्॥ पुनस्तस्मिन्ने
व सूत्रे चतुर्थमष्टमांशं संवर्ध्य तद्बहिश्चतुर्दिक्षु चतुरस्रप्रांतरेखास्पृष्टं क्षेत्रसमन्यासं क्षेत्रमध्याच्चतुर्थवृत्तं रचयेत्॥ तत्र
दलानामुत्तरभागान् कल्पयेत्॥ ततः पुनस्तस्मिन्नेव सूत्रे पंचममष्टमांशं संवर्द्ध क्षेत्रमध्यान्निम्नांसं च वृत्तं क्षेत्राद्बहिः
कुर्यात्॥ तत्र स्वतुल्यापरिमाणांतरालानि दलाग्राणि रचयेत्॥ दलाग्रांतरालानि परिसरद्दलाग्रैः सह सर्वं रखनेत्॥ तथा
च सत्त्वचतुरस्रकोणभूमिर्दलाग्रैः परिगृहीता भवति॥ खातकुंडाधोमप्रदेशे विस्तारसमोत्सेधां कर्णिकां रचयेत्॥ तथा च
कामिके॥ तत्संधिं च तथा कुर्यात्कर्णिकाव्याससमानतः इति॥ कर्णिकातो बहिर्यथासंभवं केसरादीनि प्रकल्पयेदिति॥ इ
दं च पद्मकुंडमष्टदलं चतुर्द्दलं वा कर्त्तव्यं॥ विदद्दलमष्टदलं तु वेति कामिकोक्तेरेव॥ सिद्धांतशेखरेपि॥ चतुर्दिक्षु चतुः
पत्रं पद्माभं कुंडमीरितं॥ अथवाष्टदलं कुंडं कुर्याच्छास्त्रोक्तमार्गतः इति॥ ॥अथाष्टास्रकुंडनिर्माणप्रकारः॥ कामिके
॥क्षेत्रपादद्वादशं भागं चतुर्दिक्षु ततं दतरे॥ विन्यसेत्तत्प्रमाणेन तुर्यास्रमपरं तरचयेत्॥ तस्य कर्णप्रमाणेन तद्भुजास्वपि
लांछयेत्॥ तत्राष्टसूत्रसंयोगादष्टास्रकुंडमुच्यत इति॥ क्षेत्रस्य चतुरस्रीकृतस्य द्वादशमं भागं तदंतरे॥ तस्य चतुरस्रस्यां
तरे बहिश्चतुर्दिक्षु विन्यस्य लांछयित्वा तस्य मानेन बहिर्लांछितस्य द्वादशमस्य भागस्य परिमाणेनापरं द्वितीयं चतुर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रं नयेत्प्रसारयेत॥ एवं चतुरस्रस्य बहिः परितो द्वितीयं चतुरस्रं कुर्यादित्यर्थः॥ तुर्यांशाद्यः स्त्रशः प्रसार्यतो प्यत्र चतुरस्र
स्यापरः॥ तस्येति॥ तस्य बाह्यचतुरस्रस्य बहिः परितो द्वितीयं चतुरस्रं कुर्यादित्यर्थः॥ तुर्यांशाद्यः सूत्रशः प्रसार्यतो प्यत्र चतु
कर्णप्रमाणेन कोणस्त्रार्द्धप्रमाणेन तद्भुजासु तस्य बाह्यचतुरस्रस्य भुजासु दिक्षु चतुष्टयावच्छिन्ने रेखासु लांछयेदंक
येत॥ कर्णश्चाह्येयद्यपि शिल्पिशास्त्रे कोणस्त्रवचनः प्रसिद्धस्तथापि तत्र कोणस्त्रस्य भुजाशाद्यावाद्दिग्रेखापेक्षया
धिकपरिमाणत्वात्तेन भुजासु लांछयितुमशक्यत्वात्कोणस्त्रार्द्धपरः॥ तेनाष्टसु लांछनेषु सूत्रसंयोगात्स्त्राष्टकया
तेन यत्कुंडस्य घते तद्दृशस्त्रमुच्यते॥ अत्रायं तात्पर्यार्थः॥ इष्टप्रमाणचतुरस्रस्य मध्यरेखांशाद्द्वाधाविभज्यैकैकं भागं व
हिश्चतुर्दिक्षु विन्यस्य तत्परिमाणेनापरं चतुरस्रं पूर्वचतुरस्रस्य परितः कुर्यात्॥ ततो बाह्यचतुरस्रकर्णार्द्धप्रमाणस्त्र
स्यादिवाह्यचतुरस्रस्येशानकोणे निधाय तस्यैव पूर्वपार्श्वरेखायां तत्सूत्रं प्रसार्य तन्मानेनाग्नेय्यपूर्वयोरंतरालेचिन्ह
येत॥ पुनस्तस्मादेवकोणादुत्तररेखायामुत्तरवायव्ययोरंतराले तन्मानेन चिन्हयेत॥ ततः सूत्रस्यादिमाग्नेयकोणे निधा
यवाह्यचतुरस्रपूर्वरेखायां पूर्वैशानयोरंतराले तन्मानेन चिन्हयेत॥ ततः सूत्रस्यादिं निर्ऋतिकोणे निधाय दक्षिणरेखा
यामाग्नेयदक्षिणयोरंतराले तन्मानेन चिन्हयेत॥ पुनस्तस्मादेवकोणात्पश्चिमरेखायां वायव्यपश्चिमयोरंतराले तन्मा

नेन चि[illegible]येत॥ पुनस्तस्मादेवकोणात्पश्चिमनैर्ऋत्ययोरंतराले चिन्हयेत॥ पुनस्तस्मादेवकोणादुत्तररेखायां तन्मानेनोत्तरेशा
नयोरंतराले चिन्हयेत॥ एवं प्रतिदिशं लांछनद्वयकरणाद्दिक्चतुष्टये लांछनाष्टकं भवति॥ ततः कोणे भवयाम्भवतिलां
छनद्वयस्य शाग्रे सूत्रचतुष्टयं निपातयेत॥ एवं पंचप्राच्यादि चिन्हद्वयांतरालवर्त्ति सूत्रचतुष्टयेन सह सूत्राष्टकयोगादृष्ट
स्रकं कुंडं भवतीति॥ कुंडखननप्रकार उक्तो मोहचूलोत्तरे॥ चतुर्विंशतिमं भागमंगुलं परिकल्प तु॥ चतुर्विंशांगुलं हस्तं कुंडानां
परिकल्पयेत॥ हस्तमात्रं खनेत्तिर्यगूर्द्ध्वमेखलया सहेति॥ पूर्वोक्तेष्वाद्यपरिमाणानां मध्ये हो मानुसारेण यस्य यावत्[illegible]माणं
कुंडं चिकीर्षितं तत्स्य कुंडस्य क्षेत्रं चतुर्विंशतिधा विभज्य चतुर्विंशतिभागपरिमाणमंगुलं परिकल्पतादृशै[illegible]
लैर्हस्तं परिकल्प्य तेन हस्तेन परिमितं [illegible]खननं तिर्यक्खननं विधेयं॥ अधःखननं तु कुंडोर्ध्वः प्रदेशात्स्वकंठ[illegible]
र्यं पावत्स्वीकार[illegible]परिमितमूर्ध्वमानं [illegible]भवति तथा विधेयमित्यर्थः॥ एतेन पावत्परिमाणं कुंडं वि[illegible]
णातिर्यक्खननं कर्तव्य॥ अधःखननं तु प्रथममेखलाग्रेण सह तावत्परिमाणं यथा भवति तथा कर्त्तव्यमित्युक्तं [illegible]
न्यादिकुंडेषु योयः आकारः परिकल्पितस्तेन तदाकारेण सस्वप्रभृति भवतेचतुरस्रविस्तारपरिमितं मानमधः प्रदेश[illegible]
लाग्रे[illegible]सहितं यथा भवति तथा ततेत॥ प्रतिष्ठासारसंग्रहे पि॥ पंचत्रिमेखलो याद्यशाखाश्रेषमधःखनेत॥ प्रपंचसार[illegible]मपि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ द.०.के ॥ कु...तिर्यगूर्ध्वं मेखलयासहेति॥ जिनांगुलं चतुर्विंशांसंगुलं॥ शारदातिलकेतु॥ यावान्कुंडेषुयं विधिरिति॥
॥२५॥ ...तेधि॥ ...दंगुलं तस्याः मेखलानां विधिर्भवेदिति॥ सिद्धांतशेखरेपि॥ कुंडेहस्तमितं कंठं कुर्यादेकांगु
...तीति॥ अत्र सर्वत्रैव ...परिमिते कुंडे एकांगुलपरिमितकंठाभिधानेनाधिकपरिमाणकुंडेषु स्वस्वचतु...प
...मितेः कंठ ...मेखलापरिमाणमुक्तं पिंगुलायते॥ खातादेकांगुलं त्यक्त्वा मेखलानां स्थितिर्भवेत॥ मे...लेका
थवातिस्रो॥ ऋतसंख्या थवाप्रिये॥ एकाषडंगुलोत्सेधविस्तारा मेखला मतेति॥ ऋतसंख्यापंचसंख्या॥ कालोत्तरे॥ मेखला
त्रितयं कार्यं कोणाणामयमांगुलेरिति॥ यदा मेखलात्रयं क्रियते तेरं दं परिमाणं क्रमोक्तेः॥ कोणाश्चत्वारः॥ रामास्त्रयः॥
यमौद्वौ॥ एवं च सति कंठसन्निहिता प्रथमा मेखलान्तःप्रदेशात्रवांगुलोच्चाच्चतुरंगुलविस्तृता द्वितीयानुत दृहिः पंचांगु
लोच्चात्र्यंगुलविस्तृता॥ तृतीयापि तद्दहिर्द्व्यंगुलोच्चद्व्यंगुलविस्तृतेति उक्तं भवति॥ इदं च स्पष्टीकृतं लक्षणासंग्रहे॥ प्रथ
मा व्यंगुलव्यासा तुन्नैणसानवांगुलैः॥ मध्या तु त्र्यंगुला बाह्या तृतीया तु यमांगुलेति॥ प्रथमा कुंडसंनिहिता॥ व्यासाद्विस्ता
रात्र्यंगुला॥ नवांगुलोन्नतत्वं तु अन्तःप्रदेशे॥ बाह्यप्रदेशे तु द्वितीयमेखलाया॥ उपरि चतुरंगुलोच्चैव॥ मेखलापंचकपक्षे राम॰
तत्परि...णामपि तत्रैव॥ मेखलाः पंच वा कार्याः षट्पंचाथवा त्रिपक्षकैरिति॥ अथ पक्षश्चत्वारः॥ पक्षौ द्वौ॥ सिद्धांतशेखरे तु मे ॥२५॥

खलापंचकपक्षे परिमाणांतरमुक्तं॥ सर्वेषामेव कुंडानामेकवातिस्र एव वा॥ पंच वा मेखलास्तासामुच्यते लक्षणं
यथा॥ चतुर्विंशेन भागेन कुंडानामंगुलं मतं॥ कुंडानां मेखलां कुर्यादेकां च षडिरंगुलैः॥ चतुर्भिश्च त्रिभिर्द्वाभ्यामू
र्ध्वा मध्या त्वधोगता॥ तिस्रः प्रोक्ताः क्रमाच्चैवं विस्तारादपि॥ बाणाधिवह्निभेचंद्रमात्राः स्युः पंच मेखलाः॥ मेखलाः
कीर्तिताः सर्वाः कुंडानामनुरूपत इति॥ योन्याद्याकारेषु कुंडेषु योन्याद्याकारा एव मेखलाः कार्या इत्यर्थः॥ विश्वक
र्मणाप्यामेवोक्तं॥ यादृक्कुंडस्याकृतिः संप्रदिष्टा तादृग्रूपं मेखलाद्यावदित्यादिति॥ द्विहस्तादिकुंडविशेषेषु मेखला
परिमाणाविशेषा उक्ताः सारसंग्रहे॥ द्विहस्तस्य च षट्वेदश्र्यंगुलैर्मेखलाद्यावदित्यादिति॥ द्विहस्तादिकुंडविशेषेषु
मेखलापरिमाणाविशेषा उक्ताः सारसंग्रहे॥ द्विहस्तस्य च षट्वेदत्र्यंगुलैर्मेखलात्रये॥ मेखलाः स्युस्त्रिहस्तस्य स
प्तपंचगुणांगुलैः॥ चतुर्हस्ते मेखलास्युरष्टनुं चतुरंगुलैः॥ मेखलाः पंचहस्ते निधिद्वीपशरांगुलैः॥ षट्करस्य वताः
प्रोक्तांगुलैः॥ मेखलाः सप्तहस्तस्य रुद्रार्कद्वीपकांगुलैः॥ अष्टहस्तस्य कुंडस्य भानु वसुकांगुलैः॥ नवहस्तमि
ते कुंडे विश्वरुद्रनवांगुलैः॥ दशहस्तमिते कुंडे मनुभानुदशांगुलैरिति॥ गुणास्त्रयः॥ ऋतवः षट्॥ निधयो नव॥ द्वीपाः
सप्त॥ शराः पंच॥ रुद्रा एकादश॥ अंकानव॥ भानवो द्वादश॥ वसवोष्टौ॥ विश्वे त्रयोदश॥ मनवश्चतुर्दश॥ यानि लक्षणानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ क्षे स्वायंभुवे। मेखलामध्यतो योनिः कुंडार्धात्र्यंशविस्तृता॥ अंगुष्ठमानोष्ठकंठा कार्याश्वत्थदलाकृतिरिति। मेख वि॰
लामध्यदेशाच्चोपरितनेष्वास्वाः॥ योनिः स्यान्मेखलोपरीति सिद्धांतशेखरेभिधानात्॥ कुंडार्धा॥ यावत्परिमाणायतकुं
॥२६॥ डं तदर्धपरिमाणानदीर्घा त्र्यंशविस्तृता कुंडतृतीयांशेन विस्तृता॥ अंगुष्ठमानोष्ठकंठा॥ अत्रांगुष्ठशब्दः कुंडचतुर्वि
शांशरूपांगुलपरः॥ ओष्ठशब्देनात्र कुंडमध्यप्रविष्टयोन्यग्रमुच्यते॥ तदंगुलपरिमितं कार्यमित्यर्थः॥ कंठशब्दे
नात्र योनिमेखलोच्यते॥ तथाचांगुलपरिमितया मेखलया प्रांतभागोपरितो वेष्टिता योनिः कार्येत्यर्थः॥ त्रैलोक्यसारे
पि॥ दैर्घ्यात्तुर्यांगुलायोनिस्त्र्यंशेनाविस्तरेणतु॥ एकांगुलोच्छ्रितासातु प्रविष्टाभ्यंतरे तथा॥ कुंभद्वयसमायुक्ता
चाश्वत्थदलवन्मता॥ अंगुष्ठमेखलायुक्ता मध्येत्वास्यथतिस्तथा॥ अंत्रेणेति। प्रथमभागेतरतो यावान्न्यूनस्वदैर्घ्य
विस्तारेत्यर्थः॥ एकांगुलोच्छ्रिता। एकेनांगुलेनोन्नता॥ एतेन योनिपरिमाणेन सह मेखलायांगुलोन्नता भवति॥ तथा॥
एकांगुलेन योन्यग्रेणाभ्यंतरे कुंडमध्ये प्रविष्टा कार्या॥ कुंभद्वयसमायुक्तेति मूलदेशे द्वाभ्यामर्धद्विपाकारत्वेन गज रम॰
कुंभाकृतित्वात् कुंभद्वयेत्युक्ता॥ मध्ये त्विति। पृथश्रुत्विग्घृतधारणायविलयते॥ तथा योनिरपि मध्ये सबिला कार्येत्य
र्थः॥ इयं चाश्वत्थपत्रसदृशी गजोष्ठसदृशी वा कार्या॥ अश्वत्थपत्रवद्योनिर्गजोष्ठप्रतिमाथवेति सिद्धांतशेखरे ॥२६॥

डिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ ५॥ ६॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः॥ बाणबाणासनधरः कर्तव्योर्कसु
तः सदा॥ ७॥ करालवदनः खड्गचर्मशूलीवरप्रदः॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते॥ ८॥ धूम्रा द्विबाह
वः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ ९॥ सर्वे किरीटिनः कार्या ग्रहालोकहितावहा
॥ स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा॥ ग्रहाणामधिदेवताः प्रत्यधिदेवताश्चोक्तास्तत्रैव॥ भास्करस्येश्वरं विद्यां
उमां च शशिनं तथा॥ स्कंदमंगारकस्यापि बुधस्य च तथा हरिं॥ ब्रह्माणं च गुरोर्विद्याच्छुक्रस्यापि शचीपतिं॥ शनैश्च
रस्यापि यमं राहोः कालं तथैव च॥ केतूनां चित्रगुप्तं च सर्वेषामधिदेवताः॥ अग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री च देवता॥
प्रजापतिश्च सर्पाश्च ब्रह्माप्रत्यधिदेवताः॥ एतत्स्वतिमालक्षणान्युक्तानि विष्णुधर्मोत्तरे॥ पंचवक्त्रो वृषारूढः प्रतिवक्त्रं
त्रिलोचनः॥ कपालशूलखट्वांगी चंद्रमौलिः सदाशिवः॥ १॥ अक्षसूत्रं च कमलं दर्पणं चकमंडलुं॥ उमा बिभर्ति हस्ते
षु पूजिता त्रिदशैरपि॥ २॥ कुमारः षण्मुखः कार्यः शिखंडकविभूषणः॥ रक्तांबरधरः कार्यो मयूरवरवाहनः॥ ३॥ कु
क्कुटश्च तथा घंटा तस्य दक्षिणहस्तयोः॥ पताका वैजयंती स्याच्छक्तिः कार्या च वामयोः॥ ४॥ प्रदक्षिणार्धस्थिताधःक
राद्वारभ्य निसर्गाः॥ विष्णुः कौमोदकीपद्मशंखचक्रधरः क्रमात्॥ ५॥ यज्ञोपवीती हंसस्थ एकवक्त्रो हविर्भुजः॥ अथ स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान॰प्र॰
॥३०॥
जंस्रुवं बिभ्रत्कं डिकां च प्रजापतिः ॥ ५ ॥ चतुर्दंतगजारूढो वज्री कुलिशासत्करः ॥ शचीपतिः कर्तव्यो नानाभरणभूषितः
॥ ६ ॥ ईषसीनो यमः कार्यो हंड हस्तो प्रजानता ॥ रक्तहक् पाशभृत् स्रमो महिषस्थो विभूषितः ॥ ७ ॥ कालः करालवद
नो यमः कार्यो निसमप्पति भीषणः ॥ पाशहस्तो दंड हस्तः सर्पवृश्चिकरोमहा ॥ ८ ॥ उदीच्यवेषं स्वाकारं द्विभुजं सौम्य
दर्शनं ॥ पुस्तकालोकनपरं चित्रगुप्तं विनिर्दिशेत ॥ ९ ॥ दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत ॥ १० ॥ पिंगलश्मश्रुके
शांतः पिंगाक्षत्रितयो रुणः ॥ छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः ॥ त्रिशिन्हितं च वरेण गस्य करमं तु कारये
त ॥ २ ॥ श्रोपहद्रीहूपधारिणः श्वेता मकरवाहनः ॥ दधानः पाशकलशौ मुक्ताभरणभूषितः ॥ ३ ॥ शुक्लवर्णा मही
कार्या दिव्याभरणभूषिता ॥ चतुर्भुजा सौम्यवपुश्चंद्रांशुसदृशांबरा ॥ रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतं ॥ पद्मक
रे च कर्तव्यं भुयो पाद्वनंदन ॥ द्विभ नागानां चतुर्णां सा कार्या पृष्ठगा तथा ॥ ३ ॥ विस्विंड्पोर्लक्षणमधिदेवतास्तत्कं
॥ ५ ॥ वामे शच्याः करे कार्या सौम्यसंतानमंजरी ॥ वरदा मंडिता कार्या द्विभुजा च तथा शची ॥ ६ ॥ प्रजापतिलक्षणमपि प्रा दान॰
गुक्तं ॥ ७ ॥ अक्षसूत्रस्रुवधराः सर्पाः कुंडिकापुष्पिसंयुताः ॥ एकभोगा द्विभोगा वा सर्पाः कार्याश्च भीषणाः ॥ ८ ॥ पद्मासन ॥३०॥
स्थो जटिलो ब्रह्मा कार्यश्चतुर्मुखः ॥ अक्षमाला स्रुवं बिभ्रत् पुस्तकं च कमंडलुं ॥ वासः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च

॥ ९ ॥ विनायकादि पंचानां प्रतिमालक्षणमथितैव ॥ चतुर्भुजस्त्रिनेत्रश्च कर्तव्यो गजाननः ॥ नागयज्ञोपवीतश्च शशां
कह्रुतशेखरः ॥ दंतं हस्तक करे दधानो द्वितीये चाक्षसूत्रकं ॥ तृतीये परशुं दध्याच्चतुर्थे मोदकं तथा ॥ १ ॥ द्वात्रिंशदणां तथा
भलं खड्गं च खेटकं च रक्षिणो ॥ चंद्रबिंबमथो वामे खट्वांगं कपालकं ॥ घंटकं च दधाना सिंहारूढा तु द्विभुजा
॥ एषा देवी समुद्दिष्टा दुर्गा दुर्गापहारिणी ॥ ३ ॥ धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः ॥ वरदानकरो धूम्रवर्णः
कार्यो विजानता ॥ ३ ॥ नीलोत्पलांगं गगनं तद्वर्णांबरधारकं ॥ चंद्रार्कहस्तं कर्तव्यं द्विभुजं सौम्यरूपवत ॥ ४ ॥ द्विनु
जो देवभिषजौ कर्तव्यौ देहसंयुतौ ॥ तयोरौषधयः कार्याः दिव्या दक्षिणहस्तयोः ॥ वामयोः पुस्तकौ कार्यौ दर्शनीयौ त
था द्विजाः ॥ एकस्य दक्षिणे पार्श्वे वामे वान्यस्य देव ॥ नारीयुग्मं प्रकर्तव्यं सुरूपं चारुदर्शनं ॥ रत्नभांडकरे कार्यं चंद्रशुभ्रां
बरे तथा ॥ ५ ॥ दिक्पालप्रतिमालक्षणानि तु ब्रह्मयामले ॥ इंद्रस्त्वैरावतारूढो वज्रपाणिः शचीसखः ॥ स्वर्णवर्णः
सहस्राक्षो नाकपत्त्वमरेश्वरः ॥ पद्मं सर्वदलस्याग्रे इंद्रमिंद्रं च इत्वचा ॥ १ ॥ अग्निस्तु स्वर्णवर्णांगः सप्तार्चिः सप्तहस्त
कः ॥ स्वाहासखो मेषवाहः शक्त्यत्र स्रुक्स्रुवादिमत ॥ आदिशौ हेनजुहूयमर्डवा गरुंघते ॥ अग्निं दृतमिसेन याज्ञवा
ग्नेयदलाग्रके ॥ २ ॥ इलाप्रियो दंडधरो यमो महिषवाहनः ॥ रक्तवर्णो हि लोकानां स्वस्वकर्मफलप्रदः ॥ ३ ॥ एभ्यो याम्यद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यान० प्र० लाग्येतु यमाय सोम मिस्त्वा॥३॥ खड्गचर्मधरो नीलो निर्ऋतिर्नरवाहनः॥ कुर्य्यात्केशो विरूपाक्षः करालः कालिकाप्रिय
॥३१॥ ॥ मोषुणास्त्विति मंत्रेण नैर्ऋते तु स्थलायके॥४॥ नागपाशधरो रक्तः ऋद्धरागः पद्मिनीप्रियः॥ वरुणो बुपतिः स्वर्णवर्णी
मकरवाहनः॥ ध्रुवः पश्चिमदिग्भागे तत्वत्वा अग्ने त्वा तथा॥५॥ प्राणात्मतो हि जगतो वायुः कृष्णमृगासनः॥ हेमदं
उधरः श्यामावर्णो तोमो हिनीपतिः॥ तव वायो इत्यृचा च स्थाप्यो वायुर्महद्दिशि॥६॥ अश्वारूढः कुंतपाणिः कुबेरस्त्रिविणी
पतिः॥ निधीश्वरः स्वर्णवर्णो धनदो रूपवान्प्रभुः॥ सोमो धेनुं यतेनैव प्रज्ञ स्थले ह्युत्तरे तथा॥७॥ शुद्धस्फटिकसंकाशो गौ
रीशो वृषवाहनः॥ वरदाभयधृक्लाक्षहस्त्रयक्षः परमेश्वरः॥ कद्रुद्राय पयेति मंत्रेणाथ पलः प्रागुत्तरे दले॥८॥ अत्रेन्द्र
इत्यादिकल्पदैः स्वस्वशाखीयतत्तद्देवताप्रकाशकमंत्रा उपलक्ष्यंते॥ अत्राधिदेवतादीनामपि स्वस्वप्रतिमासु
अक्षतपुंजेषु वा पूजा कार्या॥ अधिदेवतानां स्थापनप्रदेशा उक्ताः॥ स्कंदपुराणे॥ वक्ष्ये स्थानानि देवानामीश्वरादि
यथाक्रमम्॥ सूर्यस्यैवोत्तरे शंभुमुमां सोमस्य दक्षिणे॥ स्कंदं मंगारकस्यैव दक्षिणास्यां निवेशयेत्॥ सौम्यासाश्रिमतो
विष्णुं ब्रह्माणं जीवपूर्वतः॥ इंद्रमैशा सितादिक्षिणं दा स्याग्रेयतो यमं॥ राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं॥ केतोर्नैर्ऋ राम०
त्यदिग्भागे चित्रगुप्तं निधापयेदिति॥ प्रसधिदेवता स्थापनदेशा उक्ता गोभिलीये॥ ग्रहदेवतयोर्मध्ये अधिदेवाश्रिवेशये ॥३१॥

दिति॥ उत्पलपरिमलोद्धृतवाक्ये तु विशेष उक्तः॥ ग्रहस्य दक्षिणे पार्श्वे स्थापयेदधिदेवता॥ ग्रहस्योत्तरपार्श्वे तु
प्रत्यधिदेवतामिति॥ एवं च विकल्पस्थानस्येति ज्ञायते॥ समानविषयत्वात॥ व्रीहियववत॥ विनायकस्थाप
नदेश उक्तः स्कंदपुराणे॥ उत्तरे शनिसूर्याभ्यां गुरुकेत्वोश्च दक्षिणे॥ गणाधिपः प्रतिष्ठाप्यः सर्वदेवनमस्कृतः॥
अत्र विनायकपदस्य विनायकादिपंचकलोकपाल उपलक्षणत्वात्तत्रैव विनायकस्य परितो दुर्गादीनां स्थापनं कार्य
मिति केचिदाहुः॥ संग्रहकारेणातु स्थानांतरमुक्तं॥ यथा॥ राहुमंदादिनेशानामुत्तरस्यां यथाक्रमं॥ गणेशाद् दुर्गा वा
यूश्वराहुकेत्वोश्च दक्षिणे॥ आकाशमश्विनौ चेति पंचैतान्स्थापयेत्ततः॥ विशेषोत्र मुक्तो मात्स्ये॥ आदित्यादिमुखाः
सर्वे साधिप्रत्यधिदेवताः॥ स्थापनीया मुनिश्रेष्ठ नांतरेण यराः मुरति॥ नांतरेण बहिर्योगिनः॥ अंतरं बहिर्योगोपस्था
नयोरिति पाणिनिस्मृतेः॥ आवाहनमंत्र उक्तः स्कांदे॥ वर्णाद्रूपगुणोर्युक्तान्याहृत्यावाहयेत्सुरानिति॥ व्याहृत्या प्रणा
वादिस्समस्तव्याहृत्या॥ विनायकाद्यावाहनमपि व्याहृतिभिरेव कार्य॥ विनायकं तथा दुर्गा वायुमाकाशमेव च॥ आवाह
येद्व्याहृतिभिस्तथैवाश्विकुमारकौ विति मत्स्यपुराणोक्तेः॥ स्थापनं तु तत्तन्मंत्रैरेव कार्य॥ तेच मंत्रा उक्ताः स्कांदे॥ आकृष्णे
नसहस्रशीर्षा रश्मिमिंद्रे वाक्त्वा त्थैदद्वे॥ अग्निर्मूर्द्धेति भोमा रुद्रुध्यस्व बुधाय च॥ बृहस्पते अतियदर्यः शुक्राय वा मामृतास्तुतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र.शां.प्र० शनैश्चरस्य मंत्रोयं शन्नोदेवीरुदाहृतः ॥ कयानश्चित्रराहोश्च केतुं कृण्वन्केतवे इति ॥ याज्ञवल्क्यस्मृतावप्येत एव मंत्रा
॥३१॥ उक्ताः ॥ अधिदेवताप्रत्यधिदेवतामंत्रा अप्युक्ताः स्कांदे ॥ ईश्वरं त्र्यंबकं चेति श्रीश्चेतेति च पार्वती ॥ यदक्रंदेति च स्कंदं
विष्णुं विष्णोरराटतः ॥ आब्रह्मन्निति ब्रह्माणं सजोषा इंद्र इति वासवं ॥ यमाय त्वेति च यमं कालं कार्षिरसीति च ॥ चित्राव
स्वितिमंत्रेण चित्रगुप्तं निधापयेत् ॥ अग्निं दूतमिति त्वग्निं उपः प्रित्वेति पापमपि ॥ स्योना पृथिवि भवेदित्याइदं विष्णुस्तु वि
क्रमे ॥ इंद्रायेंद्रा इतींद्र स्योनान्नपतीं शच्चीस्थितौ ॥ प्रजापते प्रजेशस्य सर्पा ये तु नमोस्त्विति ॥ एष ब्रह्मेति चेव विधेः क्रमा
त्प्रत्यधिदेवताः ॥ विनायकादीनां स्थापनमंत्रा वासिष्ठा मुक्ताः ॥ विनायकं गणानां त्वा दुर्गां वै जातवेदसे ॥ वायो ये ते तथा
वायुं घृतं घृतेति वा वरं ॥ याबांकशेतिमंत्रेण स्थापयेदश्विनौ सुतौ ॥ इति ॥ यजमानाभिषेकार्थं ग्रहवेद्या ईशानकोणे
वरुणा कलशस्थापनं कार्यमित्युक्तं मत्स्यपुराणे ॥ प्रागग्नेयां तस्या स्तु दध्यक्षतविभूषितं ॥ चूतपल्लवसंछन्नं फलवस्त्र
युगान्वितं ॥ पंचरत्नसमायुक्तं पंचभंगयुतं तथा ॥ स्थापयेद्व्रणां कुंभं वरुणां तत्र विन्यसेत् ॥ गंगाद्याः सरितः सर्वाः स
मुद्राश्च सरांसि च ॥ गजाश्वरथ्यावल्मीकसंगमह्रदगोकुलात् ॥ मृदमानीय विप्रेंद्र सर्वौषधिसमन्वितं ॥ स्नानार्थं वि राम०
न्यसेत्तत्र यजमानस्य धर्मवित् ॥ इदं च सेतिकर्तव्यताकमुक्तं मानवसंहितायां ॥ गोमयालेपिते देशे धान्याद्यैरुपशोभि ॥३१॥

ते ॥ पंकजं कारयेत्तत्र चतुर्विंशदलान्वितं ॥ तंडुलैः कारयेद्धन्वा रक्तपीतसितासितैः ॥ कर्णिकायां न्यसेद्व्रीहीन् स्थापयेत्ते
षु कुंभकं ॥ आलब्धेष्विति सनयाकलत्रं स्थापयेद्बुधः ॥ इमं मे गंगे मंत्रेण पूरयेत्तीर्थवारिणा ॥ कुंभं च गंधवस्त्राद्यै
स्तन्मंत्रैः प्रपूजयेदिति ॥ शौनकेनाप्युक्तं ॥ अहीरणां शंभुकोणे वा सौम्ये वा पद्ममालिखेत् ॥ तन्मध्ये वारुणं कुंभं पु
रोपितोपप्रस्तरितं ॥ अव्रणां सुदृढं रत्नं धान्यस्योपरि विन्यसेत् ॥ उद्धुत्तासीति मंत्रेण तस्मिन्कुंभे मृदः क्षिपेत् ॥ न्यग्रोधो
दुंबराश्वत्थप्लक्षजंबूतरूद्भवाः ॥ रुवतीभिव्रइत्यचास्त्वरुचस्तस्मिन्विनिक्षिपेत् ॥ प्रवोयहेत्वेति सनया चैवांशा त्वा वि
निक्षिपेत् ॥ विधिनापंचगव्यानि विनिक्षिपेत् ॥ गंधादि निततन्मंत्रैर्विनिक्षिपेत् ॥ ओषधीरिति सनया औषधानि रत्ना
नि च ॥ अभावे द्रागमूल्यानि सुवर्णं वा निक्षिपेत् ॥ गंधद्वारामिसनयागंधं तत्र विनिक्षिपेत् ॥ सर्वे समुद्रां गंगे च इमं मे
गंगाइत्यपि ॥ आपो हि ष्ठादिभिर्मंत्रैरभिमंत्र्य च वारुणीः ॥ सर्वे समुद्रा इत्यादिप्रतीकग्रहणं ॥ तेन ॥ सर्वे समुद्राः सरितस्ती
र्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु
कावेरि जलेस्मिन्सन्निधिं कुरु इति द्वौ मंत्रौ पौराणिकौ ॥ इमं मे गंगे इति तु वैदिको मंत्रः ॥ अत्र कलशस्थापनारोपतिनिपत
त्रं ग्वेदमंत्राभिधाने पितृअमशालीयैः कलशादिप्रकोष्ठकाः स्वस्वशाखीयाः एवमंत्राः यासिवाः ॥ इदं च कलशस्थापनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ह्वान॰वि॰ वक्ष्यमाणा लोकपालादिस्थापनांतरं कार्यं ॥ तत्र ग्रहसज्जोपकरणान्युक्तानि याज्ञवल्क्येन ॥ यथावर्णं प्रदेयानि वा
॥३३॥ सांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः ॥ मात्स्येपि ॥ धूपो देयोत्र सुरभिरुपरिष्टाद्वितानकं ॥
शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितं ॥ स्कांदे ॥ दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं ॥ चंद्रे च भार्गवे चैव सित
वर्णं प्रदापयेत् ॥ कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः ॥ अगरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च ॥ ग्रहवर्णानि पु
ष्पाणि गायत्र्या धूपमाहरेत् ॥ रवेः कुंदुरकं धूपनाग्निमस्तघृतं सिता ॥ भौमे सर्जरसश्चैव अगरुश्च बुधे स्मृतः ॥ सिल्ह
कं गुरवे दद्याच्छुक्रे बिल्वागरुं तथा ॥ गुग्गुलं मंदवारे तु लाक्षा राहोश्च केतवे इति ॥ कुंदुरुः सल्लकीनिर्यासः ॥ सिल्ह
कं सिल्हारसः ॥ उद्दिष्टास्वेति मंत्रेणादीपं दद्यात्तद्वितः ॥ गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं ॥ लोहिताय हविष्या
न्नं बुधाय क्षीरषाष्टिकं ॥ दध्योदनं गुरोर्दद्याच्छुक्राय च घृतौदनं ॥ मिश्रितं तिलमाषैर्मिश्रितमन्नं च भितिच्छेषः ॥ नैवे
द्यानि मात्स्ये प्रोक्तानि ॥ गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं ॥ अंगारकाय संयावं बुधाय क्षीरषाष्टिकं ॥ मत्स्य राम॰
गंत्र कुजे दद्यादिति क्वचित्पाठः ॥ दध्योदनं तु जीवाय शुक्राय च घृतौदनं ॥ शनैश्चराय कृसरमाजं मांसं च राहवे ॥ चि ॥३३॥
त्रौदनं च केतुभ्यः सर्वभक्ष्यैरथार्चयेत् ॥ संयावं गोधूमविकारः ॥ विनायकादिसज्जासु शतपत्रचंदनादीनि ग्राह्याणि ॥

॥ पुष्पाणि शतपत्राणि चंदनं च विलेपनं ॥ एतेषां गुग्गुलुर्धूपो नैवेद्यं च घृतौदनं ॥ सर्वेषां लोकपालानां चंदनं च विलेपनं
॥ शतपत्रादिपुष्पाणि दद्यात् गुग्गुलुधूपकं ॥ दीपं गोघृतसंयुक्तं नैवेद्यं सघृतौदनं ॥ इत्युत्सलपरिमलोदाहृतवचना
त् ॥ उक्तानामलाभे यथालाभमन्तु कालोद्भवैरनिषिद्धैः एता विधेया ॥ ग्रहसमिधो याज्ञवल्क्येनोक्ताः ॥ अर्कः पलाशः ख
दिरस्त्वपामार्गोथ पिप्पलः ॥ औदुंबरः शमी दूर्वाः कुशाश्च समिधः क्रमात् ॥ एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा ॥ हो
तव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युता इति ॥ लोकपालादिस्थापनप्रदेशा उक्ताः स्मृत्यंतरे ॥ इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं द
क्षिणे तथा ॥ वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ इंद्रः पीतो यमः श्या
मो वरुणः स्फटिकप्रभः ॥ कुबेरश्च सुवर्णाभः त्वग्निश्चापि सुवर्णाभः ॥ तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रकीर्तितः ॥ ईशा
नस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् ॥ इंद्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ॥ ध्रुवो धरस्तथा सोम आपश्चैवानिलो
नलः ॥ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः ॥ देवेशेशानयोर्मध्ये आदित्यानां प्रतिष्ठितिः ॥ धातायमा च मित्रश्च
वरुणोंशो भगस्तथा ॥ इंद्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशा
दित्या नामभिः परिकीर्तिताः ॥ अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥ वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः ॥ अजै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान·प्र· कपाद्दहिर्बुध्न्यः पिनाकीचापराजिताः॥भुवनाधीश्वरश्चैव कपालीच विशांपतिः॥स्थाणुर्भगश्च भगवान्रुद्रास्त्वेका
॥३४॥ दशस्मृताः॥प्रेतेशरक्षोर्मध्येच मातृस्थानं प्रकल्पयेत्॥मातरो गौर्याद्याः॥निरृते रुद्ररे भागे गणेशायतनं विदुः॥
कुबेरमरुतोर्मध्ये मरुतां स्थानमुच्यते॥मरुतो नाम ते देवा गणा वै सप्तसप्तकाः॥आवहः प्रवहश्चैव उद्वहः संव
हस्तथा॥विवहः प्रवहश्चैव तथा परिवहोऽनिलः॥इति॥मात्स्य एव॥अर्चार्चनं प्रतिमापूजनं॥ब्रह्मादिप्रतिमास्व
रूपमभिहितं प्राक्॥तत्रैव यह वेद्यामित्यर्थः॥फलवस्त्वेति पूजाधनद्रव्यमात्रोपलक्षणं॥मात्स्य एव॥लोकेश
वर्णापरितः पताकामध्ये ध्वजः॥किंकिणीकायुतः स्यात्॥द्वारेषु कार्याणि चतेतोरणानि च स्वार्थयिष्णीरस्वनसतीनां॥
पताकादिलक्षणं परिभाषायामुक्तं॥द्वाद्वारेषु कुंभद्वयमत्र कार्यं हेमाग्र्यधूपांबररत्नयुक्तं॥अत्र द्वारेष्वित्युक्तेः प्र
तिद्वारं कुंभद्वयं स्यादित्यर्थं॥तथा॥द्राक्षेगुदीचंदनदेवदारुश्रीपर्णिबिल्वप्रियकांजनोत्थं॥स्तंभद्वयं हस्तयुगावखा
तं कृत्वा दृढं पंचकरोच्छ्रितंच॥तदंतरं हस्तचतुष्टयं स्यात्तथोत्तरंगं च तदस्त्रमेव॥समानजातिश्च तुलावलंबाहेम दान·
नमध्ये पुरुषेण युक्ता॥दैर्घ्येण सहस्तचतुष्टये स्यात्स्थूलत्वमस्यास्तु दशांगुलानि॥सुवर्णपट्टाभरणा च कार्या मलो ॥३४॥
हपाशद्वयमंखलाभिः॥युता सुवर्णेन च वर्णमालाविभूषिता माल्यविलेपनाद्या॥आरग्वादिवृक्षाः स्पतवनद्रुत्याद

योमध्यदेशे प्रसिद्धाः॥स्तंभद्वयं सप्तहस्तप्रमाणं॥चतुरस्त्रं वेदिमध्ये हस्तचतुष्टयांतरालं पूर्वपश्चिमभागयोः
प्रत्येकं हस्तद्वयं निखेयं॥तथा उत्तरांगं स्तंभद्वयोपरितनं काष्ठं चतुरस्त्रमेव कार्यं॥तथेति स्तंभद्वयकाष्ठसजातीय
मित्यर्थः॥तदंगमेवेति पाठे पि तदंगं स्तंभद्वयकाष्ठसजातीयमित्यर्थः॥तदंतरं॥तस्य निखातस्य स्तंभद्वयस्य प्रति
र्यंतरं॥तथा स्तंभद्वयस्याधोभागमारभ्योत्तरांगपर्यंतमूर्ध्वाधोमानं च हस्तचतुष्टयमित्यर्थः॥ततश्च भूमि हृपरि
पंचकरोच्छ्रितयोस्तोरणस्तंभयोर्हस्तचतुष्टयोपरिहृतछिद्रयोः प्रोतं बहिर्निर्गतप्रांतद्वयं चोत्तरंगकाष्ठं कार्यमि
त्युक्तं भवति॥समानजातिरिति॥तोरणसमानजातीयद्रुमयी साच तुला उत्तरांगमध्यात्॥हस्तविंशांगुले रव
लाडुरगया च वेलेति चतुर्वर्गचिंतामणिः॥हेमेन सौवर्णेन पुरुषेण विष्णुना॥मध्येभरवलावलंबितसुवर्णमय
गोविंदप्रतिमायेत्यर्थः॥गोविंदप्रतिमोक्ता पंचरात्रे॥अथ स्वकेगरागमरूदवामयोः करयोः क्रमात्॥ऊर्ध्व वामस्य मध्यः प
प्रगोविंदकपिलांगकेऽइति॥दैर्घ्यणेत्यादि॥साचतुर्हस्तदीर्घा स्यात्॥स्थूलत्वं स्थौल्यं दशांगुलपरिमितवलयासं
तिसूत्रपरिमिः॥तस्यौल्यात्तुलायेत्युक्तं भवति॥विश्वकर्मणापि तुलालक्षणमुक्तं॥विशेषदानं कथितं तुलादितस्या
स्तुलालक्षणमुच्यते प्राक्॥तुलाप्रमाणं स्मृतमंगुलानि दैर्घ्यं विलेषसावतिः प्रमाणेः॥प्रांतद्वये लग्नकलपद्मसंक्तेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्दान·प्र० तंतुलाष्टोत्तरमंगुलानां॥सुर्विंशतिः पंचचधातुबंधा वंधेषु विशत्सुराभिवेश्याः॥ईशः शशोमारुतरुद्रसूर्याः स्यावि
॥३५॥ श्वकर्मा गुरुरंगिरोग्नी॥ प्रजापतिर्विश्वसृग्गविधाता पर्जन्यचंद्रौ पितृदेवता च॥ सोमश्चधर्मोमरराजसाश्विनलेशा
मित्रावरुणौ मरुद्गणाः॥ धनेशगंधर्वजलेशविष्णुरेतेचतुर्विंशतिरेवदेवाः॥ स्यात्संवविंशः पुरुषः सएकोऽस्तोल्प
मानस्तुलया महात्मा॥ एताविधेयास्तपनीयमय्योरत्नान्विता देवतमूर्तयस्ताः॥ षडंगुलः स्याच्चतुरस्रपिंडः प्रांतद्वये
विश्रुतनामा॥ तुलोर्ध्वभागे कलशद्वयं स्यात्तथांकुरद्वंद्वमधस्तलांते॥ षडंगुलोच्छ्रांकुरकश्चपिंडोप्येकांगुलो वि
श्रुतनामा॥ पात्रीद्वयं तच्चतुरंगुलं स्याद्देवं मयाकथितं प्रमाणं॥ मध्यांकुरेमकलिकांगुलानि पंचाधिकाविंश
तिरेषदैर्घ्ये॥ एकांगुलोऽस्या भवती हपिंडस्तत्राहदेवः किलवासुकिःस्यात्॥ एकैकवज्रुलेभतेगुलानि त्रिसप्तति पिं
डगतांगुलाच॥ तच्चैलकद्वंद्वमथांगुलानि त्रिंशत्तथा पंचदशाधिका स्यात्॥ तन्मात्रं तु बंधं शुभकोष्ठधारपि रंगुलद्वं
द्वमथो विधेयं॥ अधोद्वयेमध्यमथ दैवतास्यात्तुलांतरे मिपतिर्निवेश्य इति॥ षसावतिः प्रमाणो रिसत्रप्रमाणश्द: दान·
शास्त्रवाची॥ तेन प्रमाणोः प्रमाणाभ्रतेः शास्त्रे रित्यर्थः॥ तथा॥ प्रांतद्वयबद्धलोहपत्राद्बहिरित्यर्थः॥ इदंचांगुलष ॥३५॥
ट्कं प्रांतद्वये प्रत्येकं ज्ञातव्यं॥ ततश्च पूर्वोक्तैर्लोहयात्राद्वयांतरालवर्तिभिः षण्णवसंगुलैरेतेभ्यश्च बहिःस्थितैर्द्वादश

भिरंगुलैः कृत्वाऽशतंतुलाष्टोत्तरमंगुलानामित्युपसंहारो गुणते॥ धातुबंधाः सुवर्णादि धातुबंधाः॥ अधिशत्सुराः वक्ष्य
माणा ईशाद्या निवेश्याः स्थापनीयाः॥ तपनीयमय्यः॥ सुवर्णमय्यः॥ रत्नान्विताः रत्नखचिताः॥ ईशादिप्रतिमालक्षणानि
विश्वकर्मीये॥ सर्वांत्तरे त्रिनेत्रश्च वृषभस्थास्त्रिशूलधृक्॥ कपालपाणिश्चंद्रार्धभूषणाः परमेश्वरः॥१॥ श्वेतश्वरथ
गः सोमो गदापाणिर्वरप्रदः॥२॥ धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः॥३॥ रक्तवर्णस्त्रिनयनो द्विभुजोश्चंद्रमौल
यः॥ जटिलाश्च प्रकर्तव्या रुद्रा वराधनुर्धराः॥४॥ रविः कार्यः शुभः स्वभुः सिंदूराकृणसप्रभः॥ पद्मासनः पद्मकरो भवि
तो रश्मिनाधरः॥५॥ विश्वकर्मा तु कर्तव्यः श्मश्रुलो रत्नानाधसंदंशपाणिर्द्विभुजस्तेजोमूर्त्तिधरो महान्॥६॥ ब्रह्मांडे॥ पीतां
बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोत्तमं सः॥७॥ विश्वक
र्मीये॥ कमंडलु स्रुवं चैव शक्तिरसे भपिकमात॥ करन्यस्तंगिरोनाम्नः करागणि समंततः॥८॥ पाणौ पञ्चाग्निनाम्नो
पि कलयंति जपास्त्रजं॥ शक्तिं च पुस्तकं चैव कुमारे वकमंडलुं॥९॥ विश्वेदेवस्वरूपमाह यमः विश्वेदेवास्तु सर्वेपि दृष्टि
णो बाणपाणयः॥ कर्त्तव्या बाणपाणौ तु सप्तसप्तसनपाणयः॥ तेच कोल्बादयोदश॥ क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरि
लोचनौ॥ पुरूरवा आर्द्रवोचेति विश्वेदेवा दश स्मृताः॥ इति वायुपुराणात्॥१०॥ विधातृरूपं पूर्वोक्तं प्रजापतिसदृशं॥ वज्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ चतुर्मुखमिति विशेषः ॥११॥ सिद्धार्थसंहितायां ॥ पर्जन्यनामाविर्त्ते योगरुत्वञ्चापान्वितः ॥ योधत्तेसर्वजीवात्मावरंबीजं
॥३६॥ चशंखकं ॥ कुबेरंच पयोजंच चिरत्नं महाशुचिः ॥ पाशंचक्रं त्रिशूलं घकुंडी चदशभिः करैः ॥१२॥ शंभुरीशावतं ॥१३॥ अ
नयोरपि मिलितयोर्दैवतात्वं ॥ पितृलक्षणमहयमहीपिकायां ॥ कुशाविष्टरयप्रस्थाः पितरः पिंडपाणयः इति ॥१४॥ सो
म्यरूपं ब्रह्मांडे ॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हस्ते ॥ चर्मासिधृक्सोमसुतः सहासः सिंहाधिरूढोव
रदोतुधोम्य ॥१५॥ धर्मरूपं विष्णुधर्मोत्तरे ॥ चतुर्वक्त्रश्चतुर्बाहुः सितमाल्यः सितांबरः ॥ सर्वाभरणवांश्चैव तो धर्मः कार्योवि
जानता ॥ दक्षिणे चाक्षमाला च तस्य वामे तु पुस्तकं ॥१६॥ अमरराजरूपं विश्वकर्मीये ॥ चतुर्दंतगजारूढो वज्रपाणिः
पुरंदरः ॥ प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः ॥१७॥ गोभिलः ॥ द्विभुजौ देवभिषजौ कर्त्तव्यावश्ववाहनौ ॥ तयो
रोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥ वामयोः पुस्तकौ कार्यौ दर्शनीयौ यौमद्विजैः ॥१८॥ विश्वकर्मीये ॥ वरुणः पाश
भृत्सौम्यः प्रतीच्यामकराश्रयः ॥१९॥ मित्रः कमलपाणिश्च कमलासनसंस्थितः ॥ द्विभुजः श्वेतमाल्यश्च सर्वभूतहि दान॰
तेरतः ॥ वरुणाः सर्ववत् ॥ अनयोर्मिलितयोर्दैतात्वं ॥२०॥ ब्रह्मांडे ॥ देवा एकोनपंचाशद्देवेंद्रसमतेजसः ॥ आतरः पुरुहू ॥३६॥
तस्यमरुतः सूर्यवर्चसः ॥ किरीटहारकेयूरकटकादिविभूषिताः ॥ खड्गचर्मधरा निसंज्ञाचास्यानुचरातरः ॥२०॥ श्रीश्रीप्र

श्रे ॥ हस्वमायिं गनेत्रं च गदितं पीतविग्रहं ॥ पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा ॥२१॥ गंधर्वस्वरूपमाहयमः
॥ वरदो भक्तलोकानां किरीटी कुंडली गदी ॥ कार्यः सुरूपो गंधर्वो वीणावाद्यरतः सदा ॥२२॥ जलेशोवरुणावत् ॥
॥२३॥ विष्णुमाह विश्वकर्मा ॥ प्रदक्षिणे दक्षिणाधः करादारभ्य निसशः ॥ विष्णुः कौमोदकी पद्मं शंखचक्रैरलंकृतः
॥२४॥ पंचविंशः पुरुषो गोविंदस्तल्लक्षणमुक्तं प्राक् पंचरात्रे ॥ तोलमानं इति ॥ त्रयोदशे तुलामध्यस्थिते धातुबंधेभ्र
खलावलंबितस्थूलपादियमाणः ॥ षडंगुलं स्यादिति यत्सर्वमुक्तं प्रांतद्वये तुलायाः ॥ प्रत्येकमंगुलषट्कपरिमितत्वं ॥
तच्चतुरस्रं कर्त्तव्यं ॥ न तु तुलामध्यभागद्वत्तं ॥ तयोश्चतुलाप्रांतस्थितयोश्चतुरस्रभागयोरनंतनामाविष्णुरधिदेवतेस्यर्थः ॥
कलशद्वयं कलशाकारद्वयं ॥ अंकुटद्वंद्वं बडिशाकारलोहपात्रद्वयं ॥ षडंगुलो पीसादि ॥ तुलामध्यभागे उन्नतांगकाष्ठ
मध्यावलंबितलोहफलके तुलापावतत्रावलंबनार्थं षडंगुलदीर्घः ॥ एकांगुलस्थूलेस्तुलामध्योपरिभागे लोहमयां
कुटकोबडिशाकारः कार्यः ॥ तस्याधिष्ठातानंतनामाविष्णुरेव भपात्रद्वयमिति ॥ तुलाप्रांते अधोभागे यदंकुटद्वयं पूर्व
मुक्तं पात्रीद्वयसंतकं तच्चतुरंगुलदीर्घं कार्यमित्यर्थः ॥ मध्यांकुटइति ॥ तुलामध्यभागस्थितषडंगुलदीर्घांकुटेः वलंबि
तापंचविंशत्यंगुलदीर्घा एकांगुलस्थूला संकेलिका भ्रखलागोविंदप्रतिमावलंबनार्थं कार्या ॥ तस्याश्चवामुकिरधिदेवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ सर्थः॥ यजमानसुवर्णायोर्धारणार्थपात्रावलंबनार्थामपराणां रज्जूनां प्रत्येकं परिमाणमाह॥ एकैकरज्जुरित्यादिना॥ त्रि
॥३७॥ सप्ततिं अधिकां सप्ततिं पिंडगतां गुंला एकं गुलस्थूला॥ तत्र खेलकद्वयं यजमानसुवर्णादिद्रव्यधारणार्थं पात्रद्वयं पंच
चत्वारिंशदंगुलविस्तारं शुभकाष्ठनिर्मितं अंगुष्ठद्वयस्थूलं सुवर्णादिधातुवद्धं कार्यमित्यर्थः॥ तयोश्च पात्रयोरधो
भागद्वये भ्रमिरधिदेवदेवतामध्यभागे तु भ्रमिरधिदेवते त्यर्थः॥ चेलकविषयविशेषांतरमुक्तं लिंगपुराणे॥ भुल्कजौ
वृद्ध्टौ विधान्वंधने तु कारयेत॥ त्रिंकाधस्तात्यकर्त्तव्यौ पलैराधारकावुभौ॥ ज्ञातापृष्ठेकेनवाकुर्यात् पक्षानांवाषड्शातेन
वासनुत्तालप्रविस्तारं मध्यमं परिकीर्त्तितं॥ सार्द्धत्रितालविस्तारं कनीयश्च विधीयते॥ पंचमात्रं चतुर्मात्रं त्रिमात्रं
फलमुच्यते॥ चतुर्द्वारसमोपेतं द्वारमंगुलिनाथवा॥ कुंडलैश्च समोपेतं श्लक्ष्णासिक्थसमन्वितं॥ कुंडले कुंडलेका
र्यं भ्रखलापरिमंडलं॥ भ्रंखलाधारवलयमवलंवेन योजयेत॥ प्रादेशं वा चतुर्मात्रं भ्रमिं स्तकावलंवयेदिति॥ भुल्क
जौ तापत्रजौ आधारकौ यजमानसुवर्णादिद्रव्यधारणार्थपात्रे॥ तालो नाम विस्तारितांगुष्ठमध्यमाग्रयोरंतरप्रदेशः॥ पं
चमात्रमित्यादि पंचमात्रा शतपुलपरः॥ फलं प्रांतभागः॥ चतुर्द्धारसमोपेतं छिद्रचतुष्टयान्वितं॥ अयमर्थः॥ तात्रपला राम॰
नां सहस्रेण षट्शतपाषट्शतसावाकमात्पादेशपंचकतालचतुष्टयसार्द्धतालत्रयविस्तारो पंचचतुस्त्र्यंगुलोच्छ्रितप्रो ॥३७॥

तमागाव्ंगुलस्थूलछिद्रचतुष्टयप्रोतवलयचतुष्टयान्वितावाधारकौ कार्यौ॥ प्रोतवलयचतुष्टयं छिद्रचतुष्कम
ध्यछिद्रेभ सुश्लिष्टं कार्यमिति द्वयचतुष्टयाश्लिष्टं भ्रंखलाचतुष्कं त्रिंशदांगुलं उपरिभागे एकस्मिन्वलये प्रोतं कृत्वा
तुलाग्र्याधोवलंवितेबडिशाकारांकुटेःबलंबयेत॥ एवमितरस्यपि आधारत्रिकं तुलाग्र्याधोवलंविते डिती याकु
टके योजयेत॥ एतच्चाधारपात्रद्वयं भ्रमेरूपरि प्रादेशमात्रं अंगुलचतुष्टयपरिमितं वा तरं सत्का अवलंवनीयमि
ति॥ नारदेन प्रकारांतरेणातुलोक्ता॥ चतुरस्त्रा तुला कार्या पार्श्वे चावितथा विधौ॥ चतुर्थ्यपि च पार्श्वेषु मानेस्याच्चतुरं
गुलं॥ मुक्ताता वतुकटकावंतयोर्विन्यसेद्बुधः॥ चतुर्हस्तधरं तुलामध्ये भ्रंखलयान्विता॥ त्रिकं हस्तत्रयं कुर्यात्स्कंट
कं चतुरंगुलमिति॥ पार्श्वेतोरणस्तंभौ॥ तथा विधौ चतुरस्त्रौ॥ चतुर्थ्यपि च पार्श्वेषु तुलावाइति शेषः॥ मुक्तेति॥ तावदंगु
लचतुष्टयं मुक्त्वा लाभयतः प्रत्येकं प्रांतयोः परितस्कंटकद्वयं विन्यसेदित्यर्थः॥ अत्र सर्वत्राविरुद्धानां समा
वेशो विरुद्धानां विकल्पो वगंतव्यः॥ अथ मत्स्यपुराणे॥ चक्रं लिखेद्वारिजगर्भयुक्तं नानारजोभिर्भुवि पुष्पकीर्णं॥
वितानकं चोपरि पंचवर्णं संस्थापयेत्पुष्पफलोपशोभं॥ मात्स्य एव॥ षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखमिति तत्सैव
तडागोत्सर्गविधानात॥ वारिजगर्भयुक्तमिति॥ वारिजेन पद्मेन गर्भे मध्ये युक्तं॥ नानारजोभिः पंचवर्णरजोभिः॥ तानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान०प्र० क्तानि परिभाषायां॥ मुविविवेदिमध्ये॥ उपरि॥ वेधाइ तिशेषः॥ षोडशारचक्रनिर्माणप्रकारोग्रंथांतरे दृष्टो लिख्य
॥३८॥ ते॥ गुरुर्वैद्यपरिष्कृतौ सुसमायां मध्ये त्रिहस्तायामं त्रिहस्ता विस्तारं चतुष्कोणात्मकं चतुरस्रं मंडलमुद्धरेत॥ अ
त्र नव नवांगुलानि कोनिसंपद्यंते॥ ततो बहिरंस्रपंक्तिषु चतुर्दिक्षु पार्श्वयोश्च तुर्दिक्षु कोष्ठानां त्रयं त्रयं स्रस्तं
प्रतिदिशं मध्यमकोष्ठद्वयं मार्जयेत॥ तेन चतुर्दिक्षु षट्षट्पदानि चत्वारि द्वाराणि भवंति॥ ततो मध्यमस्थितको
ष्ठयोडशके मध्यानि चत्वारि कोष्ठान्यवशेष्य परितः पंक्तिचतुष्टयस्थितानि द्वादशकोष्ठानि मार्जयेत॥ ततो वा
स्थकोणां चतु। ते च मध्यस्थस्य चतुरस्रपीठस्य पादाः स्युः॥ ततः पीठनाभिस्थानस्थैतककोदिनात्रयोदशांगुलमि
तेन सूत्रेण कर्कटेन वा षड्विंशत्यंगुलविस्तृतं संपाद्यते तस्माद्धास्यवृत्तादेकमंगुलं विहाय पंचदशांगुलमितेन
सूत्रादिना ततृतश्चतुर्विंशत्यंगुलमितं वृत्तं संपाद्य पुनस्तथैव चतुरंगुलेन सूत्रादिना तन्मध्ये षोडशांगुलं वृत्तं कृत्वा
तदंतर्द्व्यंगुलेन सूत्रादिना चतुरंगुलं मध्यवृत्तं कुर्यात॥ ततस्तच्चतुरंगुलं कर्णिकात्मकं मध्यवृत्तं पीतेन रजसा पू एम०
रयित्वा कर्णिकावधि रेखां सितेन रजसा निर्माय तद्बहिरष्टांगुलात्मके वृत्ते पीतरक्तसितरजोभिः संपादितम् अलमध्या ॥३८॥
याणि षोडशकेसराणि कुर्यात॥ ततः केसरावधि रेखां सितेन रजसांगुलोन्नतां संपाद्य चतुर्विंशत्यंगुलात्मके तद्ब

हिर्वृत्ते सितरजसा षट्दिक्षु खाग्राणि अष्टौ पत्राणि लोहितरजोरंजितान्याणि कल्पयेत॥ ततो दलांतरे रेखां सि
तेन रजसा ह्रस्व विधाय दलांतराणि कृष्णेन रजसा पूरयेत॥ ततो ष्टदलपद्मावधिवृत्ते रेखां सितेन रजसा कृत्वा
तद्बहिरेकांगुलांतरां बहिर्वृत्ते रेखां सितेनैव रजसा संपाद्य वृत्तद्वयांतरं परितोऽष्टदलाग्रदलासंधिचिन्हैः षोडश
धा विभज्य प्रतिभागं यवाकाराः षोडश नानारूपाम पीतारुणारजोभिः कृत्वा तदंतर्यथा शोभं रजोभिः पूरयेत॥ तद्बहिः
सितपीतारुणात्रूपाम हरिताः पंचरेखा लिखेत॥ तद्बहिः पीतवृत्ते चतुरस्रं यथाशोभं रजोभिर्भूषयित्वा पीठावधि रेखां
सितेन रजसा चतुरस्रा लिखेत॥ द्वारस्थानानि पूर्वादितः पीतत्रूपामम्येत हरितरजोभिः पूरयेत॥ ततः सितेन रजसां
गुलोन्नतेन बहिश्चतुरस्ररेखां कुर्यादिति षोडशारचक्रनिर्माणप्रकारः॥ ॥मात्स्ये॥ अथर्त्विजो वेदविदश्च का
र्याः सुरूपवेषान्वयशीलयुक्ताः॥ विधानदक्षाः पटवोनुकूलाये चार्यदेशप्रभवा विजेन्द्राः॥ गुरुश्च वेदांतवि
चार्यदेशसमुद्भवः शीलकुलाभिरामः॥ कार्यः पुराणाभिरतोतिदक्षः प्रसन्नगंभीरसरस्वतीकः॥ वेदार्थविद्वि
धचिसाढः॥ सिताम्बरः कुंडलहेमसूत्रकेयूरकंठाभरणाभिरामइति॥ विधानदक्षाः महादानविधिकुशलाः॥
पटवोरोगरहिताः॥ आर्यदेशो विष्णुनोक्तः॥ चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते॥ सम्लेच्छदेशो विज्ञेयो स्या

४दान॰प्र॰ ॥३१॥

येदेशास्ततःपरइति॥ अत्रयद्यपिमंडलकरणोत्तरमथर्त्विजइत्यानंतर्यबोधकाथशब्दस्वरसाच्छ्रुतक्रममहिम्ना
मंडलकृत्युत्तरंऋग्वीदिवरणमुच्यते॥ तथापिसकलधर्माधिकृतस्यगुरोर्मंडलकरणादौविनियोगस्यगुरुत्वप्र
युक्तत्वात्तत्पूर्वकरणःस्याप्यत्वाद्दार्थेनक्रमेणस्वस्तिवाचनानंतरमेवाचार्यादिवरणं॥ वरणेनचाचार्यत्वादि
सिद्धेः॥ नचमंडलकरणादेराचार्यमात्रकर्तृकत्वेप्रमाणाभावइतिवाच्यं॥ तडागाद्युत्सर्गेमात्स्यएव॥ यजमानस्य
प्रवेशानंतरंरत्नसामंडलेकुर्यात्संचवरेणतत्वविद्दिगारभ्ययजध्वमितिब्रूयादाचार्यस्त्वभिपूज्यचेतेनग्रंथेनमं
डलकरणादिकर्मकलापस्याचार्यमात्रकर्तृकस्योक्तेः॥ ऋत्विक्संख्योक्तातत्रैव॥ पूर्वेणऋग्वेदविदौभवेतांय
जुर्विदौदक्षिणाकार्यौ॥ स्थाप्यौपश्चिमेसामविदौचपश्चादथर्वणावुत्तरतश्चकार्याविति॥ पूर्वेणपूर्वस्यांदिशि॥
एवमुत्तरत्रापिज्ञेयं॥ अत्रजापकाअपिवरणीयाः॥ तथाचतत्रैव॥ जपेयुःशांतिकाध्यायंजापकाःसर्वतोदिशामि
ति॥ तेषामुत्तरत्रविनियोगदर्शनात्॥ तेचतडागाद्युत्सर्गे॥ अष्टौतुजापकाःकार्याइत्यष्टसंख्याविहिताः॥ इहापि राम॰
तावंतएवग्रह्यंते॥ तथाचतडागाद्युत्सर्गप्रकृतमत्स्यपुराणएव॥ भुजगास्त्वाष्टहोतारोद्वारपालास्तथाष्टवै॥ अष्टौ ॥३१॥
तुजापकाःकार्यावेदवेदांगपारगाः॥ हेमाद्रिकारिणाःकार्याद्विजावैपंचविंशतिरित्यष्टानांद्वारपालकानामभिधानाद

त्रापिद्वारपालाअष्टौभवंतीत्यभिप्रेत्यचतुर्वर्गचिंतामणिकाराः॥ गुरुणासहपंचविंशतिर्विप्राणांवरणमन्यं
ते॥ कृत्यकल्पतरुकारास्तुजपेयुःशांतिकाध्यायंजापकाःसर्वतोदिशामितितुलापुरुषेजापकानामेवश्रवणात्ते
षांचतडागाद्युत्सर्गेअष्टौचजापकाःकार्याइतिमात्स्यएवाष्टसंख्याश्रवणाद्दृष्टौजापकाहोतारश्चाष्टावितिषो
डशैवर्त्विजःकार्याइतिप्रत्यपादन्॥ रत्नाकरविद्याधरादयस्तु॥ तुलापुरुषस्यसकलेतिकर्तव्यतोपदेशेनापू
र्वकर्मत्वेनदानांतरप्रकृतित्वात्तडागोत्सर्गेणसहप्रकृतिविकृतिभावाभावात्तद्धर्मातिदेशासंभवेनतत्रत्याष्टसं
ख्यात्रनाश्रीयते॥ किंतुसर्वतोदिशामितिदिक्चतुष्टयसंबंधाच्चत्वारएवात्रजापकाःकार्याइतिहोतृभिःसहद्वा
दशैवात्रऋत्विजःकार्याइत्याहुः॥ तेषांविनियोगोमात्स्येदर्शितः॥ गंधैःपुष्पैरलंकृत्यद्वारपालान्समंततः॥ पठध्व
मितितान्ब्रूयादाचार्यस्त्वभिपूजयच॥ यजध्वमितियज्वनश्चाचार्यस्त्वभिपूजयच॥ होतृकान्मुनरेवतु॥ उत्कृष्टमंत्रजा
प्यंततिष्ठध्वमितिजापकानिति॥ अत्रपूर्वेणास्याद्दिग्द्विक्परमऋग्वेदिवेदविदःपूर्वादिदिक्कुंडगतानांहोतॄणामिव
द्वारपालानांजापकानांचवेदितव्यः॥ तत्रैव॥ विनायकादिग्रहलोकपालवस्वष्टकादिसमरुद्गणानां॥ ब्रह्माच्यु
तेशार्कवनस्पतीनांस्वमंत्रतोहोमचतुष्टयंस्यात्॥ विनायकादिस्याद्दिशादेनदुर्गावायवाकाशाश्विनोग्रस्तंते॥ ग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र.शां.प्र. हशद्देनग्रहाधिदेवताप्रत्यधिदेवताश्चलक्ष्यंते॥ आदित्यपदेनरुद्रास्त्रपिलक्ष्यंते॥तेषामपिसर्वग्रहाहुतसंख्यांतरव
॥४७॥ चनेनसंस्थापनोक्तेः॥स्वमंत्रतइति॥स्वस्वशाखायविहितत्तद्देवताप्रकाशकमंत्रैः॥सार्वविभक्तिकत्वात्तसिः॥होमचतुष्टयमि
ति॥होमानांचबहुत्वेपिवेदचतुष्टयसंबंधाद्धोमचतुष्टयमित्युक्तं॥अयंचहोमः प्रयोगेवक्ष्यमाणोग्रहादीनांवनस्पतं
तानांस्वस्वशाखोयैस्तत्तल्लिंगकैर्मंत्रैः प्रतिदैवतमष्टोत्तरशतसंख्याकोऽष्टाविंशतिसंख्याकोवाकार्यः॥चतुर्वर्गचिं
तामणौतु॥नवग्रहनवाधिदेवतानवप्रत्यधिदेवताविनायकादयःपंचकोवाकार्यः॥चतुर्वेदाद्योलोकपालादश्राव
सवोष्टौरुद्राएकादशद्वादशादित्याःसप्तमरुद्गणाब्रह्मादयःपंचेतिग्रहादिवनस्पत्यंतानांपंचाशीतिसंख्याकानांदेव
तानांप्रत्येकंद्वादशद्वादशाहुतिहोमेनप्रतिकुंडंविंशत्युत्तरंसहस्रमाहुतीनांसंपादनीयं॥तत्राप्यष्टानांवसूनामेकादशा
रुद्राणांद्वादशादित्यानांसप्तमरुद्गणानांप्रत्येकंतत्तत्प्रकाशकमंत्राभावात्प्रणवादिचतुर्थीस्वाहांतैः स्वस्वनामभिरे
व॥ॐ धरायस्वाहा॥ॐ ध्रुवायस्वाहेत्यादिभिर्जुहुयात्॥अन्येषांवैदिकैर्मंत्रैर्होमःकार्यइत्युक्तं॥अन्येतुवस्वादीनां राम
मष्टादिसंख्याकानांवस्वादित्वेनरूपेणदेवतात्वं॥नतुधराध्रुवइत्यादिरूपेणदेवतात्वं॥ततश्चवस्वादिप्रकाशका ॥४७॥
नांप्रयोगेवक्ष्यमाणानांवैदिकमंत्राणांसद्भावात्तैरेवमंत्रैर्वस्वादीनांप्रतिमंत्रमष्टोत्तरशतमष्टाविंशतिवाहुतीर्जुहु

यादित्याहुः॥ताप्यानिसूक्तानितथैवतेषामनुक्रमेणैवयथास्वरूपंजाप्यानिऋत्विग्भिरितिशेषः॥सूक्तानितुतत्त
च्छाखासुक्रमपठितैकदेवतामंत्रसमुदायाः॥तेषांग्रहादीनामनुक्रमेण॥यथास्वरूपंदशांशंपंचपंचर्चमित्यादित
त्तत्स्वरूपमनतिक्रम्येत्यर्थः॥होमावसानेकृततर्पणश्चदेशग्रहेगृहीत्वाबलिंगंधधूपैः॥आवाहयेल्लोकपतीन्मंत्रमे
णामंत्रैरमीभिर्यजमानयुक्तैः॥होमावसाने।पूर्णाहुतेःप्राचीनकर्मकलापांते॥कृततर्पणादः ब्रह्मांतर्भावितणप
र्थःप्रयोगः॥कारिततर्पणादइत्यर्थः॥अमीभिर्वक्ष्यमाणैः॥तेचमंत्राः॥ एत्येहिसर्वामरसिद्धसाध्यैरित्यादिसत
तंशिवायेस्तताः त्रैलोक्यपानिभूतानीत्यादिमुद्रान्विताइत्यंताश्च॥प्रयोगेवक्ष्यंते॥अत्रेंद्रादीनांबलिदानानंतरं
ईशान्यांदिशिमंडलंकृत्वातत्रैवत्रैलोक्यपानीत्यादिसार्द्धश्लोकद्वयेनभूतेभ्योबलिंदद्यादितिसंप्रदायः॥इत्यावा
त्यसुरान्ध्यानुलिप्तोहेमभूषणां॥कुंडलानिचरत्नानिहेमानिकटकानिच॥तथांगुलीयविज्ञाणिवासांसिशय
नानिच॥दिग्गुणोगुरवेदद्याद्भूषणाच्छादनादिकं॥आवाह्यसत्त्वगणमावाहनंकारयित्वेअथ॥उभयोरावाहनयोः
समानकर्तृकत्वनियमात्॥जयेयुःशांतिकाध्यायंजापकाःसर्वतोदिशं॥अपंशांतिकाध्यापजपोविनियोगहोन
मारभ्याधिवासनकर्मसमाप्तिपर्यंतोज्ञेयः॥उपोषिताततःसर्वेकृत्वैवमधिवासनं॥एवमधिवासनंकृत्वाउपोषिताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ सर्वैवसेयुरितिशेषः॥उपवासाच्छक्तौनक्तंभुक्तंपायो॥उपवासोभवेवमशक्तौनक्तमप्युच्यतेति॥नक्तंनक्तंभोजनं॥इ
॥४१॥ दंचाधिवासनमप्यधिककुर्यादितावैष्ण्यरोगादिनावैकल्पेवासद्यएवकुर्यात॥सद्योधिवासनंकुर्याद्व्यग्रोवा
विकलोक्षवदितिस्मृतेः॥अथप्रातःकृत्यमुक्तंतत्रैव॥आद्यंतेचमध्येचकुर्याद्ब्राह्मणवाचनम॥ब्राह्मणवाचनं
स्वस्तिवाचनं॥आरोहकर्मोपक्रमे॥अंते॥दानांतोधिवासनांते॥अतश्चाधिवासनांतेप्रातःहोमजपादिकर्मोपक्रमा
त्प्राक्ब्राह्मणवाचनमितिसिद्धं॥ततोमंगलशब्देनस्नापितोवेदपुंगवैः॥त्रिःप्रदक्षिणमाहृत्यगृहीतकुसुमांजलिः
॥शुक्लमाल्यांबरोभूत्वातांतुलामभिमंत्रयेत॥इदंचस्नपनंकुंडसमीपस्थितकलशोदकैर्ग्रहवेदिसंनिहितक
लशोदकैश्चसुराक्तवसादिभिर्मंत्रैर्यजमानस्यकार्यं॥तेचमंत्राःप्रयोगेवक्ष्यंते॥तुलाभिमंत्रणमंत्रास्तु॥नमस्तेस
र्वदेवानामित्यादिअस्मात्संसारसागरादित्यंताःप्रयोगेभिधास्यंते॥तत्रैव॥पुण्यकालेसमासाद्यकृत्वैवमधिवासनं॥
पुनःप्रदक्षिणांकृत्वातांतुलामारुहेद्बुधः॥सखड्गचर्मकवचःसर्वाभरणभूषितः॥धर्मराजमथादक्षिणांकृत्वातांतु
लामारुहेद्बुधः॥सखड्गचर्मकवचःसर्वाभरणभूषितः॥धर्मराजमथादायहैमंसूर्येणसंयुतं॥कराभ्यांबद्ध राम॰
मुष्टिभ्यामास्तेपश्यन्हरेर्मुखं॥पुण्यकालेग्रहणावनसंक्रांतिव्यतीपातादिरूपम॥समासाद्यप्राप्यसत्वरंकृत्वा॥ ॥४१॥

उत्तरफलकेतुलामारुह्यसुवर्णोनिर्मितेधर्मराजसूर्यप्रतिमेमुष्टिद्वयांतर्गृहीत्वातुलामध्यावलंबितस्यगोविंदस्यमु
खंपश्यन्पश्चादासीनेतितांतुलामारुहेदित्यादेरर्थः॥इदंचोत्तरफलकेतुलारोहणं॥दक्षिणोनसुवर्णस्याङ्गत्तरेणनराधि
पइतिगोपथब्राह्मणवाक्याद्रूपं॥धर्मराजप्रतिमाचतुर्भुजामहिषारूढादंडपाशधराकार्या॥सूर्यप्रतिमातुद्विभुजा
पद्मासनाभयवरदधारिणीकार्या॥एतेचक्रमेणवामदक्षिणमुष्टिभ्यांग्राह्ये॥सौवर्णौधर्मराजंतुसव्येकृत्वाकरेततः॥
भास्करंदक्षिणेचैवमुष्टिंबध्वप्रयत्नतइत्युक्तेः॥ततोपरेतुलाभागेन्यसेयुर्द्विजपुंगवाः॥समममभ्यधिकंद्रव्यंकांचनंच
तिनिर्मलं॥यजमानाधारतुलाफलकादन्यस्थितशिक्यफलके॥अत्रतत्तद्दानांतर्यबोधनाद्यजमानारोहणानंतरं
शिक्यांतरेद्रव्यप्रक्षेपइतिगम्यते॥अथर्वणगोपथब्राह्मणेतु॥सशस्त्रःसन्निरस्त्राणःसर्वाभरणभूषितः॥सुवर्णम
यतःकृत्वापश्चात्तोल्पेनराधिपइतिद्रव्यप्रक्षेपानंतरंयजमानारोहणमुक्तं॥एवंविरोधेउभयोस्तुल्यबलत्वादैच्छिको
विकल्पः॥पुष्टिकामस्तुकुर्वीतभूमिसंस्थंनराधिपः॥गोदोहनेनप्रभुकामस्यप्राप्यादिति॥तुष्टिकामोभूमिसंस्थंकु
र्वीतेतिगुणफलसंबंधः॥क्षणमात्रंततस्थित्वापुनरेवमुदीरयेत॥नमस्तेसर्वभूतानांसाक्षिभूतेसनातने॥पितामहेन
देवित्वंनिर्मितापरमेष्ठिना॥त्वयाधृतंजगत्सर्वंसहस्थावरजंगमं॥सर्वभूतात्मभूतस्थेनमस्तेभूतधारिणीति॥अत्रवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान॰प्र॰ शेष उक्तो वह्निपुराणे॥ कृत्वातु विधिवद्धोमं सुस्नातस्तीर्थवारिणा॥ तुलां तद्रूपविधानेन ब्राह्मणैर्वेदमंत्रकैः॥ समुपोष्या
॥५२॥ र्चयेद्देवं पीतांबरधरं हरिं॥ पश्चात्तदारुहेच्छिक्यं प्राङ्मुखो दङ्मुखोपि वा॥ ज्योतिर्विदेन मुहूर्तेन पूरयित्वा तुलां पृथक्॥ स
र्वाभरणसर्वांगः सवस्त्रासनसंयुतः॥ तत्र स्थितो मुहूर्तं स दृष्ट्वा श्लिष्टे तु समंत्रतः॥ जपेन्मंत्रं च पौराणं पुनंतु मेति वा तत्त्वा॥
पौराणां मंत्रोक्तम्॥ यथा पवित्रमतुलमपत्यं जातवेदसः॥ तथा स्वेन पवित्रेण सुवर्णा हि पुनातु मां॥ रुद्रस्य सुमहत्तेजः का
र्तिकेयस्य संभवः॥ तथा स्वेन पवित्रेण सुवर्ण॰ मां॥ पवित्रत्वाद्यथा देवैः श्रिसमाधार्यते सदा॥ तथा स्वे॰ मां॥ यथाग्निर्देव
ताः सर्वाः सुवर्णं च तदात्मकं॥ तथा स्वे॰ मां॥ यत्कृतं मे स्वकायेन मनसा वचसा तथा॥ दुष्कृतं तत्सुवर्णस्थं यातु मुक्तिपरां
शुभामिति॥ पुनंतु मेति तत्त्वा॥ पुनंतु मा देवजना इत्यादिकामकृत्रयं वा॥ मा त्वे प्रकृतमुच्यते॥ ततो वतीर्य गुरवे पूर्वमर्द्धं नि
वेदयेत॥ ऋत्विक्भ्यः परमर्द्धं तद्दद्याद्दक्षपूर्वकं॥ सर्वमर्द्धं प्रथमोपकल्पितमर्द्धं॥ अपरमवशिष्टं॥ अत्र दक्षिणादा
नस्यावश्यकत्वात्का दक्षिणा सा च कियती स्यादाकांक्षायामुक्तमिहैव॥ गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेदिति॥ ग्राममश्व
रत्नानि चेति विग्रहः॥ अत्र रत्नानीति संख्याविशेषानुक्तावपि तुलापुरुषविधायकाथर्वणगोपथब्राह्मणे॥ अश्वालंकारं कर्त्रे द राम॰ ॥४२॥
द्यात्सहस्रं दक्षिणां ग्राममवरं चेति॥ सहस्ररूपसंख्याविशेषश्रवणात्तत्संख्यासंख्येययोः परस्पराकांक्षायां नष्टाश्वद

ग्धरथन्यायेन रत्नानीत्यर्थः संपद्यते॥ तत्रापि दक्षिणाधिकरणन्यायेन समानजातीयानामेव संख्यासंबंधो युक्त
इति यथालाभमुक्ताधिकजातीयरत्नसहस्रं दक्षिणा देयेति चतुर्वर्गचिंतामणिकाराः आहुः॥ अन्ये तु ग्रामरत्नानि
निवेदयेदित्येतदन्येषामपि तुलापुरुषद्रव्यदानानामप्यनुक्तानार्थमिति व्याचक्षाणाः सर्वेषामेव दानानां सुवर्णं दक्षिणा
म्नात इति सामान्योक्तेः सुवर्णदक्षिणामाहुः॥ तत्रापि पक्षे सुवर्णस्य संख्याविशेषाकांक्षायां गोपथब्राह्मणोक्तसहस्रसं
ख्या संबंधः॥ तथा सति कृष्णलादिभिर्यथाशक्ति परिगृहीतैर्निर्वाहः कार्यः॥ अत्र ज्ञापकं हारपालकेऽप्यतुलितसुवर्ण
दन्येदेवसुवर्णदानतक्षं तुलापुरुषद्रव्यदानस्य परं पक्षद्वयमुक्तं मत्स्यपुराणे॥ प्रार्थ्य तेषामनुज्ञानं तथान्येभ्योपि दा
पयेत॥ दीनानाथविशिष्टादीन्पूजयेद्ब्राह्मणैः सह॥ तेषां गुर्वृत्विजां परितोषकरद्रव्यमानस्यार्थदत्वात् दत्त्वा प्राप्यामेभ्यो
वारज्ञापकादिभ्योऽपि दद्यादित्यपरः पक्ष इत्यर्थः॥ अत्रैव पक्षे दीनेभ्यः कोशेपरी विप्रेभ्योपि दद्यादित्यन्यः पक्ष इत्यर्थः॥ अत्र
ब्राह्मणैः सहेति दीनानाथादीनां ब्राह्मणसहयोगोक्तेर्दीनानाथादयो ब्राह्मणा एव लभ्यंते॥ दीनादिब्राह्मणानामसत्वा
परदेनैव लाभात्॥ पक्षत्रयेपि पृथक्संकल्पवाक्यानि प्रयोगे स्पष्टयिष्यंते॥ तत्रैव॥ न चिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः
॥ तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणां॥ शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलं॥ प्रोक्षितं पात्रोद्देशेन सत्तं॥ अत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान. प्र. नेनविधिनायस्तु तुलापुरुषमाचरेत॥ प्रतिलोकाधिपस्थाने प्रतिमन्वंतरं वसेत॥ विमानेनार्कवर्णेन किंकिणीजालमालि
॥४३॥ ना॥ स्तूयमानोप्सरोभिश्च ततो विष्णुपुरं व्रजेत॥ कल्पकोटिशतं यावत्तस्मिंल्लोके महीयते॥ कर्मक्षयादिह पुनर्भुवि राजरा
जोऽभूपालमौलिमणिरंजितपादपीठः॥ श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्तप्रतापजितसर्वमहीपलोकः॥ यो ददा
ति मानमपि यन्नृपतिभक्तियुक्तः कालांतरे स्मरति वाचयतीह लोके॥ यो वा शृणोति पठतीह समानरूपः प्राप्नोति धाम सपुरंदर
देवजुष्टमिति तुलापुरुषमहादानमंत्रवाक्यानि॥ ॥अथ तुलापुरुषमहादानप्रयोगः॥ तत्र तुलापुरुषमहादानं चिकी
र्षुर्यजमानः शिष्टाचारादधिवासनदिनात्पूर्वेद्युः कृतैकभक्तादिनियमः॥ परेद्युः प्रातः कृतनित्यक्रियोऽहतवासाः प्राग्दक्
प्रवणे गोमयोपलिप्ते भूभागे शुभासने प्राङ्मुखो तर्जनीतः सकुशोपग्रहपवित्रपाणिरुपविश्य विघ्नेशं स्मृत्वा द्विराचम्य
प्राणानायम्य देशकालादि संकीर्त्य सकलपापोपशमनपूर्वकसर्वमन्वंतरकालावच्छिन्नसर्वलोकपालस्थानाधिकरण
कनिवासोत्तरकालभूसुरगणाधिष्ठितकल्लरणानकस्किंकिणीगणमंडितार्कवर्णविमानवरणाकवैकुंठभुवनगम
नानंतरकल्पकोटिशतावच्छिन्नतल्लोकभोगोपभोगोत्तरकालाखिलभूपालमौलिमाणिक्यमालोपरंजितचरणपीठत्ववि दान.
शेषितराजराजत्वप्राप्त्युत्तरकालश्रद्धान्वितयज्ञसहस्रयाजित्वप्रदीप्तप्रतापनलाशेषमहीपालविजयकामो विष्णुप्री ॥४३॥

तिकामो वा श्वस्तुलापुरुषमहादानमहं प्रतिपादयिष्य इति कृतसंकल्पश्चिकीर्षिततुलापुरुषमहादानविघ्नोपघातार्थं गो
विंदं गणपतिं विनायकानां पूजनमहं करिष्य इति संकल्प्य पृथक् पृथक् तान्यथाविभवं संपूज्य तज्जाय ह्रणायत्रीं च्चा
लरणाय स्थ क्लावधिकान्वेद उन्मुख्यानुपवेश्य गंधवस्त्रपुष्पादिभिः संपूज्य तुलापुरुषमहादाने भवद्भिस्तया प्रतिपादयिष्य
इत्युक्त्वा तैः प्रतिपादयेत्यनुज्ञातो गौर्यादिषोडशमातृकापूजापूर्वकं नांदीश्राद्धं विदध्यात॥ तत्र मातृकापूजोच्यते॥
कृतप्रक्षालितकरचरणः स्वाचांतः कुशपाणिः प्रागवस्थासनेोपविष्टः कुशयवजलपाणिरद्येत्यादिदेशादिकीर्तनांते
ते प्रारब्धतुलापुरुषमहादानांगभूतं गणपतिसहितषोडशमातृपूजनमहं करिष्य इति संकल्प्य संनिहितपूजोपकरण
ः प्रतिमास्वक्षतपुंजेषु रेखासु वा ताः पूजयेत॥ ॐ भूर्भुवः स्वरित्युक्त्वा भगवति गौरि इहागच्छ सावाल्ये सतिष्ठेति स्थापयेत
॥ एवं पद्मे। शचि। मेधे। सावित्रि। विजये। जये। देवसेने। स्वधे। स्वाहे। मातरः। लोकमातरः। धृते। पुष्टे। तुष्टे। आत्मकुलदेव
ते। गणपते। इत्येता गणपत्यंताः प्रत्येकमावाह्य स्थापयेत॥ मातरो लोकमातर इत्यत्र गणगच्छत इह तिष्ठतेति प्रयोगवि
शेषः॥ ततः स्वस्वशाखीयैः प्रतिष्ठामंत्रैः प्रतिष्ठाप्य गौर्यै नमः पद्मायै नम इत्यादिभिः प्रणवादिचतुर्थीनमोंतैः स्वस्वनाममंत्रै
रासनार्घ्यपाद्याचमनीयमधुपर्कपुनराचमनीयस्नानवस्त्रोत्तरीयाचमनीयगंधपुष्पधूपदीपनैवेद्यतांबूलदक्षिणादिभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ शान४प्र० रुप॥ चौरैः संपृक्तपंकेन चिरप्रात्रेण विलीनं घृतं सगुडं हस्तेनादाय ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि स
॥४४॥ हस्रधारं॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वेति यजुर्मंत्रेण मातृणां मुखपरिसिंचनं च तिस्रो वा धारा॥
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वेति यजुर्मंत्रेण मातृणां मुखपरिसिंचनं च तिस्रो वा धारा॥ देवस्त्वा
सविता पुनातु वसोः पवित्रेण शतधारा दक्षिणदिग्भागुत्तरापवर्गा पश्चिमदिग्भागे प्रागपवर्गं वा पातयेत॥ ताश्च य
राय यजमानः शिरसि सपत्नीकोंजुलीः कृत्वा प्रतीच्छेत॥ अत्र मातृगणदेवतापक्षे पूर्वप्रयोगस्य गौर्यादिकुलदेवतं
ताः संबुध्यं ता उच्चार्य गणपतिसहिता इहागच्छत इत्यावाह्य स्थापयित्वा प्राग्वत्प्रतिष्ठाप्य॥ ॐ गौर्यादिमातृभ्यो गणप
तिसहिताभ्यो नम इति मंत्रेण प्राग्वदुपचारान् समर्प्य तथैव वसोर्धारां कुर्यादिति मातृपूजाप्रयोगः॥ ॥अथाभ्युदयि
कश्राद्धप्रयोगः॥ तत्र कालः पूर्वाह्णः॥ प्रदक्षिणमुपचाराः कार्याः॥ पित्र्यमंत्रवर्जं जपः॥ ऋजवो दर्भाः॥ यवैस्तिलार्थः
॥ दधिबदराक्षतमिश्राः पिंडाः संपन्नमिति तृप्तप्रश्नः॥ सत्यवसुसंज्ञकौ विश्वेदेवौ॥ मातृपितामहीप्रपितामह्यो नांदी
मुख्यः पितृपितामहप्रपितामहा नांदीमुखाः मातामहप्रमातामहवृद्धप्रमातामहा नांदीमुखा देवाः॥ अत्रैकैकदैव राम०
तो द्वौ द्वौ नयुग्मब्राह्मणाह्वानं॥ सर्वकर्म सव्येनैव कार्यं॥ केचिदिदमपिंडमाहुः॥ सत्यवसुसंज्ञकानां विश्वेषां देवानां नां ॥४४॥

दीमुखानां स्थाने इत्यादिना प्रयोगेण यथाशाखं नांदीश्राद्धं कुर्यात॥ जीवत्पितृकस्तु॥ पितुर्मातुश्चोद्देशेन कुर्यात
॥ पित्रादिषु त्रिषु जीवत्सु न कुर्यात् तानेव भोजयेदित्याभ्युदयिकश्राद्धप्रयोगः॥ ॥अथ पुण्याहवाचनं॥ तत्र बौधा
यनः॥ ब्राह्मणानन्नेन परिविष्य पुण्याहं जपित्वा॥ एकैकामिति पुण्याहामेसादिभिः संबध्यते॥ एकैकामाशिष
मिति शेषः॥ तच्चैवं॥ गंधमाल्यवस्त्रादिभिर्यथाशक्त्यर्चितान् प्राणान् ब्राह्मणाननुदङ्मुखानुपवेश्य स्वयमाचार्यो य
जमानेनान्वारब्धः प्राङ्मुखो गंधपुष्पादिभिरर्चितं जलपूर्णकलशं करण्यामालभ्य भोब्राह्मणाः अस्य कर्मणः पुण्या
हं भवंतो ब्रुवंतु॥ ॐ स्वस्ति भवंतो ब्रुवंतु॥ ॐ ऋद्धिं भवंतो ब्रुवंतु॥ इत्येकैकामाशिषं त्रिस्त्रिर्वाचयेत॥ ब्राह्मणास्तु ॐ
पुण्याहं॥ ॐ स्वस्ति॥ ॐ ऋध्यतामिति यथाक्रमं प्रत्याशिषं त्रिस्त्रिः प्रब्रूयुरिति वाक्यार्थः॥ ॐकारपूर्वकमिति ब्राह्म
णसजातीययजमानविषयं॥ अत एव व्यासः॥ पुण्याहवाचनं चैव ब्राह्मणस्य विधीयते॥ एतदेव निरोंकारं कुर्यात् क्ष
त्रियवैश्ययोः॥ सोंकारं ब्राह्मणो कुर्यान्निरोंकारं महीपती॥ उपांशु च तथा वैश्ये स्वस्तिमद्दैवकीर्तयेदिति॥ अत्र वि
शेषमाह सरवः॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत॥ कौम्भकर्माणि मांगल्ये संग्रामाद्भुतदर्शने इति॥ वि
स्तरेण पुण्याहवाचनमुक्तमाश्वलायनबह्वृचपरिशिष्टे॥ अथ निष्कृते जानुनि मंडलः कमलमुखसदृशांजलिं शिरसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰ प्र॰ धायदक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन
॥५५॥ पुण्याहं दीर्घमायुरस्तु ॥ शिवा आपः संतु सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु गंधाः पांतु सुमंगल्यं चास्तु ॥ पुष्पा
णि पांतु सौश्रियमस्तु ॥ तांबूलानि पांतु ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु आरोग्यमस्तु ॥ दीर्घमायुः शांतिः पुष्टिस्तुष्टिः
श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रव
र्तंते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बह्वृषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये
॥ वाच्यतां ॥ भद्रं कर्णेभिः॰ यजुः ॥ द्रविणोदा द्रविणसस्तु॰ यजुः ॥ सविता पश्चातात्॰ यजुः ॥ नवो नवो भवति॰ यजुः
॥ उच्चा दिवि॰ यजुः ॥ एता ऋचः पुण्याहे उक्ताः व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां म
नः समाधीयतां ॥ समाहितमनसः स्मः ॥ प्रसीदंतु भवंतः ॥ प्रसन्नाः स्मः ॥ शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥
अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ स्वस्ति शिवं कर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ पुत्रसमृद्धि प्रम॰
रस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ अनिष्टनिरसनमस्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरे कर्मण्यविघ्न ॥५५॥
मस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां ॥ तिथिकरणमुहूर्तनक्षत्रसंपदस्तु ॥ ति

थिकरणमुहूर्तनक्षत्रे यह लग्नाधिदेवताः प्रीयंतां ॥ तिथिकरणे मुहूर्तनक्षत्रे सग्रहे सदैवते प्रीयेतां ॥ दुर्गापांचा
ल्यौ प्रीयेतां ॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां ॥ अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां ॥ विष्णुपुरोगा ऋषिगणाः
प्रीयंतां ॥ श्रीमाहेश्वरीपुरोगा मातरः प्रीयंतां ॥ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां ॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां ॥
ब्रह्म च ब्राह्मणाश्च प्रीयंतां ॥ श्रीसरस्वत्यौ प्रीयेतां ॥ श्रद्धामेधे प्रीयेतां ॥ भगवती कात्यायनी प्रीयतां ॥ भगवती माहे
श्वरी प्रीयतां ॥ भगवती ऋद्धिकरी प्रीयतां ॥ भगवती वृद्धिकरी प्रीयतां ॥ भगवती पुष्टिकरी प्रीयतां ॥ भगवती तुष्टिक
री प्रीयतां ॥ भगवंतौ विघ्नविनायकौ प्रीयेतां ॥ भगवान्विघ्नविनायकः प्रीयतामिति केचित्पाठः ॥ सर्वाः कुलदेवताः
प्रीयंतां ॥ सर्वाः ग्रामदेवताः प्रीयंतां ॥ हताश्च ब्रह्मद्विषः ॥ हताः परिपंथिनः ॥ हताश्च विघ्नकर्तारः ॥ शत्रवः परा
भवं यांतु ॥ शाम्यंतु घोराणि ॥ शाम्यंतु पापानि ॥ शाम्यंत्वीतयः ॥ शुभानि वर्द्धंतां ॥ शिवा आपः संतु ॥ शिवा ऋतवः संतु
॥ शिवा ऋतवः संतु ॥ शिवा अग्नयः संतु ॥ शिवा आहुतयः संतु ॥ शिवा वनस्पतयः संतु ॥ शिवा अतिथयः संतु ॥ अहो
रात्रे शिवे स्यातां ॥ निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यंतां ॥ योगक्षेमो नः कल्पतां ॥ शुक्रांगारकबु
धबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां ॥ भगवान्नारायणः प्रीयतां ॥ भगवान्पर्ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान॰प्र॰ म्नः प्रीयतां॥भगवान्स्वामी महासेनः प्रीयतां॥पुण्याहकालान्वाचयिष्ये वाच्यतां॥उद्गातेव शकुने साम गायसि ब्रह्मपु
॥५६॥ त्र इव सवनेषु शंससि॥वृषेव वाजी शिशुमतीरपीत्य॥विश्वतो नः शकुने भद्रमावद सर्वतो नः शकुने भद्रमावद॥
याद्यापप्रजापतिप्रसादेन याऽपापुरेवं बललक्ष्मीः पुण्यामवंतल्लक्ष्मीं समावयति पुण्यां लक्ष्मीं स स्कुरुते॥यत्पुण्यं नक्ष
त्रं तद्धकुर्वीतोपव्युषं॥यदा वै सूर्य उदेति॥अथ नक्षत्रं नैति॥यावति तत्र सूर्यो गच्छेत॥यत्र जघन्यं पचेपत। तावत्कुर्वी
त॥यत्कारी स्यात् पुण्याहस्यैव कुरुते॥ॐ पुण्याहं भवंतो ब्रुवंतु॥तानि वा एतान्यम नक्षत्राणि॥यान्येव देवनक्षत्राणि॥
तेषु कुर्वीत यत्कारी स्यात् पुण्याहस्यैव कुरुते॥ॐ पुण्याहं भवंतो ब्रुवंतु॥ॐ पुण्याहं॥स्वस्तये वायुमुपब्रवामहे॥भवं
तु नः॥आदित्यं तु हयनीयः पथ्यमये वेतः स्वस्त्या प्रयंति पथ्यं स्वस्तिमभ्युघंति।स्वस्त्येवेमं प्रयंति स्वस्त्युघंति स्वस्त्युपघंति
।स्वस्ति न इंद्रः दधातु॥श्रेष्ठो देवास व वः सोमास भ्यवतस्त्वोदेवीरजराः अविषाः तेयत्तं पातु रजसः पुरस्तात्स वस्तरो(?)
मम तं स्वस्ति॥ॐ स्वस्ति भवंतो ब्रुवंतु॥ॐ आयुष्मते स्वस्ति॥ऋध्याम स्तोमं सनुयाम॥सर्वामृद्धिमृध्युयामिति॥ऋध्यास्मा
हव्यैर्नमसोपसद्य मित्रं देवं मित्रधेयं नो अस्तु अनूराधान्हविषा वर्धयंतः शतं जीवेम शरदः सवीराः॥त्रीणि त्रीणि से राम॰
देवानामृद्धिर्त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः॥ऋध्याम वर्त ह्यो एषु लोकेषु प्रतितिष्ठति॥ॐ ऋद्धिं भ ॥५६॥

वंतो ब्रुवंतु॥ॐ ऋध्यतां॥श्रिये जातः श्रिय एव वेद॥यस्मिन्ब्रह्माभ्यजयत्सर्वमेतदमुं च लोकमिदमूह सर्वं॥तन्नो नक्षत्रमि
जिद्विजित्य श्रियं दधात्वहृणीयमानं॥अहे बुध्निय मंत्रं मे गोपाय॥यमृषयस्त्रैविदा विदुः॥ऋचः सामानि यजूंषि
सा हि श्रीरमृता सतां॥ॐ श्रीरस्त्विति भवंतो ब्रुवंतु॥ॐ अस्तु श्रीः॥पुण्याहं समृद्धिरस्तु॥भगवान्प्रजापतिः प्रीयतां
मिति हेमाद्र्यादिनिबंधोक्तं पुण्याहवाचनं॥ ॥ततो यजमानो गुरुश्च वेदात्तविद्दिसाधुकुलक्षणान्मुदमुखमाचार्यं
वस्त्रद्वयहेमसूत्रकुंडलकेसरकंठाभरणमुद्रिकादिभिः संपूज्य अस्मिन्नुलापुरुषमहादानकर्मणि गुरुत्वेन
त्वामहं वृणे इति वृणुयात॥वृतोस्मीति वदेत॥एवमेव ऋग्वेदिनौ द्वौ विप्रौ यजुर्वेदिनौ द्वौ सामवेदिनौ अथर्ववे
दिनौ च द्वौ वृणुयात॥गुरुपदस्थाने ऋत्विक्त्वेनेति विशेषः॥ततोऽष्टौ जापकान्द्वौ द्वारपालकौ अथ सर्वं वृ
णुयात॥अत्र जापकत्वेन द्वारपालकेनेति विशेषः॥ततो वरणक्रमेण मधुपर्कपूजनं कार्यं॥यथाक्रमं ऋत्वि
कृतस्वशाखोक्तं मधुपर्कं तस्य कुर्यात॥तत्र ऋग्वेदिना मधुपर्कविधिरुच्यते॥कर्ता प्रक्षालितकरचरणः स्वाचांतः
प्राङ्मुखः सकुशोपग्रहपाणिः पीठोपविष्टो विहितः संभृतसंभारः सन्नत्र हंता नामाचार्यर्त्विजां मधुपर्केणार्हणां
करिष्ये इति संकल्प्य पंचविंशतिकुशनिर्मितं विष्टरं गृहीत्वार्घ्यपनिवेदयेत् विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० ।ततोर्घ्यः प्रतिगृह्यतामित्युक्त्वा॥ अहंवर्ष्मेतिवामदेवऋषिरनुष्टुप्छंदः। लिंगोक्तादेवताउपवेशनेविनियोगः।
॥५७॥ अहंवर्ष्मसजातानांविद्युतामिवसूर्यः॥ इमंसमभितिष्ठामियोमाकश्चाभिदासतीत्यनेनमंत्रेणोदगग्रेविष्टरउप
विशेत्॥ ततःकर्ताभ्युक्षपात्रेपाद्यमुदकंगृहीत्वापाद्यंपाद्यंपाद्यंप्रतिगृह्यतामित्युक्त्वाप्रतिगृह्णामीत्युक्तोऽर्घ्यमुद
कमर्घ्यंसांजलावासिंचेत्॥ ततःकर्ताचमनपात्रंगृहीत्वाआचमनीयमाचमनीमाचमनीयंप्रतिगृह्यतामित्युक्त्वा
प्रतिगृह्णामीत्युक्तेतत्पात्रंनिवेदयेत्॥ अथार्घ्यस्तदेकदेशंगृहीत्वाआचमनीयमाचमनीमाचमनीयंप्रतिगृह्यता
मित्युक्त्वाप्रतिगृह्णामीत्युक्तेतत्पात्रंनिवेदयेत्॥ अथार्घ्यस्तुऽमृतोपस्तरणमसीतिपीत्वाःस्पेनोस्पेनोदकेनभु
ध्मर्थमाचामेत्॥ ततआचांतोपार्घ्यायदधिमधुगर्भंदधिघृतगर्भंवाकांस्यपात्रंमहताकांस्यपात्रेणापिहितंकराभ्यामा
दायमधुपर्कोमधुपर्कोमधुपर्कःप्रतिगृह्यतामितिनिवेदयेत्॥ तंचानीययजमानमर्घ्योमित्रस्यत्वाचक्षुषाप्रतिक्ष
इतिप्रक्षपयित्वा॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीत्यंजलिनाप्रतिगृह्यसव्यकरे
निधायपिधानपात्रमपनीयमधुवातेतितस्यराहूगणोगोतमऋषिः। गायत्रीछंदोविश्वेदेवादेवतामधुपर्कालोड एम०
नेविनियोगः॥ मधुवाताइत्यादिनागावोभवंतुइत्यंतेनतृचेनमंत्रेणांगुष्ठानामिकाभ्यांमधुपर्कंत्रिःप्रदक्षिणमालोडये ॥५७॥

तस्मात्किंचिदादायवसवस्त्वागायत्रेणछंदसाभक्षयंत्वितिप्राच्यांविसृजेत्॥ पुनरादायरुद्रास्त्वात्रैष्टुभेनछंदसाभक्ष
यंत्वितिदक्षिणेविसृजेत्॥ पुनरादायआदित्यास्त्वाजागतेनछंदसाभक्षयंत्वितिपश्चिमेविसृजेत्॥ पुनरादायविश्वे
त्वादेवाआनुष्टुभेनछंदसाभक्षयंत्वितिउदीच्यांविसृजेत्॥ मध्यादादायभूतेभ्यस्त्वेतित्रिरूर्ध्वमुत्क्षिप्यमधुपर्कैकदे
शमादायतत्संत्रभूमौनिधायविराजोदोहोसीतिप्रथमंप्राश्नीयादाचम्य॥ पुनर्गृहीत्वाविराजोदोहमशीयेतिद्विती
यंप्राश्याचम्य॥ पुनरादायमयिदोहःपद्यायैविराजइतितृतीयंप्राश्याचम्य॥ शेषमंतेवासिनेउच्छिष्टाधिकारिणेब्राह्मणा
यवादद्यात्॥ आचमनीयेनअमृतापिधानमसीत्याचम्यामोदकेनद्विराचामेत्॥ अथाचांतोदकायार्घ्याययजमानोगौर्गौ
र्गौःप्रतिगृह्यतामितितांनिवेदयेत्॥ ततोर्घ्यःप्रतिगृह्णामीत्युक्त्वामातारुद्राणामितिमंत्रेण॥ अस्यभार्गवोजमदग्निऋ
षिःत्रिष्टुप्छंदोगौर्देवतागोरुत्सर्जनेविनियोगः॥ मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः। प्रनुवोचं
चिकितुषेजनायमागामनागामदितिंवधिष्टेतिमंत्रंपठित्वा ॐ मुत्सृजतेतिमंत्रेणतामुत्सृजेत्॥ इत्यृग्वेदिनांमधुपर्कविधि
ः॥ ॥अथयजुर्वेदिनांमधुपर्कः॥ तत्रयजमानोर्घ्यायासनमाहार्यमिह॥ साधुभवानास्तामर्चयिष्यामोभवंतमितिततोर्घ्यः
अर्घ्यंयेतिब्रूयात्॥ अथयजमानादन्येनविष्टरोविष्टरोविष्टरःप्रतिगृह्यतामित्यावेदितेयजमानस्त्वहंमीविष्टरमर्घ्यह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म॰प्र॰ स्तं दद्यात्॥ अथार्घ्यस्तस्मै विष्टरं प्रतिगृह्योदगग्रमासनेनिधाय वर्ष्मोऽस्मीत्यथर्वण ऋषिः॥ अनुष्टुप्छंदः॥ विष्टरो
॥४८॥ देवता विष्टरोपवेशने विनियोगः॥ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः॥ इदं तमभितिष्ठामि यो मा कश्चाभिदास
तीत्यनेन मंत्रेण तदुपरि पूर्वाभिमुख उपविशेत्॥ ततः सर्ववदन्येन पाद्यं पाद्यं पाद्यं पाद्य प्रतिगृह्यतामित्यावेदिते य
जमानकोऽस्य जलपूर्णपाद्यपात्रमर्घ्यहस्ते निवेदयेत्॥ स चाददायतेन जलेन दक्षिणं स्वपादं प्रक्षालयेत्॥ तन्मंत्रः॥
विराजो दोह इतिमंत्रस्य प्रजापतिऋषिः यजुः आपो देवता पादप्रक्षालने वि॰॥ विराजो दोहोऽसि विराजो दोहमशीय
मयि पाद्यायै विराजो दोह इति॥ पुनरनेनैव मंत्रेण वामं पादं प्रक्षालयेत्॥ तदनंतरं पूर्ववदन्येन विष्टरो विष्टरो वि
ष्टरः प्रतिगृह्यतामित्यावेदिते यजमानस्तस्मै द्वितीयं विष्टरमर्घ्याय दद्यात्॥ अर्घो दत्तं विष्टरमादाय वर्ष्मोऽस्मीति मंत्रे
ण पादयोरधस्तादुदगग्रं विष्टरं निधाय तदुपरि पादौ स्थापयेत्॥ ततोऽन्येनार्घोऽर्घोऽर्घः प्रतिगृह्यतामित्यावेदिते यजमा
नेन तस्मै दत्तमर्घं मंत्रेण गृह्णीयात्॥ आपस्थेतिमंत्रस्य प्रजापतिऋषिः यजुः॥ आपो देवता अर्घग्रहणे वि॰॥ आपस्थ राम॰
युष्माभिः सर्वान्कामानवाप्नवानीति प्रतिगृह्य मस्तकपर्यंतमानीय समुद्रं व इत्यस्याथर्वणऋषिः अनुष्टुप्छंदः आपो दे ॥४८॥
वता॥ अभिमंत्रणे वि॰॥ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टा अस्माकं वीरा मा परासेचि मत्पय इति॥ अथा

न्येनाचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति आवेदिते यजमानेन तस्मै दत्तमाचमनीयमर्घ्यः प्रतिगृह्य
दक्षिणहस्तेनोदकमादायाचमेत्॥ तन्मंत्रः॥ आमागन्यशसेतिमंत्रस्य परमेष्ठिऋषिः बृहतीछंदः॥ आपो देवता॥ आ
चमने विनि॰॥ आमागन्यशसा संसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति मंत्रेण
सकृदाचम्य॥ ततः स्मार्ताचमनं कुर्यात्॥ ततो दधिमधुघृतपूर्णं कांस्यपात्रं कांस्यपात्रांतरेणापिहितं कर्त्रा गृहीत्वा
न्येन मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामित्याश्राविते सति यजमानेन तस्मै मधुपर्केण निवेदितोऽथार्घ्यो य
जमानहस्तास्थितमेव मधुपर्कपात्रमुद्घाट्येक्षेत मित्रस्यत्वेतिमंत्रस्य बृहस्पतिऋषिः यजुः सविता देवता मधुपर्के
वीक्षणे वि॰। मित्रस्यत्वा चक्षुषा प्रतीक्ष इति मंत्रेण॥ ततः प्रतिगृह्णाति देवस्यत्वेतिमंत्रस्य प्रजापतिऋषिः गायत्रीछं
दः सविता देवता मधुपर्कग्रहणे वि॰॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रे
ण प्रतिगृह्य सव्यपाणौ कृत्वा दक्षिणहस्तस्यानामिकया मधुपर्कं प्रादक्षिण्येन नमः श्यावास्यायेत्यस्य प्रजापतिऋषिः
यजुः सविता देवता॥ मधुपर्कालोडने विनियोगः॥ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामीति सकृदालोड्या
नामिकांगुष्ठेन च तस्मै मधुपर्कैकदेशं भागत्रयं भूमौ क्षिपेत्॥ ततोऽर्घी मधुपर्कैकदेशं दक्षिणहस्तेन गृहीत्वा पात्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान·प्र·वि मत्मैनिधायमन्मधुनेतिप्राश्नीयात्॥यन्मधुन इतिमंत्रस्यकुत्सऋषिः जगतीछंदः।मधुपर्कोदेवताप्राशने विनि॰॥
॥५९॥ यन्मधुनो मधव्यं परमं रूपमन्नाद्यं॥तेनाहं मधव्येन परमेण॥अन्नाद्येन परमो मधव्यो अन्नादोऽसानीति।पुनरनेनैव मंत्रे
ण द्वितीयवारं प्राशनेनैव मंत्रेणोच्छिष्ट एव तृतीयवारं प्राश्नीयात्॥मधुमतीभिस्तिसृभिस्तिसृभिर्वा प्रत्यृचं त्रिः प्राशनं
॥मधुपर्कशेषं पुत्रायांतेवासिने वोत्तरत आसीनाय दद्यात्स्वयं वा सर्वं प्राश्नीयात्प्राग्वा संचरे निनयेत्॥तत आचम्य स्मार्त
विधिना॥इंद्रियाणि स्पृशेत्॥तन्मंत्रस्तु॥वाङ्म इत्यादीनां प्रजापतिऋषिः सर्वाणि यजूंषि।लिंगोक्ता देवता इंद्रियाभि
मर्शने विनि॰॥वाङ्म आस्येस्त्विति मुखं॥नसोर्मे प्राणोस्त्विति नासाछिद्रद्वयं॥अक्ष्णोर्मे चक्षुरस्त्विति पाक्षिणी॥कर्णयो
र्मे श्रोत्रमस्त्विति कर्णौ॥बाह्वोर्मे बलमस्त्विति बाहू॥ऊर्वोर्मे ओजोस्त्वित्यूरू॥अरिष्टानि मेंगानि तनूस्तन्वा मे सह संत्वि
ति सर्वाण्यंगानि स्पृशेत्॥ततो यजमानः आचांतोदकाय शस्त्रमादाय गां निवेदयेत्॥गौर्गौर्गौरिति॥ततोर्घ्यः माता रुद्राणा
मितिमंत्रस्य ब्रह्मा ऋषिः त्रिष्टुप्छंदः गौर्देवता।गवालंभने विनि॰॥माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृत
स्य नाभिः॥प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥मम चामुककर्मणोमुष्य यजमानस्य च नाम नी संकीर्त्य पा राम·
प्मानं हनोमीत्यालंभपक्षे ब्रूयात्॥यद्यप्यत्र सत्रकृता गवालंभ उक्तस्तथापि मधुपर्के पशुर्वा धय इति कलिवर्ज्यप्रकरणेन ॥५९॥

कलौ गवालंभः कार्यः॥किं तु त्सर्जनमेव॥कृते विवाहादन्यत्रालंभनं पाक्षिकं भवेत्॥गोरालंभनिषेधात्स्यात्सर्वत्रोत्स
र्जनं कलाविति स्मृतेश्च॥उत्सर्गपक्षे मंत्रप्रयोगो यथा॥माता रुद्राणामित्यादि विधिवत्संतपरित्वा मम चामुष्य च पाप्मा
हतः ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात्॥अनेनैव विधिना संवत्सराद्दूर्ध्वं स्व ऋत्विक् राजा स्नातकः उत्कृष्टजातिः समान
जातीर्वा सखा चयथागृह्यमिति तमर्चयेत्॥सोमेन यक्ष्यमाणस्तु संवत्सरादर्वागपि ऋत्विजो मधुपर्केणार्चयेदिति यजुर्वेदि
नां मधुपर्कविधिः॥ ॥अथ छंदोगानां मधुपर्कविधिः॥यजमानो मंडपोत्तरदेशे संयतां गां मनेनमंत्रेणोपतिष्ठेत्॥अह
र्णोतिमंत्रस्य वासिष्ठ ऋषिः निवृदनुष्टुप्छंदो धेनुर्देवता।गोरूपस्थाने विनि॰॥ॐ अर्हणा पुत्रवाससा धेनुरभवद्यमे॥
सा नः पयस्वती दुहा उत्तरा समामिति॥ततोर्हणीयः प्रत्युत्थानादिना संमानितास्तिष्ठन्नेव चतुष्कोपरि निहितमुदा समु
द्विरमजयेत्॥इदमहमिति वसिष्ठ ऋषिर्यजुः विराड्देवता आसनोपवेशने विनि॰॥इदमहमिमां पद्यां विराजमन्नाद्या
याधिष्ठामीति॥ततः कर्त्ता पंचविंशतिकुशमयौ विष्टरौ गृहीत्वा अर्हणीयाय विष्टरौ विष्टरो प्रतिगृह्यतामित्युक्त्वा दद्या
त्॥ततोर्हणीयः प्रतिगृह्णामीत्युक्त्वा तयोरेकं विष्टरं गृहीत्वा या ओषधीरिति वसिष्ठ ऋषिः अनुष्टुप्छंदः ओषध्यो दे
वता विष्टरनिवेशने विनि॰॥ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः॥तासामस्यमास्मिन्नासने छिद्रा शर्म यच्छतेति मंत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ स्नान·प्र·वि· णोदगग्रमासनेनिधायतदुपर्युपविश्यद्वितीयंविष्टरंपादयोरधोनिदध्यादनेनैवमंत्रेण॥तस्यवसिष्ठऋषिः॥अनु
॥५०॥ ष्टुपछंदः।ॐअथोदेवताअघविष्टरदेशनेवि·॥ॐयाॐषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु॥तामस्त्वर्मास्मेनूपाद
योरछिद्राःशर्मयच्छतेतिनिधायतत्रपादौस्थापयेत॥ततःकर्त्राताम्रादिपात्रस्थंदूर्वाक्षतकुसुमचंदनोपेतमुदक
मानीयपाद्यंपाद्यंपाद्यंप्रतिगृह्यतामितिब्रूयात॥ततोर्घ्यःप्रतिगृह्णामीत्युक्त्वातत्रात्मछायामवपश्यवेवतत्प्रेक्षेतानेनमंत्रे
ण॥अस्यवसिष्ठऋषिःयजुःआपोदेवतापाद्योदकावेक्षणेवि·॥ॐयतोदेवीःप्रतिपश्याम्यापस्ततोमाराद्धिरागछतिइ
ति॥अथार्घ्यःस्वयमेवपूर्वंवामपादंप्रक्षाल्यततोदक्षिणमितिक्रमेणवक्ष्यमाणमंत्राभ्यांपादौप्रक्षालयेत॥तत्राद्यस्य
वसिष्ठऋषिः।भुरिगेकाणागायत्रीछंदः॥सव्यपादोदेवता।सव्यपादप्रक्षालनेविः॥ॐसव्यंपादमवनेनिजेऽस्मिन्राष्ट्रेश्रि
यंदधेइति।द्वितीयस्यवसिष्ठऋषिः।यजुः।दक्षिणपादोदेवता॥दक्षिणपादप्रक्षालनेवि·॥ॐदक्षिणंपादमवनेनि
जेऽस्मिन्राष्ट्रेश्रियमावेशयामीति॥ततोर्घ्यएवपुनरुभौपादौप्रक्षालयेतवक्ष्यमाणमंत्रेण॥तस्यवसिष्ठऋषिःय रा·म·
जुःउभयपादौदेवता॥उभयपादप्रक्षालनेविनियोगः॥ॐपूर्वमन्यमपरमन्यमुभौपादाववनेनिजेराष्ट्रस्यऋध्या ॥५०॥
अभयस्यावरुध्येइति॥आनंतरमाचारप्राप्ताजलेकिंचिद्धिरण्यंनिधायार्घ्यस्यवारितस्मिन्नेवप्रक्षालयेत॥ततःकर्तैव

दधिदूर्वाक्षतकुसुमचंदनाद्युपेतंशंखादिपात्रस्थमुदकंगृहीत्वाऽर्घ्यमर्घ्यमर्घ्यंप्रतिगृह्यतामितिवदेत॥तदर्घ्य
ःप्रतिगृह्णामीतिगृहीत्वैकदेशंहस्तेनादायशिरसिनिक्षिपेत॥अनेनमंत्रेण॥तस्यवसिष्ठऋषिः॥भुरिगायत्रीछंदः
राष्ट्रीदेवता।अर्घ्यग्रहणेवि·॥ॐअन्नस्यराष्ट्रिरसिराष्ट्रिस्तेभूयासमिति॥ततःपात्रांतरेशुद्धमुदकंगृहीत्वाद्यप्र
तिब्रूयात॥आचमनीयमाचमनीयमाचमनीयंप्रतिगृह्यतामिति॥तदर्घ्यःप्रतिगृह्णामीतिप्रतिगृह्यानेनमंत्रेणा
चामेत॥तस्यवसिष्ठऋषिः।भुरिगेकाणागायत्रीछंदः॥आचमनीयंदेवता॥आचमनेवि·॥ॐयशोसियशोमयिधेहि
ति॥ततोयजमानःकांस्यपात्रेस्थितंदधिमधुघृतकांस्यपात्रेणापिहितंगृहीत्वामधुपर्कोमधुपर्कोमधुपर्कःप्रतिगृ
ह्यतामित्यर्घ्यायनिवेदयेत॥तदर्घ्यःप्रतिगृह्णामीत्युक्त्वातत्पात्रमादायमुद्घाट्यैकदेशंगृह्णीयात॥तन्मंत्रस्यवसिष्ठ
ऋषिः।यजुः।मधुपर्कोदेवता॥मधुपर्कग्रहणेविः॥ॐयशोसिपयशोसीति॥ततःप्राशनमंत्रस्यवसिष्ठऋषिःयजुः॥म
धुपर्कोदेवता॥मधुपर्कप्राशनेवि·॥ॐयशसोभक्षोसिश्रियंमयिधेहीतिप्रथमंकनिष्ठिकांगुष्ठाभ्यांततोनामिकां
गुष्ठाभ्यामादायत्रिधोच्चारितेमंत्रेणत्रिःप्राश्यचतुर्थंबहुतंस्मैपिबेत॥शेषमुच्छिष्टभागिनेब्राह्मणायदद्यात॥ततो
र्घ्यआचम्यगौर्गौरितिनापितेननिवेदितांगामानेयमंत्रेणोत्सृजेत॥तन्मंत्रस्यवसिष्ठऋषिः।बृहतीछंदः।गौर्देवता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ गोरुत्सर्जनेवि॰॥ॐमुंचगांवरुणपाशाद्विषंतंमेभिधेहितंजह्यमुष्यचोभयोरुत्सृजगामत्तुतृणानिपिबतूदकमि
॥५१॥ ति॥ततोर्घ्यगामनुमंत्रयेतानेनमंत्रेण॥तस्यवसिष्ठऋषिः।त्रिष्टुपछंदः।गौर्देवता।गवानुमंत्रणेवि॰॥ॐमा
तारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः।प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्टे
तीतिसामगानांमधुपर्कविधिः॥ ॥अथाथर्ववेदिनांमधुपर्कविधिः॥ततोयजमानोदर्भान्बहूनानाप्यविष्टरान्कु
र्वीतस्यर्घ्यंप्रतिवदेत॥सचार्घ्यः॥ऋतेनत्वाकर्मणासंस्नत्वामीत्येवंद्वाभ्यांप्रथमंपाद्याय।सत्येनत्वाकर्मणासंस्न
त्वामीतिद्विशाखंद्वितीयमासनार्थं॥तपसात्वाकर्मणासंनत्वामीतित्रिशाखंततोयमधुपर्कार्थमितिविष्टरत्रयंनि
मीयजमानहस्तेदद्यादनेनमंत्रेण॥ॐअतिसृष्टोद्विषयायोस्मान्द्वेष्टियंवयंद्विष्मोसाचदातुरिति॥अत्रास्यचदातु
रितियजमानमीक्षेत॥अथयजमानःपाद्यार्घ्यमुदकंगृहीत्वाःर्घ्यंप्रतिपाद्यंभोइतिनिवेदयेत॥अथार्घ्यमत्तोक्ष्यवक्ष्य
माणांमंत्रचतुष्टयेनतदभिमंत्रयेत।मंत्रास्तु॥हिरण्यवर्णाःशुचयःपावकायासुजातःसवितायास्वग्निः।याग्निंगर्भं
दधिरेसुवर्णास्तानआपःशंस्योनाभवंतु।यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति॥याअग्निंगर्भंदधि राम॰
रेसुवर्णाशिवेनमाचक्षुषापश्यतापशिवयातन्वोपस्पृशातत्वचंमे॥घृतंश्चुतःशुचयोयाःपावकास्तानआपः ॥५१॥

शंस्योनाभवंतु॥शिवेनमाचक्षुषापश्यतायशिवयातन्वोपस्पृशातत्वचंमे॥घृतम्श्चुतःशुचयोयाःपावकास्तानआ
पःशंस्योनाभवंतु॥शिवेनमाचक्षुषापश्यताप त्विति॥ततोर्घ्यंॐमयिवर्चमचतपश्चधारयाणीतिमंत्रेणपाद्योदक
कैकदेशेनदक्षिणांपादंप्रक्षाल्यॐमयिक्षत्रंचविशश्चधारयाणीतिमंत्रेणसव्यंपादंप्रक्षाल्यइमौपादाववनिक्तौ
ब्राह्मणाब्रह्मसावतं॥आपःपादावनेजनीर्द्विषंतंनिर्दहंतुमेइतिपादावनुमंत्र्यअस्यचदातुरितिमंत्रेणार्घ्यदातारमी
क्षेत॥ततोयजमानःसविष्टरमासनंभोइत्यर्घ्यायासनमाहारयति॥अथार्घ्यः॥ॐविस्त्वयरिंपृथिवीमावहामिक्षां
छूमिंब्रह्मणावावृधानां॥जनत्तेपृथिविप्रणीतामन्नभागंघृतंत्वानिनिषसमहमेइतिमंत्रेणसद्विशाखविष्टरेआसनेप्रत्य
ङ्मुखउपविशेत॥ततएकशाखविष्टरेर्घ्यःपादौप्रतिष्ठापयेत।द्वेष्टायोस्मान्द्वेष्टियंचवयंद्विष्मोस्यचदातुरितिमंत्रे
ण॥अत्रास्यचदातुरितिमंत्रभागेनदातारमीक्षेत॥ततोदाताअर्घपात्रस्थोदकंगंधपुष्पादिसहितंगृहीत्वाःर्घ्यंभो३
इत्यर्घ्यार्घ्यमावेदयेत॥ततोर्घ्यीत्राणांमुखमसिमुखमहंश्रेष्ठःसमानानांभूयासं॥ओयेमत्तास्थामतमाकृण्वतदा
सात्रस्माकंबहवोभवंतु॥अभ्वावफोमन्माप्यस्तत्वृषोभःर्भुवःस्वर्जनदोमितिमंत्रेणार्घ्यंगृहीत्वाभिमंत्र्यात्मानमभिमुखं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ होम॰प्र॰ तूष्णीं निनीय॥ तेजोऽस्यमृतमसीति तेन ललाटमालभेत॥ अथ कर्त्राचमनीयमुदकं गृहीत्वा आचमनीयं भो इत्याचमनीय
॥५१॥ मर्घ्याय निवेदयेत॥ अथार्घ्यस्तद्गृहीत्वा ॐ जीवा स्थ जीव्यासं सर्वमायुर्जीव्यासं॥ उपजीवा स्थोपजीव्यासं सर्वमा
युर्जीव्यासं संजीवना स्थ संजीव्यासं सर्वमायुर्जीव्यासं॥ इंद्रजीव स्वर्यं जीव देवा जीवा जीव्यासमहं सर्वमायुर्जीव्यासमिति
मंत्रेणाचामेत॥ ततो यजमानो मधुदधिघृतयुक्तं मधुपर्कपात्रं कांस्यपात्रेणापिहितमधःस्थितत्रिशाखविष्टरस्योर्ध्वं
स्थितैकशाखविष्टरमादाय मधुपर्कं भो इत्यार्घ्याय निवेदयेत॥ अथार्घ्यो यजमानहस्तस्थमेव मधुपर्कपात्रमनुमं
त्रयेदेभिर्मंत्रैः॥ ॐ मधुवाता ऋतायते मधु क्षरंति सिंधवः। माध्वीर्गावो भवंतु नः॥१॥ मधुनक्तमुतोषसो मधुमत्पार्थिवं र
जः॥ माध्वीर्नः संत्वोषधीः॥२॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः॥ मधु द्यौरस्तु नः पितेति॥३॥ पुनरेभिरेव प्रत्यभिमं
त्रयेत॥ तत उद्घाटितमधुपर्कं ॐ सूर्यस्य त्वा प्रतीक्षे इति मधुपर्कं प्रतीक्ष्य ॐ अमृतोऽहममृतो मयाऽमृतं मेच स्वरुग होम॰
तं मे श्रोत्रममृतो मे प्राणोऽमृतो मे प्राणोऽमृतो मे पानोऽमृतोऽहं सर्व इति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो ह ॥५१॥
स्ताभ्यां प्रसूतः प्रतिगृह्णामीति गृहीत्वा प्राग्देशस्थे इडिले निधाय ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे इ
मंत्रेण भूमौ निधायांगुलिद्वयेन प्रदक्षिणमाचाल्यानामिकांगुष्ठेन च संगृह्य वक्ष्यमाणैर्मंत्रैः प्राश्नीयात ॐ भूः तत्स

वितुर्वरेण्यं भूः स्वाहेति प्रथमं प्राश्य ॐ भुवः भर्गो देवस्य धीमहि ॐ भुवः स्वाहेति द्वितीयं प्राश्य ॐ स्वः धियो यो नः प्र
चोदयात॥ स्वः स्वाहेति तृतीयं प्राश्य ॐ जन स्वाहेति चतुर्थं प्राश्य दध न्स्वाहेति पंचमं प्राश्य फट् स्वाहेति षष्ठं प्राश्य ॐ
हुहन स्वाहेति सप्तमं प्राश्य ॐ अहन्स्वाहेत्यष्टमं प्राश्य ॐ तत्स्वाहेति नवमं प्राश्य ॐ शं स्वाहेति दशमं प्राश्य ॐ भूः इत्येका
दशं प्राश्य तत् भूमौ वा हस्ते प्राश्नीयात॥ ततः आचम्योच्छिष्टं द्विजाय वृषलाय वा दद्यात॥ ततः कर्त्रा गौरित्यर्घ्याय गां निवेद
येत॥ अथार्घ्यो ममसि भवत्स्वपत्रं प्राणो बहुर्बव अस्थ्य त्वामनामत ॐ भूर्भुवः स्वर्जनदोमित्यतिसृजानि माता रु
द्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः॥ प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ तृणानि गौ
रत्त्विति प्राह॥ सूयवसाद्भगवती हि भूया अथो वयं भगवंतः स्याम॥ अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरं
तीति प्रतिष्ठमानां गामनुमंत्रयेत् यजमानस्य ममच पाप्मा हत इति ब्रूयात् इत्याथर्ववेदिनां मधुपर्कविधिः॥ ॥ अथ यजमा
नस्तोरणाद्यलंकृतकलशकुंड चतुष्पथ तुलादियुक्तं महावेदिं ग्रहवेदिं पताकाध्वजवितानादियुक्तं पुष्पमालादि भूषितं प्रा
गुक्तप्रकारेण निर्मितं षोडशहस्तादिकं मंडपं सपत्नीकः पुत्रपौत्रादिसमन्वितः शुक्लांबरमाल्यानुलेपनभूषणालंकृ
तोऽधिवासनार्थं मंगलस्नानोपचवाद्यमंगलशब्दैः पश्चिमद्वारेण प्रसालकलशहस्तः प्रविश्य दक्षिणद्वारस्य पश्चिमदेश उपवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा॰न॰प्र॰ ऽश्यथाविहितंकर्मकुरुतेतिगुर्वादीन्विनियुज्यसंयतस्तिष्ठेत॥ततोगुरुर्महावेद्यांषोडशास्रचक्रंपंचभिर्वर्णकैः पूर्वोक्तप्र
॥५३॥ कारेणाविरच्यपुण्याहवाचनपूर्वादिकुंडेषुप्रतिकुंडंवस्त्रयुगंगंधमाल्यंपंचपल्लवविभूषितमंतःक्षिप्तपंचरत्नसर्वौ
षधिकुसुमफलमेकैकंपूर्णकलशंमंत्रविधिनास्थापयित्वाएवमेवप्रतिद्वारंद्वौद्वौकलशौसंस्थापयित्वाप्रागादिकुं
डेषुहोमार्थमृग्वेदादिवेदविदोद्वौद्वौऋत्विजौतथाततद्वारेषुप्रतिजपार्थंद्वौद्वौजापकौतथाप्रतिद्वारंसूक्तादितत्तद्वेद
मंत्रपाठार्थंद्वौद्वौद्वारतोरणपालकौचोपवेश्यवस्त्रमुद्रिकागंधपुष्पैरलंकृत्ययजध्वमितिहोतृकान्॥उत्तमंत्र
जाप्येनतिष्ठध्वमितिजापकान्॥सूक्तानिपठध्वमितिद्वारपालकान्विनियोजयेत॥अत्रकेचित्प्रयोगकाराःमंडपेमंडप
देवतास्थापनादिकर्मकरिष्यइतिसंकल्प्यगणेशंसंपूज्यपरब्रह्मत्यादिमंत्रैर्मंडपांतःसर्षपान्विकीर्यकुशैःपंचगव्येन
तत्तन्मंत्रैःसर्वत्रप्रोक्ष्यबद्धांजलिःस्वस्तिनइंद्रइतिपठित्वाततःपूर्वस्यांदिशिमंडपाद्बहिर्हस्तमात्रेवटतोरणादिअ
श्वत्थतोरणांतान्सादिलक्षहोमप्रयोगोक्तप्रकारेणारोप्यतत्रतत्रस्तंभेष्वैरावतादिकंवावास्तंभद्वारीन्सं
पूज्यतेषांबलीन्दत्वामंडपमध्येमहाध्वजमुच्छ्रित्यतत्रब्रह्माणंसंपूज्यसंक्षेपेणविस्तरेणवाप्रयोगशास्त्रेभप्रतिष्ठांकृत्वा राम॰
वाकुर्यादित्याहुः॥हेमाद्रिरूपनारायणाद्यस्तनेलिखितंवेतः॥अतःकृताकृतमितिज्ञायते॥अथाचार्यानुज्ञाताः ॥५३॥

ऋत्विजःपूर्वादिकुंडेषुएकोहोताऽमोब्राह्मेतिद्वौद्वावुपविश्यस्वस्वशाखोक्तप्रकारेणाग्निस्थापनादिकंकुर्युः॥
जापकाश्चकर्मसमाप्तिपर्यंतस्वस्वशाखीयशांतिजपंकुर्युः॥शांतयश्चऋग्वेदिनांशन्नइंद्राग्नीइत्यादयः॥यजुर्वेदिनां
शंचमेचाचइत्यादयःसामवेदिनामबोधियत्यादीनिसामानिशांतिः॥अथर्ववेदिनांशांताद्यौःशन्नइंद्राग्नीशन्नःस
त्यस्येतिसूक्तेचपरेशांतयः॥द्वारपालास्तुस्वस्वशाखीयश्रीसूक्तादिजपंकुर्युः॥उक्तंहि॥श्रीसूक्तंपावमानंचसोमसू
क्तंसुमंगलं॥शांत्यध्यायंचेंद्रसूक्तंरक्षोघ्नंचेतिबह्वृचा॥दक्षिणेतुद्वारपालोतुरुद्रान्पुरुषसूक्तकं॥श्लोकाध्यायंशुक्रि
यंचमंडलाध्यायमेवच॥वामदेव्यंबृहत्सामज्येष्ठसामरथंतरं॥तथापुरुषसूक्तंचरुद्रसूक्तमतःपरं॥आज्यदोहानि
सामानिशांतिकंभारुंडानिच॥पश्चिमेद्वारपालस्तुपठेत्सामगोतथा॥अथर्वांगिरसंनीलरुद्रंदेव्यपराजिता॥मधुसू
क्तंरोधसंचशांतिकाध्यायमेवच॥अथर्वणोद्वारपालोपठेतामुत्तरस्थितौ॥एवंतदर्थः॥श्रीसूक्तंहिरण्यवर्णांहरिणीमित्या
दि॥पावमानंस्वादिष्ठयेत्यादि॥सोमसूक्तमाप्यायस्वेत्यादि॥सुमंगलंकनिक्रददिजुषामित्यादि॥शांत्यध्यायःशन्नइं
द्राग्नीइत्यादि॥इंद्रसूक्तंयोजातइत्यादि॥रक्षोघ्नंकृणुष्वपाजइत्यादि॥रुद्रानमस्तेरुद्रइत्यादयः॥पुरुषसूक्तंयोजातेत्या
दि॥रक्षोघ्नंकृणुष्वपाजइत्यादि॥श्लोकाध्यायोदेवसवितरित्यादिः॥शुक्रियंऋचंवाचमित्यादि॥मंडलाध्यायोयदेतन्मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ग्रन॰प्र॰ डलंतंपंतीसादिः॥वामदेव्यंकयानश्चित्रइत्यस्यामृचिगीतं साम॥ज्येष्टसाममूर्द्धानंदिवइत्यस्यामृचिगीतंसाम॥
॥५५॥ रथंतरंअभित्वाशूरेत्यस्यामृचिगीतंसाम॥पुरुषसामसूक्तं॥रुद्रसूक्तंआवोराजेसादिसाम॥आग्नेयेदाहानिदेवव्रतानी
त्येवंरूपाणि॥शांतिकमबोध्यग्निरित्यादिगीतंसाम॥भारुंडानिइमंस्तोममर्हतइत्याद्यासुगीतानिसामानि॥अथर्व
णानामसूक्तं॥छंदोगायत्रहरूपाययेत्यादि॥आंगिरसंअगिरसोजन्मनाइत्यादि॥नीलरुद्र्यारुद्रयत्तेपित्यादि॥अपरा
जितादेवीपरिवर्त्मानीत्यादिः॥मधुसूक्तंमधुवाताइत्यादि॥रोधसंअभयंद्यावापृथिवीत्यादि॥शांतिकाध्यायः॥शान्त
इंद्राग्नीभवतामित्यादिरिहचः॥अथाग्रावसरेखचेत्यादि॥अक्षतैभिःस्वकुंडेषुवन्हिप्रणायनेकृतेप्रतिष्ठां हर्यंस्वेषां
पश्चिमदिशिप्राङ्मुखउपविश्यआदित्यादीन्द्वाविंशतिगणानावाह्यस्थापयेत॥तत्प्रकारस्तु॥यस्वेषांसर्वेषांभद्र
मंडलंलिखित्वातत्रमंडलेदेवताआवाह्यसंस्कृतहयपरिवरंप्रसार्याष्टदलपद्मविरच्यकर्णिकायामादित्यांगुलेर
क्तमंडलेसप्रणावमाहितितत्रयत्तुस्वार्थरक्तपुष्पाक्षतैःकलिंगदेशोत्सन्नकाश्यपगोत्ररक्तवर्णासूर्यइहागच्छेहतिष्टेसा
वाह्यरक्ततंडुलैः॥आकृष्णेनहिरण्यस्तूपसविताचत्रिष्टुप॥सूर्यस्थापनेविनियोगः॥ॐआकृष्णेतिमंत्रेणास्थापये रत्न॰
त्सूर्यं॥१॥ततआग्नेयदलेश्वेतेवतुरस्रेचतुर्विंशांगुलेमंडलेॐभूर्भुवःस्वरितुत्कायमुनादेशोद्भवआत्रेयगोत्रभुक्ताश्वेत ॥५५॥

सोमइहागच्छेहतिष्टेत्यावाह्यइमंदेवावसृताःसोमोयजुः॥ॐइमंदेवाइतिश्वेताक्षतैःसोमंस्थापयेत॥२॥ततोदक्षिणो
त्रिकोणेत्र्यंगुलेरक्तमंडलेॐभूर्भुवःस्वरवंतीदेशोद्भवभारद्वाजगोत्ररक्तवर्णभोमइहागच्छेत्यावाह्य॥अग्निर्मूर्द्धावि
रूपांगारकोगायत्री॥ॐअग्निर्मूर्द्धादिवइतिमंत्रेणरक्तपुष्पाक्षतैर्भौमंस्थापयेत॥३॥ततईशान्येदलेपीतेवाणाकारे
चतुरंगुलेमंडलेॐभूर्भुवःस्वरितुत्कामगधदेशोद्भवआत्रेयगोत्रपीतवर्णबुधइहागच्छेत्यावाह्यउद्बुध्यस्वपरमेष्ठि
उ[illegible]धात्रिष्टुप॥उद्बुध्यस्वेतिमंत्रेणपीततंडुलैर्बुधंस्थापयेत॥४॥ततउत्तरेदीर्घचतुरस्रेमंडलेपीतेॐभूर्भुवःस्वरि
त्युक्त्वासिंधुदेशोद्भवांगिरसगोत्रपीतवर्णगुरोइहागच्छेत्यावाह्यबृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप॥बृहस्पतेअ
तीतिमंत्रेणश्वेततंडुलैर्गुरुंस्थापयेत॥५॥ततःपूर्वदलेशुक्लेपंचकोणेनवांगुलेमंडलेॐभूर्भुवंस्वरित्युक्त्वाभोजक
टदेशोद्भवभार्गवगोत्रशुक्लवर्णशुक्रइहागच्छेत्यावाह्य अन्नात्परिस्रुतोइत्यश्विसरस्वतींद्रऋषयः॥अतिजगती
शुक्रः॥ॐअन्नात्परिस्रुतइतिमंत्रेणशुक्लतंडुलैःशुक्रंस्थापयेत॥६॥ततःपश्चिमेधनुराकारेकृष्णवर्णेदलेॐभूर्भु
वःस्वरित्युक्त्वासौराष्ट्रदेशोद्भवकाश्यपगोत्रकृष्णवर्णशनैश्चरेकृष्णवर्णशनैश्चरइहागच्छावाह्यशंनोदध्यङ्ङाथर्वणा
आपोगायत्री ॐशन्नोदेवीतिमंत्रेणकृष्णपुष्पाक्षतैःशनैश्चरंस्थापयेत॥७॥ततोनैर्ऋत्यदलेशूर्पाकारेमाद्यांगुले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान·प्र· छ्मवर्णोमंडले ॐ भूर्भुवः स्वरित्युक्त्वा बर्बरदेशोद्भवं पैठीनसिगोत्रं छ्मवर्णं राहो इहागछेत्यावाह्य कयानोवाम
॥५५॥ देवो राहुर्गायत्री॥ ॐ कयान इति मंत्रेण छ्मस्राक्षते राहुं स्थापयेत॥८॥ ततो वायव्यदले ध्वजाकारे षडंगुले चित्रवर्णो
मंडले ॐ भूर्भुवः स्वरित्युक्त्वा अंतर्वेदिदेशोत्पन्नं जैमिनिगोत्रं चित्रवर्णं केतव इहागछ केतो इह तिष्ठ इत्यावाह्य
केतुं छ्म एवम्म धुम्र्छंदाः केतुर्गायत्री ॐ केतुं कृण्वन्नित्रिमिति मंत्रेण छिद्राक्षतैः केतून् स्थापयेत॥९॥ ततस्तं सूर्योत्त
रभागे ॐ भूर्भुवः स्वरीश्वरेहागच्छ त्र्यंबकं यजामह इति मंत्रेणेश्वरं स्थापयेत॥१॥ ततः सोमस्य दक्षिणे ॐ भूर्भुवः
स्वः इत्युमामावाह्य श्री भव त इति मंत्रेणोमां स्थापयेत॥२॥ एवमेव भौमदक्षिणे यदक्रंद इति मंत्रेण स्कंदं स्थापयेत॥३॥
बुधपश्चिमभागे प्रागवदावाह्य विष्णो रराटमिति मंत्रेण विष्णुं॥४॥ गुरोः पूर्वभागे प्रागवदावाह्य आब्रह्मन्निति मंत्रेण ब्र
ह्माणं स्था॥५॥ शुक्रपूर्वभागे प्रागवदावाह्य सजोषा इंद्रेति मंत्रेणेंद्रं स्था॥६॥ शनेराग्नेयभागे प्रागवदावाह्य यमाय त्वे
ति मंत्रेण यमं संस्था॥७॥ राहोरीशानभागे प्रागवदावाह्य कार्षिरसीति कालं॥८॥ केतुनैर्ऋत्यभागे प्रागवदावाह्य
चित्रावसो इति मंत्रेण चित्रगुप्तं स्थापयेत॥९॥ ततो ग्रहाधिदेवतयोर्मध्ये ऽग्न्यादयः॥ प्रत्यधिदेवता आदित्यादिके ग्र॰
भ्योः ॐ भूर्भुवः स्वरिति मंत्रेणावाह्य अग्निं दूतमिति मंत्रेणाग्निं स्था॥१॥ उदुत्तमं मित्यपः॥२॥ स्योना पृथिवीति क्षितिं ॥५५॥

॥३॥ इदं विष्णुरिति विष्णुं॥४॥ इंद्र आसामिति इंद्रं॥५॥ अदित्यै रास्नासीति इंद्राणीं॥६॥ प्रजापते नेति प्रजापतिं॥७॥ नमो
अस्तु सर्पेभ्य इति सर्पान॥८॥ ब्रह्मजज्ञानमिति ब्रह्माणमिति नव प्रत्यधिदेवताः स्थापयेत॥ उत्पलपरिमल्लकारादय
स्तु॥ आदित्यादीनां दक्षिणपार्श्वेषु तत्तदधिदेवताः स्थापयित्वा दिशादीनां वामपार्श्वेषु प्रत्यधिदेवताः स्थापयेदिशा
द्रुः॥ तत्राचारतोप्येवं स्थापनीया॥ ततो राहोरुत्तरभागे गणानां त्वेति मंत्रेण गणपतिं स्था॥१॥ शनेरुत्तरभागे जातवेद
स इति दुर्गां॥२॥ सूर्योत्तरभागे वायो येत इति वायुं॥३॥ राहुदक्षिणभागे घृतं घृतपावान इति आकाशं॥४॥ केतुदक्षि
णभागे यावां कशेति मंत्रेणाश्विनावावाह्य मुक्ताक्षतैः स्थापयेत॥५॥ ततः इंद्रादीन् दश लोकपालान् सर्वादिदिक्षु स
प्रणवव्याहृतिभिरावाह्य त्रातारमिंद्रं॥१॥ अग्निं दूतं २ यमाय सोमं ३ असुन्वं तं ४ तत्वा यामि ५ आनो नियुद्भिः॥६ वयं
सोम ७ तमीशानं ८ इत्येभिर्मंत्रैर्यथादिशं स्थापयित्वा ईशानेंद्रयोर्मध्ये ब्रह्मजज्ञानमिति ब्रह्माणं॥९॥ निर्ऋतिवरुणयो
र्मध्ये ऽनंतं सहस्रशीर्षेति विपर्यायेणावाह्य स्थापयेत॥ ततः इंद्रस्य दक्षिणभागे ॐ भूर्भुवः स्वरित्युक्त्वा ध्वजवस्त्रं स्थापयेत॥
तथैवाग्नियमयोर्मध्ये रुद्रं स्थापयेत॥ यमनिर्ऋतयोर्मध्ये ब्रह्माणं॥ निर्ऋतिवरुणयोर्मध्ये अच्युतं॥ वरुणवाय्वोर्मध्ये ई
शं॥ वायुसोमयोर्मध्ये ऽर्कं॥ ततो वेदिमध्ये ब्रह्मविष्णुमहेशानां सौवर्णी प्रतिमा त्रयं स्थाप्य॥ ततस्तन्निवाचेवत्स अर्कं चनस्पतिं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰ प्र॰ स्थापयेत्॥ ततः प्रत्येकमाकृष्णेनेत्यादिमंत्रपाठांते ॐ सूर्याय नमः इत्यादिनाममंत्रेण प्रणवादिचतुर्थ्यंतेन तत्तन्नाम
॥५६॥ मंत्रेण इदमासनमिदं पाद्यमिदमाचमनीयमिदं स्नानमिदं वस्त्रमिदमनुलेपनं॥ एतानि पुष्पाणि॥ एष धूपः॥ ए
ष दीपः॥ एतानि नैवेद्यानि इत्यादिक्रमेण सूर्यादीन्नवनवसंतान् देवताः पूजयेत्॥ पूजासाधनानि वस्त्रकुसुमगं
धाक्षतधूपदीपनैवेद्यादीनि प्राग्ज्ञानि ज्ञेयानि॥ ततो होतारो यजमानेन वक्ष्यमाणप्रकारेणाग्न्यसांगे कृते सति॥
आघाराज्यभागांते घृतान्नतिलैरेतेभ्य एव सूर्यादिदेवेभ्यः स्वस्वशाखापठितैर्वक्ष्यमाणैस्तत्तद्देवताप्रकाशक
मंत्रैः प्रतिकुंडं अष्टोत्तरशतमष्टाविंशतिर्वा जुहुयुः॥ होमांते च होतृभिः कृत्स्नदेवतानां प्रकाशकानि स्वस्वशाखो
क्तानि वक्ष्यमाणानि सूक्तानि जप्यानि च॥ अथ दानीं प्रसंगात् लोककर्यायत्त्विग्विदितां सर्वकुंडे ऽग्निस्थापनादिविधि
रुच्यते॥ तत्र गोमयोपलिप्ते कुंडमध्ये सिकतापकीर्णायतियां समिधमादाय षडुल्लेखाः कुर्यात्॥ तत्र प्रथमामग्निस्था
पनपश्चाद्भागे उदगायतीं रेखां लिखित्वा तस्या दक्षिणोत्तरांतर्लग्ने प्रादेशमात्रे प्रागायते कुर्यात्॥ तत्र प्रथमामग्निस्थापनस्थल
पश्चाद्भागे उदगायती रेखा उदक्संस्थाः कुर्यात्॥ तामुत्तां समिधं निधाय तत्राग्नेः स्व समिधं निरस्य अप उपस्पृश्य तत्राग्नि राम॰
प्रणवव्याहृतिभिः प्रणयेत्॥ अथैतेन कुंडेषु वक्ष्यमाणप्रकारेणाग्निस्थापने कृते सति तदनंतरमाचार्यो ग्रहादिस्थाप ॥५६॥

नं कुर्यात्॥ ततोऽन्वाधानादि च॥ तद्यथा॥ ॐ भूर्भुवः स्वरिति प्रसमिधोऽग्नौ निदध्यात्॥ ततो निमुष्टित्रयसंमितं बर्हि
स्तत्त्वपंचदशधा दारुणि च हस्तप्रमाणानि संगृह्य यजनीयदेवतानां ध्यानं कृत्वा सोदकेन पाणिना वितरग्निं परि
समूह्य कुशानादाय तैरुदगग्रैः कुशैः पुरस्तात्प्रागग्रैर्दक्षिणात उदगग्रैः पश्चात्प्रागग्रैरुत्तरतोऽग्निं परिस्तीर्य त्रिरग्निं प्र
दक्षिणमुद केन पर्युक्ष्य ब्रह्मासनं दक्षिणतः कुशेषूपवेशयेत्॥ ब्रह्मा चैतस्मिन्नुपविशेत्॥ यजमानेन गृहीतदक्षि
णाकरांगुष्ठो दक्षिणपादमग्रे कुर्वन् पूर्वेणाग्निं ब्रह्मासनस्थानमासाद्यांगुष्ठानामिकाभ्यामासनात्तृणं निरस्य निर
स्तः परावसुरिति तृणं निरस्याप उपस्पृश्य इदमहमर्वावसोः सदने सीदामीत्यासने उपविश्य जपति॥ बृहस्पति
र्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपायेति॥ ततः उत्तरतोऽग्नेः दर्भेषु द्वंद्वं न्यंचि पात्राणि सादयेत्॥
ततोऽछिन्नाग्रे अनंतर्गर्भे कुशौ प्रादेशमात्रे पवित्रे कृत्वाऽद्भिः संसृज्य ते प्रोक्षणीपात्रेऽतर्धाय अपो निषिच्यांगुष्ठोपकनि
ष्ठिकाभ्यामुत्तरयोः पवित्रे गृहीत्वोत्तानाभ्यां पाणिभ्यां त्रिः प्रागुत्पुनीयात्॥ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रे
ण वसोः सूर्यस्य रश्मिभिरिति सकृन्मंत्रेण द्विस्तूष्णीं॥ ताभिरद्भिः पात्राणि प्रोक्ष्योत्तानानि कृत्वा ग्रंथिं विस्रस्य त्रिः प्रो
क्षेत्॥ ततः पश्चादग्नेः प्रणीतापात्रं स्थापयित्वा तत्रोदगग्रे पवित्रे निधाय प्रोक्षणीवदद्भ्यो निषिच्याक्षतान् पुष्पाणि च निक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰वि ष्योऽस्तुय ॐ ब्रह्मन्त्वयः प्रणेष्यामीति ब्रह्माणामापृच्छेत॥ ततो ब्रह्मा ॐ भूर्भुवः स्वर्बृहस्पतिप्रसूत इत्युक्त्वा ॐ प्रणयेति
॥५७॥ वदेत॥ ततः कर्त्तोत्तरतोऽग्नेः प्रागग्रेषु दर्भेषु प्रणीतापात्रं स्थापयित्वा प्रागग्रेणाच्छादयेत॥ ततस्तत्पवित्रांतर्हितायामा
अस्यामाज्यमासनिरूप्योदगंगारान्निरस्य तेष्वाज्यमधिश्रित्य ज्वलतातृणेनावज्योत्य दर्भाग्रे प्रच्छिद्य प्रक्षाल्याग्नौ प्रक्षि
प्यापुनर्ज्वलतातृणेन पर्यग्निकुर्यात॥ ततोऽग्नेः पश्चादुदगग्रं बर्हिरास्तीर्य आज्यमुदगुद्वास्य बर्हिष्यासादयेत॥
ततः प्रोक्षितानंगारान्पुनरग्नौ प्रक्षिप्योदगग्राभ्यां पवित्राभ्यामाज्यमुत्पूय पवित्रे अद्भिः संप्रोक्ष्याग्नौ प्रहरेत् स्रुवं स्रु
चंच प्रतप्य दर्भाग्रैः स्रुवस्य स्रुचश्च बिलं संमृज्य अग्रमूलाभ्यां तं दर्भाग्रैः स्तयोः पृष्ठं दर्भमूलैः स्रुवस्य स्रुचश्च दंडं पृ
ष्ठतआरभ्योपरिष्टाद्बिलपर्यंतं प्रत्येकं त्रिभिस्त्रिभिः संमृज्यात॥ स्रुवं स्रुचंच प्रोक्ष्य पुनः प्रतप्याऽऽसान्तरतो बर्हिषि निदध्यात
॥ संमार्गदर्भान् प्रोक्षितानग्नौ प्रास्येत॥ अग्निं परितो गंधाक्षतादिनालंकृत्य संस्त्य पाणी कृत्वा दक्षिणेन पाणिना भि
घार्याभ्यर्च्य अयंत इध्म इति वामदेव ऋषिः जातवेदोऽग्निर्देवता त्रिष्टुप् छंदः इध्माधाने विनियोगः॥ ॐ अयंत इध्म आत्मा जा
तवेदस्तेनेध्यस्व वर्धस्व चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेतीध्ममग्नावादध्यात॥ अत्र होतृसंग रम॰
बहुत्वात्तत्काले स्वाहुतिर्येकेन यजमानेन प्रत्याहुतिरिध्मस्याग्नः कर्तुमशक्य इति होमारंभात्प्राग्वदेत्तत्काला ॥५७॥

कीर्तनांते अत्र तुलापुरुषमहादानकर्मांगत्वेन चतुष्टय होमपर्याप्तमिदं तिलाज्यद्रव्यं प्रजापतीन्द्राग्निसोमादि
ग्रहरुद्रादितदधिदेवताप्रत्यधिदेवताविनायकादिपंचकेंद्रादिलोकपालवसुरुद्रादिसमरुद्गणब्रह्माच्यु
तेशार्कवनस्पत्यग्निवायुसूर्यप्रजापतिस्विष्टकृदग्निभ्यो होमार्थमुपात्तं॥ यथादैवतमस्तु न ममेति त्यजेत॥ ततो हो
माय यजमानेनान्वारब्धः स्रुवेण प्रजापतिं मनसा ध्यायन्वायव्यादाग्नेयीं यावत्संमी पूर्वाघारमाघारयेत॥ ततः स्रुचा
चतुर्गृहीतेनाज्येनेंद्राय स्वाहेति नैर्ऋत्यकोणादैशानीं यावत्तिष्ठन्नुत्तराघारमाघारयेत॥ ततउपविश्य स्रुवेणाग्नये
स्वाहेत्यग्नेरुत्तरभागे सोमाय स्वाहेत्यग्नेर्दक्षिणभागे चाज्यभागौ जुहुयात॥ ॥ अथ प्रधानहोमः कार्यः॥ तत्र होता उदङ्मु
खो होमदेवता मनसा ध्यायन्घृताक्तान्तिलान्नाहूस्नेन सादिसूर्यादि मंत्रैस्तत्तदृषिछंदोदेवतास्मरणपूर्वकं उ
त्तानपाणिनोपांशु प्रत्येकमष्टोत्तरशतमष्टाविंशतिवाहुतीर्जुहुयात॥ तत्र ऋष्यादिकं कथ्यते॥ आकृष्णेन हिरण्यस्तू
प ऋषिः सविता देवता सूर्यप्रीत्यर्थे तिलाज्यहोमे विनियोगः॥ एवमुत्तरमंत्रेष्वपि तत्तद्देवताहोमसंबंधेन विनियो
गऊह्यः॥ ॐ आकृष्णेन॰ पश्यन्स्वाहा॥१॥ आप्यायस्व गोतम मंत्रेष्वपि तत्तद्देवहोमः सोमो गायत्री॥ ॐ आप्यायस्व॰ सं
गथे स्वाहा॥२॥ अग्निर्मूर्धा विरूपांगिरसकोगायत्री। ॐ अग्निर्मूर्धा॰ जिन्वति॥३॥ अग्ने विवस्वदुषस इति प्रस्कण्वो बुधो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रशां॰प्र॰ बृहती॥ॐ अग्नेविवस्वत॰उषस्वेधः॥४॥बृहस्पतेपरिदीयोरथप्रतिरथोबृहस्पतिस्त्रिष्टुप्॥ॐ बृहस्पतेपरिदीय॰र
॥५७॥ थानं॥५॥शुक्रंतेअन्यद्भरद्वाजःशुक्रस्त्रिष्टुप्॥ॐ शुक्रंतेअन्यत॰रातिरस्तु॥६॥शमग्निरितिविरूपःशनिरुष्णिक्॥ॐ
शमग्निर॰स्विधः॥७॥कयानोवामदेवराहुर्गायत्री॥ॐ कयान॰वृता॥८॥केतुंकृण्वन्नामधुच्छंदाःकेतुर्गायत्री॥
ॐ केतुंकृण्वन॰रजायथः॥९॥इतिनवग्रहमंत्राः॥ ॥अथाधिदेवतामंत्राः॥आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्
॥ॐ आवोराजान॰कृणुते॥१॥गौरीर्मिमायदीर्घतमाउमाजगती॥ॐ गौरीर्मिमाय॰व्योमन्॥२॥कुमारंमातेतिस्कं
दऋषिःस्कंदस्त्रिष्टुप्॥ॐ कुमारंमाता॰नरैतो॥३॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ॐ इदंविष्णु॰सुरे॥४॥त्वमित्सप्र
थागोतमोब्रह्माबृहस्पती॥ॐ त्वमित्सप्रथाः॰वेधसः॥५॥इंद्रमिदितिमेधातिथिरिंद्रोबृहती॥ॐ इंद्रमित॰सातये॥६॥आ
यंगौरितिसार्पराज्ञीयमोगायत्री॥ॐ आयंगौः॰प्रयन्स्वः॥७॥ब्रह्मजज्ञानंप्रजापतिःकालस्त्रिष्टुप्॥ॐ ब्रह्मजज्ञानं॰
विवः॥८॥अनाज्ञातंप्रजापतिश्चित्रगुप्तोऽनुष्टुप्॥अनाज्ञातं॰यथातथं॥९॥अथप्रत्यधिदेवतामंत्राः॥अग्निंदूतंमे शां॰
धातिथिरग्निर्गायत्री॥ॐ अग्निंदूतं॰सुक्रतुं॥१॥उदुत्तमंशुनःशेपअपस्त्रिष्टुप्॥ॐ उदुत्तम॰स्याम॥२॥स्योनापृथिवी ॥५८॥
मेधातिथिःपृथिवीगायत्री॥ॐ स्योनापृथिवि॰सप्रथाः॥३॥सहस्रशीर्षेतिनारायणोविष्णुरनुष्टुप्॥ॐ सहस्रशीर्षा॰

दशांगुलं॥४॥इंद्रायेंद्रोमरुत्वेतिकश्यपइंद्रोगायत्री॥ॐ इंद्रायेंद्रो॰मासदः॥५॥उत्तानपर्णेतीन्द्राणीऋषिरिंद्राणा
नुष्टुप्॥ॐ उत्तानपर्णे॰केवलकुरु॥६॥प्रजापतेनत्वद्धिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥ॐ प्रजापतेनत्वत॰रयीणां
॥७॥कालिकोवसिष्ठःसर्पोनुष्टुप्॥ॐ कालिकोनामसर्पः॰वाहनः॥८॥एषब्रह्मायऋत्विजइतिप्रजापतिर्ब्रह्मा
नुष्टुप्॥ॐ एषब्रह्मा॰आसपः॥९॥अथविनायकादीनांपंचानां॥आतूनइंद्रकुसीदःकाण्वोगणपतिर्गाय
त्री॥ॐ आतून॰दक्षिणेन॥१॥जातवेदसेमारीचःकश्यपोदुर्गात्रिष्टुप्॥ॐ जातवेदसे॰दुरितात्यग्निः॥२॥का
शाद्विशुर्मेद्दीनोंवितोवापुरुषऋष्णिक्॥ॐ काशाद्विसुः॰दधदिता॥३॥आदित्प्रत्नस्यवत्सऔकाश्योगायत्री॥ॐ आ
दित्प्रत्नस्य॰दिध्यतेदिवा॥४॥एषोउषाप्रस्कण्वोऽश्विनौगायत्री॥ॐ एषोउषा॰बृहत्॥५॥अथेंद्रादिलोकपालानां॥
त्रातारमिंद्रगर्गइंद्रस्त्रिष्टुप्॥ॐ त्रातारमिंद्र॰धात्विंद्रः॥१॥अग्निंदूतंमेधातिथिरग्निर्गायत्री॥ॐ अग्निंदूतं॰सुक्रतुं॥२॥
यमायसोमंयमोनुष्टुप्॥ॐ यमायसोम॰अरंकृत॥३॥मोषुणःकण्वोनिर्ऋतिर्गायत्री॥ॐ मोषुणः॰तृष्णयासह॥
४॥उदुत्तमंशुनःशेपोवरुणस्त्रिष्टुप्॥ॐ सोमोधेनुं॰ददस्मै॥७॥तमीशानंगोतमईशानोजगती॥ॐ तमीशानं॰स्वस्तये
॥८॥सहस्रशीर्षानारायणोऽनंतोऽनुष्टुप्॥ॐ सहस्रशीर्षा॰दशांगुलं॥९॥ब्रह्मजज्ञानंहिरण्यगर्भोब्रह्मात्रिष्टुप्॥ॐ ब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प्र॰ ह्मजज्ञानं॰विव॥१॥ वसूनां॥ अनयाऽत्र वसिष्ठो वसवस्त्रिष्टुप्॥ ॐ त्वमया अत्र॰ नोऽध्वा॥११॥ रुद्राणां॥ आ रुद्रास अ
॥५१॥ त्रेयो रुद्रा जगती॥ ॐ आ रुद्रास॰ उदम्नज्ञे॥१४॥ आदित्यानां॥ यज्ञो वे देवानां कुत्स आदित्यास्त्रिष्टुप्॥ ॐ यज्ञो देवानां
॰वित्तरासत॥१३॥ मरुद्गणानां॥ आविद्युन्मद्भिर्मरुतमो मरुतः प्रस्तारपंक्तिः॥ ॐ आविद्युत॰ सुमायाः॥१४॥ हेमाद्रे
तु॰ वीनां॰ वित्तरासः॥ अष्टानां वसूनामेकादशानां रुद्राणां द्वादशानामादित्यानां समानानां मरुद्गणानां च प्रत्येकं तत्तन्न
काज्ञाकमंत्राभावात्सर्वैर्नैर्धराध्रुवइत्यादिभिर्वस्वादिनाममंत्रैः प्रणवादिभिर्नमः स्वाहांतैः॥ ॐ धाताराय नमः स्वाहा
ॐ ध्रुवाय नमः स्वाहेत्येवमादिरूपैः प्रत्येकं द्वादश संख्याकः कुंडचतुष्टयेपि होमः कार्य इत्युक्तं॥ अथ ब्रह्मणः॥
ब्रह्मजज्ञानं प्रथमं पुरे॥ विष्णोः इदं विष्णुः॥ इंद्रास्य॥ कद्रुद्राय कण्वो रुद्रो गायत्री॥ ॐ कद्रुद्राय॰ हृदे॥ अर्कस्य॥ चित्रं दे
वानां कुत्सः सूर्यस्त्रिष्टुप्॥ ॐ चित्रं देवानां॰ तस्थुषश्च॥ वनस्पतेः॥ वनस्पते वीडुंगो गौ वनस्पतिस्त्रिष्टुप्॥ ॐ वन
स्पते॰ जेत्वानि॥ ॥अथ ज्येष्ठमंत्राणामार्षादिकमुच्यते॥ कृपाग्निप्रथममित्यस्य धाध्विन्वच्छहिदेवेत्संतस्यैकाद
शर्चस्य सावित्रसूक्तस्य हिरण्यस्तूपः सविता त्रिष्टुप् सवितृप्रीत्यर्थे जपे विनियोगः॥ एवमुत्तरत्र विनियोगः कृत्स्वः॥१॥ राम॰
त्वं सोम प्रचिकित इत्यादि प्रचिकितस्ता गाः पिशाचितंतस्य त्रयोविंशतस्य सोमसूक्तस्य गोतमः सोमश्च तस्यास्त्रिष्टुभः स ॥५१॥

प्रगायत्र्यो द्वाद्वशौष्णिहः॥२॥ समिधाग्निमित्यारभ्य श्रामा आप्रुवसोति तिसृस्त्रिंत्तस्य त्रिंशदृचस्य भौमस्य सूक्तस्य विरूप आंगिरसो
ग्निर्गायत्री॥३॥ उदुत्यंश्चमित्यादिसोमपीतचइत्यंतस्य द्वादशर्चस्य तृतीयसूक्तस्य चोदुत्यं त्रिष्टुप्॥४॥ यस्तस्तंभे सार
भ्य धनुषामरातीमित्यंतस्यैकादशर्चस्य बृहस्पतिसूक्तस्य वामदेवो बृहस्पतिस्त्रिष्टुप् पंचम्यौ जगती॥५॥ शुक्रं तइत्या
दितवसस्वंचमित्यंतस्य चतुर्दशर्चस्य शुक्रसूक्तस्य भरद्वाजः पूषा द्वितीयाजगती शेषास्त्रिष्टुभः॥६॥ आपोहिष्ठेत्या
दिसस्तजवर्चसेत्यंतस्य नवर्चस्याने श्वरसूक्तस्य सिंधुद्वीप आपो गायत्री अंत्ययोरनुष्टुप्॥७॥ कृपानभ्रिवेत्या
दिधामित्रोपरीत्यंतस्य पंचदशर्चस्य राहसूक्तस्य वामदेव इंद्रो गायत्री॥८॥ युंजंतीत्यारभ्य रजसइत्यंतस्य दशर्चस्य व
त्रुधुक्तस्य मधुच्छंदा इंद्रो गायत्री॥ ॐ युंजंति रजसे॥१॥ अथाधिदैवतानां॥ इमा रुद्रायेत्यादि एथिवी उत्तरेत्यंतस्यै
कादशर्चस्य रुद्रसूक्तस्य कुत्सो रुद्रो जगती इति रुद्रस्य॥१॥ अथो माधाः॥ आपो हिष्ठेत्यादि वर्चसे इत्यंतस्य नवर्चस्य
सिंधुद्वीप आपो गायत्री॥ अंत्ययोरनुष्टुप्॥ उमासूक्तं जपे विनि॰॥२॥ अथ स्कंदस्य॥ प्रातर्ग्निमित्यादि सप्रथ इत्यंतस्य पं
चदशर्चस्य स्कंदसूक्तस्य मेधातिथिः स्कंदो गायत्री॥३॥ अतो देवा इत्यादि विष्णोर्यत्सरमं पदमित्यंतस्य षड्चस्य विष्णुसूक्त
स्य मेधातिथिर्विष्णुर्गायत्री॥४॥ अग्न आयाह्यग्निभिरित्यादि क्षस्विन इत्यंतस्य त्रिंशदृचस्य लमसूक्तस्य प्रगाथो ब्रह्मा गाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ त्री॥५॥इंद्रविश्वाइत्यादि उत वासंतिन्नपसीरित्यंतस्य षड्र्चस्येंद्रसूक्तस्य जेतामधुच्छंदा इंद्रो गायत्री॥६॥ आयंगौरि
त्यादि प्रतिवत्सोरहद्युभिरित्यंतस्य त्र्यृचस्य सर्पराज्ञी सूर्यो गायत्री॥७॥ ब्रह्मजज्ञानमित्यादि---त्यं
॥६९॥ तस्य अष्टर्चस्य कालसूक्तस्य कश्यपः कालस्त्रिष्टुप॥८॥ अनाज्ञात मित्यादि यथातथमितिपंचस्य चित्रगुप्तसूक्त
स्य प्रजापतिश्चित्रगुप्तोऽनुष्टुप॥ चित्रगुप्तप्रीतये जपे वि॰॥९॥ अथ प्रत्यधिदेवतानां॥ अग्निं दूतमित्यादीमं स्तोमं जु
षस्व न इत्यंतस्य द्वादशर्चस्याग्निसूक्तस्य मेधातिथिरग्निर्गायत्री॥१॥ कस्य नूनमित्याद्यदितये स्यामेत्यंतस्य पंचदर्चा
स्याप्यसूक्तस्य शुनःशेप आपस्त्रिष्टुप॥२॥ स्योना पृथिवी से कमंत्रस्य मेधातिथिः पृथिवी गायत्री पृथिवी प्री॰॥३॥ स
हस्रशीर्षेत्यादि संतितिदेवाइत्यंतस्य षोडशर्चस्य सूक्तस्य नारायणो विष्णुरनुष्टुप॥४॥ इंद्राय इंद्रो मरुत्वत इत्येकस्येंद्रमं
त्रस्य कश्यपः सोमो गायत्री॥५॥ इमां खनाम्योषधी मित्यादि यथा बाविरवधा वत्तित्यंतस्य षड्र्चस्येंद्राणीं ऋषिरिंद्राण्य
नुष्टुप॥६॥ प्रजापते नत्वेत्येकस्य प्रजापतिमंत्रस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप॥७॥ कालिकोनामेत्येकमंत्रस्य वसिष्ठः दान॰
सर्पोनुष्टुप॥८॥ एष ब्रह्माय ऋत्विज इत्येतस्य मंत्रस्य प्रजापतिर्ब्रह्मानुष्टुप॥९॥ अथ विनायकादिपंचानां॥ आतूनं ॥६९॥
इंद्रेत्यादि हिमक्षजरंत इत्यंतस्य नवर्चस्य सूक्तस्य कुसीदः काण्वो गणपतिर्गायत्री॥१॥ जातवेदसे इत्येकर्चस्य मारीचः

कश्यपो दुर्गा त्रिष्टुप॥२॥ काराग्निभूरित्येकर्चस्य त्रितो वायुरुष्णिक्॥३॥ आदित्यत्नस्येत्येकर्चस्य वत्स आ काण्वो
गायत्री॥४॥ एषो उषेत्येकर्चस्य प्रस्कण्वोऽश्विनौ गायत्री॥५॥ अथ दिक्पालकानां॥ इंद्रं विश्वा इत्याद्यष्टर्चस्ये
द्रसूक्तस्य जेता मधुच्छंदा इंद्रोऽनुष्टुप॥१॥ अग्निं सनिमित्यादि उविर्णमायेजस्वेत्यंतस्य सप्तर्चस्याग्निसूक्तस्य सोबी
को ग्निर्वैश्वानरो ग्निस्त्रिष्टुप॥२॥ परेयिवांसमित्यादि यम आ हि तेत्यंतस्य षोडशर्चस्य यमसूक्तस्य यमो यमस्त्रिष्टुप
॥३॥ वेत्याहि निर्ऋतीनामित्येकर्चस्य त्र्यश्वा निर्ऋतिरुष्णिक्॥४॥ मोषुवरुणेत्यादि देवरां रिष इत्यंतस्य पंचर्चस्य वरुणाख्
त्रेस्य वसिष्ठो वरुणाश्च तस्रो गायत्र्यो साज्जगती॥५॥ वात आवातिवित्यादिन्नो वस इत्यंतस्य त्र्यृचस्य वायुसूक्तस्य वातायन उ
लयो वायुर्गायत्री॥६॥ त्वं सोमेति गविष्ठावित्यंतस्य सोमसूक्तस्य गोतमः सोमस्त्रिष्टुप॥७॥ इमा रुद्राय इत्यादि द्यो रित्यंत
स्य रुद्रसूक्तस्य कुत्सो रुद्रो गायत्री॥८॥ ब्रह्मजज्ञानमित्याद्यष्टर्चस्य ब्रह्मसूक्तस्य कश्यपो ब्रह्मा त्रिष्टुप॥९॥ सहस्र
शीर्षेत्यादि षोडशर्चस्य सूक्तस्य नारायणो विष्णुरनुष्टुप॥१०॥ वसूनां जाया आवेत्येकमंत्रस्य वसिष्ठो वसवस्त्रिष्टुप
॥१॥ रुद्रस्थापन पक्षे त्र्या रुद्रा सद इत्येमंत्रस्यात्रेयो रुद्रो जगती॥२॥ आदित्यानां तु॥ इमा गिर रत्यारभ्य विदश्ये सुवीरा इत्यंतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान०ब० समन्दशर्चस्यादित्यसूक्तस्यकूर्मोगार्त्समदऋषिरादित्यास्त्रिष्टुप्॥३॥मरुतानांतु॥मरुतोयस्यहिक्षयादित्येतोतिषकर्त्तीयड
॥६१॥ मसीत्यंतस्यदशर्चस्यमरुद्वेत्याहिनितसूक्तस्यगोतमोमरुतोगायत्री॥४॥ब्रह्मणस्तु॥हिरण्यगर्भसमित्यादिपयी
रणामित्यंतस्यदशर्चस्यत्रयस्त्रिंशसूक्तस्यहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥५॥विष्णोस्तु॥सहस्रशीर्षेतिपूर्ववत॥६॥इ
न्द्रस्य॥आतेपितरित्यादिविदथेसुवीराइत्यंतस्यपंचदशर्चस्येन्द्रसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप्॥७॥अर्कस्यतु॥चि
त्रंदेवानामितिषडृचस्यार्कसूक्तस्यकुत्सःसूर्यस्त्रिष्टुप्॥८॥वनस्पतेस्तु॥वनस्पतेवीड्वंगइत्यादिप्रविहमाऽआयेस
तस्यतचस्यतचस्यवनस्पतिसूक्तस्यगौवनस्पतिस्त्रिष्टुप्॥९॥इतिजप्यसूक्तान्युक्त्वाहोतोत्तरतंत्रंकुर्यात॥यथा॥
स्रुवेणाज्यंगृहीत्वापरस्यकर्मणाइत्यस्यहिरण्यगर्भोऽग्निःस्विष्टकृदितिधृतिःस्विष्टकृद्धोमेवि०॥ॐ यदस्यकर्मणाइ
त्यादिनास्विष्टकृतंहुत्वेध्मसंनहनंप्रोक्ष्यॐरुद्रायस्वाहेतिहुत्वापउपस्पृशेत॥ततःप्रायश्चित्तहोमः॥तद्यथा॥अ
याश्चाग्नइत्येका॥अतोदेवाइदंविष्णुरितिद्वे॥व्याहृतयश्चतस्रः॥ततोब्रह्मापिमात्रएवप्रायश्चित्ताहुतीर्हुत्वाकर्म राम०
विपर्यासप्राप्तश्चित्ताहुतिद्वयंदेव।अतिपातयानीतिमंत्रेणनिधेनेनेसंतेनहुत्वातत्संस्रवमिधमाधायॐचमइत्यादि ॥६१॥

संस्थामंत्रजपेनोपस्थायविरमेत॥अथाचार्यःअनाज्ञातमित्यादिमंत्रेणाज्यंहुत्वाचतस्रोव्याहृतीर्जुहुयात॥ततोद्विती
येन्द्रियेणाहवाचनामंतरंवासमुद्राहूर्मिरित्यनेनपूर्णाहुतिंहुत्वाप्रणीतापात्रोदकेनबर्हिषिनिनयेत॥ततःपरिस्त
रणंविसृज्याग्निंपरिसमूह्यपर्युक्ष्यालंकृत्यसंपूज्यॐचमइतिजपित्वाविरमेदित्यृग्वेदिनामग्निस्थापनादिविधिः
॥ ॥अथयजुर्वेदिनामग्निस्थापनादिविधिः॥आदौसुस्थाप्यंकुंडमग्रमोदर्भैःपरिसमूहनं॥गोमयेनोपलेपनं॥
खादिरेणस्फेनप्रागग्रोदक्संस्थरेखात्रयकरणं॥अंगुष्ठानामिकाभ्यांरेखाभ्यःक्रमेणपांसुद्धरणं॥कुशोदकेना
भ्युक्षणंचकुर्यात॥तत्राग्निंस्थापयित्वाग्नेर्दक्षिणतोब्रह्मासनंकुशैरास्तीर्यतत्रब्रह्माणमुपवेशय॥वारणाचमसंमय
यंवापात्रंवामहस्तेनिधायजलेनापूर्यसकुशांभ्यांभूमौनिधायालभ्यप्रणीयोत्तरतोग्नेःस्थापयित्वाप्रागग्रैर्बर्हि
र्भिरीशानादीशानपर्यंतप्रदक्षिणमग्निंपरिस्तीर्याथयथात्रासादयेत॥तद्यथा॥पवित्रछेदनानित्रीणिकुशात
रुणानि॥पवित्रेद्वेकुशातरुणोप्राग्रदीर्घेशाधिकपरिमाणे॥प्रोक्षणीपात्रंवारणंतैजसंवा॥आज्यस्थालीताम्रमयी॥
संमार्जनकुशास्त्रीन॥उपयमनकुशास्त्रीन॥प्रादेशमात्राःसित्स्वःपालाशीःसमिधः॥खादिरंस्रुवं॥गव्यमाज्यं॥षट्पंचा
शदधिकशतद्वयमुष्टिमिततंडुलपूर्णंभूर्णपूर्णपात्रंदक्षिणार्थंवरंवेतिक्रमेणोदगग्रप्राक्संस्थमासादयेत॥तत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ हान.प्र. आसादितैस्त्रिभिः कुशतरुणैर्द्वयोः कुशतरुणयोः साग्रयोः मूलदेशाच्छेदने न प्रादेशमात्रे पवित्रे संपाद्य प्रोक्षणीपात्रे
॥६३॥ दकमासिच्य ताभ्यां पवित्राभ्यां प्रोक्षणीपात्रं सव्ये पाणौ कृत्वा दक्षिणेन पाणिना दिंगनं कृत्वा ताभिरद्भिः प्रोक्ष्य आसा
दित पात्राणि प्रत्येकं क्रमेण प्रोक्ष्य असंचरे प्रोक्षणीपात्रं निदध्यात्॥ ततः आज्यस्थाल्यामाज्यं निरूप्य अग्नावधिश्रित्य उल्मु
केन प्रदक्षिणं पर्यग्निं कुर्यात्॥ ततः स्रुवं प्रागग्रमधोमुखमग्नौ प्रताप्य संमार्गकुशाग्रैः स्रुवं मूलादारभ्याग्रपर्यंतं संम
उपसंमार्गकुशमूलैः स्रुवाग्रमारभ्याधोभागं मूलपर्यंतं संमृज्यात्॥ ततः प्रणीतोदकेन प्रोक्ष्य पुनः प्रताप्य दक्षिणतो द
र्भेषु निधायाज्यमुद्वास्य पवित्राभ्यामुत्पूयावेक्ष्यापद्रव्यं निरस्य प्रोक्षणीश्चोत्पूय उपयमनं कुशानादाय समिधस्ति
स्र आधाय तिष्ठन् समिधोऽग्नावाधाय पवित्रे प्रोक्षण्युदकेन सर्वतः प्रदक्षिणमग्निं पर्युक्ष्य पवित्रे प्रणीतासु निधाय संस्रावधारणा
र्थं प्रोक्षणीपात्रं प्रणीताग्न्योर्मध्ये निदध्यात्॥ अथ दक्षिणं जान्वाच्य जुहोति आसने उपविष्टो हृदि सव्यहस्तं निधाय स्रुवेणा
ज्यं तु हुयात्॥ तद्यथा॥ ॐ प्रजापतये स्वाहेति प्रजापतिं मनसा ध्यात्वा स तत्र मनसैव प्रांचं सर्वाघारमग्नौ समिद्वेषु होतुर्हरतः॥
रुद्रमेवोत्तरघारं मिं इन्द्राय स्वाहेति अग्नेर्दक्षिणतो जुहुयात्॥ ततः आग्नेयमाज्यभागमग्नये स्वाहेत्युत्तरपूर्वार्द्धे जुहोति॥ सोमा राम.
य स्वाहेति सोममाज्यभागं दक्षिणपूर्वार्द्धे जुहोति॥ यद्वा समिद्धतमे अग्निप्रदेशे सर्वाहुतिप्रक्षेपः कार्यः॥ ततो ग्रहादिदेवता ॥६३॥

होमः कार्यः॥ तत्र आकृष्णेनेति हिरण्यस्तूप आंगिरस सविता त्रिष्टुप्। सूर्यप्रीतये तिलाज्यहोमे विनियोगः॥ एवमुत्तर
त्रापि विनियोग ऊह्यः॥१॥ इमं देवा इति वरुणः सोमो यजुः॥२॥ अग्निर्मूर्द्धा विरूप आंगिरसोऽग्निर्गायत्री॥३॥ उद्बुध्यस्व
परमेष्ठी बुधस्त्रिष्टुप्॥४॥ बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्॥५॥ अन्नात्परिस्रुतः प्रजापतिः शुक्रः सरस्वती इन्द्रः शु
क्रो जगती॥६॥ शन्नो देवीर्दध्यङ् आथर्वणः आपो गायत्री॥७॥ कयानो वामदेव राहुर्गायत्री॥८॥ केतुं कृण्वन् मधुच्छं
दाः केतुर्गायत्री॥९॥ त्र्यंबकं वसिष्ठो रुद्रोऽनुष्टुप्॥१॥ श्रीश्च ते नारायण उमा त्रिष्टुप्॥२॥ यदक्रंदो भार्गवजमदग्निर्दी
र्घतमसः स्कंदस्त्रिष्टुप्॥३॥ विष्णो रराटं प्रजापतिर्विष्णुर्यजुः॥४॥ आब्रह्मन् यजुः॥५॥ सजोषा इन्द्र विश्वामित्र इन्द्रस्त्रि
ष्टुप्॥६॥ यमाय त्वा दध्यङ्ङाथर्वणो यमो यजुः॥७॥ कार्षिरसि आथर्वणः कालोऽनुष्टुप्॥८॥ चित्रावसो ऋषयश्चित्रगुप्त
एकपदा जगती॥९॥ अग्निं दूतं मेधातिथिरग्निर्गायत्री॥१॥ आपो हिष्ठा सिंधुद्वीप आपो गायत्री॥२॥ स्योना पृथिवी
दध्यङ्ङाथर्वणः पृथिवी गायत्री॥३॥ इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री॥४॥ इन्द्र आसां प्रजापतिरिन्द्रस्त्रिष्टुप्॥५॥
अदित्यै रास्नासि प्रजापतिरिन्द्राणी यजुः॥६॥ प्रजापते न त्वद्धिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥७॥ नमोऽस्तु सर्पेभ्यो देवाः सर्पा अ
नुष्टुप्॥८॥ ब्रह्म जज्ञानं प्रजापतिर्ब्रह्मा त्रिष्टुप्॥९॥ गणानां त्वा प्रजापतिर्गणपतिर्यजुः॥१॥ अंबे अंबिके प्रजाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रा०न०प्र० तिदुर्गाणिविश्वहइत्यनुष्टुप्॥२॥वायोयेतेप्रजापतिर्वायुर्गायत्री॥३॥घृतंघृतपावानोमेधातिथिराकाशोयजुः॥४॥यावं
॥६३॥ कशाप्रजापतिरश्विनौगायत्री॥५॥त्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप्॥१॥अग्नेपावकमेधातिथिरग्निर्गायत्री॥२॥यमा
यत्वास्थ्यऊथर्वणोयमोयजुः॥३॥असुन्वंतंप्रजापतिर्निर्ऋतिस्त्रिष्टुप्॥४॥इमंमेवरुणप्रजापतिर्वरुणोन्वि
गायत्री॥५॥वायोयेतेप्रजापतिर्वायुर्गायत्री॥६॥आप्यायस्वप्रजापतिःसोमोगायत्री॥७॥तमीशानंगोतमईशानो
जगती॥८॥ब्रह्मजज्ञानंप्रजापतिर्ब्रह्मात्रिष्टुप्॥९॥नमोस्तुसर्पेभ्योदेवाःसर्पाअनुष्टुप्॥१०॥स्रुगावोदेवाइतिदे
वावसवस्त्रिष्टुप्॥१॥रुद्राःसंसृज्यपृथिवींप्रजापतीरुद्राअनुष्टुप्॥२॥यत्तोदेवानांप्रजापतिरादित्यास्त्रिष्टुप्
॥३॥मरुतोयस्यप्रजापतिर्मरुतोगायत्री॥४॥ब्रह्मजज्ञानंप्रजापतिर्ब्रह्मात्रिष्टुप्॥५॥इदंविष्णुर्मेधातिथिर्विष्णुर्गा
यत्री॥६॥नमस्तेरुद्रपरमेष्ठीरुद्रोगायत्री॥७॥स्वर्णाघर्मःप्रजापतिरर्कोगायत्री॥८॥वनस्पतेवीड्वंगःप्रजापतिर्वनस्प
तिस्त्रिष्टुप्॥९॥इतिहोममंत्राः॥अथजपसूक्तानि॥सूर्यस्तत्सवक्ष्यततोयेःहनिसोर्यभ्वतुर्दशार्चश्चाद्विषःप्रतीको राम०
ऽत्राश्वविभ्राडुहज्जगतीविभ्राट्सौर्यउदुत्यंतिस्रःप्रस्कण्वआनोनारुद्यातंसौर्यगायत्रेत्रेष्टुभंसूर्यप्रीतयेअयेविनियो
गः॥एवमुन्नरत्रापिविनियोगउह्यः॥१॥अथादंप्रत्विसारस्यप्रचिकित्सागवेष्टाविसंततस्यञेंब्रेन्हुष्टुपस्यगोतमःसो ॥६३॥

मास्त्रिष्टुप्॥२॥अग्निर्मूर्द्धस्यैकमंत्रस्यविरूपांगरिसकोगायत्री॥३॥उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप्॥४॥बृहस्पतेअ
तिगत्समदोबृहस्पतिस्त्रिष्टुप्॥५॥अग्नात्परिस्रुतःप्रजापत्यश्विसरस्वतीइंद्रश्चत्वारोजगती॥६॥शन्नोदेवीःसिंधु
द्वीपःशनिर्गायत्री॥७॥कयानोवामदेवोराहुर्गायत्री॥८॥केतुंकृण्वन्नस्यमधुच्छंदाःकेतुरनिरुक्तोगायत्री॥९॥इति
ग्रहाणां॥ ॥अथाधिदेवतानां॥नमस्तेरुद्रसादिहवामहेइत्यंतस्यषोडशर्चस्यानुवाकस्यपरमेष्ठीऋषिर्मानोब्र
योःकुत्संसर्वासामेकरुद्रोदेवता।प्रथमागायत्रीततस्तिस्रोनुष्टुभस्ततस्तिस्रःपंक्त्यस्ततःसप्तानुष्टुभस्ततोद्वेजगत्यौ
॥१॥श्रीश्चतेनारायणउमात्रिष्टुप्॥२॥यदक्रंदोभार्गवजमदग्निर्हिरण्यगर्भोमस्कंदःषपःस्कंदस्त्रिष्टुप्॥३॥सहस्रशी
र्षेतिषोडशर्चस्यानुवाकस्यनारायणःपुरुषोनुष्टुबंत्यात्रिष्टुप्॥६॥यमायत्वारध्यऊथर्वणोयमोगायत्री॥७॥का
र्षिरसिअथर्वणःकालोयजुः॥८॥चित्रावसोकश्यपश्चित्रगुप्तएकपदाजगती॥९॥ ॥अथप्रत्यधिदेवानां॥असा
जरासःसप्तस्याग्निष्टुत्याग्निरीशमिकेप्रथमेहनिपुरोरुचेत्याग्नेयश्चआद्येद्वैऐंद्रवायव्यस्यस्याजरासोवसप्रीहरयोय
मकेतवोविहव्यायजमानोमैत्रावरुणास्यगोतमोपृक्षावात्वाश्विनस्यदेवविहव्यपद्मुत्कस्यकुत्सोयमिहमथिनोवैश्वदेव
यहरोत्रीगोत्रिह्नानाविश्वामित्रऐंद्राग्नस्याग्निर्हेत्रारिणाभरद्वाजोवैश्वदेवस्यविश्वेभिःसोम्यंमेधातिथिरायन्मतोपर्यार्ध्वेश्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰
॥ ६७॥

यत्पराशरः शात्त्योः ग्रेरार्षा त्रिष्टुं हिता विश्ववारा लाठंहिमाहं द्रप्समरद्वाजस्ते अग्ने देवइहसावादित्यस्यले अग्नेवसि
ष्ठः अथिर्प्रस्काण्वआदित्यग्रह अयशे विश्वेषामदितिर्वामदेवोगोतमोमहो अग्नेः सावित्रस्तत्सुनो धानाको नुक्र
मायत्रैत्रैत्रिष्टुभम॥१॥ आपोलिष्टेतितस्य स्पर्सिंधुद्वीपआपोगायत्री॥२॥ स्योनापृथिवीदध्यङाथर्वणः पृथि
वीगायत्री॥३॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥४॥ त्रातारमग्निंद्रं त्रिष्टुप्॥५॥ अदितेरास्रासीतिप्रजापति
रिंद्राणीयजुः॥६॥ प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥७॥ नमोस्तसर्पेभ्यइतितचस्यप्रजापतिः सर्पागा
यत्री॥८॥ ब्रह्मजज्ञानंप्रजापतिर्ब्रह्मत्रिष्टुप्॥९॥ गणानांत्वाप्रजापतिर्गणपतिर्यजुः॥१॥ अग्नेब्रवेअग्नेविवेकप्रजापति
र्यजुः॥२॥ मित्रुत्वान्वायोप्रजापतिर्वायुर्गायत्री॥३॥ घृतंघृतपावानोमेधातिथिराकाशोयजुः॥४॥ यावांकशाप्रजा
प्रतिरश्विनौगायत्री॥५॥ ॥अथदिक्पालानां॥ आशुःशिशानइत्यनुवाकइंद्रदिक्कां॥ अस्याजरासोनुवाको
यः॥२॥ यमायत्वांगिरसेतेयमस्यां॥३॥ असुन्वंतंतचनिर्ऋतिः॥४॥ एदेष्यादिकंप्रागुक्तं॥ इमंमेगायत्रीत्रिष्टु स्म॰
मौवारुणोपाशुनःशेपःस्तत्रत्रिष्टुप्॥॥ वाग्निवाग्निवारुणौवामदेवःवरुणप्रीतयेजयेविः॥इमंमे॰नदृधि॥५॥ ॥६॥
पीवो अन्नान्देत्रिष्टुभौवसिष्ठोवायुरग्नेगायत्रीप्रयाभिर्वसिष्ठस्त्रिष्टुभंवायोयेगायव्यपरकपाचत्रिष्टुपनियुत्वान्वायो

गायत्रीगत्समदेवायोम्नुकोनुष्टुभंपुरुमीढाजमीढावानस्त्रिष्टुभमाजमीढस्तवबायोश्वअंगिरसोगायत्रीसर्वावायव्याः
॥६॥ आप्यायस्वगौतमः सौमीगायत्रीत्रिष्टुबुष्णिहः आप्यायस्व समवाड्धे॥७॥ नमस्तेरुद्रइत्यनुवाकईशस्य॥८॥ न
मोअस्तुसर्पेभ्यइतितचमनंतस्य॥९॥ ब्रह्मजज्ञानंब्रह्मणः॥१०॥ वसूनां॥ सुगावइत्येकस्यदेवाऋषयोवसवस्त्रि
ष्टुप्॥१॥ रुद्राणां॥ नमस्तेरुद्रइत्यनुवाकः॥२॥ यज्ञोदेवानामित्यादित्यानांप्रजापतिरादित्यास्त्रिष्टुप्॥३॥ मरुतोयस्ये
तिमरुतांप्रजापतिर्मरुतोगायत्री॥४॥ ब्रह्मजज्ञानंब्रह्मणः॥५॥ सहस्त्वत्रीर्षेतिषोडशार्चस्याच्युतस्य॥६॥ विश्वाडित्य
नुवाकोर्कस्य॥७॥ नमस्तइतीशस्य॥८॥ वनस्पतेवीड्वंगइतिवनस्पतेः प्रजापतिर्वनस्पतिस्त्रिष्टुप्॥९॥ ॥अथोत्तरं
तंत्रं॥ होमांतेब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहुयात॥ तद्यथा॥ स्रुवेणाज्यमादाय॥ ॐ भूः स्वाहा इदमग्नये॰॥१॥
ॐ भुवः स्वाहा इदंवायवे॰॥२॥ ॐ स्वः स्वाहा इदंसूर्याय॰॥३॥ त्वन्नोअग्ने॥४॥ सत्वन्नोअग्ने॥५॥ अयाश्चाग्ने॥६॥ येतेश
तं॥७॥ उदुत्तमं॥८॥ इदंवारुणपंचकं॥ ॐ प्रजापतयेस्वाहा॥ इदंप्रजापतये॥९॥ ॐ अग्नयेस्विष्टकृतेस्वाहा॥ इदमग्न
येस्विष्टकृते॥१०॥ ततोद्वितीयेन्हि पुण्याहंवाचनानंतरंमूर्त्तीनमितिपूर्णाहुतिंहुत्वासंस्रावप्राशनपवित्रप्रतिपत्तिप्रणी
ताविमोकपूर्णपात्रदानानिकुर्यादितियजुर्वेदिनामग्निस्थापनादिविधिः॥ ॥अथसामगानामग्निस्थापनादिविधिरुच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दश॰प्र॰ ते॥ तत्र कर्त्ता प्राङ्मुखः कुंडमुविचतुर्विंशत्यंगुलमितायां कुशैरप्यद्धयमपात्स्य गोमयेनानुलिप्य तत्र फलकं दलकन
॥६५॥ क कुशं कुसुमयवानामिकाग्रेण तिस्रो रेखाः कुर्यात्॥ कुशेनैव रेखाः कुर्यादिति कौथुमशाखायाः॥ दीर्घकृत्तु कुशा
दिनां गुरुपर्वभिरंगुलमानं विधायोपलिप्तस्थंडिलस्य दक्षिणाभागे सार्द्धमंगुलं त्यक्त्वा द्वादशांगुलां पूर्वगामिनी
पार्थिवी ध्यात्वा भ्रुक्ष्णवर्णां रेखामुल्लिखेत् तस्याश्चांतसंलग्नामुत्तरगामिनीमेकविंशत्यंगुलामाग्नेयी ध्यात्वा लोहितलो
हितवर्णांतिथैवोल्लिखेत्॥ ततः पार्थिवरेखामूलात्रस्मादधिकेषडंगुलांतरं त्यक्त्वा ऐंद्रीं संलग्नां पूर्वगामिनीं प्रादेश
मितां प्राजा[illegible]पत्यां ध्यात्वा कृष्णवर्णां तथैवोल्लिखेत्॥ ततस्तद्रेखातस्तावदंतरं त्यक्त्वा तथैवापरां प्रादेशमितामैंद्रीं ध्या
त्वा नीलवर्णामुल्लिखेत्॥ ततस्तावदंतरां पूर्वगामिनीं द्वादशांगुलां सौमीं ध्यात्वा पीतवर्णामुल्लिखेत्॥ प्रागग्रद्वादशां
गुलरेखावत् षट्यो समस्तां प्रांगुलाम्यंतरालानीति कौथुमशाखीयानां मतं॥ पश्चिमरेखायाम् एकविंशत्यंगुलत्वात्॥ ततः
क्रमेणारेखासु उल्लिखितोल्लिकरं गृहीत्वा प्रागुदीच्यामुत्क्षिमात्रे देशे निरस्यात्॥ ततोनुगृह्णामि रविरुद्धिरुल्लिखितसु भाग राम॰
मभ्युक्षेत्॥ ततआयसादृश्गोमयमस्यादिस्थालिकास्तुटितनिर्गीत्कसुवर्णताम्रकांस्यादिपात्रेणाग्रिमानीयक्र ॥६५॥
व्यादाग्नौ द्वादशहृतमितिवचनात् ज्वलत्तृणानिरसनं कुर्यात्॥ क्रव्यादमिति मंत्रस्य प्रजापतिरृषिः त्रिष्टुप्छंदः॥ अग्नि

र्देवता ज्वलत्तृणानिरसने वि०॥ ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः इसर्थे चैन ज्वलत्तृणामैशान्यां
निक्षिपेत्॥ ततोस्थापनं॥ व्याहृतीनां प्रजापतिरृषिः बृहस्पति छंदो बृहस्पतिर्देवताग्निस्थापने वि०॥ ॐ भूर्भुवः स्व
रित्यभिमुखमग्निं तत्र प्रणयेत्॥ ततस्तस्मिन्नेव समिधं निक्षिपेत्॥ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्निमुत्तु
तार्द्धेनार्द्धज्वाला प्रसक्षीकरणामुपस्थानं॥ कुशोत्तरं ब्रह्मासनं॥ अग्निर्दक्षिणत उपकल्प्याधीतवेदं ब्राह्मणं वृणीत॥ ॐ
अमुककर्माहं करिष्ये तत्र त्वं ब्रह्मा भवेति॥ ततः प्रदक्षिणमग्निं परिक्रम्य ब्रह्मा स्वकीयासने प्राङ्मुखो वारिधारां दत्वा प्रत्य
ङ्मुख आसनस्य पूर्वं तत्तिष्टन्दक्षिणपाणिना ऽऽसनं स्थं अन्वामहस्तांगुष्ठानामिकाभ्यामासनात्कुशं गृहीत्वा नैर्ऋ
ति दिशि क्षिपेदनेन यजुषा॥ अच्छंदस्कानि निगदयजूंषि॥ तस्मादस्य प्रजापतिर्ऋषिः परावसुर्देवता॥ तृणानिरस
ने वि०॥ ॐ निरस्तः परावसुः॥ तत उदकमुपस्पृश्य पादस्मुखस्तत्रोपविशेत्॥ तत्रमंत्रः॥ वसिष्ठ ऋ० परावसुर्दे०॥ उपवे
शने वि०॥ ॐ अर्वावसोः सदने सीदामीति॥ स्वापति यावच्च नियम्य प्रांजलिर्विष्णुमनुस्मरन् वाग्यमः कर्मसमाप्ति तत्रासीत
॥ ततः कर्त्ता वह्नेरुत्तरत उरगाया प्रणीता प्रोक्षणी स्थालीयथाविनियोगं बर्हिरिध्मान्स्रुवं कुशं स्रुवाज्यं गृसोदके समिद्धपादीनि द्व्या
सादयेत्॥ अथ भूमिरूपः॥ अग्नेः पश्चात् भूमौ दक्षिणोत्तरोयत्तावांताभिमुखोमंत्रेणोपवेशी तत्राह परमेष्ठी ऋषिः अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० ष्टुप्॰ अग्निर्देवता समिन्धने वि॰ ॥ ॐ इदं म इमे ज्ञामहद्यं भद्रं शुभे गतं ॥ परासपत्नान्बाधस्व माऽन्येषां विंदते धनं ॥ रा
॥६६॥ त्रौ न विंदते वस्विति जपेत ॥ ततो गृहीतकुशेन दक्षिणपाणिना उत्तरादि प्रदक्षिणमग्नेः स्तृणं ॥ यथासनस्तृणं परिसमूहनं
कुर्यात ॥ तत्र मंत्रः ॥ कौत्स ऋषिः जगती छंदो ग्निर्देवता परिसमूहने विनियोगः ॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सं
गते मा मनीषया ॥ भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥ त्वा केमत्वा समिधं साधयाम्त्वियस्त्वे देवा हवि
रदंत्वाहुतं ॥ त्वामादित्यां आवह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तवेति ॥ ततः प्रागग्रैः कुशैरग्रैर्मूलानि छादयन्मूला
दक्षिणात उत्तरतः पश्चाच्च त्रिराशेनैव दहूलमयुग्मपत्रमनुपमतूलं संततं बर्हिस्तृणीत ॥ ततः खादिरं पालाशं वा समानहे
क्षं द्विः प्रादेशमितं समिद्द्वियं तिमध्यमिधामादाय मूलमध्याग्रदेशे धारयेन्नाम्भप्रजापतिं ध्यात्वा जुहुयात ॥ ततस्तावच्छि
ष्टाद्बर्हिषः साग्रमंतर्गर्भं कुशद्वयं समपत्रमाद्याप नि निरस्य प्रादेशमात्रं छिंद्यात ॥ तत्र मंत्रः ॥ प्रजापतिर्ऋषिः पवि
त्रे देवता यजुः पवित्रछेदने वि॰ ॥ ॐ पवित्रे स्थो वैष्णव्यौ इति छित्वा ॥ प्रजापतिर्ऋषिः पवित्रे देवता यजुः प्रोक्षणी वि॰ ॥ राम०
विष्णोर्मनसा पूते स्थ इति पवित्रे प्रोक्षणीं कृत्वा अस्थाल्यां पवित्रे कृत्वा अद्भिः प्रोक्षितमाज्यं निर्वपेत ॥ एतत्संप्लवनं ॥ तत उ ॥६६॥
त्पवने ॥ उपरिगत दक्षिणाग्रस्तहस्तयोरंगुष्ठानामिकाभ्यामुदगग्रे विरले पवित्रे गृहीत्वा ताभ्यां सकृदाज्यमुत्पुनाति सीमा

उमूर्ध्वं नयेत ॥ प्रजापतिर्ऋषिः आज्यं देवता यजुः ॥ आज्यस्योत्पवने वि॰ ॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवि
त्रेण वसोः सूर्यस्य रश्मिभिरिति ॥ अथ तत्पवित्रमद्भिः प्रक्षाल्याग्नौ प्रक्षिपेत ॥ अथाज्यमग्राववधिश्रित्योत्तरादिश
मवतारयेदित्याज्यसंस्कारः ॥ अथ दर्भैः स्रुक्स्रुवौ संमृज्य प्रतप्य स्रुक्स्रुवोत्तरतो निदध्यात ॥ अथ समिद्द्वयमाज्यस्था
ल्यां वाग्रे पश्चिमतः स्थापयेत ॥ अथ दक्षिणं जान्वाच्य ॥ प्रजापतिर्ऋषिः अदितिर्देवता यजुः उदकांजलिप्रसे वि॰ ॥ ॐ
अदितेनुमन्यस्वेति दक्षिणतः ॥ प्रागंतं प्रजापतिर्ऋषिः अनुमतिर्देवता यजुः ॥ उदकांजलिप्रसेचने वि॰ ॥ ॐ अनुमतेनु
मन्यस्वेति पश्चिमत उदगंतं ॥ प्रजापतिर्ऋषिः सरस्वती देवता उदकांजलिप्रसेचने वि॰ ॥ ॐ सरस्वत्यनुमन्यस्वेत्युत्तरतः
प्रागंतं ॥ अथोदकांजलिं गृहीत्वा संलग्नधारया होमीयद्रव्यसहितमग्निं प्रदक्षिणं पर्युक्षेत ॥ प्रजापतिर्ऋषिः त्रिष्टुप् छं
दः सविता देवता पर्युक्षणे विनि॰ ॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ॥ दिव्यो गंधर्वः केतपूः केतं नः पु
नातु वाचस्पतिर्वाचं नः स्वदतु ॥ अथ जानुमुत्थाप्य समिदग्रं तदुष्णाग्रपाणापनिगादम घृतस्कंदं जपेत ॥ वसिष्ठ ऋ
षिः कालाग्निरुद्रो देवता विरूपाक्षजपे विनियोगः ॥ ॐ तपश्चे सारम्भश्चासं नियमश्च ॐ भूर्भुवः स्वरों भिसं ते परित्वोच्छ्रुसे
त ॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्त्वं च वाक् च मनश्चात्मा च ब्रह्म च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ तानिप्रपद्ये तानिमामवंतु भूर्भुवः स्वरोम् महांतमात्मानं प्रपद्ये विरूपाक्षोसि दंत्रांजिस्तस्य ते शय्या पर्णे गृहा अंतरिक्षे वि
॥६७॥ मितं हिरण्मयं तद्देवानां हृदयान्यस्मिन्ने कुंभे तः सन्निहितानि बलभृच्च बलसाच्च रक्षतो प्रमनी अनिमिषतः सत्
त्यं यत्ते द्वादश पुत्रास्ते त्वा संवत्सरे संवत्सरे काम प्रेणाय यज्ञेन याजयित्वा पुनर्ब्रह्मचर्यमुपयंति त्वं देवेषु ब्राह्मणोस्यहं ब्राह्म
णो वै ब्राह्मणमुपधावत्युप त्वा धावामि जपंतं मा मा प्रतिजापीर्जुह्वंतं मा मा प्रतिहौषीः कुर्वंतं मा मा प्रतिकार्षीः त्वां प्र
पद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यतां ॐ समुद्रो मा विश्वव्यचा ब्रह्मानुजा
नातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोनुजानातु तस्मै विरूपाक्षाय दंत्रांजये स
मुद्राय विश्वव्यचसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ॥ ततः प्रदक्षिणा हस्तेनाग्निं परिक्रम्य हस्तास्थित पुष्पाक्षतैर्ब्रह्मा
णं पूजयित्वा तेनैव मार्गेण स्वस्थानमित्वं हस्तमानीय समिधमग्नौ प्रक्षिपेत् ॥ ततो बलस्याग्नेइ हागच्छेत्यादिना तत्तत्कर्मो
क्तं वन्हिमावाहयेत् ॥ ततो महाव्याहृतिभिर्होमः ॥ प्रजापतिऋ॰ गायत्री छंदोग्निर्देवता व्याहृतिहोमे विनि॰ ॥ ॐ भूः
स्वाहा ॥ प्रजापतिऋ॰ उष्णिक् छंदो वायुर्देवता होमे वि॰ ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋ॰ अनुष्टुप् छंदः सूर्यो देवता दा॰प्र॰ ॥६७॥
होमे वि॰ ॥ ॐ स्वः स्वाहा ॥ प्रजापतिर्ऋषिः बृहती छंदः प्रजापतिर्देवता होमे वि॰ ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ पुनस्तिस्रो आहुत

यो होतव्याः ॥ ततो ग्रहादि होमः ॥ तत्र ग्रहमंत्राणामृष्यादिकमभिधीयते ॥ उदुत्यमिति प्रस्कण्वऋषिः गायत्रीछंदः
सूर्यो देवता ॥ सूर्यप्रीतये साज्यतिलहोमे वि॰ ॥ एवमुत्तरत्रापि विनियोगः कार्यः ॥ इति सूर्याय हुत्वा ॥१॥ संते पयांसीति
सोमऋषिः त्रिष्टुप् छंदः सोमो देवता ॥२॥ अग्निर्मूर्द्धेति वरुणऋषिः गायत्री भौमो दे॰ ॥३॥ अग्ने विवस्वदिति मद्रेजा
मदग्निऋषिर्गायत्री बुधो देवता ॥ अग्ने विवस्वतं उषर्बुधं ॥४॥ बृहस्पते परी सप्रतिरथऋ॰ बृहस्पतिर्देवता त्रिष्टु
प् ॥५॥ शुक्रं ते इति भरद्वाजऋषि॰ शुक्रो दे॰ त्रिष्टुप् ॥ शुक्रं ते अन्यत् ॥६॥ शंनो देवीति सिंधुद्वीपऋ॰ गायत्री छंदः
शनिर्दे॰ ॥७॥ कयान इति वामदेवऋषिः गायत्री राहुर्दे॰ ॥८॥ केतुं कृण्वन्निति मधुछंदा ऋ॰ गायत्री छंदः केतुर्देव॰
॥९॥ अथाधिदेवता ॥ आवो राजानमिति वामदेवऋषिः त्रिष्टुप् रुद्रो दे॰ आवोराजानं रुद्राय ॥१॥ आपो हि ष्ठेति
सिंधुद्वीपऋ॰ गायत्री उमा दे॰ आपो हि॰ चक्षसे ॥२॥ स्योना पृथिवीति मेधातिथिऋ॰ गायत्री स्कंदो दे॰ स्योना॰ स
प्रथाः ॥३॥ इदं विष्णुरिति मेधातिथिऋ॰ गायत्री विष्णुर्देव॰ ॥४॥ त्वमित्सप्रथा इति गोतमऋ॰ बृहती ब्रह्मा दे॰ त्वमि
त॰ वेधस॰ ॥५॥ इंद्रमिदिति पुत्रकत्सऋ॰ बृहती इंद्रो दे॰ इंद्रमित॰ सातये ॥६॥ आयंगौरिति सर्पराज्ञीऋ
षिः गायत्री यमो दे॰ आयंगौ॰ स्वः ॥७॥ ब्रह्मजज्ञानमिति ब्रह्माऋषिः त्रिष्टुप् कालो देवता ॥ ब्रह्मज॰ विव॰ ॥८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ ग्रा० न० प्र०
॥६८॥

त्र इदितिचित्रगुप्तऋषिः गायत्री॰ चित्रगुप्तोदेवता। चित्रइच्छिद्रोः ह्रस्वाचमन॥१०॥ अथप्रत्यधिदेवतानां॥ अग्निं
दूतमितिभरद्वाजऋ॰ गायत्री॰ अग्निर्दे॰ अग्निं सुक्रतुं॥१॥ उदुत्तममितिगोतमऋ॰ त्रिष्टुप॰ आपोदे॰। उदुत्तम॰
स्याम॥२॥ पृथिव्यंतरिक्षं द्यौरितिविरूपऋ॰ उष्णिक्॰ पृथिवीदे॰। पृथिव्यंतरिक्षे॰ घर्मोज्योति॰॥३॥ सहस्रशीर्षेति
नारायणऋषिः अनुष्टु॰ विष्णुदे॰। सहस्र॰ गुलं॥४॥ इंद्रायदर्विंतिइध्मवधीयऋ॰ गायत्री॰ इंद्रोदे॰॥ इंद्रायदे॰ आ
सदन॥५॥ एकाष्टकेतिवसिष्ठऋ॰ अनुष्टुपछंदः इंद्राणीदेव॰ एकाष्टका॰ शचीभिः॥६॥ प्रजापतेनत्वदितिहि
रण्यगर्भऋ॰ त्रिष्टुप॰ प्रजापतिदे॰ प्रजापतेन॰ रयीणां॥७॥ तवेदिंद्रावममितिवसिष्ठऋ॰ त्रिष्टुप॰ सर्पदेवता। तवेदिं
द्रावमं॰ वृधते॥८॥ एषब्रह्मायऋत्वियइतिप्रजापतिऋ॰ द्विपदागायत्रीछंदः ब्रह्मादे॰ एषब्रह्मा॰ गतो॥९॥ अथविना
यकादिपंचानां॥ आतूनइंद्रेतिगौरिवीतिऋ॰ गायत्री॰ गणपतिर्देवता॥ आतूनइंद्र॰ रक्षिरोन॥१॥ जातवेदसइतिभुवः
रोपऋ॰ त्रिष्टुप॰ दुर्गादे॰ जातवेदसे॰ सग्निः॥२॥ आपोनाविभूरितिदुर्ऋ॰ त्रिष्टुप॰ वायुदे॰ आपोनाविभुः॰ दधिर्त्तं॥३॥ ग्र०
आदित्प्रत्नस्येतिनिधनकामऋ॰ गायत्री॰ आकाशोदेव॰ आदित्प्रत्नस्य॰ दिवा॥४॥ एषोउषापूर्व्याऋ॰ गायत्री॰ अश्वि ॥६८॥
नौदेव॰ एषोउषा॰ बृहत॥५॥ अथदिक्पालानां॥ त्वामिद्धीतिभरद्वाजऋषिः बृहती॰ इंद्रोदे॰ त्वामित॰ सर्वतः॥१॥ अ

ग्निर्मूर्द्धाणीतिश्रौतऋ॰ गायत्री॰ अग्निर्देवता॥ अग्निर्मूर्द्धाणी॰ आहुतः॥२॥ नाकेसुपर्णमितियमऋ॰ त्रिष्टुप॰ यमोदेव
॰ नाकेसुपर्णं॰ भुरण्युं॥३॥ वेस्याहिनिर्ऋतीनमित्यादित्यऋ॰ उष्णिक्छंदः निर्ऋतिदेव॰ वेस्याहिनिर्ऋतीनं॰ पश्
मिव॥४॥ इमंमेवरुणेतिपुष्कलऋ॰ गायत्री॰ वरुणोदे॰ इमंमेवरुणा॰ चके॥५॥ वातआवात्वितिप्रतीचीनेउःकाक्षी
तऋ॰ गायत्री॰ वायुदे॰। वातआवातः॰ तारिषत॥६॥ स्वादिष्ठयेतिगंभीरऋ॰ गायत्री॰ सोमोदे॰। स्वादिष्ठया॰ सुतः॥७॥ त
द्वोगायेतिरुद्रऋ॰ गायत्री॰ ईशानोदे॰। तद्वोगाया॰ शाकिने॥८॥ समानोअध्वेत्युशनाऋ॰ त्रिष्टुप॰ अनंतोदे॰। समानो
अध्वा॰ विरूपे॥९॥ ब्रह्मजज्ञानमितिपरमेष्ठीऋषिः त्रिष्टुप॰ ब्रह्मादे॰ ब्रह्मजज्ञानं॰ विवः॥१०॥ अथवसूनां॥ तमग्निमस्ते
वसवइतिवामदेवऋषिः विराट्छंदः वसवोदे॰। तमग्निमस्ते॰ आसनिस॥१॥ अथादित्यानां॥ आदित्यैरिंद्रः सगणइ
तिभरद्वाजऋ॰ विराट्छंदः आदित्योदे॰॥ आदित्यैरिंद्रः॰ रक्षमाणा॥२॥ अथमरुतां॥ पवमाना अरक्षतेतिअभासऋ॰
गायत्री॰ मरुतोदेव॰। पवमाना असृक्षत॰ प्रयांसिवः॥३॥ ब्रह्मणोब्रह्मजज्ञानमितिप्रावत॥४॥ अथाश्विनस्य॥ इदंविष्णु
रितिमेधातिथिऋ॰ गायत्री॰ अश्विनौदेव॰। इदंविष्णुः॰ पांसुरे॥५॥ ईशान्यतु॥ मात्वासोमस्येतिसोमऋ॰ बृहतीछं॰ ईशानो
दे॰। मात्वासोमस्य॰ नयोविवत॥६॥ अर्कस्यतु॥ इंद्रापमध्वनेसुतमितिगोरिवीतऋ॰ गायत्री॰ अर्कोदे॰। इंद्रायमध्वने॰ सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ह्नान·प्र·
॥६९

एवं॥७॥वनस्पते स्तं॥वनस्पतइतिवाचय्यऋ॰त्रिष्टुप्॰वनस्पतिर्दे॰॥वनस्पतेवीड्वंगः॰जेत्वानि॥८॥अथजप्यानिसू
क्तानि॥तत्रयेषांसूक्तानिनसंतेषांहोममंत्राएवजप्याः॥तत्रोदुत्यंजातवेदसमितिप्रस्कण्वऋषिः॥गायत्री॰सविताद्दे॰
सूर्यप्रीतयेजपेविनियोगः॥एवमुत्तरत्रापिविनियोगऊह्यः॥१॥अथसोमस्य॥प्रकाव्यमुशनेवादिवेसूक्तं॰पवमानतिच
श्लेसंसंतेस्वाद्दष्टावसोमसूक्ते॰आधानोतिसृणांवाजजिद्वुधिः॰त्रिष्टुप्॰चोषारागाभादिसऋषिःगायत्री॰सर्वासांसोमोदेवता
॥२॥अथभौमादिकेतुनांतानांप्रत्येकंसूक्ताभावाद्धोममंत्राएवऋषिछंदोदेवतानुस्मरणपूर्वकंजप्याः॥१॥तत्राग्निर्मूर्द्धे
तिभौमे॥अग्नेविवस्वदितिबुधे॥बृहस्पतेः॥शुक्रंतेअन्यदितिशुक्रे॥शंनोदेवीरितिशनौ॥कयानश्चित्रइतिराहौ॥केतुंकृण्
वन्निति केतुषु॥२॥अथाधिदेवतानां॥तत्ररुद्रस्य॥आवोराजानमितिवामदेवऋ॰त्रिष्टुप्॰तत्कोगायतिर्वगोस्यरुद्र
भार्गवऋ॰गायत्री॰आद्यस्येहोतानामग्निर्वैश्वानरऋषिः॰त्रिष्टुप्॰देवव्रतसंतकानामभिपताइतित्रयाणांमध्येद्वयोरु
द्रऋ॰ अंत्यस्यविश्वेदेवाऋषयः॰अनुष्टुप्॰सर्वेषांरुद्रोदेवता॥रुद्रसंहितामंत्रजपेवि॰॥१॥उमायाःसूक्तं॥आपोहिष्ठे
निसिंधुद्वीपऋ॰गायत्रीछंदः॰उमादेवता॥२॥स्कंदस्यतुस्कंदसंहितायां॥अग्नमेडितित्रयाणांचप्रऋ॰बृहती॰आनोवि
श्वासुहव्यमितित्रयाणांत्रातिऋ॰बृहतीछंदः॥प्रसेनानीरितित्रयाणांकुत्सऋ॰त्रिष्टुप्॰पवित्रंतइतिद्वयोरादिसऋ॰ रुम·
॥६९॥

जगतीछंदः॰सर्वेषांस्कंदोदे॰॥३॥विष्णोस्तुविष्णुसंहितायां॥इदंमेविष्णुरिति॥विष्णुऋ॰गायत्रीछंदः॥एक्षेस्यव
ष्णोइतिविष्णुव्रतस्यविष्णुऋषिः॰जगती॰प्रकाव्यमितिवारहनरस्यवाजजिदृषिः॰त्रिष्टुप्॰सहस्रशीर्षेतिषट्चगीत
योः पुरुषव्रतयोः पुरुषऋ॰अनुष्टुप्॰सर्वेषांविष्णुर्देव॰॥४॥ब्रह्मेंद्रयमकालचित्रगुप्तानांसूक्ताभावाद्धोममंत्रा
एवऋष्यादिस्मरणपूर्वंजप्याः॥तत्रब्रह्ममित्यत्रप्रथाइतिब्रह्मणः॥५॥इंद्रमिद्देवतातयइतीद्रस्य॥६॥आयंगौःपृ
श्निरितियमस्य॥७॥ब्रह्मजज्ञानमितिकालस्य॥८॥चित्रइच्छिशोरितिचित्रगुप्तस्य॥९॥अथप्रत्यधिदेवतानां॥त
त्राग्नेरपांमैश्च सूक्ताभावात्सर्वत्रदृष्ट्यादिस्मरणपूर्वकंहोममंत्राएवजप्याः॥तद्यथा॥अग्निंदूतमग्नेः॥१॥उदुत
ममिस्यपां॥२॥पृथिव्यंतरक्षमितिभूमेः॥३॥इदंमेविष्णुरितिविष्णोर्विष्णुसंहितापूर्ववत्॥४॥ततइंद्रंद्राणीप्रजा
पतिसर्पब्रह्मणां॥पूर्ववद्धोममंत्राएवजप्याः॥यथा॥इंद्रायेंद्रोमरुत्वतइतींद्रस्य॥५॥एकादृष्काताऽपसेतींद्राण्या
॥६॥प्रजापतेनत्वदितिप्रजापतेः॥७॥नवेदिवावमितिसर्पाणां॥८॥एषब्रह्मायऋत्वियइतिब्रह्मणः॥९॥अथवि
नायकादिपंचानां॥तत्रविनायकस्यविनायकसंहितायां॥अदृइरितिद्वयोरुक्षपऋ॰त्रिष्टुप्॰पुष्पारासइतिद्वयोःपृ
थ्वीऋ॰त्रिष्टुप्॰आतनइतिचतुर्णांद्वयोर्गौरवीतऋषिः॰अन्ययोरपालवेरपुऋ॰गायत्रीछंदः॰पुरुमानाइत्याद्यस्यअ

४ दान॰प्र॰ क्षोरं ब्रह्म॰ षष्ठस्याग्निऋ॰ क्षयोहृतीयं॰ सर्वेषां विनायको देवता जपे विनियोगः॥१॥ दुर्गावाय्वाकाशानाम
॥७०॥ श्विनोश्च सूक्ताभावाद्धोममंत्रा एव जप्याः॥ यथा॥ जातवेदसइति दुर्गायाः॥२॥ काशात्रिशुरिति वायोः॥३॥ आ
दित्यल्लस्येत्याकाशस्य॥४॥ एषो उषेत्यश्विनोः॥५॥ अथ दिक्पालानां तत्त्वं द्वाग्रे यमनिर्ऋति॥ वरुणावायूनां
सूक्ताभावाद्धोममंत्रा एव जप्याः॥ तत्रत्वामिन्द्रेतींद्रस्य॥१॥ अग्निर्मूर्धेत्यग्नेः॥२॥ नाकेसुपर्णमितियमस्य॥३॥ अ
त्वेस्थाहि निर्ऋतीनामितिनिर्ऋते॥४॥ इमंमेवरुणेति वरुणस्य॥५॥ वात आवातु इति वायोः॥६॥ सोमस्य तु प्रकाव्य
मुशनेसादित्यावरशांचसूक्तं प्राग्वज्जप्यं॥७॥ ईशानस्यावीराजानमिसादिरुद्रसंहिता प्रागुक्ता जप्या॥८॥ समानोऽग्न
ध्येत्यनंतस्य॥९॥ ब्रह्मजज्ञानमिति ब्रह्मणः॥१०॥ वस्तूनां तमग्निमस्तेवसवइति प्रागुक्तो मंत्रः॥११॥ रुद्राणां रुद्रसंहिता
पूर्वोक्ता॥१२॥ अदितिसेरिंद्रसादित्यानां॥१३॥ पवमाना असृक्षतेति मरुद्गणस्य॥१४॥ ब्रह्मजज्ञानमिति ब्रह्मणाः
॥१५॥ अच्युतस्य पूर्वोक्ता विष्णुसंहिता सहस्रशीर्षेति॥१६॥ ईशानस्य पूर्वोक्ता रुद्रसंहिता आवोराजानमिति पूर्वो
क्ता जप्या॥१७॥ अर्कसंप्रदापमध्ये नेपुतमिति॥१८॥ वनस्पतेर्वनस्पतेवीडुंगइति॥१९॥ एषुमंत्रेषु येप्रगीतामं राम॰
त्रास्तेतथैवजप्याः॥ इति सूक्तजपः॥ ॥ अथोत्तरांगहोमः॥ तत्र प्रथमं पूर्ववत्स्थापितप्रहोमं विधाय तत्समीमकां ॥७०॥

समिधामादध्यात॥ ततोंजलिनाजलमादायदेवसवितरितिमंत्रेण प्रदक्षिणमग्निं पर्युक्ष्य॥ ॐ अदितेऽन्वमंस्था
इति दक्षिणतः॥ ॐ अनुमतेऽन्वमंस्था इति पश्चिमतः॥ ॐ सरस्वत्यन्वमंस्था इत्युत्तरतः क्रमेणोदकांजलिं प्रसिंच
त॥ ततः स्तर्तंबर्हिः संहृत्य स्रुष्टिना समादाय मध्यमूलेक्रमेणाघृताभ्यक्तं कुर्यात् अनेन यजुषाः प्रजापतिर्ऋषिरग्निर्दे
वता॥ यजुः अभ्यंजने विनियोगः॥ ॐ अक्तं रिहाणा व्यंतु वयः॥ अथ तदग्नौ प्रक्षिपेदनेन मंत्रेण॥ प्रजापतिर्ऋ
षिरनुष्टुपछंदः रुद्रो देवता बर्हिर्होमे वि॰॥ यः पशूनामधिपतीरुद्रस्तंतिचरो वृषा॥ पशूनस्माकं माहिंसीरेतदस्तु
हुतंतवस्वाहा॥ ततो द्वितीयेन स्रुवेणापाहवाचनानंतरं पूर्णाहुतिंजुहुयात॥ प्रजापतिऋषिः यजुः वसुर्देवता पूर्णाहु
तिहोमे वि॰॥ ॐ वसुभ्यः स्वाहा॥ इत्यविच्छिन्नधारया पूर्णाहुतिंजुहुयात॥ ततो दक्षिणादानं॥ ततः प्रदक्षिणमग्निं
परिक्रम्य ब्राह्मणाशिषस्तु पुनः स्वासनमागत्याग्निं प्रदक्षिणीकृत्य पात्रस्थजलेनोपचनिरस्य पुनर्जलेन पूर्यभस्मेषु
तिष्ठाप्य वामदेव्यं साम गायेत॥ वामदेव ऋषिः गायत्री छंदः इंद्रो देवता शांतिकर्मणि जपे विनियोगः॥ ॐ कयान श्चि
त्र आभुवदूती सदावृधः सखा कया॥ अत्र बलिहरणं तेषु रोगपरिशिष्टे कथितमपि वरं प्रार्थनं सर्वत्रापि मन्यंते शि
ष्टाः॥ तद्यथा॥ आरोग्यमायुरैश्वर्यं धीधृतिः संततिर्दश॥ ॐ ओजश्चः पशवश्चवीर्यं ब्रह्मवर्चसमायमेव च॥ सोमार्पणं कर्मसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ क्षिपत्ताति श्रेष्ठं सुकृतत्र॥ संतत सर्वमेतत्संवेसाक्षिनश्चविशारोहिरिहिनःगाइति॥ ततः सर्वमेतत्कर्माच्छिद्रमास्त्विति अभिधाय
॥७१॥ यथाशक्त्यभिरूपान्ब्राह्मणान्भोजयेदिति सामगानां कुशकंडिका॥ ॥अथाथर्वणानामग्निस्थापनादिविधिः॥ त
त्रादौ बर्हिर्लवनाय दात्रस्वादानमंत्रः॥ ॐ अयस्मयं वयस्मयं बिलविष्णामिमा यया॥ ताभ्यामुरुः सर्वेदिमथ कर्मा दि
कुर्महे॥ धपछपरःसुंस्वरपाहरोषधिमहिंसंततः॥ इत्यनेन मंत्रेणादात्रं गृहीत्वा ॐ षधीद्दानुपर्व त्रिति बर्हिरुपरिपर्व
रापालुनाति॥ ततो बर्हिर्विश्वरारूणीसंनस्थग्रीष्मत्तेभ्रमेवर्षाणीशारदेभ मतः शिशिरोवसंततः॥ ऋततवस्तेविहिता हाय
नीरहोरात्रे पृथिविनोदुहाथामिसनेनम्रमेरुपस्थानं कृत्वा पादेशमात्रां ब्राह्मीसमिधं वितायानुमंत्रयेद्नेन मंत्रेणा
ॐ विमिमिषूप्रयस्वंती घृताचीदेवानां धेनुस्नयस्पृगोषा॥ इंद्रः सोमपिबतु क्षेमो अस्त्वग्निः प्रस्तोतु विमृधोनुदस्वेति
॥ ततस्तयाशमीसमिधाषट्शमिसादिवेदिं कल्पयेत॥ अत्रायं वेदिकल्पना प्रकारः॥ कुंडस्याग्नां दक्षिणोत्तरयोश्च
प्रतिदिशं समिधोर्द्धमर्द्धंगृहीत्वाषाश्चिमायां च मार्द्द समि द्भयमितां भूमिं गृहीत्वा दीर्घचतुरस्रां महावेदिं परिकल्पये
त॥ साच प्राक्पश्चिमयोः समिस्त्रकायता दक्षिणोत्तरयोश्च समिच्चतुष्टयायता स्यात्॥ तत्र महावेद्याः पश्चिमरेखाम रा॰म॰ ॥७१॥
ध्यरेखामध्यात्पूर्वतः समिद्वयमितां भूमिं त्यक्त्वा प्राचीरेखामध्यात्पश्चिमतः समिन्मात्रां भूमिं त्यक्त्वा तथैव दक्षिणोरेखा

या उत्तरेच समिन्मात्रां भूमिं त्यक्त्वा कुंडमध्ये समिद्वयपरिमितां समचतुरस्रामुत्तरवेदिं कल्पयेत॥ साच कुंडाभ्यंतरेपरि
तः समिद्दैर्घ्यत्यागेन संपद्यते॥ एवमुत्तरवेदिं परिकल्प्य महावेद्याईशानकोणादारभ्य जंघसीसर्वतो वालुकपांसुखंकु
र्यात॥ ततो बृहस्पतेपरिगृहाणवेदिं सुगावोदेवाःसदनाअकर्मअस्याब र्हिः प्रथतां साध्वंतरहिस्वानः पृथिवीदेवीर
स्त्वितिवेदिं परिगृह्णाति॥ त्रीन्वारान्वेदिरेखापरितोनुमंत्रणापरिग्रहःघ्रते भस्मेवर्षाणीशारदे मंतः शिशिरोवसं
तः॥ ऋततवस्तेविहिताहायना अहोरात्रे पृथिवीनोदुहाथां॥ यत्तेभूमेविखनामि॥ क्षिप्रंतदपिरोहतु॥ मातेमर्मविमृ
ग्वरिमातोहृदयमर्पयामिमितिखनित्वा॥ यत्तेहुतंतआप्नस्यातिप्रजापतिःप्रथमजाः ऋतस्यतेनेनखनितस्यपरोकु
र्यात॥ त्वमस्यावपनीजनानामदितिः कामदुघापप्रथानेतिवालुकाभिस्तांपरिपूरयित्वापुनः पूर्वोक्तप्रकारेण समिन्मान
पूर्वकं चतुरस्रामग्निस्थापनार्थमुत्तरवेदिं गृहीत्वा ततोबृहस्पतेपरिगृहाणेतिसर्वोक्तमंत्रेण वालुकानिधाय॥ अंस
धांमध्यतोमानवानां यस्याउद्वतः प्रवतः समंबहु॥ नानावीर्या ॐषधीर्याबिभर्ति पृथिवीतः प्रथतां नाध्यतानइति
मंत्रेणवालुकाः प्रथयित्वा॥ यस्याश्चतस्रः प्रदिशः पृथिव्यायस्यामन्नंकृष्टयः संबभूवुः॥ याबिभर्तिबहुधाप्राणदेज
त्सनोभूमिर्गोष्वप्यन्नेदधातु इति मंत्रेण प्रथितापि वालुकाभिर्वेदिं चतुरस्रांकृत्वा देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दानग्र०

॥७२॥

ष्मोहस्ताभ्यांप्रस्तरः अशिवापरिगृह्णामीतिहिरण्यपाणुस्तेरवनसाधनगृहीत्वाइंद्रः सीतांनिगृह्णातुतांपूषाअभि
रक्षतु॥सनः पयस्वतीदुहामुत्तरामुत्तरांसमामितिप्रागग्रोरेखांकृत्वातस्यांव्रीहियवावोप्यवर्षेणाभूमिःपृथ्वीवि
तासानोदधातुभद्रयाः। प्रियेधामनीतिमंत्रेणाद्भिः संप्रोक्ष्य॥यस्यामन्नंव्रीहियवौयस्याइमाः पंचकृष्टयः॥भूम्यैपर्ज
न्यपत्न्यैनमोस्तुवर्षमेदसेइतिभूमिंनमस्कृत्य॥त्वामग्नेभृगवोनयंतामांगिरसःसदनेअग्नयएहि॥विश्वकर्मणुर
तुप्रज्ञानन्भद्रंपंथामनुतेदिशानःश्रियंपंथामनुतेदिशानःस्वस्तिंपंथामनुतेदिशानइत्यग्निंप्रणीय॥भद्रोभव
श्रेयोभवस्वस्त्योभवेतिपात्रस्थव्रीहिप्रक्षिप्य॥विश्वंभरावसुधानीप्रतिष्ठाहिरण्यवक्षाजगतोनिवेशनी॥वैश्वानरं
बिभ्रतीभूमिरग्निमिंद्रऋषभाद्रविणोनोदधातुइत्युक्त्वैवाममग्निंप्रतिष्ठाप्य॥तत्रममाग्नेवर्चोविहवेष्वस्तुवयंत्वे
धानास्तन्वंपुष्येम॥मरुतंत्रमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाजयेमेतितिस्रःसमिधोहुत्वा॥तत्संस्तीपवित्रे
कृत्वातांभ्यामिध्यस्यविःप्रोक्षणींकुर्यात॥तत्रविस्रोर्मनसापूतेस्थइतिप्रथमंप्रोक्षणींविस्रोर्मनसापूतमसीतिद्वि
तीयं॥देवस्त्वासवितोत्पुनात्वच्छिद्रेणपवित्रेणाग्नेर्धारेणासहस्रधारेणसुप्वोत्पुनामीतितृतीयं॥तत्संमोचतुर्थं॥ततो ॥ राम०
ग्नयेत्वाजुष्टंप्रोक्षामीतीध्मंसमाहाय॥अग्निर्भूम्यामोषधीष्वग्निमापोबिभ्रत्यग्निरश्म॥अग्निरंतःपुरुषेषुगोष्वश्वेषु ॥७२॥

ग्नयः॥अग्निर्देवश्रानयत्यग्नेर्देवस्योर्वीऽअंतरिक्षं॥अग्निंमर्त्तासइंधतेहव्यवाहंघृतप्रियं॥अग्निर्वासाः पृथिव्यसित
ज्ञुस्त्विषीमंतंमासितंमाकृणोतु॥अग्न्यादेवेभ्योदद्दातियज्ञंहव्यमरंकृत॥अग्न्यामनुष्याजीवंतिस्वधयातेनमर्त्याः॥सा
नोभूमिः प्रणाआयुर्दधातुजरदष्टिंमापृथिवीकृणोतु॥एतमिध्मंसमाहितंजुषाणोअग्नेः प्रतिहर्यहोमैः॥तस्मिन्विदेमसु
मतिंस्वस्तिप्रजांचक्षुःपशून्समिद्धेजातवेदसिब्रह्मणा॥अस्मेधारयंतमग्नेपुनर्जमित्वाब्रह्मणादेवेन॥द्यौर्दित्यस्मं
द्रविणोहभद्रंप्रेमंवोचोहविर्दादेवतासु॥एतैःपंचभिर्मंत्रैरिध्मंजुहोति॥ततः॥त्वंभूमिमत्येष्योजसात्वंवेद्यासीद
सिचारुरध्वरे॥त्वांपवित्रमृषयोभरंतस्त्वंपुनीहिदुरितान्यस्मत॥अनेनवर्हिःप्रोक्ष्य॥ऋषीणांप्रस्तरोहिसिनमोस्तुदे
वायप्रस्तरायेत्यनेनब्रह्मासनंनिधाय॥अमुककर्मणायजमानोयजते॥तत्रभूपतेभुवनपतेभुवांपतेमहतोभूतस्य
पतेब्रह्माणंत्वावृणीमहेइतिकर्त्तावरणामंत्रंजपेत॥ततोब्रह्मात्रपति॥अहंभूपतिरहंभुवनपतिरहंभुवांपतिरहंमह
तोभूतस्यपतिस्त्वहंमनसेप्रब्रवीमिमनोवाचेवागायत्र्यैगायत्र्युष्णिहेउष्णिगनुष्टुभेनुष्टुब्बृहत्यैबृहतीपंक्त्यैपंक्ति
स्त्रिष्टुभेत्रिष्टुप्जगत्यैजगतीप्रजापतयेप्रजापतिर्विश्वेभ्योदेवेभ्यःॐभूर्भुवःस्वर्ज्जनेदोमिति॥ततोब्रह्मास्वासनमी
क्षते॥अहेदैधिषव्योदतस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकतरइति॥अथासनोद्दक्षिणस्योपदिश्यतांनिरस्यतिनिरस्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ट्रा.न.प्र. पराब्रमुः सहपाप्मना निरस्तः सोऽत्तोपोसान्देष्टि यं च वयं द्विष्म इति॥ तत आसनमन्वालभ्य जपति इदमहममुं मर्वावसोः सद
॥७३॥ ने सीदामि तस्य सदने सीदामि तस्य सदने सीदामि इदमहमस्य सदने सीदामि मामस्य देव बर्हिः स्वासस्थ
स्त्वाध्यासादेव मर्त्या घ्रद्मनभिश्रोकं॥ विमाक्रं पृथिवी मा वद्दानिक्षमाम्रमित्रस्त्वा शावाहयानां॥ ऊर्जं पृष्ठं बिभ्रती मन्त्रमा
गाघृतं त्वाभिनिषदे वभमे इति मंत्रेणासने उपविशेत्॥ ततो ब्रह्मा बृहस्पतिर्ब्रह्मा ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पतेय
ज्ञैर्गोपाये ति ब्रह्मा जपं जपेत॥ ततउत्तउतिष्ठ तः न्नाकं पथा तं मा धावा पृथिवीभ्यो इति धावा पृथिवी समीक्षते॥ ततः कर्ता
देवस्य त्वा सवितुरिति परिग्रह्णामीत्यंतं पूर्वोक्तं मंत्रं जपेत॥ ब्रह्मा तु परिस्तरणाहिपिधे द्विवे हिं मा आतिमोधारनुयाज्या
नां॥ होतृषदनं हरितं हिरण्मयं निष्का यत्ते यजमानस्य लोके इति प्रसवं जपति॥ ततः कर्ता देवस्य त्वा. प्राग्वत् ततः प्रति-
परिस्तरणामीति परिस्तृणाति त्रीन्वारानाग्नेये॥ त्रीन्दक्षिणे॥ त्रीन्पश्चिमायांसकलायां॥ त्रीनुत्तरे ततः पूर्वस्तरणस्याधःस्त
णाति॥ एवमैशानकोणे॥ त्रीन्पश्चिमायां सकलायां॥ त्रीनुत्तरे ततः पूर्वस्तरणस्य॰ अयमर्थः॥ अग्रेयमारभ्य ब्रिभिब्रि राम.
भिब्रिभिर्दर्भैर्दक्षणाग्रैः प्राकूलैस्तत्र दर्भाग्रादितो न्नरदर्भमूले प्राक्संस्थैस्त्रिः परिस्तृणाति॥ एवं नैर्ऋतेसमारभ्य उदगग्रैः ॥७३॥
पूर्वस्तृतदर्भाधः क्रमेणाग्नेयपर्यंतं त्रिः परिस्तृणाति॥ तथैव नैर्ऋत्यां दारभ्यो दगग्रैर्वायव्यपर्यंतं त्रिः परिस्तीर्य वायव्याद

रभ्येशानपर्यंतं प्रागग्रैस्त्रिभिः परिस्तृणातीति॥ अत्रायं क्रमेणास्तरणे आग्नेयपरस्थितं स्य दक्षिणास्तृत दर्भाग्रस्य ई
शानस्थितोत्तरतः स्तृतदर्भाग्रस्य चोत्तरएव धरा भावानियमप्राधान्येन॥ त दक्षिणोत्तरं करोतीति दक्षिणादर्भस्याग्रमु
परि करोतीत्यर्थः॥ हविषां त्वा जुष्टं प्रोक्षामीति मंत्रेणास्तीर्णं प्रोक्षणं॥ अथ कर्ता स्वासनं दर्भानास्तीर्य॥ अहे दैधिषव्या
दतइत्यादि वीक्षणांतं सर्वत्र स्वयं कुर्यात॥ अथोदपात्रं गृहीत्वा यथाग्रे ब्रह्मणा स्पतिः ससधर्मा अधीश्वरत॥ देवस्य
त्वा सवितुः प्रसव इति उदपात्रं पुरो निधाय॥ इहेत देवीरमंतवसानाहिरण्यवर्णा अनवद्यरूपाः॥ आपः समुद्रो वरुण
श्च राजा संपातभागान्हविषो जुषंतां॥ इंद्रप्रशिष्टा वरुणप्रसूता आपः समुद्राद्दिवमुद्वहंतु॥ इंद्रप्रसूता वरुणप्रशिष्टा
दिवस्पृथिव्याः श्रियमावहंतु॥ इति सपवित्रे उदपात्रे उदकं क्षिपति॥ विलीनमस्तमाज्यं गृहीत्वाधिश्रित्य पर्यग्निकृत्वो
दगुद्वास्य पश्चादग्नेरुपसाद्य उदगग्राभ्यां पवित्राभ्यां मुत्पुनाति॥ अथ माज्य संस्कारः॥ ततो दर्भैः स्रुवं निमार्ष्मीति मंत्रे
ण स्रुवसंमार्जनं निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति मंत्रेण स्रुवं प्रतप्य विमृज्य हस्तो सिदक्षि
णापूर्वादक्षो व्हहस्मते॥ तं त्वा हं स्रुवमादद्दे देवानां हव्यवाहनं॥ अयं स्रुवो निदधाति होमान्क्षतायारछंदसाज्ञागतेन
॥ सर्वो यत्तस्य समनक्तिविष्टाबाहृस्य तेन षिः ग्राम्या माणा दैव्येनेति स्रुवमभिमंत्र्य ओं नमः ग्राम्यसेस्वाग्रत्वामृतय इति संस्कृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ हाम.प्र. माउस्थालीस्थितमाज्यस्ववामभागेग्रेःपश्चिमतःस्थापितापामाज्यधाम्यापात्र्यांसुवेणाप्रथमग्रहंगृह्णाति॥ॐ भुवः
शंगुष्ठेत्वागृह्णा पुष्टयइतिद्वितीयं॥ॐ स्वःशंत्वागृह्णा सहस्रपोषायेतितृतीयं॥ॐ जनःशंत्वागृह्णा परिमित
॥७४॥ पोषायेतिचतुर्थं॥पात्रांतरेणापरिमितागृह्णाति॥ततस्त्र्यासधाम्याएवधृतंस्रुवेणागृहीत्वासर्वत्रजुहुयात॥ॐ
अग्र्यावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअभिशस्तिपावा॥ॐ नमस्कारेणामनसातेजुहोमिमादेवाना मिथुयाक
र्मभागंस्वाहा॥हृदापूतंमनसाजातवेदोविश्वानिदेववयुनानिविद्वान॥सप्तास्यानितववजातवेदस्तेभ्योजुहोमिसजु
षस्वहव्यंस्वाहा॥पुरस्ताद्युक्तोवहजातवेदोग्नेविविद्धिक्रियमाणंयथेदं॥त्वंभिषकूभेषजस्यासिकर्तात्वयागामश्वं
पुरुषंसनेमस्वाहा॥यन्नस्यचक्षुःप्रभृतंमुखेचवाचाचश्रोत्रेणामनसाजुहोमि॥इमंयज्ञंवितंतंविश्वकर्मणादेवायंतु
सुतंमनस्यमानाः॥स्वाहा॥इत्येतैःपुरस्ताद्धोमान्कृत्वा॥इमंबृहस्पतेस्वविदेभ्युक्तेहवामिसिद्धियीमतो॥सनःस्थिरान्बल
वतःकृणोतुज्योधनेद्योवातवेदस्तस्याग्नयेस्वाहा॥त्वंसोममम्भ्योजसासंदिग्योनचक्षात्र्यसम्भ्यंपथोअनुस्वः॥ हाम ०
अभिनोगोत्रंविदुषइवनेशोभानोवाचमुत्रातीजिगायंसोमायस्वाहा॥इत्याज्यभागौहुत्वा॥अभ्यातानान्जुहोति॥सवि ॥७५॥
ताप्रसवानामधिपतिःसमावत्वस्मि॰ब्रह्मण्यस्मिन्कर्मण्यस्यापुरोधायामस्यांप्रतिष्ठायामस्यांचित्यामस्यामाकूत्यामस्या

माशिष्यस्यादेवहूत्यांस्वाहा॥एवमुत्तरेष्वपिमंत्रेषुसमावत्वस्मिन्ब्रह्मणीत्यादिमंत्रशेषानुषंगोवोद्धव्यः॥अ
ग्निर्वनस्पतीनामधिपतिःसमावतु॰॥द्यावापृथिवीदातॄणामधिपत्नीतेमावतामास्मिन्कर्म॰॥वरुणोपामधिप
तिःसमावतु॰॥मित्रावरुणौवृष्ट्याअधिपतीतौमावतां॰॥मरुतःपर्वतानामधिपतयस्तेमावंतु॰॥सोमोवीरुधामधि
पतिःसमावतु॰॥वायुरंतरिक्षस्याधिपतिःसमावतु॰॥रसुःप्रजानामधिपतिःसमावतु॰॥यमःपितॄणामधिपतिः
समावतु॰॥पितरःपरेतेमावंतु॰॥ततात्रवरेतेमावंतु॰॥ततामहास्तेमावंतु॰॥इति॥अथग्रहादिहोमः॥तत्रविपि
हृणामधिपतिःसमावतु॰॥पितरःपरेतेमावंतु॰॥ततात्रवरेतेमावंतु॰॥ततामहास्तेमावंतु॰॥इति॥अथग्रहादिहो
मः॥तत्रविषासहिंसहमानमित्यस्याथर्वाऋषिःजगतीछंदःसूर्योदेवता॥साज्यतिलहोमेविनियोगः॥एवंसोमादिमं
त्रेष्वपिविनियोगाऊह्यः॥विषासहिंसहमानंसहीयसंसासहानंसहीयसं॥सहमानंसहोजितंस्वर्जितंगोजितंसंधना
जितं॥ईडयंनामह्वइंद्रमायुष्मान्भूयासंस्वाहा॥१॥शकंधूमस्यवर्कसीमोनुष्टुप॥शकंधूमंनक्षत्राणियद्राजानम
कुर्वतामद्राहमस्मैप्रायच्छन्निदंराष्ट्रमस्यादितिस्वाहा॥२॥त्वयाममोध्रसांगारकेत्रिष्टुप॥त्वयामन्योसरथमारुजे
तोहर्षमाणाऋषिःतासोमरुत्वतः॥तिग्मेषवआयुधासंशिशानाउपप्रयंतुनरोअग्निरूपाःस्वाहा॥३॥यद्राजानोविभु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्रा.न.प्र. र्भुधःपंक्तिः॥ यद्राजानो विभजंत इष्टापूर्तस्य षोडशं॥ यमस्यामी सभासदः॥ अविस्तस्मात्प्रमुंचतु दत्तः शितिपात्स्वधा
॥७५॥ स्वाहा॥४॥ बृहस्पतिर्ब्रह्मा बृहस्पतिस्त्रिष्टुप॥ बृहस्पतिर्नः परिपातु पश्चादुतोत्तरस्मादधरादघायोः॥ इंद्रः पुरस्ता
दुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु स्वाहा॥५॥ हिरण्यवर्णा अपाद्यः शुक्रास्त्रिष्टुप॥ हिरण्यवर्णाः शुचयः
पावकाः यासु जातः सविता यास्वग्निः॥ या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवंतु स्वाहा॥६॥ सहस्रबाहुना
रायणः अनिरनुष्टुप॥ सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात॥ स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं स्वाहा॥७॥
दिव्यं चित्रं कौशिको राहुस्त्रिष्टुप॥ दिव्यं चित्रमृतुथा कल्पयंतमृतनामुग्रं अमपत्न्नं देति(?)॥ तमाहिरः प्रतरन्नेतु सर्वत
आपः इमाँल्लोकाननु संचरंति स्वाहा॥८॥ पक्षेत पृथुरथर्वा केतुस्त्रिष्टुप॥ पक्षेत पृथुस्तनपितुर्वरिष्ठो देवः केतुर्विश्वमा
भूषतीदं॥ मानो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य स्वाहा॥९॥ अथाधिदेवानां॥ मानो विदन्त्र(?) ब्रह्मा रुद्रो
नुष्टुप॥ मानो विदन्विव्याधिनो अभिव्याधिनो विदन॥ आरात्शरव्या अस्मद्विषूचीरिंद्र पातय स्वाहा॥१॥ आपो हि ष्ठा
सिंधुद्वीप उमो गायत्री॥ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन॥ महे रणाय चक्षसे स्वाहा॥२॥ अग्निरिव ब्रह्मा स्कंद राम.
स्त्रिष्टुप॥ अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि॥ हत्वाय शत्रून्विभजस्व वेद ओजो विमानो विमृधो ॥७५॥

नुदस्व स्वाहा॥३॥ प्रतद्विष्णुरथर्वा विष्णुर्गायत्री॥ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः॥ परा
वत आजगम्यात्परस्याः स्वाहा॥४॥ ब्रह्मजज्ञानमथर्वा ब्रह्मा त्रिष्टुप॥ ब्रह्मज. विवः स्वाहा॥५॥ इंद्रेमं ब्रह्मा इंद्रस्त्रि
ष्टुप॥ इंद्रेमं प्रतरं कृधि सजातानामसद्वशी॥ रायस्पोषेण संसृज जीवातवे जरसे नय स्वाहा॥६॥ यः प्रथमो ब्रह्मा य
मस्त्रिष्टुप॥ यः प्रथमः प्रवतमाससाद बहुभ्यः पंथामनपस्पशानं॥ यो स्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो
अस्त्वमृत्यवे स्वाहा॥७॥ रोहितः कालोथर्वा कालो नुष्टुप॥ रोहितः कालो अभवद्रोहितोग्रे प्रजापतिः रोहितो यज्ञा
नां मुखं रोहितः स्वराभरत स्वाहा॥८॥ यदा ज्ञातं कौशिकः अग्निस्त्र(?) गमोनुष्टुप॥ यदग्ने तं मर्त्यस्य कर्मणो मिथः॥ अग्ने त्वं
तस्मात्ता हि वेद यथातथमग्नये स्वाहा॥९॥ अथ प्रत्यधिदेवतानां॥ समास्त्वाग्ने ब्रह्माग्निस्त्रिष्टुप॥ समास्त्वाग्न ऋतवो व
र्धयंतु संवत्सरा ऋषयो यानि सत्या॥ सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः॥ अश्वेत स्वः स्वाहा॥१॥
शं नो देवी ब्रह्मा यो गायत्री॥ स्पष्टो मंत्रः॥२॥ भूमे मातर्ब्रह्मा पृथ्व्यनुष्टुप॥ भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितं॥
संविदाना दिवा कवे श्रियां मा धेहि भूत्यां स्वाहा॥३॥ इदं विष्णुरथर्वा विष्णुर्गायत्री॥ इदं विष्णुः सुरे स्वाहा॥४॥ इंद्रज्येष्ठ
स्वाथर्वेंद्रो नुष्टुप॥ इंद्र ज्येष्ठ स्वप्रवहा याहि सूर्य रहि स्मां॥ पिबा सुत समं ते रिहमधो श्वकान श्वानुमंदाय स्वाहा॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्या॰न॰प्र॰ प्रेतंपादावथर्वेंद्राग्नीअनुष्टुप्॥प्रेतंपादौप्रस्फुरंतंएयातोगृहात्॥इंद्राणीएतुप्रथमाजीतामुषितापुरःस्वाहा॥६॥नैनंघ्नं
॥७६॥ तावथर्वाप्रजापतिरनुष्टुप्॥नैनंघ्नंत्यप्सरसोनगंधर्वानमर्त्याः॥असिस्रिद्धि॥इदंरुद्रनिरनयकिलासंपलितंचयत्स्वाहा॥७॥
सेरभकाथर्वासर्पाःपंक्तिः॥सेरभकःपुनर्वोयंतुयद्वचः॥पुनर्हेतिःकिंस्वादितः॥यस्यस्थतन्नमत्तयोवःप्राहैत्तमत्त
स्वामांसान्यत्तस्वाहा॥८॥येदिशामथर्वाब्रह्मात्रिष्टुप्॥येदिशामंतर्देशेभ्योजुहुतिजातवेदः॥सर्वाभ्योदिग्भ्योभिदासंत
स्मान्नान्वातपराचोप्रत्यंचोप्रस्पगेनान्प्रतिसरेणहंतिस्वाहा॥१॥अथविनायकादिमंत्राणां॥निर्लक्ष्मंद्रविणोदावि
नायकस्त्रिष्टुप्॥निर्लक्ष्म्यंललाम्यंनिररातिंसुवामसि॥अथयाभद्रातानिनःप्रजाताअरातिनयामसिस्वाहा॥१॥पृतना
जितमथर्वादुर्गात्रिष्टुप्॥पृतनाजितंसहमानमग्निमुक्थैर्हवामहेपरमात्सधस्थात्॥सनःपर्षदतिदुर्गाणिविश्वाक्षा
मद्देवोअतिदुरितात्यग्निःस्वाहा॥२॥अंतरिक्षेब्रह्मावायुरनुष्टुप्॥अंतरिक्षेवायवेसमनमनसआर्ध्नोत्॥यथांतरिक्षेवा
राम॰ यवेसमनमनेवामह्यंसंनमःसन्नमंतुस्वाहा॥सरमायपघअयद्वपंतमउत्तमंनाकपरमेव्योमन्स्वाहा॥४॥संचेन्नपाथोमि
॥७६॥ ॥२॥अश्विनावनुष्टुप्॥संचेतथाथोअश्विनाकामिनासंचवक्षथः॥संवांभगासोअग्मतसंचित्तानिसमुव्रतास्वाहा॥
अथेंद्रादिकपालानां॥इममिंद्रंब्रह्मेंद्रस्त्रिष्टुप्॥इममिंद्रवर्द्धयक्षत्रियंमइमंविशामेकवृषंकृणु॥मित्रानस्यत्वंसमस

वेत्तात्वंधयास्मानहमुत्तरेषुस्वाहा॥१॥अग्नेमन्वंब्रह्माग्निस्त्रिष्टुप्॥अग्नेर्मन्वेप्रथमस्यप्रचेतसःपांचजन्यस्यबहु
धायमिंधते॥विशोविशःप्रविशिवांसमीमहेसवेनामुंचत्वंहसःस्वाहा॥२॥यमोमसुर्ब्रह्मायमस्त्रिष्टुप्॥यमोमृत्यु
रघमारोनिर्ऋथोबभ्रुःशर्वोस्तानीलशिखंडः॥देवजनाःसेनायोत्तस्थिवांसस्तेअस्माकंपरिवृंजंतुवीरान्स्वाहा॥३॥
अभितेमथर्वानिर्ऋतिस्त्रिष्टुप्॥अभितंनिर्ऋतिर्धत्तामश्वमिवाश्वाभिधान्या॥मल्वोयोमह्यंक्रुध्यतिसउपाशान्मुच्य
तेस्वाहा॥४॥येपश्चाद्थर्वावरुणस्त्रिष्टुप्॥येपश्चाज्जुहुतिजातवेदःप्रतीच्यादिशोभिदासंत्यस्मात्॥वरुणमत्वातेपरा
चोप्रत्यंचोप्रस्पगेनान्प्रतिसरेणहन्मिस्वाहा॥५॥वायोःसवितुरथर्वावायुस्त्रिष्टुप्॥वायोःसवितुर्विदथानिमन्महेयावात्मन्वद्
विशथोयौचरक्षथः॥यौविश्वस्यपरिभूवभूवथुस्तौनोमुंचतमंहसःस्वाहा॥६॥यउत्तरेभ्योब्रह्मासोमस्त्रिष्टुप्॥यउत्तरस्याजुहुति
जातवेदउदीच्यादिशोभिदासंत्यस्मात्॥सोममत्वातेपतेपराचोप्रत्यंचोप्रस्पगेनान्प्रतिसरेणहन्मिस्वाहा॥७॥धाताद
धातुर्नोगिरोईशानोगायत्री॥धाताद्धातुनोरयिमीशानोजगतस्पतिः॥सनःपूर्णेनयच्छतुस्वाहा॥८॥अंतेंतंवितमथर्वा
नंतःपंक्तिः॥अनंतंविततंपुरुत्रानंतमंतवच्चासमंते॥तेनाकपालश्चरतिविचिन्वन्विद्वान्भूतमुतभव्यमस्यस्वाहा॥
९॥ब्रह्मापरमथर्वाब्रह्मात्रिष्टुप्॥ब्रह्मापरंयुज्यतांब्रह्मपूर्वंब्रह्मांततोमध्यतोब्रह्मसर्वतः॥अनाव्याधांदेवपुरांप्रपद्येशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४द्रान॰ प्र॰ ॥६७॥

वासेनापतिर्लोके विराजति स्वाहा ॥१०॥ ॥ अथ वस्वादीनां ॥ यानावह इव साव सवस्त्रिष्टुप् ॥ यानावह उशतो देव
देवांस्तान्प्रेरय स्वे अग्ने सधस्थे ॥ जक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वसूनि स्वाहा ॥१॥ मानो विदन्निति एवे सु
क्तो रुद्राणां ॥२॥ आदित्येभ्यो ब्रह्मादित्यास्त्रिष्टुप् ॥ आदित्येभ्यो अंगिरोभ्यो मधिदं घृतेन मिथं प्रतिवेदयामि ॥ शु
द्धहस्ता ब्रह्मणास्पानि हस्यैतं तस्वर्गं सुकृता मपीत स्वाहा ॥३॥ मरुतामन्वेऽथर्वा मरुतस्त्रिष्टुप् ॥ मरुतामन्वे अधिनो दुवंतु
प्रेमं वाजं वाजसातेऽवंतु ॥ आशूनिव सुयमानह्व ऊतये ते नो मुंचंत्वंहसः स्वाहा ॥४॥ इमा ब्रह्मेति ब्रह्मा ब्रह्मा त्रिष्टुप् ॥ इ
मा ब्रह्म बृहद्दिवः कृणवदिंद्राय शूषमग्रियः ॥ स्वर्षीमहो गोत्रस्य क्षयति स्वराजा तुरश्चिद्विश्वमर्णवत्तपस्वान् स्वाहा
॥५॥ तद्विष्णोर्ब्रह्मा विष्णुर्गायत्री ॥ तद्विष्णोः ॰ तं स्वाहा ॥६॥ रुद्र जलाषभेषजा स्नारुद्रोनुष्टुप् ॥ रुद्र जलाषभेषज नीलशिखं
डकर्मकृत ॥ प्राशं प्रतिप्राशो जह्यरसान्कृण्वोषधे स्वाहा ॥७॥ वत्सो विराजो ब्रह्मा सूर्यस्त्रिष्टुप् ॥ वत्सो विराजो वृषभो म
तीनामारुरोह शुक्रपृष्ठोऽन्तरिक्षं ॥ घृतेनार्कमभ्यर्चंति वत्सं ब्रह्म संतं ब्रह्मणा वर्धयंति स्वाहा ॥८॥ वनस्पते प्रजापतिर्व
नस्पतिस्त्रिष्टुप् ॥ वनस्पते वीड्वंगो॰ जेत्वानि स्वाहा ॥९॥ अथैषां जप्यानि सूक्तान्युच्यंते ॥ तत्र सूर्यस्य ॥ विषासहिं सहमानं
सासहानं सहीयसं ॥ सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितं ॥ ईड्यं नाम ह्व इंद्र प्रियः समानो भूयासं ॥ इंद्र प्रियः

राम॰ ॥६७॥

प्रजानां भूयासं ॥ इंद्र प्रियः पशूनां भूयासं ॥ विषासहिं सहमानं सासहानं सासहानमत्स्वरव्यनुमावाहिद्विषधेरधं
तवेद्विष्णो बहुधावीर्याणि ॥ त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां माधेहि परमे व्योमन् ॥ उदिह्युदिहि सूर्य वर्च
सा माभ्युदिहि पंचहि द्विषंश्च देहि याश्च पश्यामि याश्च न तेषु मा सुमतिं कृधि ॥ तत्ते द्विष्णो बहुधेत्यादि मंत्रशेषः सर्व
वह्ने पः ॥१॥ अथ सोमस्य ॥ शाकल्यं मनक्षत्राणि यद्राज्ञानमकुर्वत ॥ भद्राय मस्मे प्रापयन्निदं राष्ट्रं बसादिति ॥ भद्रा
हं नो मध्यंदिने भद्राहं सायमस्तु नः ॥ अहोरात्राभ्यां नक्षत्रेभ्यः सूर्याचंद्रमसाभ्यां ॥ भद्राहमस्मभ्यं राजंछकध्वमत्वं
कृधि ॥ येनो भद्रमहमकरं सायं नक्तमथो दिवा ॥ तस्मै ते नक्षत्रराज शकधूमसदा नमः ॥२॥ अथ भौमस्य ॥ त्वया मन्यो
सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वन् ॥ तिग्मेषव आयुधा संशिशाना उप प्रयंति नरो अग्निरूपाः ॥ अग्निरिव
मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ॥ हत्वाय शत्रून्वि भज स्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ सहस्व मन्यो
अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् ॥ उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं ॥ एको बहूनामसि मन्य ईडिता वि
शं विशं युधये सं शिशाधि ॥ अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्मसि ॥ विजेषकृदिंद्र इवानवब्रवोऽस्मा
कं मन्यो अधिपा भवेह ॥ प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥ आभूत्या सहजा वज्र सायक सहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान•प्र• वासेनापतिर्लोकेविराजतिस्वाहा॥१०॥ ॥अथवस्वादीनां॥ यानावहेध्वसावसवस्त्रिष्टुप्॥ यानावहउशतोदेव
॥७७॥ देवांस्तान्प्रेरयस्वेअग्नेसधस्थे॥ जक्षिवांसःपपिवांसोमधून्यस्मैधत्तवसवोवसूनिस्वाहा॥१॥ मानोविदन्निति दवे मु
नोरुद्राणां॥२॥ आदित्येभ्योब्रह्मादित्यास्त्रिष्टुप्॥ आदित्येभ्योअंगिरोभ्योमधिदंघृतेनमिश्रंप्रतिवेदयामि॥ शु
द्धहस्तोब्रह्मणान्यानिहत्वैतंस्वर्गासुकृतानपीतस्वाहा॥३॥ मरुतामन्वेअथर्वामरुतस्त्रिष्टुप्॥ मरुतामन्वेअधिनोबुवंतु
प्रेमंवाजंवाजसातेअवंतु॥ आस्तनिवसुयमानऊहूतयेतेनोमुंचंत्वंहसःस्वाहा॥४॥ इमाब्रह्मेतिब्रह्मजगतीत्रिष्टुप्॥ इ
माब्रह्मबृहद्दिवःकृणावदिंद्रायशूषमग्रियः॥ स्वर्षीमहोगोत्रस्यक्षयतिस्वराज्ञातुरश्चिद्विश्वमर्णवत्तपस्वान्स्वाहा
॥५॥ तद्विष्णोर्ब्रह्माविष्णुर्गायत्री॥ तद्विष्णोः•तंस्वाहा॥६॥ रुद्रंजलाषभेषंब्रह्मारुद्रोनुष्टुप्॥ रुद्रंजलाषभेषजंनीलशिखं
डकर्मकृतं॥ प्राशंप्रतिप्राशोजह्यरसान्कृण्वोषधेस्वाहा॥७॥ वत्सोविराजब्रह्मावत्सोत्रिष्टुप्॥ वत्सोविराजोवृषभोम
तीनामारुह्यशुभ्रपृष्ठोअंतरिक्षं॥ घृतेनाकमभ्यर्चतिवत्संब्रह्मसंतंब्रह्मणावर्धयंतिस्वाहा॥८॥ वनस्पतेप्रजापतिर्व राम•
नस्पतिस्त्रिष्टुप्॥ वनस्पतेवीड्वंगोहि•भूयास्वाहा॥९॥ अथषोडशान्यानिसूक्तान्युच्यंते॥ तत्रसूर्यस्य॥ विषासहिंसहमानं ॥७७॥
सासहानंसहीयसं॥ सहमानंसहोजितंस्वर्जितंगोजितंसंधनाजितं॥ ईड्यंनामह्वइंद्रप्रियःसमानोभूयासं॥ इंद्रप्रियः

प्रजानांभूयासं॥ इंद्रप्रियःपशूनांभूयासं॥ विषासहिंसहमानंसासहानंसासहानमत्वंघरव्यजमावाहद्विषधेरधं
तवेद्विष्णोबहुधावीर्याणि॥ त्वंनःपृणीहिपशुभिर्विश्वरूपैःसुधायांमाधेहिपरमेव्योमन्॥ उदिह्युदिहिसूर्यवर्च
सामभ्युदिहि॥ याँश्चपश्यामियाँश्चनतेषुमासुमतिंकृधि॥ तेतेद्विसाबहुधेत्यादिमंत्रद्वेषःपूर्व
वद्वेषः॥१॥ अथसोमस्य॥ यंदेवामनक्षत्राणीयइज्ञानमकुर्वत॥ भद्रायमस्मैप्राप्यछन्निंद्रापूर्णमासादिति॥ भद्रा
हंनोमध्यंदिनेभद्राहंसायमस्तुनः॥ अहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचंद्रमसाभ्यां॥ भद्राहमस्मभ्यंराजंछकधूमत्वं
कृधि॥ योनोभद्राहमकरंसायंनक्तमथोदिवा॥ तस्मैतेनक्षत्रराजशकधूमसदानमः॥२॥ अथसोमस्य॥ त्वयामन्यो
सरथमारुजंतोहर्षमाणासोधृषितामरुत्वन्॥ तिग्मेषवआयुधासंशिशानाउपप्रयंतिनरोअग्निरूपाः॥ अग्निरिव
मन्योत्विषितःसहस्वसेनानीर्नःसहुरेहूतएधि॥ हत्वायशत्रून्विभजस्ववेदओजोमिमानोविमृधोनुदस्व॥ सहस्वमन्यो
अभिमातिमस्मैरुजन्मृणन्प्रमृणन्प्रेहिशत्रून्॥ उग्रंतेपाजोनन्वारुरुध्रेवशीवशंनयसएकजत्वं॥ एकोबहूनामसिमन्यईडितावि
शंविशंयुधयेसंशिशाधि॥ अकृत्तरुक्त्वयायुजावयंद्युमंतंघोषंविजयायकृण्मसि॥ विजेषकृदिंद्रइवानवब्रवोस्मा
कंमन्योअधिपाभवेह॥ प्रियंतेनामसहुरेगृणीमसिविद्मातमुत्संयतआबभूथ॥ आभूत्यासहजावज्रसायकसहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमर्षिसहस्रतउत्तरं॥कृत्वामन्योसहमेमेधिमहाधनस्यपुरुहूतसंसृजि॥संसृष्टंधनमुभयंसमाकृतमस्मभ्यंद
त्तांवरुणश्चमन्युः॥भियोदधानाहृदयेषुशत्रवःपराजितासोअपनिलयंतां॥३॥अथबुधस्य॥सोमस्यत्वोग्रुध्रां
पतेन्नोनामवाअसि॥अन्नंनस्त्वोनाहुधिप्रजयाचधनेनच॥स्त्वेौसिदृवांनानासिस्मयोसिसमन्तरः॥समग्रःस
मनोभयासंगोभिरश्वैःप्रजयापशुभिर्गृहैर्धनेन॥योस्मान्द्वेष्टियंचवयंद्विष्मस्तस्यत्वंप्राणेनाप्यायस्व॥आवयंप्या
सिषीमहिगोभिरश्वैःप्रजयापशुभिर्गृहैर्धनेन॥यंदेवाअंशुमाप्याययंतियमक्षितामक्षयंति॥तेनास्मानिंद्रोवरु
णोबृहस्पतिराप्याययंतुभुवनस्यगोपाः इति॥४॥अथबृहस्पतेः॥भद्रदधिश्रेयःप्रेहिबृहस्पतिःपुरएताते अस्तु॥
अथेममस्याआवरंपृथिव्याआरेशत्रून्कृणुहिसर्ववीर इति॥५॥अथशुक्रस्य॥शुक्रोसिभ्राजोसिस्वरसिज्योतिर
सि॥आप्नुहिश्रेयांसमतिसमंक्राम॥ इति॥६॥अथशनेः॥प्राणायमनमोयस्यसर्वमिदंवशे॥योभूतःसर्वस्येश्व
रोयस्मिन्सर्वंप्रतिष्ठितं॥नमस्तेप्राणक्रंदायनमस्तेस्तनयित्नवे॥नमस्तेप्राणविद्युतेनमस्तेप्राणवर्षते॥यत्प्राण
स्तेनांप्राणाक्रंदायनमस्तेस्तनयित्नवे॥नमस्तेप्राणविद्युतेनमस्तेप्राणवर्षते॥यत्प्राणस्तनयित्नुनाभिक्रंदत्योष
धीः॥प्रवीयंतेगर्भान्दधतेथोवह्वीर्विजायंते॥अथराहोः॥राहोमाजातस्त्वइतिमपिंमिहहंतिपृत्सुः॥सहस्त्वमस्यप्रहा

नत्वाशंततस्त्वाविनन्नूथस्वग्रयेस्वाहा इति॥७॥अथकेतोः॥यस्तेपृथुस्तनयित्नुर्यऋष्वोदैवः केतुर्विश्वमाभूषतीदं॥
मानोवधीर्विद्युतादेवसस्यमानोवधीरश्मिभिःसूर्यस्य॥सभावहासनिश्चवतांप्रजापतेदुहितःसंविदाने॥येनास
गच्छाउपमासभिक्षाश्वारुवदानिपितरःसंगतेषु॥विश्वतेनाननवरिष्टानामवाअसि॥यतकेवसमासदस्तेमेसंतुसवा
चसइति॥१॥अथाधिदेवानां॥मानोविदन्विव्याधिनोमोअभिव्याधिनाविदत्॥आराच्छरव्याअस्मद्विषूचीरिंद्रपातं
यविषूचोअस्मद्युवःपांतुयेअस्मायेवास्याः॥दैवीर्मनुष्येषवोममामित्रान्विध्यतयोभस्वोयोअरणः सजातउतनिष्ट्यो
योअस्मांअभिदासति॥रुद्रःशरव्ययोतान्ममामित्रान्विविध्यतु॥यःसपत्नोयोसपत्नोपश्चदिग्भ्योयातिनः॥देवास्तंस
र्वेधूर्वंतुब्रह्मवर्ममममांतरम॥१॥एतनाजितंसहमानमग्निमुक्थैर्हवामहेपरमात्सधस्थात॥सनःपर्षदतिदुर्गाणिवि
श्वाक्षामदेवोअतिदुरितात्यग्निः॥२॥अग्निरिवमन्योत्विषितःसहस्वसेनानीर्नःसहुरेहूतएधि॥हत्वायशत्रून्विभजस्व
वेदओजोविमानोविमृधोनुदस्व॥३॥यत्रेंद्रोअश्वनेयघदग्निर्विश्वेदेवामरुतोयत्स्वर्काः॥तत्रस्मिन्सविताधमेप्र
जापतिरनुमतिर्नियच्छात॥३॥ययोरोजसास्कभितारजांसियोवीर्यैर्वीरतमाशविष्ठा॥यापत्येतेअप्रतीतोसहोभिर्वि
ष्णुमगन्वरुणापूर्वहूतिः॥यस्येदंप्रदिशियद्विरोचतेप्रचानतिविचष्टेशचीभिः॥पुरादेवस्यधर्मणासहोभिर्विष्णुमगन्वरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ शान॰अ॰वि शांपूर्वहूतिः॥यस्येदंप्रदिशियद्विरोचतेनुकंप्राचीवंवीर्याणियः पार्थिवानिविममेरजांसि॥योअस्कभायदुत्तरंसधस्थं
॥७२॥ विचक्रमाणस्त्रेधोरुगायः॥प्रतद्विष्णुस्तवतेवीर्याणिमृगोनभीमःकुचरोगिरिष्ठाः परावतआजगाथापरस्याः॥४॥ब्रह्म
जज्ञानंप्रथमंपुरस्तात्॰विवः॥इयंपित्र्याराष्ट्र्येत्वग्रेप्रथमायजनुषेभुवनेष्ठाः॥तस्माएतंसुरुचंह्वारमह्यंघर्मंश्रीणंतुप्र
थमायधास्यवे॥प्रयोजज्ञेविद्वानस्यबंधुर्विश्वादेवानांजनिमाविवक्ति॥ब्रह्मब्रह्मणउज्जभारमध्यान्नीचादुच्चैःस्वधाअभि
प्रतस्थौ॥सहिदिवःसपृथिव्याऋतस्थामहीक्षेमंरोदसीअस्कभायत॥महान्महीअस्कभायद्विजातोद्यांसद्मपार्थि
वंचरजः॥सबुध्न्यादाष्ट्रजनुषोभ्यग्रंबृहस्पतिर्देवतातस्यसम्राट्॥अहर्यच्छुक्रंज्योतिषोजनिष्टाथद्युमंतोविवसंतुविप्राः
॥नूनंतदस्यकाव्योहिनोतिमहोदेवस्यपूर्व्यस्यधामएषयज्ञेबहुभिःसाकमित्थापूर्वेअर्धेविषितेससंनु॥योथर्वाणंपि
तरंदेवबंधुंबृहस्पतिंनमसावचगच्छात्॥त्वंविश्वेषांजनितायथासःकविर्देवोनदभायत्स्वधावान्॥५॥इंद्रोजयातिन
पराजयाताअधिराजोराजसुराजयातै॥चर्कृत्यईड्योवंद्यश्चोपसद्योनमस्योभवेह॥त्वमिंद्राधिराजःश्रवस्युस्त्वंभूरभिभू राम॰
तिर्जनानां॥त्वंदैवीर्विशइमाविराजसिआयुष्मत्क्षत्रमजरंतेअस्तु॥प्राच्यादिशस्त्वमिंद्रासिराजोतोदीच्यादिशोवृत्रहंछत्रुहो ॥७२॥
सि।यत्रयंतिस्रोत्यास्तज्जितंतेदक्षिणतोवृषभएषिहव्यः॥६॥यमोमृत्युरघमारोनिर्ऋथोबभ्रुःशर्वोऽस्तानीलशिखं

ड़ः॥देवजाताःसेनयोत्तस्थिवांसस्तेअस्माकंपरिवृंजन्तुवीरान्॥मनस्माहोमैर्हरसाघृतेनशर्वायास्त्रउतराज्ञेभ
वायः॥नमस्येभ्योनमएभ्यःकृणोम्यन्यत्रास्मदघविषानयंतु॥त्रायध्वंनोअघविषाभ्योवधाद्विश्वेदेवामरुतोवि
श्ववेदसः॥अग्नीषोमावरुणःपूतदक्षावातापर्जन्ययोःसुमतौस्याम॥७॥रोहितःकालोअभवद्रोहितोग्रेप्रजापतिः
॥रोहितोयज्ञानांमुखंरोहितःस्वराभरत्॥रोहितोलोकोअभवद्रोहितोत्यतपद्दिवं॥रोहितोरश्मिभिर्भूमिंसमुद्र
मभिसंचरन्॥८॥अर्वाङ्परस्तात्प्रयतोव्यध्वआशुर्विपश्चित्पतयन्पतंगः॥विष्णुर्विचित्तःशवसाधितिष्ठन्प्रकेतुना
सहतेविश्वमेजत्॥चित्रश्चिकित्वान्महिषःसुपर्णआरोचयन्रोदसीअंतरिक्षं॥अहोरात्रेपरिसूर्यंवसानेप्रास्यवि
श्वातिरतोवीर्याणि॥तिग्मोविभ्राजन्तन्वंशिशानोरंगमासःप्रवतोरराणः॥ज्योतिष्मान्पक्षीमहिषोवयोधाविश्वाआस्था
त्प्रदिशःकल्पमानः॥चित्रंदेवानांकेतुरनीकंज्योतिष्मान्प्रदिशःसूर्यउद्यत्॥दिवाकरोतिद्युम्नैस्तमांसिविश्वातारीद्
रितानिशुक्रः॥९॥ ॥अथप्रत्यक्षदेवतानाम॥अग्नेर्मन्वेप्रथमस्यप्रचेतसःपांचजन्यस्यबहुधायमिंधते॥विशोवि
शःप्रविशिवांसमीमहेसनोमुंचत्वंहसः॥१॥शंनोदेवी॰शृण्वंतुनः॥अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा॥अ
ग्निंचविश्वशंभुवं॥आपःपृणीतभेषजंवरूथंतन्वेमम॥ज्योक्चसूर्यंदृशे॥शन्नआपोधन्वन्याःशमुसंत्वनूप्याः॥शन्नः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ग्रह॰प्र॰ खनित्रिमाआपःस्वयंजायाःकुंभआभृताःशिवानःसंतुवार्षिकीः॥१॥सत्यंबृहदृतमुग्रंदीक्षातपोब्रह्मयज्ञःपृथिवींधारयं
॥८०॥ तु॥सानोभूतस्यभव्यस्यपत्न्युरुंलोकंपृथिवीनःकृणोतु॥३॥यच्चिद्धिइदंइतिविष्णुसूक्तंपूर्ववत्॥४॥इंद्रेंद्रजपातीत्यादींद्रसू
क्तंपूर्ववद्वाच्यं॥५॥अतयाहोप्रस्मुरवहंतप्राणातोग्रहान्॥इंद्राग्नीप्रेणोनुप्रथमाजीतापुरः॥६॥प्रजायतेनत्वंपतयोरयीणां॥
पूर्णामासिप्रथमायतियासेव्हेरात्रीणामतिशार्वरेषु॥येत्वायज्ञैर्यतिवेअर्थमयंसमितेनाकेसुकृतःप्रविष्टाः॥७॥
सोरभकत्रेरभपुनर्वीर्यंतुयातवः॥पुनर्हेतिःकिमीदिनः॥यस्यस्थमन्नपोवःप्राहेत्नमत्स्वमासांपत॥सोकानुसोक
पुनर्वीर्यंतुयावत इत्यादिप्राग्वत्॥सर्पापसर्पपुनर्वीर्यंतुयातःस्वमांसाम्पत॥५॥ब्रह्मजज्ञानमितिब्रह्मसूक्तंपूर्ववत्॥
९॥ ॥अथविनायकादिपंचानां॥निर्लक्ष्म्यंललाम्यंनिरातिंसुवामसि॥अथयाभद्रातानितानिःप्रजाअरातिंनाशयामसि
॥निररणिंसविताप्साविषक्तूपदोनिर्हस्तयोर्वरुणोमित्रोअर्यमा॥निरस्मभ्यमनुमतीरराणाप्रेमांदेवाअसाविषुःसौ
भगाय॥५॥यत्तआत्मनितन्वांघोरमस्तियद्वाकेशेषुप्रतिचक्षणेन॥सर्वंतद्वाचापहन्मोवयंदेवस्त्वासवितासूदयंतु॥६॥रिष्य
दीहृषदंतीगोसेर्वविधाभ्युत॥विलीटंललाम्यंताअस्मन्नाशयामसि॥३॥एतेनाक्तिमित्यादिदुर्गासूक्तंसर्ववत्॥४॥ ग्रह॰
र्वयोःसवितुर्विरथानिमन्महेयावांभवदिन्नोथार्यांचरक्षथः॥यौविश्वस्यपरिभूवभूवतुस्तौनोमुंचतमंहसः॥३॥पुरंयोब्र ॥८०॥

ह्मणोवेदयस्याःपुरुषउच्यते॥योवैतांब्रह्मणोवेदामृतेनावृतांपुरं॥पुरंयोच्यते॥नैवतंचक्षुर्जहातिनप्राणो
जरसःपुरा॥पुरंयोच्यते॥अष्टाचक्रानवद्वारादेवानांपूरयोध्यत॥यस्यांहिरण्मयःकोशःस्वर्गोलोकोज्योतिषावृतः
॥४॥अश्विनाब्रह्मणायातमर्वाचौवषट्कारेणयज्ञंवर्धयंतौ॥बृहस्पतेब्रह्मणायाह्यर्वाङयंतोअयंस्वरिदंयजमा
नाःस्वाहा॥५॥ ॥अथलोकपालानां॥इंद्रेंद्रजपातीत्यादींद्रसूक्तंपूर्ववत्॥अग्नेर्मन्वेइत्याद्यग्निसूक्तंप्राग्वत्॥२॥य
मोमृत्युरित्यादियमसूक्तंपूर्ववत्॥३॥यस्यास्तआसनिघोरेजुहोम्येषांबंधानामवसर्जनाय॥भूमिरितित्वाभिप्रमंद
न्तेजनानिर्ऋतिरभित्वाहंपरिवेदसर्वतः॥भूतेहविष्मतीभवैषतेभागोयोअस्मासुमुंचेमामनेनसःस्वाहा॥देवाःसंनि
र्ऋतेनेहात्वमयस्मयान्विवृतावधयाशान॥यमोमह्यंपुनरित्त्वांददातितस्मैयमायनमोस्तुमृत्यवे॥४॥उदुत्तमंवरु
णपाशमस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितयेस्याम॥५॥वायोःसवितुरित्या
दिवायुसूक्तंपूर्ववत्॥६॥शाकधूममित्यादिसोमसूक्तंप्राग्वत्॥७॥मानोविदंन्नित्यादीशसूक्तं॥८॥ब्रह्मकेस्याघनतःसू
क्तंचप्राग्वत्॥९॥ब्रह्मापरंयुज्यतांब्रह्मपूर्वंब्रह्मांततोब्रह्मसर्वतः॥अनाव्याधांदेवपुरांप्रपद्येशिवास्यानायतिलोकेवि
न्तेजा॥१०॥अथवस्वादीनां॥तत्रयानोवहेसादिवसुसूक्तंपूर्ववत्॥१॥आदित्येभ्योअंगिरोभ्यइत्याद्यादित्यसूक्तं॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दा॰न॰प्र॰ महतां मन्वेत्र अविन इत्यादि वसुसूक्तं मरुद्गणाय ॥ ३ ॥ ब्रह्म जज्ञानमिति ब्रह्मसूक्तं ॥ ४ ॥ यन्न इंद्र इत्यादि विष्णुसू-
॥८१॥ क्तं ॥ ५ ॥ मानो विदं नित्यादि रुद्रसूक्तं च प्राग्वत् ॥ ६ ॥ वत्सो विराजो वृषभो मतीनां आरुरोह शुक्रपृष्ठोंतरिक्षं ॥ घृतेना
र्कमभ्यर्चति वत्सं ब्रह्म संतं ब्रह्मणा वर्धयंतः ॥ विश्वासहिं सहमानमित्यादि सूर्यसूक्तं पूर्ववत् ॥ ७ ॥ वनस्पते वीड्व
ङ्ग इत्यादि जेत्वा नो ऽस्यंत वनस्पतिसूक्तं ॥ ८ ॥ एवं सूक्तजपानंतरं पूर्ववत् पुनः सविता प्रसवानामित्यादि समिद्गणः अप्र
तानां हुत्वा पूर्णाहुतिं कुर्यात् ॥ तद्यथा ॥ यदि कृष्णपक्षो भवति तर्हि यत्ते देवा अकृण्वन्भागधेयं अमावास्ये संवसं
तानो हुत्वा पूर्णाहुतिं कुर्यात् ॥ तद्यथा ॥ यदि कृष्णपक्षो भवति तदा यत्ते देवा अकृण्वन्भागधेयममावास्ये संवसं
तो महित्वा ॥ तेना नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरं स्वाहेति जुहुयात् ॥ शुक्लपक्षश्चेत्तदा ॥ पूर्णा प
श्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ॥ तस्यां देवैः संवसंतो महित्वा नाकस्य पृष्ठे समिषा मदेम स्वाहेति प
र्णाहुतिं जुहुयात् ॥ ततः समर्धाज्जुहुयात् ॥ तद्यथा ॥ आकूत्यै त्वा स्वाहा ॥ कामाय त्वा स्वाहा ॥ समृधे त्वा स्वाहा ॥ इत्या
स्तोमं समर्धय गायत्रेण रथंतरं बृहद्गायत्रवर्तनि स्वाहेति च तस्रः ॥ ततः सन्नतिहोमः ॥ तद्यथा ॥ पृथिव्यामग्नये द॰म॰
समनमत्स आर्ध्नोत ॥ यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः संनमंतु ॥ पृथिवी धेनुस्तस्या अग्निर्वत्सः ॥ ॥८१॥
सा मे ऽग्निना वत्सेनेषमूर्जं कामं दुहां ॥ आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ दिव्यादित्याय समनमत्स आर्ध्नोत ॥ यथा दिव्या

दित्याय समनमन्नेवा मह्यं संनमः संनमंतु ॥ अंतरिक्षं धेनुस्तस्या वायुर्वत्सः सा मे वायुना वत्सेनेषमूर्जं कामं दुहां
॥ आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ दिव्यादित्याय समनमत्स आर्ध्नोत ॥ यथा दिव्यादित्याय समनमन्नेवा मह्यं
संनमः संनमंतु ॥ द्यौर्धेनुस्तस्या आदित्यो वत्सः ॥ सा म आदित्येन वत्सेनेषमूर्जं कामं दुहां ॥ आयुः प्रथमं प्रजां
पोषं रयिं स्वाहा ॥ दिक्षु चंद्राय समनमत्स आर्ध्नोत ॥ यथा दिक्षु चंद्राय समनमन्नेवा मह्यं संनमः संनमंतु ॥ दि
शो धेनवस्तासां चंद्रो वत्सः ता मे चंद्रेण वत्सेनेषमूर्जं कामं दुहां ॥ आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥ इति सन्नति
होमः ॥ अथ प्राजापत्यहोमः ॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिभूर्जजान ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणां स्वाहा ॥ ततः स्विष्टकृद्धोमः ॥ सर्वेषां च हुतानामुत्तरतो ऽवदाय स्रुचि कृत्वा द्विरभिघार्य ॥
आ देवानामपि पंथामगन्म यच्छक्नवाम तदनु प्रवोढुं ॥ अग्निर्विद्वान्स यजात्स इद्धोता सो ऽध्वरान्स ऋतून्कल्प
यात्यग्नये स्विष्टकृते स्वाहेत्युत्तरार्धपूर्वार्धे ऽसंसक्तं हुत्वा प्रायश्चित्तानि जुहोति ॥ स्वाहेदेभ्यः स्वाहा ॥ वषडनिदेभ्यः
स्वाहा ॥ भेषज दुष्ट्यै स्वाहा ॥ निष्कृति दुरिष्ट्यै स्वाहा ॥ दैवीभ्यस्तनूभ्यः स्वाहा ॥ अयाश्चाग्ने ऽस्यनभिशस्तीश्च सत्य
मित्त्वमया असि ॥ अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा ॥ ॐ भूः स्वाहा ॥ भुवः स्वाहा ॥ स्वः स्वाहा ॥ भूर्भुवः स्वः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान०प्र० स्वाहेतिप्रायश्चित्तहोमः॥ततःस्कन्नहोमः॥यन्मेस्कन्नंमनसोजातवेदोयद्वास्कंदद्धविषोयत्रयत्र॥उत्सवोविपु
॥८२॥ षःसंजुहोमिसत्याःसंतुयजमानस्यकामाःस्वाहा॥पुनर्मैत्विंद्रियंपुनरात्माद्रविणंब्राह्मणंच॥पुनरग्नयोधि
ष्ण्यायथास्थानंकल्पयंतामिहैवस्वाहा॥इति॥ततोऽस्मृतिहोमः॥यदस्मृतिचकृमकिंचिदग्नउपारिमचरणेजा
तवेदः॥ततःपाहित्वंनःप्रचेतःशुभेसखिभ्योअमृतत्वमस्तुनःस्वाहेति॥अथसंस्थितहोमः॥यदद्यत्वाप्रयति
यज्ञेअस्मिन्होतश्चिकित्वन्नवृणीमहीह॥ध्रुवमयोध्रुवमुताशविष्ठः॥प्रविद्वान्यज्ञमुपयाहिसोमंस्वाहा॥समिंद्र
णोमनसानेषिगोभिःसंसूरिभिर्हरिवन्संस्वस्त्या॥संब्रह्मणादेवहितंयदस्तिसंदेवानांसुमतौयज्ञियानांस्वाहा॥याना
वहउशतोदेवदेवांस्तान्प्रेरयस्वेअग्नेसधस्थे॥जक्षिवांसःपपिवांसश्चमधून्यस्मैधत्तवसवोवसूनिस्वाहा॥सुगावो
देवाःसदनाअकर्मयआजग्मसदनमाजुषाणाः॥वहमानाभरमाणावसूनिवसुंघर्मंदिवमारोहतास्वाहा॥यज्ञयज्ञं
गच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा॥एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीर्यःस्वाहा॥वषड्ढुतेभ्योवषड्ढुतेभ्यः॥ राम०
देवागातुविदोगातुंवित्त्वागातुमितस्वाहेति॥अथमानसहोमः॥मनसस्पतइमंनोदिविदेवेषुयज्ञंस्वाहा॥दिविस्वाहा॥पृ ॥८२॥
थिव्यैस्वाहा॥अंतरिक्षायस्वाहा॥वातेधाःस्वाहा॥अथाज्यस्थालीघृतमुत्तमंचतुर्गृहीतमासंधान्यांस्थापयित्वाध्रुवे

णाग्रहीत्वाजुहोतिस्कामाहुतिंतत्स्मी॥इतिमानसहोमः॥स्तरणाबर्हिस्त्रिगुणीकृत्वाउग्धानीघृतेनाभ्यज्यपृथिव्यै
त्वेतिमूलमनक्ति॥अंतरिक्षायेतिमध्यं॥दिवेत्वेत्यंतं॥एवंत्रिः॥संबर्हिरक्तंहविषाघृतेनसमिंद्रेणवसुनासंमरु
द्भिः॥संदेवैर्विश्वदेवेभिरक्तमिंद्रंगच्छतुबर्हिःस्वाहेतिबर्हिर्हुत्वा॥संस्रवभागाःस्थविषाबृहंतःप्रस्तरेष्ठाबर्हिष
दश्चदेवाः॥इमंयज्ञमभिविश्वेगृणंतःस्वाहा॥देवानामसतामास्यंतास्वाहेतिसंस्रावंजुहुयात्॥ततोद्वितीयेऽह्नि
प्रपाहवाचनानंतरंपूर्णाहुतिंजुहोति॥ततःस्रुक्स्रुवौघृतपूर्णौकृत्वा॥समास्त्वाग्नऋतवोवर्धयंतुसंवत्सराऋष
योयानिसत्या॥संदिव्येनादीदिहिरोचनेनविश्वाआभाहिप्रदिशश्चतस्रः॥अग्निंमर्चेतसुष्टुतिंगव्यमाजिमस्मासुभद्रा
द्रविणानिधत्त॥स्रुक्हस्तोब्राह्मणोयानिहसेनतत्त्वगंसुनावपीतंस्वाहेतिमंत्रेणपूर्णाहुतिंहुत्वा॥देवीसिंधुनाभिस्ततः
सपत्नक्षयणोदिविसदे॥अंतरिक्षेसीदपृथिव्यासीदोहतेरोहंअपासंभवेमत्तमप्लानितिस्रुवकमेणादिवित्र्यंतरिक्षे
पृथिव्यांचहुत्वास्रुवप्राग्दंडमग्नेरुत्तरतःकृत्वाविमुंचामिब्रह्मणाजातवेदसमग्निंहोतारमजरंरथस्पृतं॥सदेवानां
जनिमानविद्वान्यथाभागंवहतुहव्यमग्निरग्नयेस्वाहेतिसमिधंजुहोति॥ततस्थ्वासोपधियीयस्वाहासमिदसिसमेधिषीय
स्वाहातेजोमपिधेहिस्वाहेतिमुखंमार्जयति॥ततोविष्णुक्रमान्क्रमते॥विष्णोःक्रमोसिसपत्नहापृथिवीसंशितोऽग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४द्दान॰प्र॰ ॥८३॥ तेजाः पृथिवीमनुविक्रमेहं पृथिव्यास्तं निर्भजामो योस्मान्द्वेष्टि यं च वयं द्विष्मः सम्राज्ञी वीतं प्राणोज्जहातु॥ विष्णोः क्रमो
ऽसि सपत्नहा अंतरिक्षं संशितो वायुतेजाः अंतरिक्षमनुविक्रमेहमंतरिक्षात्तं निर्भजामो यो स्मान् जहातु॥ विष्णोः क्र
मोऽसि सपत्नहा द्यौः संशितः सूर्यतेजा दिवमनुविक्रमेहं दिवस्तं निर्भजामो योस्मान् ॰ जहात्विति त्रिभिर्मंत्रैस्त्रीन्विष्णुक्र
मान्क्रांत्वा बहिर्निष्क्रम्य॥ सूर्यस्यावृतमन्वावर्ते दक्षिणास्यावृतं सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसमिति प्रदक्षि
णां कृत्वा॥ अगन्म स्वः स्वरगन्म संसृष्टज्योतिषा ऽगन्म वसो भूयाय वसुमान्यज्ञो वसुवंशी षीय वसुमानेन यास वसुम
यि धेहीति मंत्रेणास्तिसं निरीक्षेत॥ अथोर्ध्वपात्रमुत्थापयति॥ इंद्राय च सावचयमित्रस्य वरुणस्य च॥ ब्राह्मणा स्थापितं पा
त्रं पुनरुत्थापयामसी तातु त्वा प्यतहुदकेन आपो हि ष्ठेति मंत्रेण यजमानं मार्जयति॥ ततो यजमानः स्रुवमुदपात्र संक
इंद्रस्य वच्चसे तिस पवित्रं वंत्वार्पयित्वा समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत॥ अरिष्टाः सर्ववीरा यसोमो चनः किंचनाममत
॥ इदं जनासो विदथ महद्ब्रह्म वदिष्यति॥ नतत्पृथिव्या नो दिवि येन प्राणंति वीरुध इति ऋग्भ्यां तदुदकं यजमानांजलौ निषिंचेत्तेन
यजमानो वीरपुरुषो हमिति मुखं विमार्ष्टि॥ ततो होता व्रतानि व्रतपतये स्वाहेति समिधमाधाय॥ स संस्त्रवैर्न परिषिंचामि जात ग्र॰म॰ ॥८३॥
वेदाय इत्यग्निं परिषिच्य स्वस्थालीमुत्थाप्य ब्रह्मणे पूर्णपात्रं दद्यात॥ तत आचार्याय धेनुं दद्यात॥ ततो मंगल्यस्वस्त्ययनादिकं

योत॥ इत्युत्तरतंत्रं समापयेत॥ ततो गुरुर्यजमानेन सह तमोदिवाघरवेषु जायमानेषु माषभक्तबलिपुष्पधूपदी
पादिकमादाय मंडपांतः पूर्वदिशि॥ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश॥ संवीज्यमानोऽप्सरसां गणे
न रक्षाध्वरं नो भगवन्नमस्ते॥ इति मंत्रेणेंद्रमावाह्य॥ ॐ इंद्राय नमः इति गंधादिभिः संपूज्य इंद्राय सपरिवारायैष माष
भक्तबलिर्नम इति प्रयोगेण बलिं दद्यात॥१॥ एह्येहि सर्वामर हव्यवाह मुनिप्रवर्यैरभितोभिजुष्टः॥ तेजोवता लोक
गणेन सार्धं ममाध्वरं रक्ष कवे नमस्ते इत्यग्निमावाह्य॥ ॐ अग्नये नम इति पूर्ववदग्निं संपूज्य बलिं दद्यात॥ एवमेव
दक्षिणादिदिक्षु यमादीन्वक्ष्यमाणैस्तत्तन्मंत्रैरावाह्य तन्नाममंत्रैः संपूज्य बलीन्दद्यात॥२॥ एह्येहि वैवस्वत धर्म
राजन्सर्वामरैरर्चित धर्ममूर्ते॥ शुभाशुभानंद शुचामधीश शिवाय नः पाहि मखं नमस्ते॥ यमाय नम इत्यादि॥३॥ ए
ह्येहि रक्षोगणनायक त्वं विशाल वेतालपिशाचसंघैः ममाध्वरं पाहि शुभाधिनाथ लोकेश्वर त्वं भगवन्नमस्ते॥ नि
ऋतये नमः इत्यादि॥४॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः॥ विद्याधरेंद्रामरगीयमान पाहि त्वम
स्मान भगवन्नमस्ते॥ वरुणाय नम इत्या०॥५॥ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः॥ प्राणाधिपः का
लकवेः सहाय गृहाण पूजां भगवन्नमस्ते॥ वायवे नम इत्या०॥६॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ह्वान०प्र० र्वै॥ सर्वौषधीभिः पितृभिः सहैव गणहाराप्रज्ञो भगवन्नमस्ते॥ सोमाय नम इत्यादि॥७॥ एतद्धि हि विश्वेश्वर नित्यं भूतलके
पालरवद्धांगगणेन सार्द्धं॥ लोकेऽत्र भूतेश्वर यत्नसिद्ध्यै महाराराज्ञो भगवन्नमस्ते॥ ॐ ईशानाय नम इत्यादि॥८॥ ततो
॥८४॥ निर्ऋतिवरुणयोर्मध्ये॥ एतद्धि हि पातालधरामरद्भिर्नागांगनाकिंनरगीयमान॥ रक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरम
स्मदीयं॥ ॐ अनंताय नम इत्यादि॥९॥ ततइंद्रेशानयोर्मध्ये॥ एतद्धि हि विश्वाधिपते मुनींद्रलोकेन सार्धं पितृदेवताभि
ः॥ सर्वस्य धातास्यमितप्रभावः पात्वध्वरं नः सततं शिवाय॥ ॐ ब्रह्मणे नम इत्यादि॥ अनेन तत्र स्मरणोरुक्तस्थानमत्ययो
॥१०॥ ततइंद्रेशानमध्ये एवमनु विष्णुपत्निम्पैत्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्मविष्णुशिवैः सार्धं रक्षां
कुर्वंतु तानि मे॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मनवो गावो देवमातर एव च॥ एते ममाध्वरे रक्षां प्र
कर्वंतु मुदान्विताः॥ इति पठित्वा त्रैलोक्यस्थेभ्यो भूतेभ्यो नम इत्यनेन त्रिलिख्यैः पुष्पैर्भूतानि संपूज्य एकं माषभक्तबलिंभू
तेभ्यो नमः इति मंत्रेण दद्यात्॥ दानमागरेतु॥ त्रैलोक्ये यानि भूतानीति मंत्रद्वयं पठित्वा त्रैलोक्यस्थेभ्यः स्थावरेभ्यो राम०
भूतेभ्यो नमः॥ त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः॥ ब्रह्मणे नमः॥ विष्णवे नमः॥ शिवाय नमः॥ देवेभ्यो नमः॥ दानवे ॥८४॥
भ्यो नमः॥ गंधर्वेभ्यो नमः॥ यक्षेभ्यो नमः॥ राक्षसेभ्यो नमः॥ पन्नगेभ्यो नमः॥ ऋषिभ्यो नमः॥ मनुष्येभ्यो नमः॥ गो

भ्यो नमः॥ देवमातृभ्यो नमः॥ इत्येतैर्मंत्रैः प्रत्येकं सरअप्रत्येकं बलीन्दद्यादित्युक्तं॥ एवं यथेष्टं बलिदानं कृत्वा॥
तदनंतरं यजमानो गुरवेऽर्घसादिदेशकालौ स्मृत्वा कृतेनधिवासनकर्मप्रतिष्ठार्थमेतां दक्षिणामेतानि हेम
कुंडलोपवीतकंकणांगुलीयवस्त्राणि शयनादीनि चामुकगोत्रायामुकशाखाध्यायिनेऽमुकशर्मणे आचार्याय तु
भ्यमहं संप्रददे इत्युक्त्वा हेमानि भूषणानि वस्त्रादीनि चेतरऋत्विग्भ्यो यथापेक्षया दक्षिणानि दद्यात्॥ एवं पूर्वोक्तप्र
योगरूपदस्थाने ऋत्विक्पदप्रक्षेपेण ऋत्विग्भ्योऽपि प्रत्येकं दद्यात्॥ एवमधिवासनं कृत्वा गुर्वादिर्त्विजः सयजमाना
उपोषिताः सर्वे तां रात्रिं तत्रैव वसेयुः॥ अथ प्रभाते सर्वे कृतस्नानादिकक्रिया मंडपमागत्य पुण्याहं वाचयित्वा परागि
हुतिप्रभृति स्वस्वशाखायं पूर्वोक्तप्रकारेणाकर्मशेषं समापयेयुः॥ आवश्यककार्यातिपत्त्यादिना वैकल्ये तु सद्य एवा
धिवासं कृत्वा तदैव तुलापुरुषदानं कुर्यात्॥ सद्योऽधिवासनं वाथ कुर्याद्यो विकलो नर इति वचनादित्युक्तं प्राक्॥ त
तो वेद्याः पश्चिमदेशे उपविष्टं सकलत्रपुत्रं यजमानं कुंडसमीपस्थापितकलशजलैर्ग्रहकलशोदकेन च गुर्वादयऋ
त्विजः स्वस्वशाखीयवैदिकमंत्राभिषेकपूर्वकं सुरास्त्वामभिषिंचंत्वित्यादिभिर्मंत्रैश्च तूर्यादिमंगलशब्दैर्जायमाने
भिषिंचेयुः॥ सुरास्त्वत्यादयो मंत्राः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा संकर्षणो वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ मुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निऋर्तिस्तथा॥ वरुणः पवनश्चैव धनाध्य
॥८५॥ क्षस्तथा शिवः॥ ब्रह्मणा सहिताः शेषा दिक्पालाः पांतु ते सदा॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धि
र्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजी
वसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मनवो गावो
देवमातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च॥ औष
धानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वामभिषिंचंतु सर्वकामा
र्थसिद्धये इति॥ एवं सर्वौषधीभिस्तु लिप्तं स्नापितो यजमानः शुक्लमाल्यांबरधरः शुक्लगंधानुलिप्तांगो धृतविभूतिं
स्तुलाग्रे नम इति तुलां गंधपुष्पादिभिः संपूज्य गंधादिकं मासाय तुलादंडे देवताः प्रत्येकं पूजयेद्यथा॥ ॐ ईशानाय न
मः॥१॥ अग्नये नमः॥२॥ मारुताय नमः॥३॥ रुद्राय नमः॥४ सूर्याय नमः॥५॥ विश्वकर्मणे नमः॥६॥ गुरवे नमः॥७ दान॰
अंगिरोभ्यां नमः॥८॥ प्रजापतये नमः॥९॥ अमरराजाय नमः॥१०॥ धात्रे नमः॥११॥ पर्जन्यचंद्रमोभ्यां नमः॥१२॥ पितृ ॥८५॥
भ्यो नमः॥१३॥ सौम्याय नमः॥१४॥ धर्माय नमः॥१५॥ अमरराजाय नमः॥१६॥ अश्विभ्यां नमः॥१७॥ वरुणाय नमः॥१८

मित्रावरुणाभ्यां नमः॥१९ मरुद्भ्यो नमः॥२०॥ धनेशाय नमः॥२१॥ धर्मराजाय नमः॥२२॥ जलेशाय नमः॥२३ विश्वदेवेभ्यो न
मः॥२४॥ इति चतुर्विंशतिदेवताः संपूज्य तुलामध्यभागास्थितं पंचविंशं गोविंदं पूजयित्वा गृहीतकुसुमांजलिं तुलां
त्रिः प्रदक्षिणीकृत्य वक्ष्यमाणैर्मंत्रैस्तुलामभिमंत्रयेत॥ मंत्रास्तु॥ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता॥ सा
क्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथानृतशतानि च॥ धर्माधर्मकृतां मध्ये स्थापितासि
जगद्धिते॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता॥ मां तोलयंती संसारादुद्धरस्व नमोस्तु ते॥ योसौ तत्वाधिपो देवः
पुरुषः पंचविंशकः॥ स एषोधिष्ठितो देवि त्वयि तस्मान्नमो नम इति॥ ततो गोविंदानुमंत्रणं॥ नमो नमस्ते गोविंद तुला
पुरुषसंज्ञक॥ त्वं हरे तारयस्वामीन्नस्मान्संसारसागरादिति गोविंदाभिमंत्र्यांजलिस्थानि कुसुमानि तुलाग्रां संप्रकीर्य
पुनः तुलां प्रदक्षिणीकृत्य सोभयोः समीकृतायां तुलायां सत्याभ्युक्षरभागः प्राङ्मुखः सर्वाभरणभूषितः क्षत्रियश्चेत्कृतखड्गः
चर्मकंकवचः सो वर्णी धर्मराजप्रतिमां सव्यहस्ते गृहीत्वा हस्ते वर्णसूर्यप्रतिमां दक्षिणमुष्टौ गृहीत्वोन्नरूपादि
त्रिस्थितं तुलाफलकमारुह्य निजेष्टदेवतामाहाय तुलामध्यभागावलंबितां गोविंदप्रतिमां पश्यन्मुखे पन्यपत्रासीत॥ त
तो दक्षिणे तुलाफलके ब्राह्मणाः समादधिकं यथा भवति तथा तिनिर्मलं सुवर्णं प्रक्षिपेयुः॥ पुष्टिकामश्चेद्यजमानस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰वि॰प्र दायावत्तासुवर्णेनफलकं भूमिस्थितंभवतितावत्सुवर्णंप्रक्षिपेयुः॥ततस्तुलायामेवक्षणमात्रंस्थित्वा॥नमस्त
स्त्वादिमंत्रान्पठेत॥मंत्रास्तु॥नमस्तेसर्वभूतानांसाक्षिभूताधिभूतस्थे नमस्तेसर्वधारिणीइतिमात्स्यश्लोकद्वयंपठि
॥८६॥ त्वा॥पुनंतुमादेवजनाइत्यादित्र्यचंपठित्वा॥यथापवित्रमतुलमग्न्यंजातवेदसः॥तथात्वंनयविद्येणसुवर्णंहिपुना
तुमां॥रुद्रस्यसुमहत्तेजःकार्त्तिकेयस्यसंभवः॥तथात्वंनपवित्रेण। पुनातुमां॥पवित्रत्वाद्यथादेवैःशिरसाधार्यते
सदा॥तथात्वं॰मां॥यथाग्निर्देवताःसर्वाःसुवर्णंचतदात्मकं॥तथात्वं॰मां॥यत्कृतंमेस्वकायेनमनसावचसातथा॥दु
ष्कृतंतत्सुवर्णस्थंयातुमुक्तिपरंशुभामितिवह्निपुराणोक्तान्मंत्रांश्चपठेत॥एषांसमुच्चयएव॥जपत्वेनादृष्टार्थत्वा
त्स्वशाखानुमंत्रणावत॥ततस्तुलाफलकादवरुह्यवेदीपश्चिमभागेआसनेप्राङ्मुखउपविश्यकुशतिलयवतुलसी
जलान्यादायदेशकालकीर्त्तनांतेसकलब्रह्महत्यादिपापोपशमनपूर्वकसर्वमन्वंतरकालावच्छिन्नसर्वलोकपाल
स्थानाधिकरणकनिवासोत्तरकालभूरोगगणाधिष्ठितकलरगणकनकाकिंकिणीगणमंडितार्कवर्णसवर्णविमानक राम॰
रणकवैकुंठभुवनगमनानंतरकल्पकोटिकालावच्छिन्नतल्लोकभाग्यभोगोत्तरकालाखिलभूपालमौलिमालिका ॥८६॥
मालोपरंजितचरणपीठत्वविशेषितराजराजत्वश्रेयानुविद्धयत्तत्सहस्रद्वयाजित्वप्रदीप्तप्रतापानलानेकमहीपालविज

यकामोविष्णुप्रीतिमात्रकामोवाऽमुकगोत्रायामुकवेदाध्यायामुकशाखिनेऽमुकशर्मणेब्राह्मणायगुरवेऽमुकशर्मा
हं॥क्षत्रियश्चेदमुकवर्माहमिति॥वैश्यश्चेदमुकगुप्तोहमिति॥शूद्रश्चेदमुकदासोहमितिविशेषः॥एतदुपकल्पि
तोपकरणालंकारसहितमिदंतुलितसुवर्णसार्द्धंतुभ्यमहंसंप्रददेनममेत्युदङ्मुखोपविष्टस्यगुरोर्हस्तेकुशतिलादियु
तंजलंदद्यात॥गुरुश्च॥क्षत्रियादौयजमाने ॐकाराभावः ॐ स्वस्तीत्युक्त्वास्वकीयसुवर्णभागंस्पृष्ट्वादेवस्यत्वासवितुः
प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितत्तद्विशेषणयजुषाप्रतिगृह्यकोदादित्यादिकांकामस्तुतिंपठेत॥अ
तःकर्त्ताहतेतुलापुरुषमहादानप्रतिष्ठार्थंममुकंग्रामंदक्षिणार्थंपरिकल्पितममुक्तादियुक्तजातीयरत्नसहस्रार्द्धहाट
ल्यादिसाहस्रपरिमितसुवर्णार्द्धंवादक्षिणाममुकगोत्रायेत्यादिगुरवेतुभ्यमहंसंप्रददइतिदद्यात॥एवमपरमर्द्धमृ
त्विग्भ्योशाम्भ्यःपूर्वोक्तप्रयोगेणगुरुपदस्थानेऽमुकत्विग्भ्यइतिपदंप्रयुज्यदद्यात॥तेचस्वस्वशाखोक्तमंत्रपाठपुरःसरंस्वस्व
मंशंप्रतिगृह्यकामस्तुतिंपठेयुः॥पूर्वोक्तप्रकारेणग्रामंरत्नसहस्रार्द्धहाटकशल्यादिपरिमितसुवर्णार्द्धंवाऋत्विग्भ्योदक्षिणां
दद्यादितिहेमाद्रिकारमितार्दक्षिणादानविधिः॥विभवानुसारेणग्रामरत्नसुवर्णादीनिदद्यादितिसमंसप्रायेण्यकारणपक्षः॥
ऋत्विग्भ्यस्तुलितसुवर्णस्यद्वेधाविभागकरणेप्रथमपक्षेरूपकाशापालेभ्यस्तुलापुरुषद्रव्यस्यसमानत्वात्तेभ्यदेवद्रव्यंयथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान.प्र. त्वाक्तिं दक्षिणां दद्यात्॥ अथर्त्विगनुज्ञया तत्तोन्येभ्योपि दातव्यमिति द्वितीयपक्षः॥ अयशोतु तुलाद्रव्यं त्रेधा विभज्यैकं भा
॥८७॥ गमाचार्याय परं भागमष्टर्त्विग्भ्यस्तृतीयं भागं जापकद्वारपालादिभ्यो न्येभ्योपि ब्राह्मणेभ्यो दद्यात्॥ अस्मिन्पक्षे तु लितसु
वर्णस्य तृतीयमंशं गुरवे संप्रददे इत्यादिरूपः प्रयोगो विशेषो ज्ञेयः॥ ततः पूर्वोक्तदक्षिणां दद्यात्॥ हीनानाथविशिष्टेभ्यो
पि देयमिति तृतीयपक्षाश्रयणे तु प्रयोगः॥ यथा॥ पूर्वोक्तप्रयोगवाक्यानंतरं एतदुपकल्पितोपकरणादियुक्तमेतत्तुलित
तसुवर्णममुकगोत्राय युक्तविशेषणविशिष्टाय गुरवे तुभ्यमुक्तविशेषणाव ब्राह्मणेभ्य ऋत्विग्भ्य उक्तविशेषणाव ब्राह्मणजा
पकद्वारपालकेभ्यो न्येभ्यश्च ब्राह्मणेभ्यो हीनानाथविशिष्टेभ्यो ब्राह्मणेभ्यस्त्रिभ्यश्च युष्मभ्यमुपगतास्मदभिमतभागश्व
स्त्रेधा संप्रददे इति गुर्वादिहस्ते भुजलपूर्वं दद्यात्॥ ततो दक्षिणां च दद्यात्॥ यथा॥ अनयोर्द्वितीयतृतीयपक्षयोर्दानप्रतिष्ठ
र्थं दक्षिणादानं तु गुर्वृत्विग्भ्य एव॥ गुरवे चतुर्थांशो दानपक्षोपि केषांचिदभिमतः॥ तस्मिन्पक्षे द्वितीयांशो ऋत्विजां॥ तृ
तीयांशो जापकानां द्वारपालानां च॥ चतुर्थांशो हीनानाथादिभ्य इति विवेकः॥ येन वा तुष्यते गुरुरित्युक्तत्वाद्गुर्वृत्विजां॥ द्वि
तीयांशो ज्ञापकानां द्वारपा याव तासंतोषो ज्ञायते तावद्दातव्यमिति स्वयमपि पक्षः॥ एतेषां पक्षाणां स्वेच्छया व्यवस्थितिः॥ त राम.
तः पूर्ववत्पुण्याहवाचनं कारयित्वा सर्वोपकरणानि गृहीत्वा ग्रहवेदीं गत्वा सर्ववक्रहस्तानां पूजनं यजमानः कुर्यात्॥ ॥८७॥

ततो गुरुः॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवी॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय चेति देवताविसर्जयेत्॥ ततः
कर्मांगत्वेन यथाशक्ति ब्राह्मणान्भोजयेत्॥ संकल्पितं तुलाद्रव्यं चिरं गृहेन धारयेत्॥ राहुग्रहे सति द्विगुणादानमयाच्ञा
यं ब्राह्मणेभ्यो दद्यात्॥ ततो मंडपपीठं तद्देवतादि गुरवे दद्यात्॥ द्वारकलशादिकं द्वारपालेभ्यो दद्यात्॥ ततो मंत्रहीनं क्रि
याहीनं भक्तिहीनं जनार्दन॥ यत्कृतं तु मया देव परिपूर्णं तदस्तु मे॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं सं
पूर्णतां याति सद्यो वंदे तमच्युतं॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरितु
त्वा विष्णवे कर्मार्पणं कुर्यादिति॥ श्रीमद्विवज्ञनृपपात्रेण श्रीमन्नागदेवभट्टात्मजेनानंताचार्येण प्रथमशाखिना विरचिते विधान
पारिजातसंज्ञे निबंधे सुवर्णतुलापुरुषमहादानानुकीर्तनविधानं समाप्तम॥ ॥ अथ रजतादितुलाविधानं॥ तच्चोक्तं महा
नं॥ अथातः संप्रवक्ष्यामि महादानानुकीर्तने मिलुपक्रम्य समारभ्य धिकं यावत्कांचनं चातिनिर्मलं॥ नचेत्विधारयेत्के हे सुवर्णं
प्रोक्षितं बुध इति मत्स्यपुराणे एवोक्तेः॥ तेन च कुंडमंडपहोमादीति कर्तव्यता सुवर्णतुलावन्निरूपा॥ किंतु याक्षिका॥
यतो भविष्ये हेमतुलामुक्त्वा॥ अनेनैव विधानेन केचिद्रौप्यमयीं तुलां॥ कर्पूरस्यात्तथैवं ति केचिद्ब्राह्मणाः पुंगवाऽद्भुता
त्वा व्रततन्मंत्रो होमो वै स्तुते वा॥ भविष्ये॥ अनेनैव विधानेनेतिभ्लोकमुक्त्वा॥ तथा मितततीयायां नार्यः सौभाग्यदां तुलां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान॰प्र॰वि ॥कुंकुमेन प्रयच्छ तिलवर्णो न गुडेन वा॥ न तत्र मंत्रो होमो वा एवमेव प्रदीयते॥ विश्वामित्रः॥ आदित्ये राहुग्रस्ते तु
॥८८॥ वर्णास्तोलयेन्नृ॥ ततो मय्य हेतुरोप्यप्रदानं तथा शृणु॥ प्रवार्य स्वमुखे पुत्रे उत्सन्नः पवित्रे देहतः॥ सर्वपापहरा
येतद्ददामि प्रीयतां विभुः॥ इत्युच्चार्य जलं त्वक्षु निक्षिपेद्द्विजसत्तमे मेति॥ अत्र सुवर्णरजततुलयोरपि ग्रहणो इति कर्त्तव्य
तायां त्रिमावत्रपकत्वं घात्यते॥ नानुनिषेधः॥ समवेतकार्यैव॥ प्रीणांति पितरः कांस्यताम्रे चैव पितामहाः॥ लवणो सिंधु
जे लक्ष्मीः प्रीयतां पार्वती गुडे॥ गांधेर्गुडे वीवासोभिः सौभाग्यं लवणोपरं॥ प्रीयतां विश्वधात्रीति दानमंत्रो विधीयते॥ तुलापु
रुषतो राजन् प्याति तत्परमं पदं॥ सर्वपापविमुक्तात्मा मुक्तिं यात्यपुनर्भवां॥ हत्वा तु ब्राह्मणान्न यस्तोलयेदात्मनस्तनुं॥
सुवर्णेनात्मतुल्येन ब्रह्महसाध्य याहमिति॥ अत्रानुक्तदक्षिणेषु तुलापुरुषदानेषु सामान्यतो विहितं सुवर्णांत अनवाप्
क्रितो दक्षिणात्वेन देयं॥ इति स्वल्पकर्पूरकुंकुमलवणगुडवस्त्रतुलापुरुषविधानं सूर्यचंद्रग्रहतुलाविधानं च॥ ॥अ
थ लोहस्य तुलाविधानं॥ स्कांदे॥ लोहनामाभवत् पूर्वं दानवः सुमहाबलः॥ स देवैः समरे क्रुद्धैर्वधार्थं शकलीकृतः॥ त राम॰
दंगसंभवं सर्वलोहं यद्दृश्यते क्षितौ॥ आत्मानं तोलयित्वा तु दद्याल्लोहं तु तत्समं॥ द्विजाय पात्रीविभक्ताय तथा स्वस्मै द्विजा ॥८८॥
तये॥ पादुकोपानहं छत्रं चामरासनसंयुतं॥ अयने विषुवे प्राप्ते व्यतीपातादिपर्वसु॥ अश्वप्रयुक्तो भुंचो देशो विशेषाद्भुक्ते

रायरोः॥ पंचामृतेन संस्नाप्य देवदेवमुमापतिं॥ केवलेन घृतेनाथ प्रस्थमात्रेणाप्लुतेदिं॥ सुगंधचंदनजलैस्ततः संस्ना
पयेद्विभुं॥ चंदनागरुकर्पूरकंकोलमृगनाभिभिः॥ विलिप्य परमेशानं सुमनोभिरथार्चयेत्॥ भक्त्या निवेद्य नैवे
द्यमनन्येन चेतसा॥ ततः प्रणम्य जगतामीश्वरं प्रार्थयेदिति॥ देवदेव जगन्नाथ कृपालो परमेश्वर॥ मामुद्धर संस
सारपंकसंमग्नं दुःखितम्॥ इति संप्रार्थ्य यो दद्याल्लोहमात्मसमं नरः॥ स याति शिवसालोक्यं यावदिंद्राश्चतुर्दश॥
ततः पुनरिहायातः पृथिव्यामेकराड् भवेत्॥ अत्रापि सुवर्णादक्षिणेति ज्ञेयं॥ इति लोहतुलाविधानं॥ ॥अथ गरुड
पुराणोक्तनानारोगघ्न लोहादितुलाविधानं॥ सनत्कुमार उवाच॥ वक्ष्ये तुलापुरुषदानं शृणु मत्तोऽजयोद्भवं॥ अथ लो
हप्रदानं व्यसर्वरोगोपशांतये॥ कांस्यं च यक्ष्मके देयं त्रपु चार्शोविकारके॥ यक्ष्मके यक्ष्मरोगे सति॥ अपस्मारे च सीसं
स्यात् ताम्रं कुष्ठे सुदारुणे॥ पैत्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः॥ सौवर्णं सर्वरोगेषु प्रदद्यान्मनुजोऽभयं॥ फलोद्भवमथोद
घाकृहरणी दारुणारुजेति॥ गोडं भस्मकरोगे च योगं वैगवडमालके॥ जांगालं चाग्निमंदि चरोमौ स्या तैलं पौष्पकं॥ मधूद्भ
वं तथा देयं श्वासकासजलोदरे॥ घृतोद्भवं तथा देयं छर्दिरोगोपशांतये॥ क्षीरं पित्तविनाशाय दधिकं भगंदरे॥ लवण
वंद्यप्नाशाय यवं ददु विनाशने॥ अयं च सर्वरोगस्य नाशने श्रुतमेव च॥ अपि दैवतं लोहे च महाभैरवमुच्यते॥ कांस्ये त्रयाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान·प्र· भ्विनौ च वायुर्वैसीम्सके स्मृतः॥ ताम्रे सूर्यस्तथा प्रोक्तः यैत्तले च कुहूस्तथा॥ रौप्ये च पितरो ज्ञेयाः सुवर्णे स्थदेवता
॥८१॥ ः॥ फले सोमो गुडे चापस्ताम्बूले तु विनायकः॥ गंधर्वः कुंकुमे चैव नागा लंग्रिस्तथा स्मृतः॥ मधौ पक्षाः प्रयत्नेन घृते म
त्युंजयः स्मृतः॥ क्षीरे तारागणाः प्रोक्ता दधि सर्पाः प्रकीर्त्तिताः॥ पिष्टे प्रजापतिर्देवः अन्ने सर्वाश्च देवताः॥ आर्त्तीयद्दा
स्यात्तां प्राप्नुयात्तु शरदेशतः॥ नित्यं मृत्युंजयप्राप्त विधिना पत्य रीयते॥ तदेव सर्वशात्पर्थ भवतीह न संशयः॥ तुलापु
रुषदानेन मृत्युंजं पतिमानवः इति॥ अत्राधिदेवतो त्कीर्त्तनेन तत्तुलादानेन तत्तद्देवपूजाघं॥ मृत्युंजयप्राप्त विधिनेति मृत्युं
जयपूजाविधानाम मृत्युंजयपूजयित्वेत्यर्थः॥ तत्पूजाविधिश्चोक्तो देवीपुराणे॥ मृत्युंजयपश्च देवोयं चतुर्भुजस्त्रिनेत्र
कः॥ अक्षमालाधरो देवो दक्षिणोनत्तुपाणिना॥ वामेनामृतकुंडं च धारयन्नमृतान्वितं॥ वराभयपाणिश्च दिव्याभर
णभूषितः॥ शुभ्रः सुनीलवासाश्च पद्मस्योपरि संस्थितः॥ जां जीं हृच्च शिरो ज्ञेयं जूं वषड्ढ शिखा स्मृता॥ जैवं षट्कंकव
चं ज्ञेयं जौ नेत्रं च प्रकीर्त्तितं॥ जः फडस्त्रं समुद्दिष्टं षडंगोयं भवेत्सदा॥ ॐकार आवाहमंत्रः ओंकारो वै विसर्जने॥ अ दान·
ष्टेयाः शक्तयः प्रोक्ताः पंचाक्षरसमन्विताः॥ जया च विजया चैव अजिता चापराजिता॥ भद्रकाली कपाली च क्षेम्याम ॥८१॥
तुपराजिता॥ जूंसइति मंत्रराज स्तो मृत्युंजयः शिवः॥ गंधादिभिर्यथान्यायं यथा ब्राह्मणपूजनं॥ मृत्युंजयोक्तं दानेषु स

वैधेवं विधिः स्मृतः॥ ॐ जूंसइति वैहातुं कामाघं साधयेत्सदा॥ गारुडे एव॥ लोहेतदामंत्र मम्पुं॥ गृहीत्तुर्हृदिरोपयेत्
॥ शिरो ललाटे कंठे च जिह्वाग्रे लेख्यं गरुडयोः॥ नाभौ च ब्रह्मगरस्वेव एतद् ष्टांकिम सेत॥ अरत्निर्हस्तमात्रं वा सार
जस्य प्रकीर्त्तितं॥ यथेच्छया प्रयोगेन यथावत्कर्तुमिच्छया॥ षष्ठ्या यत्नेः संघटितम तांतं पलिकं भवेत्॥ लोहनिष्प
न्नमेवैतत्तत्राचान्नेन मिश्रितं॥ पंचाशत्पलसंयुक्तं दं डं चायससंस्थितं॥ वस्त्रे राष्ट्राघदानेन न यमं दंडेन विद्यते॥ इति
॥ अत्रापि स्वर्णा दक्षिणा देया॥ इति नानारोगघ्नतुलाविधानं॥ ॥ अथ विष्णुधर्मोक्तं घृतादितुलाविधानम्॥ शंक
र उवाच॥ तुलादानं प्रवक्ष्यामि सर्वपापविनाशनं॥ यत्कृत्वा चरितं पूर्वं लक्ष्म्या नारायणेन च॥ पुण्यं पद्दिन मथा साघ
त्तृतीयायां विशेषतः॥ गोमयेनानुलिप्तायां भूमौ कुर्यात् दृढं शुभं॥ दारवं शुभ महत्सम्यक्चतुर्हस्तप्रमाणतः॥ उपरि तोततो
दंडो यदं॥ तत्राधारो र्धा दृढं यः॥ सुवर्णेन तत्र बध्नीयात्त्वशक्त्या घटितं धटे॥ शिक्यद्वयं तु बध्नीयात्तस्मिन् तथटिके ततः
॥ तत्र प्रहेत्त्वव स्त्रैश्च पुष्पालंकारभूषितः॥ अभीष्टदेवतां गत्वा स्नापयित्वा घृतादिभिः॥ तुलादानेन सर्वं सवि
धिरेषप्रकीर्त्तितः॥ सर्वं स्य वक्ष्यमाणघृतादितुलापुरुषस्येत्यर्थः॥ विधिरेषप्रकीर्त्तितः इति विधिविशेषप्रतिपादनेन मु
ख्यतुलापुरुषदानेतिकर्त्तव्यतातिदेशो निरस्यते॥ इति मदनरत्नकारः॥ सर्वत्रोपायमिसपरे॥ प्रथमास्तु घृत स्योक्ता तेजो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ वृश्चिके तु तुला॥ मासि केशान्तु सौभाग्यं तैलेन बहुलाः प्रजाः॥ वाससा दिव्यवस्त्राणि प्राप्नोति तुलया ध्रुवं॥ लवणा
॥१०॥ स्य तुलया वाप्यमरोगित्वं गुडस्य च॥ अप्सराघनेत्रा कैरया सुरूपं चंदनेन तु॥ अभिमताभवेद्रत्नतुलायां कुंकुमस्य
तु॥ न संतापो हृदि भवेत्स्त्रीरस्य तुलया सदा॥ सर्वकामप्रदाः सर्वाः सर्वपापक्षयंकराः॥ पोरहाति तुलाः सर्वाः स्वर्गश्चे
त्परमं पदमिति॥ तथा॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता॥ मां तोलयंती संसाराद्धुद्धरस्व नमोस्तु ते॥ इत्यार
त्व क्षणाच्छित्वा चिंतयित्वा हरिप्रियं॥ अवरुह्य ततो द्रव्यो दद्यादन्यथापि च॥ गुरुं संपूज्य विधिवत्सवलिंकारभूष
णैः॥ विसर्जयेच्च मस्तकं सभोजयित्वा विधानतः॥ त्रोपेद्विजेभ्यो दातव्यं स्त्रीभ्योऽन्येभ्यस्तथैव च॥ द्रव्यं वस्तु विशिष्टाना
माश्रितानां कुटुंबिनां॥ विधिमानेनयो दद्यात्तुलादानं विशेषतः॥ स लोकमेति पार्वत्याः सेव्यमानो सुरांगनैः॥ तत्रोष्य
कालं सुचिरमिह लोके नृपो भवेत॥ इति घृतादितुलाविधानम्॥ ॥अथ पराशरोक्तं गुडादितुलाविधानं॥ गुडं वा यदि
खंडं लवणं वा पितोलितं॥ यो दद्यादात्मना तुल्यं नारी वा पुरुषोपि वा॥ पुमान्सुखसमृद्धः स्यान्नारी स्यात्सार्वतीसमा॥
सुभगो रूपसंपन्नो भुंजीतांते त्रिविष्टपं॥ हिरण्यपद्मसिशाख्युक्तं सर्वसंभवविभूषणान्वितं॥ अलंकृत्य द्विजाग्र्यं तं परिधाप्य राम॰
चैवासनं॥ खंडादि तोलितं पश्चा दिद्याय प्रतिपादयेदिति गोपथब्राह्मणे॥ अथ चैक्निमूपक्षः स्याद्यथा संपद्यते धनं ॥१०॥

॥धातुभिः सह तोल्यस्तु वासोभिस्तु रसैस्तथा॥ व्रीह्यादिभिः सर्वधान्यैर्यथासंपद्यते गृहे॥ यस्याप्यस्य कुले जातं त्रिःसप्त
पुरुषैः कृतं॥ तत्सर्वं नश्यते क्षिप्रमग्नौ तूलं यथा तथा॥ अनामयं स्थानमवाप्य देवैरलं घनीयं सुकृतं हि रम्यं॥ स
मस्तदोषात्परिमुक्तदेहो दिवीव व्रजति सूर्यलोके॥ सूर्यलोके देवीत्यभेदेन संबंधः॥ अथ सुवर्णादिजनताम्रव्यतिरिक्ते
द्रव्यतुलापुरुषप्रयोगः॥ न तत्र मंत्रो होमो वा स्तुत्रैस्त्रहोमजपाद्यमात्रः॥ श्रद्धालुर्यजमानः पुण्यकालमासाद्य यथाश
क्ति मंडपं संपाद्य तुलां संपादयेत॥ तत्रिर्मपभ्रा प्रकारो मात्स्ये॥ शाकं गुडं चंदनदेवदारुस्त्रीपर्णी बिल्वप्रियकांजनानां॥
स्तंभद्वयं हस्तयुगावखातं कृत्वा क्षतुं पंचकरोच्छ्रितं च॥ तदंतरे हस्तचतुष्टयं स्यात्तथोत्तरांगं च तदंगमेव॥ समानजातिश्च
तुलावलंबिता हेमेन मध्ये पुरुषेण युक्ता॥ दैर्घ्येण सा हस्तचतुष्टयं स्यात्पृथुत्वमस्याश्च दशांगुलानि॥ सुवर्णपत्राभर
णा च कार्या सलोहपाशद्वयशृंखलाभिः॥ युता सुवर्णेन च रत्नमालाविभूषिता माल्यविभूषणाभ्यां॥ इत्युक्तलक्षणां शिक्य
द्वयावलंबितफलकद्वयायेतां दक्षिणोत्तरदिगावलंबिनीं तुलां निर्माय संभारान्संभृत्य धर्मराजसूर्यविष्णुप्रतिमाः कृत्वा
गणेशग्रहांशलोकपालाष्टदेवताः संपूज्य प्रार्थयित्वा देशकालौ स्मृत्वाऽमुकवरोऽमुकगोत्रोऽमुकशर्माऽहं तत्तद्वचनागतफलका
मः श्रीविष्णुप्रीतिकामो वाऽमुकद्रव्येणाघतादिनानुपुरुषदानं करिष्य इति संकल्प्याचार्यं हत्वा तेभ्यो वस्त्रादिकं यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ संभवं स्त्वा पर्वोन्हे मृत्युंजय पूजाविधिना त्र्यंबकं यजामहे इति मंत्रेण मृत्युंजयं संपूज्य तन्नात्तोल्यनीय द्रव्याधिदेवतां पू
॥९१॥ र्वोक्तैर्भैरवादिकोपथा यथा संपूज्य धर्मराजसूर्य विष्णुप्रतिमाः कृता सुवर्णेन आवाहनाद्युपचारैः संपूज्य विष्णुप्रतिमां
गोविंदसंज्ञितां तुलादंडमध्य विभागे लंबितां बध्वा तुलादंडस्य दक्षिणप्रांत बध्वा धारभ्य चंदनादिनात दधिष्ठितदेवता
पूजयेत॥ तद्यथा॥ ॐ भूर्भुवः स्वः ईशाय नमः ईशमावाहयेत॥ एवमुत्तरत्रापि ज्ञेयं॥१॥ न्नाशिनेश्माहतेरु रुद्रे४ सूर्यं ५
विश्वकर्माणं६ गुरुं ७ अंगिरोग्नी८ प्रजापतिं९ विश्वे१० जगद्विधातारं११ पर्जन्यं वाग्नं१२ पितृदेवतां१३ सोमं१४ धर्मं १५ अ
मरराजं१६ अश्विनौ१७ जलेशं१८ मित्रावरुणौ१९ मरुद्गणान२० धनेशं२१ गंधर्वं२२ वरुणं२३ विष्णुं२४ इत्येताः पंचविं
शति देवताः मध्ये गोविंदं चावाह्य गंधादिभिः संपूज्य॥ निकामे निकामे नः दधिक्राव्णः स्थिरो भव वीड्वंगः॥ यतो यतः समी
हसे॥ शिवो भव प्रजाभ्यः॥ इत्येतैर्मंत्रैः स्तंभद्वयमन्तरसंस्थं संपूज्य॥ तुलामंडपस मंततः एवं दिक्क्रमेण द्वादीत्ते लोकपा
लानावाह्य संपूज्य सदीपान्बलीन्स्तंभे भोद्याग्रे पूर्णमासेहो पोषितस्तत्रैव तारात्रिं जागरयात॥ इदमधिवासनपूर्वदिने
कार्यं॥ कार्यदिनाः संभवे सद्य एव कृत्वा पूर्णमासुरास्त्वामभिषिंचविसादि मंत्रैरभिषिक्तो यजमानो गृहीतकुसुमांज राम॰
लिस्तुलां त्रिः प्रदक्षिणीकृत्योपविश्य प्राङ्मुखस्तुलामभिमंत्रयेत॥ ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता॥ सा ॥९१॥

क्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथानृतशतानि च॥ धर्माधर्मकृतां मध्ये स्थापि
तासि जगद्धिते॥ त्वं तुले सर्वदेवानां प्रमाणमिह कीर्तिता॥ मां तोलयति संसाद्धुद्धरस्व नमोस्तुते॥ अथ गोविंदमुम
त्रेणं॥ योसौ तत्वाधिपो देवः पुरुषः पंचविंशकः॥ सएषोधिष्ठितो देव तस्मिंस्तस्मान्नमो नम इति॥ ततः प्रार्थना॥ नमो
नमस्ते गोविंद तुलापुरुषसंज्ञक॥ त्वं हरे तारयस्वास्मानस्मात्संसारसागरात॥ इत्युक्त्वा गोविंद तुलो परि कुसुमानि नि
क्षिपेत॥ पुनस्तुलां त्रिः प्रदक्षिणीकृत्य सर्वाभरणसंपन्नो वामभुजेन गृहीतधर्मराजप्रतिमा दक्षिणभुजेन गृहीत्वास्व
र्यप्रतिमः उत्संगस्थ स्वेष्टदेवताः प्राङ्मुख उदङ्मुखो वोत्तरशिक्ये उपविशेत॥ दक्षिणेन तु द्रव्यं स्थापयेत रक्षास्वयं विशे
दिति वचनात॥ ततो दक्षिणाग्निकोणस्थितात्म द्रव्यं निधाय यावत्सममधिकं वा पुष्पिकामभूस्त्वं कुर्यात॥ अथ
यजमानो गोविंद प्रतिमामीक्षमाणः शिक्यस्थ इमं मंत्रं पठेत॥ ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनि॥ पिताम
हेन देवि त्वं निर्मिता परमेष्ठिना॥ त्वया धृतं जगत्सर्वं सहस्थावरजंगमं॥ सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि॥ इति घ
तादितोलनीय द्रव्यं किंचित्सुवर्णं दत्त्वा च दिमे मंत्राः पठनीयाः॥ यथा पवित्रमतुलमपसं ज्ञातवेदसः॥ तथा रत्नपवित्रे
ण सुवर्णेन हि पुनातु मां॥ रुद्रस्य तु महत्तेजः कार्त्तिकेयस्य संभवः॥ तथा रत्नं मां॥ यथाग्निर्देवताः सर्वाः सुवर्णे हि तदात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान॰ अ॰ वि॰ कं॥ तथास्त्वे॰मां॥ यत्कृतं मे स्वकायेन मनसा वचसाथवा॥ दुष्कृतं तत्सुवर्णास्थं यातु मुक्तिं परां शुभां॥ इत्युक्त्वा गौरे
॥९२॥ हनमात्रं स्थित्वा॥ ततोवतीर्य वेदिपश्चिमे उपविश्य घेत्वा घृत्वा॰ मुक्तकाम इदं इमं मम शुदेवं तद्घृतं चेन्मत्तु जयदेवं
तेश्राचार्यायान्येभ्यो ब्राह्मणेभ्यः समाश्रितं सुवर्णाभ्यादीनानाथस्त्रीभ्यश्च यथाविभागं संप्रदद्देनमभ्रेसत्क्वो कृते
ततुलापुरुषदानप्रतिमास्तुलापुरुषार्द्धं तदर्द्धं तदर्द्धं वाचार्याय दत्वान्येभ्यश्च प्रतिपाद्याश्रावेक्षणां कृत्वा॥ प्रमादात्क
र्वतां कर्म॰॥ यस्मृत्या च नामोक्त्या॥ मंत्रहीनं क्रियाहीनं यत्कृतो षियरश्रासि॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव
च॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु इत्येतान्मंत्रान् पठित्वा ईश्वराय समर्प्याचार्यं क्षमाप्येषेः सहभुंजीतेति॥
इति श्रीमद्विद्वज्जनकृपापात्रेशानंताचार्यप्रथममन्नाखिनविरचिते दानविधानपारिजाते सकलतुलाविधानानि॥
॥ ॥श्रीमद्विघ्नहरने घनायनमः॥ तुलापुरुषानंतरं हिरण्यगर्भदानमुच्यते॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महा
दानमनुत्तमं॥ नाम्ना हिरण्यगर्भाख्यं महापातकनाशनं॥ पुण्यां दिनमथासाद्य तुलापुरुषदानवत्॥ ऋत्विङ्मंडलसं राम॰
भारभूषणाच्छादनादिकं॥ कुर्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः॥ पुण्याहवाचनं कृत्वा तद्वत्कृत्वाधिवासनं॥ उप
वासोपि ऋत्विग्भिः सह कार्य इति दानसागरे॥ ब्राह्मणो वानयेत्कुंडं तपनीयमयं शुभं॥ द्वासप्ततिं गुलो [illegible] हेममयं ॥९२॥

कज्ञाभवत॥ त्रिभागहीनविस्तारं प्रशस्तं मुद्राकृतिः॥ कुंडमिति यजमानप्रवेशार्थं हिरण्यगर्भाख्यं पत्र॥ हेमपंकजेति।
अधोभागमध्यस्थाष्टदलकं सुवर्णकमलयुक्तं॥ त्रिभागेति॥ अष्टाच त्वारिंशदंगुलविस्तृतं॥ रत्नान्यानि सरत्नानि
दद्यात् रुचिंतं तथैव च॥ हेमतालं सपिटकं बहिरादिसंयुतं॥ तथैवावरणं नाभेरुपवीतं च कांचनं॥ पार्श्वतः स्थापयेत्तद्व
द्धेमदंडकमंडलु॥ रत्नान्याशणोति॥ रत्नान्यवखंडकाराणि सुवर्णखंडानि॥ पिटकोमज्जषादावीनीलछेदनार्थं॥ सूचिः कर्ण
वेधनार्थं॥ नाभेशवरणार्थं वस्त्राकारं॥ उपवीतमुपनयनेधारणार्थं॥ दंडकमंडलु समावर्तनेधारणार्थं॥ एवं दत्रावादीति
कमंडल्वंतानि सौवर्णानि कृत्वा हेमकुंडाद्दाख्यप्रदेशे प्रार्श्वतः स्थापयेदित्यर्थः॥ आदित्यसादिसप्रतिमासंयुत॥ वप्राक
रं पिधानं स्यात्समंताद्दंगुलाधिकं॥ मुक्तावलीसमोपेतं पद्मरागदलान्वितं॥ तिलद्रोणोपरिकृतं वेदीमध्ये ततो न्यसेत्॥ अंगु
लाधिकं मुखेन सर्वतोधिकमित्यर्थः॥ यद्यप्यत्र सुवर्णपरिमाणं नोक्तं॥ तथापि यावता सुवर्णेन यजमानस्य मुखप्रवे
शावस्थाननिर्गमयोगं भवति तावता कुंड घटनीयं॥ ततो मंगलशब्देन ब्रह्मघोषरवेण च॥ सर्वौषध्युदकस्नानस्नापितो
वेदविन्मेः॥ शुक्लमाल्यांवरधरः सर्वाभरणभूषितः॥ इमममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥ नमो हिरण्यगर्भाय
हिरण्यकवचाय च॥ सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः॥ भूर्लोकप्रमुखालोकास्तव गर्भव्यवस्थिताः॥ ब्रह्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० दयस्तथा देवा नमस्ते विश्वधारिणे॥ नमस्ते भुवनाधार नमस्ते भुवनाश्रय॥ नमो हिरण्यगर्भाय गर्भेय स्य पितामहः॥
॥९३॥ यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥ ततस्तु अधिवासनादि स्नाहि
त्वं तत्कर्मस्य मास्यंतरमित्यर्थः॥ एवमामंत्र्य तन्मध्यमाविश्याथो उदङ्मुखः॥ मुष्टिभ्यां परिसंगृह्य धर्मराजं चतुर्मुखं॥
जानुमध्ये शिरः कृत्वा तिष्ठेदुच्छ्वासपंचकं॥ अत्र हि रण्यगर्भे विधानेनाच्छादितस्य गर्भाधानादिकार्यं। गर्भाधानं पु
सवनं सीमंतोन्नयनं तथा॥ कर्यात्त्रिघोषा गर्भस्य ततस्ते द्विजपुंगवाः॥ गीतमंगलशब्देन गुरुरुत्थापयेत्ततः॥ जात
कर्मादिकाः कुर्यात्क्रियाः षोडशचापराः॥ अत्र जातकर्मादिसंस्काराणां स्वरूपतः करणासंभवात्तत्तत्कामं ध्यानपू
र्वकं तत्तत्प्रधानकर्ममंत्रपाठमात्रेणाते कार्याः॥ स्त्रीभ्य दुकर्तव्ये केवलं नुसंधानमात्रं कार्यं॥ तत्रापि स्त्रिया विवाहः स
मंत्रकः॥ सूच्यादिकं च गुरवे दत्वा मंत्रमिमं जपेत्॥ नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः॥ चराचरस्य जगतो गृह
भूताय ते नमः॥ मंत्रा हं जनिता पूर्वं मलंकासो द्विजोत्तमः॥ त्वत्प्रसादेन संभवाद्देवदेहो भवाम्यहं॥ चतुर्भिः कल दान०
शैर्मुख्यस्ततस्ते द्विजपुंगवाः॥ स्नानं कुर्युः प्रसन्नांगाः सर्वाभरणभूषिताः॥ देवस्य त्वेति मंत्रेण स्थितस्य कांचनासने॥
अद्यजातस्य मंगानि अभिषेक्ष्यामहे वयं॥ दिव्येनानेन वपुषा चिरं जीव सुखी भव॥ ततो हिरण्यगर्भं तेभ्यो दद्या ॥९३॥

द्विचक्षणाः॥ ते पूज्याः सार्वभावेन बहुस्तदनुज्ञया॥ तेभ्यो गुर्वादिभ्यः तद्विभागस्तुलापुरुषवत्॥ तत्रोपकरणांस्त
र्वं गुरवे विनिवेदयेत्॥ सर्वमुक्तेन बहूपकरणां स्व्याद्यादिकं करणं वेधादिकर्मणि जातप्रयोजनं गुरवे दद्यादित्यर्थः
॥ पादुकोपानहच्छत्रचामरासनभाजनं॥ ग्रामं वा विषयं वापि यच्चान्यद्यपि संभवेत्॥ इदं च ग्रामादिकं दक्षिणात्वेन
संबध्यते॥ आत्मालंकारमपि कर्त्रे दद्यादिति गोपथब्राह्मणे॥ अनेन विधिना यस्तु पुण्येऽन्हि विनिवेदयेत्॥ कल्पका
टिशतं यावद् ब्रह्मलोके महीयते॥ ॥ इति श्रीमदनंतभट्टविरचिते विधानपारिजाते हिरण्यगर्भमहादानविधानं॥ ॥
अथ ब्रह्मांडदानं। मात्स्ये॥ अथातः संप्रवक्ष्यामि ब्रह्मांडविधिपूर्वकं॥ यच्छ्रेष्ठं सर्वदानानां महापातकनाशनं॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत्॥ ऋत्विङ्मंडलसंभारभूषणाच्छादनादिकं॥ लोकेशावाहनं तद्वदधिवा
सनकं तथा॥ तुलापुरुषवस्त्रपत्नेनात्रापि हानसंकल्पोपवासगोविंदादि रज्ञानुज्ञाग्रहणादीनि पूर्वांगसहितक
र्माणपतिद्विपंते॥ कुर्याद्विंशत्पलादूर्ध्वमासहस्राच्च शक्तितः॥ शाकलद्वयसंयुक्तं ब्रह्मांडं कांचनं बुधः॥ ग्रीवाहीनं स
कुंभस्य सदृशं कारयेत्ततः॥ दिग्गजाष्टकसंयुक्तं षड्वेदांगसमन्वितं॥ लोकपालाष्टकोपेतमध्यस्थितचतुर्मुखं॥ शिवाच्यु
तार्कशिखरमुमालक्ष्मीसमन्वितं॥ वस्वादित्यमरुद्गर्भं महारत्नसमन्वितं॥ वितस्तेरंगुलशतं यावदायामविस्तरं॥ कौशेयव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रसंवीतंतिलद्रोणोपरिन्यसेत॥तथाद्रव्याण्यानिसमंतात्परिकल्पयेत॥दिग्गजाष्टकमैरावतादिप्रतिमात्मकं॥तथा
षड्ढं॰ हंसप्रतिमायुतं॥ वितस्तेरिति॥ द्वादशांगुलात्मिकवितस्तिमारभ्यशतांगुलमानेनाननुरोधेनसमविस्तारोत्सेध
मंडकार्यमित्यर्थः॥ पूर्वयांतन्न्यसेत्प्रद्युम्नं पूर्वदक्षिणे॥ प्रहतिं दक्षिणेदद्यात्संकर्षणमतःपरं॥ पश्चिमेचानिरुद्धंतु
निरूढमतःपरं॥ अग्निमुत्तरतोहेमवासुदेवमतःपरं॥ समंतात्कुंडपीठस्थानर्चयेत्कांचनान्बुधः॥ ब्रह्मांडस्यपूर्वादिदि
क्षुकृतगुडपीठेष्वेतान्संस्थाप्यार्चयेदित्यर्थः॥ अत्रप्रतिमालक्षणादानकांडतोवसेयं॥ स्थापयेद्वस्त्रसंवीतान्स्तो
कुंभान्स्त्रीवत्॥ द्वौवधेनवेदियाः सहेमांबरदोहनाः॥ पादुकोपानहच्छत्रचामरासनदर्पणैः॥ भक्ष्यभोज्यान्नदीपेक्षु
फलमाल्यानुलेपनैः॥ होमाधिवासनांतेचस्नापितोवेदपारगैः॥ इममुच्चारयेन्मंत्रं त्रिःकृत्वाथप्रदक्षिणां॥ नमोस्तु
विश्वेश्वरविश्वधामंजगत्सवित्रेभगवन्नमस्ते॥ सप्तर्षिलोकामलभस्तलेचागर्भेणसार्धंवितरामिरक्षां॥ येदुःखितास्ते
सुखिनोभवंतुप्रयांतुपापानिचराचराणां॥ त्वद्दानशस्त्राहतपातकानांब्रह्मांडदोषाः प्रलयंप्रयांतु॥ एवंप्रणाम्यामन
रविश्वगर्भंदद्याद्द्विजेभ्योदशधाविभज्य॥ भागद्वयंतत्रगुरोःप्रकल्प्यसमंभजेच्छेषमतःक्रमेण॥ स्वल्पेचहोमेगुरुरेक
एवकुर्यादथैकाग्निविधानयुक्त्या॥ सएवसंपूज्यतमोल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन॥ अत्रपर्वांतेसहस्रपलप

क्षउत्तममस्तदर्धंमध्यमस्तदर्धोधमः इत्यल्पपक्षोत्तेयः॥ इत्थंयएतदखिलंपुरुषोत्रकुर्याद्ब्रह्मांडदानमधिगम्यमही
द्धिमान॥ निर्धूतकल्मषविशुद्धतनुर्मुरारेरानंदकृत्समुपैतिसहाप्सरोभिः॥ संतारयेत्पितृपितामहपुत्रपौत्रबंधुप्रिया
तिथिकलत्रशतायकंसः॥ इतिश्रीविधानपारिजातेब्रह्मांडदानविधानं॥ ॥ अथकल्पपादपदानं॥ मात्स्ये॥ कल्पपा
दपदानाख्यमतःपरमनुत्तमं॥ महादानंप्रवक्ष्यामिसर्वपातकनाशनं॥ पुण्यंदिनमथासाद्यतुलापुरुषदानवत॥ पु
ण्याहवाचनंकुर्याल्लोकेशावाहनंतथा॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ कांचनान्कारयेद्वृक्षान्नानाफलस
मन्वितान॥ नानाविहगवस्त्राणिभूषणानिचकारयेत॥ अर्धादूर्ध्वमृद्सुवर्णस्यकारयेत्कल्पपादपं॥ गुडप्रस्थोप
रिष्टाच्चसितवस्त्रयुगान्वितं॥ ब्रह्मविष्णुशिवोपेतंपंचशाखंचभास्करं॥ पंचशाखादिक्षुमध्येकार्याः॥ कामदेवमध
स्ताच्चसकलत्रंप्रकल्पयेत॥ संतानंपूर्वतस्तद्वत्तुरीयांशेनकल्पयेत॥ मंदारंदक्षिणेपार्श्वेश्रियासार्धंघृतोपरि॥ पश्चि
मेपारिजातंतुसावित्र्यासहतीरके॥ सुरभीसंयुतंतद्वत्तिलेषुहरिचंदनं॥ अत्रघृतादयोगुडपरिमितायाद्याः॥ संनि
धानात॥ कल्पपादपसुवर्णपरिमाणात्रियलादूर्ध्वंहसहस्रपलपर्यंतंज्ञेयं॥ कौशेयवस्त्रसंवीतानिक्षुमाल्यकलान्वि
तान॥ तथाष्टौपूर्णकलशान्साडुकाशानभाजनं॥ दीपिकोपानहच्छत्रचामरासनसंयुतं॥ फलमाल्ययुतंतद्वदुपरिष्टाद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानकं॥अन्नानभाजनं॥भुक्तिपात्रं॥तथाष्टदशधान्यानिसमंतादुपकल्पयेत्॥होमाधिवासनांतेच स्नापितोवेदपार
गैः॥त्रिप्रदक्षिणमावृत्यमंत्रमेतमुदीरयेत्॥नमस्तेकल्पवृक्षायचिंतितार्थप्रदायिने॥विश्वंभरायदेवायनमस्तेवि
श्वमूर्त्तये॥यस्मात्त्वमेवविश्वात्माब्रह्मस्थाणुर्दिवाकरः॥मूर्त्तामूर्त्तंपरंबीजमतःपाहिसनातन॥त्वमेवामृतसर्वस्व
मनंतःपुरुषोव्ययः॥संतानाद्यैरुपेतःसन्पाहिसंसारसागरात्॥एवमामंत्र्यतंदद्यात्कुरुवेकल्पपादपं॥चतुर्भ्यश्चाथ
ऋत्विग्भ्यः संतानादीन्प्रकल्पयेत्॥चतुर्भ्यःकुंडचतुष्टयसंबंधिऋत्विग्भ्यइत्यर्थः॥स्वल्पेस्वेकाग्निवत्कुर्यात्गुरवेवाभिप
जनं॥स्वल्पंत्वब्रह्मांडवद्देतितं॥नवित्तशाठ्यंकुर्वीतनचविस्मयवान्भवेत्॥अनेनविधिनायस्तुमहादानंनिवेद
येत्॥सर्वपापविनिर्मुक्तःसोश्वमेधफलंलभेत्॥इतिकल्पपादपमहादानविधानं॥ ॥अथगोसहस्रमहादानं॥
मात्स्ये॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥गोसहस्रप्रदानाख्यंसर्वपापहरंशुभं॥पुण्यांतिथिसमासाद्ययु
गमन्वंतरादिकं॥पयोव्रतस्त्रिरात्रंस्यादेकरात्रमथापिवा॥इदंपयोभक्षमात्रमधिवासनदिनात्पूर्वेद्युःकार्यं॥अ
धिवासनदिनेतुलापुरुषवदुपवासएव॥दानदिनेपिपयोव्रतःस्यात्॥त्रिरात्रैकरात्रयोःशक्त्याव्यवस्था॥लोकेशा
वाहनंकुर्यात्तुलापुरुषदानवत्॥पुण्याहवाचनंकुर्याद्धोमःकार्यस्तथैवच॥ऋत्विङ्मंडपसंभारभूषणाच्छादना रम॰ ॥९५॥

दिकं॥वृषंलक्षणसंयुक्तंवेदिमध्येधिवासयेत्॥वृषलक्षणंवृषोत्सर्गविधानेद्रष्टव्यं॥गोसहस्राद्विनिष्कृष्यग
वांदशकमेवच॥इदंगोदशकंगोसहस्राद्भिन्नमितिकेचित्॥तदयुक्तमिति॥सवत्सं॥सवत्संदशकंगवामितिभविष्योक्ते
र्विशेषोक्तेः॥गोसहस्रंबहिःकुर्याद्वस्त्रमाल्यविभूषितं॥सुवर्णशृंगाभरणंरौप्यपादसमन्वितं॥बहिःकुर्यान्मं
डपाद्बहिरासादयेदित्यर्थः॥अस्मिन्गोसहस्रेनधेनुत्वनियमः॥अंतःप्रवेश्यदशकंवस्त्रमाल्यैस्तुपूजयेत्॥सु
वर्णघंटिकायुक्तंकांस्यदोहनकान्वितं॥सुवर्णतिलकोपेतंहेमपट्टैरलंकृतं॥कौशेयवस्त्रसंवीतंगंधमाल्यवि
भूषितं॥हेमरत्नयुतैःशृंगैश्चामरैश्चोपशोभितं॥पादुकोपानहछत्रचामरासनसंयुतं॥अंतःमंडपाभ्यंतरे
इत्यर्थः॥अरगोदशसौवर्णिके॥खुराःपंचपलाः॥पंचाशत्पलदोहनपात्रं॥इदंसर्वप्रत्येकंगोदशकसमीपेस्था
प्यं॥गवांदशकमध्यस्थंकांचनोनंदिकेश्वरः॥कौशेयवस्त्रसंवीतोनानाभरणभूषितः॥लवणद्रोणशिखरेमाल्ये
क्षुफलसंयुतः॥सलक्षणश्चकर्त्तव्योधिवासोत्रयथाविधिः॥ऊर्ध्वस्थितस्त्रिनेत्रोद्विभुजःसौम्योनंदिकेश्वरः॥वामेतुशूल
लभदक्षेचाक्षमालासमन्वितः॥ऊर्ध्वस्थितइत्यर्थः॥कुर्यात्पलशतादूर्ध्वंसर्वमतशेषतः॥शक्तितःपलसाहस्रंत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ तययावदेवतु॥इदंनंदिकेश्वरप्रतिमाविषयमितिहेमाद्रिः॥गोमुखरानंदिकेश्वरादिसर्वविषयमित्यस्मद्ग्रंथेभिहितं
॥९६॥ ॥ ॥गोशतेतुदशांशेनसर्वमेतत्प्रकल्पयेत्॥सर्वमितिगोसहस्रोक्तंलवणाद्रोणातिरिक्तंसर्वंदशांशेनकल्प
येदितिमदनरत्नेव्याख्यातं॥पुण्यंकालंसमासाद्यगंधमाल्यनिस्वनैः॥सर्वौषध्युदकस्नापितोवेदविन्नमैः॥इममु
च्चारयेन्मंत्रंगृहीतकुसुमांजलिः॥नमोवोविश्वमूर्तिभ्योविश्वमातृएवच॥लोकाधिवासिनीभ्यश्चरोहिणीभ्य
नमोनमः॥गवामंगेषुतिष्ठंतिभुवनात्मकविंशतिः॥ब्रह्मादयस्तथादेवारोहिण्यःपांतुमातरः॥गावोमेह्यग्रतः
संतुगावःपृष्ठतएवच॥गावःशिरसिमेनित्यंगवांमध्येवसाम्यहं॥यस्मात्त्वंवृषरूपेणधर्मएवसनातनः॥अष्ट
मूर्तेरधिष्ठानमतःपाहिसनातन॥इत्यामंत्र्यततोदद्याद्गुरवेनंदिकेश्वरं॥सर्वोपकरणोपेतंगोवृतंचविचक्षणः॥
॥ऋत्विग्भ्योधेनुमेकैकांदशकादिनिवेदयेत्॥सर्वासामितिगोदशकात्ययंगुरवेदत्वाऽष्टर्त्विग्भ्योगवाष्टकंदद्या
दित्यर्थः॥गवांशतमथैकैकंतदर्द्धंवाथविंशतिं॥दशापंचाथवादद्यादन्येभ्यस्तनुरूपाणिकौबहुभ्योदातव्यायतो रामः
दोषरीभवेत्॥वस्त्रस्वकस्पर्शतव्याःश्रीमहादोपवच्छये॥पयोव्रतपुनस्तिष्ठेदेकाहंगोसहस्रदः॥श्रावयेच्छ ॥९६॥

त्युयाद्यापिमहादानानुकीर्त्तनं॥तद्दिनंब्रह्मचारीस्यायदीच्छेद्विपुलांश्रियं॥अनेनविधिनायस्तुगोसहस्रप्रदोभवेत्
॥सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते॥अथहिरण्यकामधेनुदानं॥मात्स्ये॥अथातःसंप्रवक्ष्यामिकामधेनु
विधिंपरम॥सर्वकामप्रदंनृणांसर्वपातकनाशनं॥लोकेशावाहनंतद्वद्धोमःकार्योधिवासनं॥तुलापुरुषवत्कुर्यात्कुं
डमंडपवेदिकाः॥स्वल्पेप्येकाग्निवत्कुर्याद्गुरुरेवसमाहितः॥कांचनस्यातुशुद्धस्यधेनुंवत्संचकारयेत्॥उत्तमापलसा
हस्रेणतदर्द्धेनतुमध्यमा॥कनीयसीतदर्द्धेनकामधेनुःप्रकल्पिता॥अन्नोक्तमुख्याचतुर्थांशेनवत्सःकार्यः॥गुडधेन्वादौ
तथादर्शनात्॥शक्तितस्त्रिपलादूर्ध्वमशक्तोपिहिकारयेत्॥वेद्यांकृष्णाजिनंन्यस्यगुडप्रस्थसमन्वितं॥न्यसेदुपरितांधे
नुंमहारत्नैरलंकृतां॥कृष्णाजिनस्यगुडप्रस्थेधेनुःस्थाप्येत्यर्थः॥कुंभाष्टकसमोपेतांनानाफलसमन्वितां॥तथाष्टाद
शधान्यानिसमंतात्परिकल्पयेत्॥इक्षुदंडाष्टकंतद्वन्नानाफलसमन्वितां॥भाजनंचासनंतद्वत्ताम्रदोहमकंतथा॥कौशे
यवस्त्रद्वयसंवृतांगीदीपातपत्राभरणाभिरामां॥सचामराकुंडलिनीसघंटांमणिक्यपादुकरौप्यपादां॥रसैश्चसर्वैःपु
रतोभिजुष्टांहरिद्रापुष्पफलैरनेकैः॥अजाजिकुस्तुंबुरुशर्करेराभिर्वितानकंचोपरिपंचवर्णं॥आभरणंललाटति
लकादि॥गणित्रिकाक्षमाला॥अजाजिजीरकं॥कुस्तुंबरुधान्यकमित्यर्थः॥स्नातस्ततोमंगलवेदघोषैःप्रदक्षिणीकृत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰ख॰

॥९७॥

सपुष्पहस्तः॥आवाहयेत्तांगुडधेनुंमंत्रैर्द्विजायप्रदद्यात्स्वयंदर्भपाणिः॥गुडधेनुमंत्रास्तु॥यालक्ष्मीःसर्वभूतानांयाच
देवेष्ववस्थिता॥धेनुरूपेणसादेवीममपापंव्यपोहतु॥विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः॥चंद्रार्क
शक्रशक्तिर्याधेनुरूपास्तुसाश्रिये॥चतुर्मुखस्ययालक्ष्मीर्लक्ष्मीर्याधनदस्यच॥लक्ष्मीर्यालोकपालानांसाधे
नुर्वरदास्तुमे॥स्वधायापितृमुख्यानांस्वाहायज्ञभुजांचया॥सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमेइतिपुष्पां
जलिनावाह्य॥त्वंसर्वदेवगणमंदिरमंगभूताविश्वेश्वरित्रिपथगोदधिपर्वतानां॥त्वद्दानशस्त्रशकलीकृतपात
कौघःप्राप्तोस्मिनिर्वृतिमतीवपरांनमामि॥लोकेयथेप्सितफलार्थविधायिनींत्वामासाद्यकोहिभवदुःखमुपैतिमर्त्यः॥
संसारदुःखशमनाययतस्वकामंत्वांकामधेनुरितिदेवगणावदंति॥इतिवाच्याममंत्र्यवेदिपश्चिमभागेप्राङ्मुखोप
विष्टउदङ्मुखेभ्योगुर्वृत्विग्भ्यश्चधेनुंदत्वा॥अमुकगोत्रायामुकशर्मणेमुकवेदाध्यायिनेब्राह्मणायतुभ्यंगुरवेत
थाग्रपश्यमंतस्थास्थितांमहारत्नहेमकुंडलधरांगंधमाल्यादिभिःकारौप्यपात्रघृतांकृताकौशेयवस्त्रद्वयाढ्य राम॰
तांपादुकोपानच्छत्रचामरासनदीपताम्रदोहननानाफलसर्वरसयुक्तांकांस्यपात्रहरिद्रापुष्पफलजीरककुसुंभ ॥९७॥
हरिद्रार्करादष्टादशधान्यपूर्णांकुंभेक्षुदंडाष्टकसहितामुपरितद्दत्तपंचवर्णवितानोपेतांहिरण्यकामधेनुंसर्वपाप

क्षयपूर्वकमहदेकल्पागागोद्वादिसेवितत्रिविधफलप्राप्तिकामःशिवप्रीतिकामोवाहंयथाभागंसंप्रददेनममेति
सतिलकुशजलंस्वहस्तस्थंतद्धस्तेनिक्षिपेत्॥तेचदेवस्यत्वेतिपठित्वाॐस्वस्तीतिप्रतिगृह्यकामस्तुतिंपठे
युः॥ततःहोतातद्धिरण्यकामधेनुमहादानप्रतिष्ठासिद्ध्यर्थमिदंहिरण्यमग्निदैवतमेतावत्परिमाणंगोत्राममरत्वा
दिश्चपुष्पमहंसंप्रददेइतिप्रत्येकंदक्षिणांदत्वाजापकादिभ्योपितद्दैवसुवर्णादिदक्षिणांदद्यात्॥ॐपुण्याह
मितिवाचयित्वायांतुदेवगणाः॥इतिदेवान्विसृज्यब्राह्मणानामथाज्ञाभोजनंपित्वादीनानाथादीन्मपरितोषयेदितिप्र
योगः॥फलंतु॥आमंत्र्यशीलकुलरूपगुणान्वितायविप्राययःकनकधेनुमिमांप्रदद्यात्॥प्राप्नोतिधामसपु
रंदरधामजुष्टंकन्यागणैःपरिवृतःपदमिंदुमौलेरिति॥अत्रद्विजायप्रदद्यादित्येकवचनमेकाग्निपक्षपरंतेयं॥अ
नेकाग्निपक्षेतुप्रकृतिभूततुलापुरुषवदृत्विग्भ्योनेकसंप्रदानकत्वादनेकेभ्योदद्यात्॥वैकृतसंप्रदानैकत्वस्य
काग्निपक्षेसावकाशत्वात्प्राकृतसंप्रदानबहुत्वस्यबाधकत्वं॥अनन्यविषयत्वेनैवहिवैकृतविशेषेणप्राकृतं
बाध्यते॥द्वारमयंबर्हिरितिवत्॥इदंत्वन्यविषयमितिनबाधकं॥एवंहेमाद्रौलक्ष्मीधरादिभिरंगीकृतं॥एतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध॰दान॰प्र॰ गुरवे हिरण्यधेनुं दत्त्वानेकाग्निपक्षे स्यात्सुवर्णाम लिखेद्देयमिति मतं परास्तं॥ नैका बहुभ्यो दातव्या यतो दोषक
॥९८॥ री भवेदिति वचनं तु प्रत्यक्षगोपरमिति मंतव्यम॥ अन्यथा आहाराश्च फाल्गुनानि चाभिवृण्यादिति ऋीतेसो
मापहरणे॥ आहाराद्यभिषवेरणार्थ निर्वाहः कुर्वतो यजमानस्य॥ एकां गां दक्षिणां दद्यात् अन्ये एवेत्यादि बहुसंप्र
दानैकैकगोदानं विरुध्येत॥ फलं वा तुल्येन॥ एवमन्यत्रापि द्रष्टव्यं॥ इति हिरण्यकामधेनुमहादानविधानम॥ ॥अ
थ हिरण्याश्वमहादानम॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परं। यस्य प्रदानाद्भुवनमनंतं फलम
श्नुते॥ भुवनं फलमिति सामानाधिकरण्यं॥ पुण्यां तिथिं समासाद्य कृत्वा ब्राह्मणवाचनं॥ लोकेशावाहनं कुर्या
त्तुलापुरुषदानवत॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ आदिशब्देन मोविंशदित्तजाहृदिश्राद्धिकं ग
स्वते॥ स्वल्पेष्टकाग्निवत्कुर्याद्धेमवाजिनमंबुधः॥ स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि॥ कृष्णाजिनस्थति राम॰
लोपरित्यर्थः॥ अत्र तिलद्रोणपरिमाणाः॥ दानांतरेषु तथा दर्शनात॥ कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनं॥ त्रादि ॥९८॥
ताद्विपलादूर्ध्वमासहस्रपलं बुधः॥ पादुकोपानहच्छत्रचामरासनभाजनैः॥ पूर्णकुंभाष्टकोपेतं माल्येक्षुफल

संयुतं॥ हेमवाजिनं कृत्वा कौशेयसंवीतं पादुकादिभिः सह कृष्णाजिनस्थतिलोपरि स्थापयेदित्यस्यापरितो
षाद्दशधान्यामासादयेत॥ अत्रैतद्विनियोगदर्शनात॥ ताम्रासोपस्करां तद्धेममार्तंडसंयुतं॥ उपस्कारस्त्व
तूलिकोपधानदीपिकातांबूलकर्करिकादिः हिममार्तंडः सुवर्णसूर्यः॥ ततः सर्वौषधिस्नानस्नापितो वेदध्यारोगैः
॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥ ततो धिवासितो नरस्तद्दिने प्रातःकालीनपुण्याहवाचनस्वस्तिहुतादिकर्म
ौघसमाप्त्यनंतरमित्यर्थः॥ एवमग्रेपि ज्ञेयं॥ नमस्ते सर्वदेवेश वेदाहरणलंपट॥ वाजिरूपेण मामस्मात्पाहि सं
सारसागरात॥ त्वमेव सप्तधा भूत्वाच्छंदोरूपेण भास्कर॥ यस्माद्भासयसे लोकानतः पाहि सनातन॥ एवमुच्चार्य गुरवे
तमश्वं विनिवेदयेत॥ सर्वधान्योपकरणं गुरवे विनिवेदयेत॥ उपपादितं चैतत्प्राक्॥ विभवतो वित्तानुसारेण युवा
राश्रावयतीति पुराणाश्रवीतं॥ अत्रगीतात्वमिति॥ इमं हिरण्याश्वविधिं करोति यः संप्रयमानो दिवि देवतैः॥ विमु
क्तपापः सपुत्रपौत्रः प्राप्नोति सिद्धैरपि पूजितः सन॥ इति पदविच्छेदे एवं तद्धेमवाजिप्रदानमित्यादि॥ इति हिरण्या
श्वमहादानप्रयोगः॥ ॥अथ हिरण्याश्वरथमहादानविधानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्त
मं॥ हिरण्यमश्वरथं नाम महापातकनाशनं॥ पुण्यां दिनमथासाद्य कृत्वा ब्राह्मणवाचनं॥ लोकेशावाहनं कुर्यात्तुला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध०दान०प्र०

॥९९॥

पुरुषदानवत्॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ अत्राप्यादित्यदेहेन गोविंदादिमातरस्तथा ब्रह्मादिकं
गत्स्यते॥ कृष्णाजिने तिलान्कृत्वा कांचनं स्थापयेद्रथं॥ सप्ताश्वं चतुरश्वं वा चतुश्चक्रं सकूबरं॥ ऐंद्रनीलेन कुंभे
न ध्वजरूपेण संयुतं॥ लोकपालाष्टकोपेतं पद्मरागदलान्वितं॥ अत्रापि तिला द्रोणमिताः॥ कूबरो युगाधारका
ष्ठं॥ ऐंद्रनीलेन कुंभेन इंद्रनीलमयेन ध्वजरूपेण कुंभेन। इंद्रनीलमयकुंभलांछनेन सुवर्णध्वजदंडेन संयुतमि
त्यर्थः॥ लोकपालाष्टकोपेतं॥ उपरि प्रागादिभागेष्विंद्रादिभिरधिष्ठितमित्यर्थः॥ पद्मरागेति पद्मरागखंडयुक्तमित्य
र्थः॥ चत्वारः पूर्णकलशा धान्यान्यष्टादशैव तु॥ तथा प्यानीति शेषः॥ कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकं॥ मा
ल्येक्षुफलसंयुक्तं पुरुषेण समन्वितं॥ योयं दत्तः पुमान्कुर्यात्तं तंत्राधिवासनं॥ अतः पुरुषः स्वेष्टदेवता॥ अ
त्र चामरकौशेयवस्त्रोपानहपादुकाः॥ गोभिर्विभवतः सार्धं दद्याद्वत्रायनासने॥ आभरणिवपलादूर्ध्वं शक्तितः का
रयेद्बुधः॥ भारः फलसहस्रद्वयं। त्रियां तु लाशतं भारः स्यादिति तुलादाने अभिधानात्॥ इदं सुवर्णपरिमाणं कू
बरध्वजपुरुषाश्वलोकपालचक्रारक्षकसहितस्य रथस्यैतेयम्॥ अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः॥ राम०
षाभ्यां वाथ युक्तं स्याद्धेमसिंहध्वजान्वितं॥ अश्वाष्टकेनेत्यादि प्रत्यक्षाश्वपरं॥ तत्राश्वद्वयपक्षे संनिधानाद्धे ॥९९॥

ममयसिंहांकितध्वजयुक्तं रथं कुर्यात्॥ अवशिष्टपक्षद्वये सर्वोक्तमिंद्रनीलकुंभांकितध्वजं कुर्यादिति विवेकः
॥ चक्ररक्षावुभौ तत्र तुरगस्थावथाश्विनौ॥ चक्ररक्षौ चक्रसमीपस्थावश्विनौ कार्यावित्यर्थः॥ तल्लक्षणमाह
गोभिलः॥ द्विभुजावद्य वसिष्ठजौ कर्तव्यावश्ववाहनौ॥ तयोश्चौषधयः कार्या दिव्या दक्षिणहस्तयोः॥ वामयोः पु
स्तकौ कार्यौ दर्शनीयौ तथा द्विजेति॥ पुण्यकालं ततः प्राप्य पूर्ववत्स्थापितो द्विजैः॥ त्रिः प्रदक्षिणमावृत्य गृहीत
कुसुमांजलिः॥ शुक्लमाल्यांबरो दद्यादिमं मंत्रमुदीरयेत्॥ पुण्यकालो ग्रहणसंक्रांत्यादिः॥ पूर्ववत्तुलापुरुष
वत्॥ ॐ नमो नमः पापविनाशनाय विश्वात्मवेदांतुरगमाय॥ धाम्नामधीशाय भवाभवाय पापौघदावानलदे
हि शांतिं॥ वस्वष्टकादित्यमरुद्गणानां त्वमेव धाता परमं निधानं॥ यतस्ततो मे हृदयं प्रयातु धर्मैकतानत्वमघौघ
नाशात्॥ इति तुरगरथप्रदानमेतद्भवभयसूदनमत्र यः करोति॥ स कलुषपटलैर्विमुक्तदेहः परममुपैति पदं
पिनाकपाणेः॥ इति पठति शृणोति वाय इत्थं कनकतुरंगरथप्रदानमेतत्॥ न स नरकपुरं व्रजेत्कदाचिन्नरकरिपो
र्भवनं प्रयाति च यः॥ इति हिरण्याश्वरथदानं॥ ॥ अथ हेमहस्तिरथमहादानविधानम्॥ मात्स्ये॥ अथातः संप्रवक्ष्या
मि हेमहस्तिरथं शुभं॥ यस्य प्रदानाद्भवनं वैष्णवं याति मानवः॥ पुण्यां तिथिं समासाद्य तुलापुरुषदानवत्॥ पुण्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यन॰प॰ ॥१००॥

वाचनंकुर्याल्लोकेत्रावाहनंबुधः॥अक्लिष्टंअडपसंसारमखर्गाध्यादानादिकं॥अत्राणुपोषितस्तवद्वालयोः सहमो
जनं॥कुर्यादितिसर्वसंबंधः॥अस्रीदिशाहेनगोविंदपूजादिगस्त्वते॥उपवासाशक्तौनक्तंकार्यं॥अत्रनक्तौनक्तं
मिष्मतइतिस्मृतेः॥कुर्यात्पुष्परथाकारंकांचनंमणिमंडितं॥वलभीभिर्विचित्राभिश्चतुर्भ्यक्तसमन्वितं॥लोक
पालाष्टकोपेतंशिवार्कब्रसंयुतं॥मध्येनारायणोपेतंलक्ष्मीपुष्टिसमन्वितं॥पुष्परथइति॥पुष्पैर्विरचित
श्चतुष्किकारूपेणाच्छादितःक्रीडारथः॥वलभ्योगोपानस्थः॥ताश्चदिक्षुचतुष्टयेविचित्रघटनाभिःकार्याः॥तत्रै
वदिगष्टकस्थितालोकपालाःपूर्वोक्तलक्षणाःकार्याः॥वलभ्युपरितनकुटीवक्त्रघ्यादनीतिकेचित्॥शिवार्कौ
देवलक्षणांपरिभाषायां॥नारायणादेःपंचरात्रे॥नारायणश्चतुर्बाहोशंखचक्रेतथोत्तरे॥दक्षिणेतुगदापद्मेनील
जीमूतसंनिभे॥वामेश्रीर्वल्लकीहस्तापुष्टिःपद्मकरापरे॥मध्येशाहेस्थानयत्रसंवेधाधिष्ठिवादिप्रतिमात्रयंनाराय
णादिप्रतिमात्रयंचमध्येस्वस्थापयेत्॥कृष्णाजिनेतिलद्रोणकेलासंस्थापयेद्बुधः॥तथाष्टादशधान्यानि
भाजनासनचंदनैः॥दीपिकोपानहच्छत्रपादुकादर्पणान्वितं॥चतुर्भिःकलशैःसार्द्धंगोभिरष्टाभिरन्वितं॥च ॥ रम॰
गर्भेहेममातंगैर्मुक्तादामविभूषितैः॥स्वल्पतःकारयेच्चापि[illegible]शक्त्यानिवेदयेत्॥भोजनंभोजनपात्रंकांस्यं॥ ॥१०१॥

गरुडलक्षणंनारदीये॥तुंडेद्वस्ययतःपक्षीगरुडाकेत्रांगःकृतांजलिः॥सव्यजानुगतोभूमौमूर्द्धाचफणिमंडितः
॥पक्षिजंघानरग्रीवस्कंधनासानरांगकः॥द्विबाहुःपक्षयुक्तश्चकर्तव्योविनतासुतः॥विनायकलक्षणंग्र
हप्रकरणे॥आम्लानवंतकुसुमानिमहासहासकुसुमानीतिहेमाद्रिः॥वाणापुष्पाणीतिरत्नाकरः॥निवे
दयन्निवेदनार्थमुपकल्पयेत्॥कुर्यात्तंचपलादूर्ध्वमाभारादपिशक्तितः॥भारउक्तः॥इदंसुवर्णपरिमाणं
ध्वजगजलोकपालशिवादिविनायकांतप्रतिमासहितरथस्यतितेयं॥परिमाणांतरंतूक्तैः॥ततोमंगलशब्दे
नस्नापितोविदपुंगवैः॥शिरस्यदक्षिणंमोहसमाहीतकुसुमांजलिः॥इममुच्चारयेन्मंत्रंब्राह्मणेभ्योनिवेदयेत्॥
नमोनमःशंकरपद्मजार्कलोकेशविद्याधरवासुदेवैः॥त्वंसेव्यसेवेदपुराणयज्ञैस्तेजोमयस्यंदनपाहि
तस्मात्॥यत्तत्सदंपरमगुस्त्वतमंपुरारेरानंदहेतुगुणरूपविमुक्तमंतः॥योगैकमानसहशोमुनयःसमाधौपश्य
तितत्वमसिनाथरथाधिरूढः॥यस्मात्त्वमेवभवसागरसंप्लुतानामानंदभांडभृतपानपात्रं॥तस्माद्वोद्यशमनेन
कुरुप्रसादंचामीकरेभरथमाधवसंप्रदानादिति॥ततस्तंलात्रुरुषाञ्च(?)प्रकारेणदानंकुर्यात्॥इत्थंप्रणम्यकनके
भरथप्रदानेयःकारयेत्सकलपापविमुक्तदेहः॥विद्याधरामरमुनींद्रगणाभिजुष्टंप्राप्नोतिसोपदमतीद्रियमिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० डुमौलेः॥ कृतदुरितवितानप्रज्वलद्वह्निजालव्यतिकरहतदेहो ब्रह्मभाजोपि वंशून्॥ नयति पितृपुत्रान्बांधवान
॥९७॥ प्यशेषान्कृतगजरथदानः शाश्वतं सद्म विष्णोरिति॥ अत्रेतिकर्तव्यता सर्वा पूर्ववद्द्रष्टव्या॥ इति हेमहस्तिरथम
हादानविधानं॥ ॥अथ पंचलांगलमहादानविधानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ पंच
लांगलकं नाम महापातकनाशनं॥ पुण्यां तिथिं समासाद्य युगादिग्रहणादिकं॥ भूमिदानं नरोदद्यात्पंचलांग
लकान्वितं॥ खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनं॥ निवर्तनशतं वापि तदर्द्धं वापि शक्तितः॥ सारदारुमयान्कृ
त्वा हलान्पंच विचक्षणः॥ सर्वोपकरणोपेतांस्तथान्यान्पंच कांचनान्॥ खर्वटाद्यादि मीर्कंडये॥ सोत्सेधवप्रप्राकारं स
र्वतः खातकावृतं॥ योजनार्द्धविष्कंभमष्टभागान्नपद्मवसतिर्ग्राममगायतं परम्॥ तदर्द्धेन तथा खेटं तत्पा
दानं च खर्वटं॥ तथाभूद्रजनप्रायमुसमृद्धकृषीवलं॥ क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञितेति॥ निवर्तनं
वक्ष्यते॥ सारदारूणि शाकं गवीचंदनदेवदारुश्रीमपर्णीविल्वप्रियकांजनादीनि परवीज्ञानि॥ सर्वोपकरणानि दान०
तु युगयोक्त्रफलरज्जुप्राजनादीनि॥ तथैति युगयोक्त्रादिकांचनोपकरणसहितान्कांचनमयान्पंचलांग ॥९७॥
लानि सर्वथः॥ ईषलक्षणसंयुक्तान्द्रोणवतुधुरंधरान्॥ सुवर्णशृंगाभरणान्मुक्तालांगूलभूषितान्॥ लक्षणानि सु

शीलस्वारुणात्वारोगित्वं ब्रोचासहत्वादीनि रौप्यपादाग्रतिलकारक्तकौशेयभूषितान्॥ स्रग्दामचंदनयुतां
छालायामधिवासयेत् अग्रललाटं॥ रौप्यपादान्रौप्यललाटतिलकांश्चेत्यर्थः॥ अत्र शालाशब्दो मंड
पातिरिक्तशालापरः॥ अतिदेशप्राप्तत्वात्तस्याः पर्जन्यादिसकृद्भ्यः पायसं निर्वपेच्चरुं॥ एकस्मिन्नेव कुंडे
तु गुरुर्यस्मै निवेदयेत्॥ पलाशसमिधस्तद्वदाज्यं कृष्णतिलास्तथा॥ ऋत्विक्तु यस्मै गुरुर्हुधातिनिवेदये
दादिशेत्तस्मै ऋत्विक् स्वीयकुंडे पर्जन्यादिभ्यः पायसं चरुं अपि पलाशसमिदाज्यकृष्णतिलैश्च जु
हुयादित्यर्थः॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनं बुधः॥ ततो मंगलशब्देन भुक्तमाल्यांबरो बुधः॥ आ
हूय द्विजदंपत्यं संहेमसूत्रांगुलीयकैः॥ कौशेयवस्त्रकटकैर्मणिभिश्चविभव्यवयेत॥ अत्र गुर्वादिभिः
स्नापितः स्यधाहार्यं॥ अत्र गुरोरेव प्राधान्यात्तं प्रदानांतरानुपदेशात् गुरोरेव सपत्नीक इति ज्ञायते॥ शय्यासो
पस्करां दद्याद्धेनुं सकांचनपयस्विनीं॥ तथाः शाद्रधान्यानि समंतादधिवासयेत्॥ ततः प्रदक्षिणीकृत्य सग्ग
हीतकुसुमांजलिः॥ इममुच्चारयेन्मंत्रमथ सर्वं निवेदयेत्॥ मंत्रः॥ यस्माद्देवगणाः सर्वे स्थावराणि च या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान॰प्र॰ गोिचा॥धुरंधरंगेतिष्ठतितस्माद्भक्तिः शिवेस्तुते॥यस्माद्भूमिप्रदानस्यकलांनार्हतिषोडशीं॥दानान्यन्यानिमेभक्ति
॥१०२॥ र्धर्मस्यवद्दृष्टाभवेत्॥दंडेनसप्तहस्तेनत्रिंशद्दंडनिवर्तनं॥त्रिभागहीनंगोचर्ममानमाहप्रजापतिः॥मानेन
नानेनयोदद्यात्पिगोचर्ममात्रकं॥भवनस्थानमात्रंवासोपिपापैःप्रमुच्यते॥यावंतिलांगलकमार्गमुखानि
भूमेर्भासांपयतेर्इहितुरंगजेरोमकाणि॥तावंतिशंकरपुरेससमाहितिषद्भूमिप्रदानमिहयःकुरुतेमनुष्यः
॥स्वर्णप्रभंगोरंगजाश्वषभाहलंसंबद्धास्तेषांयावंतिरोमाणिसंतितावंतिताववतीःसमावर्षाणितिष्टिदिव
र्षः॥सर्वंसत्वश्चमुक्तंभविष्ये॥यावंतिलांगलमुखोत्थमदोरजांसिपावंतिचात्रसुधुरंधररोमकाणि॥तावंति
शंकरपुरेसयुगानितिष्ठेसंन्निप्रदानमिहयःकुरुतेमनुष्यइति॥अत्राप्यलदृष्टमलपएकाग्रिपक्षएव अत्र
भूमिदानंमुख्योलांगलानांसाहित्यमेवभूमिप्रदानमिहयःकुरुतेमनुष्यइतिश्रवणात्॥गांधर्वविंत्ररसुराप्स राम॰
रसिद्धसंघैराधृतचामरसुपेतमहद्विमानं॥संप्राप्तेपितृपितामहबंधुयुक्तःशांतोःपुरंअजेतिचामरनायुकं १०२
सन॥इंद्रत्वमथ्यधिगतंपमभ्युपेतिगोभूमिलांगलधुरंधरसंप्रदानात्॥तस्मात्पघोघपटलक्षयकारिभूमेर्दानं

विधेयमभिभूतिमवोद्भवाय॥इतिपंचलांगलकमहादानविधानं॥ ॥अथसुवर्णपृथ्वीमहादानविधानं॥मात्स्ये॥
अथातःसंप्रवक्ष्यामिधराहानमनुत्तमं॥पापक्षयकरंनृणाममंगलविनाशनं कारयेत्पृथिवीहैमींजंबूद्वीपानु
कारिणीं मर्यादापर्वतवतींमध्येमेरुसमन्वितां भूलोकपालाष्टकोपेतांनववर्षसमन्वितां॥नदीनदशतोपेतांम
तेसागरवेष्टितां॥जंबूद्वीपानुकारिणामितिद्विपांतरानुकारनिवृत्तिः॥मर्यादापर्वतानुक्तावेत्सवेजठरोदेवकूटश्च
मर्यादापर्वतावुभौ॥तौदक्षिणोत्तरायानेऽानीलनिषधायतौ॥गंधमादनकैलासौपूर्वपश्चायतावुभौ॥अशीति
योजनायामावर्णवांतर्व्यवस्थितौ॥निषधःपारियात्रश्चमर्यादापर्वतावुभौ॥तौदक्षिणोत्तरायामाचानीलनिषधायतौ॥
मेरोःपश्चिमदिग्भागेयथापूर्वौतथास्थितौ॥त्रिशृंगोजारुधिश्चैवउत्तरौवर्षपर्वतौ॥पूर्वपश्चायतावेतावर्णवांत
र्व्यवस्थितौ॥एतेमुनिवरप्रोक्तामर्यादापर्वतास्तव॥जठराद्याःस्थितामेरोर्येषांद्वौद्वौचतुर्दिशमिति॥नववर्षाणिजंबू
डे॥उत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणे॥तद्वैभारतंवर्षंभारतीयत्रसंततिः॥भारतंप्रथमंवर्षंततःकिंपुरुषंस्मृतं॥
हरिवर्षंतथैवान्यमेरोर्दक्षिणतोद्विज॥रम्यकंचोत्तरेवर्षंतथैवानुहिरण्मयं॥उत्तराःकुरवश्चैवतथावैभारतंतथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान.प्र. मेरोः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे॥ वर्षं येनु समाख्याते तयोर्मध्ये मिलावृतं॥ नद्यो गंगाप्रभृतयः॥ नदाः शोणाश्च
धोप्रभृतयः॥ एतेषामपि बाहुल्यात्साकल्येन रचनासंभवेपि यथा वृद्धकं कार्यं॥ अंते पर्यंते सागरैर्लवणादिसम
॥१०३॥ समुद्रैर्वेष्टितां कुर्यात्॥ तत्र भूत्वा रथाद्रत्नवर्तिभिः प्लक्षादिभिर्द्वीपैर्वेष्टितां कुर्यादिति लक्ष्मीधरदय आहुः॥ अस्मे तु
लवणसमुद्रवेष्टितामिति॥ जंबूद्वीपस्वरूपमुक्तं वैष्णवे॥ नववर्षं तु वै मैत्रेय जंबूद्वीपमिदं मया॥ लक्षयोजनवि
स्तारं संक्षेपात्कथितं तव॥ जंबूद्वीपसमावृत्य लक्षयोजनविस्तरः॥ मैत्रेय वलयाकारः स्थितः क्षारोदधिर्बहिः॥ जंबू
द्वीपं समस्तानां द्वीपानां मध्यसंस्थितं॥ तस्यापि मेरुर्मैत्रेय मध्ये कनकपर्वतः॥ चतुराशीतिसाहस्रैर्योजनैरस्य चोच्छ्र
यः॥ प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्ततः॥ मूले षोडशसाहस्रविपोजनैरस्य चोच्छ्रयः॥ प्रविष्टः षोडशाधस्ता
द्द्वात्रिंशन्मूर्ध्नि विस्ततः॥ मूले षोडशसाहस्रविस्तारस्तस्य सर्वतः॥ मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतं॥ इलावृत्तेनम सम.
हाभागाश्चत्वारश्चात्र पर्वताः॥ विष्कंभा रचिता मेरोर्योजनायुतमुच्छ्रिताः॥ पूर्वेण मंदरो नाम दक्षिणे गंधमादनः॥ वै ॥१०३॥
भ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृत इति॥ महारत्नसमाकीर्णां वसुरुद्रार्कसंयुतां॥ हेमः पलसहस्रेण ततस्तदर्धे

नाथ शक्तितः॥ शतत्रयेण वा कुर्याद्द्विशतेन शतेन वा॥ कुर्यात्संचपलादूर्ध्वमशक्तोपि विचक्षणः॥ अत्रापि मेरुश्च
नार्थोपद्मसर्णीकदेशेन लोकपालादि सर्वं कार्यं। दृष्टांतरानुक्तेः॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनं बुधः
॥ ऋत्विक्संउपसंभारभूषणाच्छादनादिकं॥ आदिशब्देन गोविंदपूजनादि गृह्यते॥ कृष्णाजिनं कृत्वा तिलाना
मुपरिन्यसेत्॥ अत्रापि तिलाः द्रोणपरिमिताः॥ तथाष्टादशधान्यानि रसांश्च लवणादिकान्॥ तथाष्टौ पूर्णकल
शान्समंतात्परिकल्पयेत्॥ वितानकं च कौशेयं फलानि विविधानि च॥ तथांशुकानि रम्याणि श्रीखंडशकलानि च
॥ इत्येवं रचयित्वा तान् धिवासपूर्वकं॥ शुक्लमाल्यांबरधरः शुक्लाभरणभूषितः॥ प्रदक्षिणं ततः कृत्वा गृ
हीतकुसुमांजलिः॥ पुण्यकालमथासाद्य मंत्रानेतानुदीरयेत्॥ यथा॥ नमस्ते सर्वदेवानां त्वमेव भवनं यतः॥ धा
त्री च सर्वभूतानामतः पाहि वसुंधरे॥ वसुं धरयसे यस्माद्वसु चातीव निर्मलं॥ वसुंधरा ततो जाता तस्मात्पाहि भया
दलं॥ चतुर्मुखोपि नो गच्छे यस्मादंतं तवाचले॥ अनंतायै नमस्तस्मात्पाहि संसारसागरात्॥ त्वमेव लक्ष्मीर्गोविंदे
शिवे गौरीति संस्थिता॥ गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चंद्रे रवौ प्रभा॥ बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प्र॰
॥१०४॥

विश्वं व्याप्य स्थिता यस्मात्तेन विश्वंभरा मता॥ धृतिः क्षितिः क्षमा क्षोणी पृथ्वी वसुमती रसा॥ एताभिर्मूर्तिभिः पाहि देवि
संसारसागरात्॥ एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत्॥ धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत्॥ शेषं चैवाथ ऋ
त्विग्भ्यः प्रणिपत्य विसर्जयेत्॥ अनेन विधिना यस्तु दद्याद्धेमधरां शुभां॥ पुण्यकालेनुसंप्राप्ते स पदं याति वैष्णवं॥
विमानेनार्कवर्णेन किंकिणीजालमालिना॥ नारायणपुरं गत्वा कल्पत्रयमथावसेत्॥ पितृंश्च पुत्रपौत्रांश्च लंतारये
देकविंशतिः॥ इति पठति य इत्थं यः शृणोति प्रसंगादपि कलुषवितानैर्मुक्तदेहः समंतात्॥ दिवममरवधूभिर्धी
तिसंप्रार्थ्यमानः परमपदसहस्रैः सेवितं चंद्रमौलेः॥ इति सुवर्णपृथ्वीरचनाप्रकारः कथ्यते॥ पुण्ये दिनस्कारो हत
निसत्क्रियो यजमानः स्वर्णधरादानमहं करिष्ये इति संकल्प्य तुलापुरुषवत्कृतोपवासो गोविंदादिसंज्ञा हृदिश्रा
द्धानुसाद्धं हरागुणपाह वाचनगुर्वादिवरणमधुपर्कदानकुंडमंडपादिकरणसंभारसंपादनमंडपप्रवेशगुर्वा
दिनियोगांतं कुर्यात्॥ ततो गुरुर्वेदपरिषोडशारचक्रं विलिख्य तदुपरि प्राग्ग्रीवोत्तरलोमकृष्णाजिनमास्तीर्य तदुप
रिप्रस्तद्रोणमिततिलेषु पलपंचकादारभ्यासहस्रपलं यथाशक्ति सुवर्णेन लोकपालवसुरुद्रादित्यप्रतिमाभिः स एम॰
हवसुं स्थापयेत्॥ तद्यथा॥ सुवर्णानुसारेण यावद्विस्तारं॥ मंडलाकारं पक्वेनात्तद्धि हिर्लवणसमुद्रादिनिर्माण ॥१०४॥

र्थं किंचिद्देशपरित्यक्तं तत्र कर्कोटकादिनाम ध्वज्ञानेन स्तेन जंबूद्वीपं परिकल्प्य तत्र प्राक्पश्चिमायतं दक्षिणो
त्तरायतं च मध्यस्थानं परिकल्प्य दक्षिणोत्तरायतां रेखां त्रिधा विभज्य नाभिस्थिते कर्कोटिनाभिरेखा व काष्ठमध्य
भागांतस्थितकोट्यंतरेण कर्कयष्टिना संपादितेन वृत्तेन मेरुं प्रकल्प्य तत्पूर्वादिदिक्षु मंदरगंधमादनविपुलसुपा
र्श्वाख्यांश्चतुरो विष्कंभपर्वतान्कल्पयित्वा मेरुसंनिहितं दक्षिणावस्थितं नवभागात्मिकाष्टतरचनार्थसंख्यातदक्षि
णास्थितभागद्वयविस्तृतं पूर्वपश्चिमायतं दंडाकारं प्राक्प्रत्यक्समुद्रसंबद्धप्रांतद्वयं विस्तारसमोच्छ्रायं निषधं परि
कल्पयेत्॥ एवं षवसंनिहितदक्षिणावस्थितहरिवर्षरूपभागनवकं परिकल्प्य तद्दक्षिणास्थितभागद्वयविस्तृतं पूर्व
पश्चिमायतं समुद्रसंबद्धप्रांतद्वयं विस्तारसमोच्छ्रायं हेमकूटं परिकल्प्य हेमकूटसंनिहितदक्षिणादिगवस्थित
किंपुरुषवर्षरूपभागनवकं तस्मात् दक्षिणपार्श्वस्थभागद्वयविस्तृतं विस्तारसमोच्छ्रायं समुद्रावधिप्रांतद्वयं हि
मवंतं परिकल्प्य तद्दक्षिणातो लवणार्णपर्यंतं भारतवर्षं परिकल्पयेत्॥ एवं मेरोरुत्तरतः कलाष्टतसपादकभागनवकांत
तरं निषधसमप्रमाणं नीलपर्वतं परिभारतवर्षं परिकल्पयेत्॥ एवं मेरोरुत्तरतः लाष्टतसपादकभागनवकांतरं निष
धसमप्रमाणं नीलपर्वरूपभागनवकं तस्मात् हिमवत्समप्रमाणं शृंगपर्वतं कृत्वा तदुत्तरतो लवणोदधिपर्यंतमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ त्तरकुरुरूपं वर्षं परिकल्पयेत्॥ एवं त्रातधाविनक्त्यां प्राक्पश्चिमायतन्मध्ये रेखायां मेरुं सन्निहितं प्राग्वस्थितभा
॥१०५॥ गनवकमिलाहष्टं वर्षसंपादनाय परिस्पृष्टतत्सर्वस्य भागद्वयविस्तृतं नीलनिषधसंबद्धोभयप्रांतं माल्यवंतं प
र्वस्थितभद्राश्ववर्षविच्छेदकं कृत्वा मेरुसंन्निहितपश्चिमदिग्वस्थितभागानवकमिलाहष्टार्थं तस्मात्तत्पश्चिमस्थि
तभागद्वयविस्तृतं निषधं संबद्धोभयप्रांतं गंधमादनं तत्पश्चिमे केतुमाल्यवर्षविच्छेदकं कल्पयेत्॥ मर्यादापर्व
तास्तु माल्यवतः पूर्वभागे दक्षिणोत्तरायतो नीलनिषधसंबद्धोभयप्रांतो जठरपर्वतस्तथैव देवकूटस्तथैव हिमवतो
दक्षिणतः प्राक्प्रत्यगायतः समुद्रसंनिविष्टप्रांतद्वयः कैलासपर्वतस्तद्दक्षिणतो गंधमादनस्तथा केतुमाल्यवर्षवि
च्छेदकगंधमादनात्पश्चिमतो दक्षिणोत्तरायतो नीलनिषधसंबद्धप्रांतद्वयो निषधस्तत्पश्चिमतस्तथैव पारियात्रः॥ तयो
त्तरकुरुविच्छेदकश्रृंगिपर्वतादुत्तरतः पूर्वापरायतः पूर्वापरसमुद्रसंनिविष्टोभयप्रांत श्रृंगिपर्वतस्तदुत्तरस्तथैव
जारुधिरित्येषां संन्निवेशरूपः॥ तथा नदीनदाः यथाशक्त्या सन्निवेशरूपाः इति निरुच त्रैसंपाद्य पद्मरागादिरत्नैरलंकृत्य समेरु
परिश्वीदिदिक्षु विद्वान्दिलोकपालाष्टकप्रतिमाः स्थापयित्वा तेषु वमध्ये पृथ्वमुख एकादशान्तरुद्रा द्वादशादित्यप्रतिमाः राम॰
स्थापयेत्॥ ततः परितः प्रत्येकं द्रोणापरिमितान्यन्यानि वा शालिराशीन्यानि लवणादिषट्रसप्रधानानि स्थापयित्वाप्र ॥१०५॥

तिदिशं स्वकूर्चंदनांबरपंचरत्नादियुतान् शोभपूर्णकलशांछत्रखंडानि रम्याणि वस्त्राणि नानाविधफलानि चास्था
प्य प्रतिशं पूर्वेकं ॐ पृथिव्यै नमः इति मंत्रेण षोडशोपचारैः संपूज्य तदुपरि पंचवर्णवितानं बध्नीयात्॥ ततः कुंड
चतुष्टयसमीपेषु सर्वौषधिपंचरत्नादिगर्भकलशस्थापनं कृत्विगादिनियोगी तैस्तैरग्निप्रणयने कृते ग्रहस्थापन
पूर्वादिहोमचतुष्टयस्तत्र शांतिकाध्यायचतुष्टयोत्तरं तत्रैषमाप्ते लोकेशावाहनाद्यंतमधिवासनं कृत्वा॥ प्रातः
प्रपाहवाचनपूर्णाहुत्यादिकर्मत्रयसमाप्ते तत्कुंडसमीपस्थकलशजलैर्ऋत्विग्भिषिक्तो यजमानः शुक्लमा
ल्यांबरधरो मंगलघोषैः सह हेमधरासमीपं गत्वा गृहीतकुसुमांजलिर्भिः प्रदक्षिणीकृत्य समंत्रैर्धरामुपतिष्ठेत॥
मंत्रास्तु॥ नमस्ते सर्वदेवानामित्यादयः पूर्वमुक्ताः॥ एवमुपस्थाय पुष्पांजलिं सिंहासनमस्थ सवेद्याः पश्चिमभागे
प्राङ्मुखोपविष्टो यजमानः सकुशाजलतिलपाणिरुदङ्मुखोपविष्टेभ्यो गुर्वादिभ्यो पुष्पमर्प्यब्राह्मणेभ्य इमां सुव
र्णाधरां जंबूद्वीपानुकारिणीं सप्तसागरद्वीपवेष्टितां महारत्नसहितां श्रीखंडादिधाम मधुरादिरसपूर्णकलशाष्ट
कश्रीखंडशाकलविविधफलवस्त्रपंचवर्णवितानोपेतां मत्स्यपुराणोक्तामृतमभावयवस्थया सर्वपापामंगल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान०प० निष्क्रियित पुत्राद्येकविंशतिस्वकुल्यपुरुषोद्धरणास्वेककिंकिणीजालमालिताके वर्णविमानाधिकरणाकनाराय
॥१०६॥ णपुरगमनानंतरकल्पत्रयावच्छिन्ननारायणपुरनिवासकामो हं संप्रददेनममेति दद्यात्॥ तेच सावित्रे च सावि
त्रेणायजुषाप्रतिगृह्य ॐ स्वस्तीत्युक्त्वाकामस्तुतिं पठेयुः॥ ततःकृतैतत्सवर्णधरादानप्रतिष्ठार्थं ग्रामरत्नादिकसु
वर्णं वा दक्षिणां संप्रददे इति प्रत्येकं दक्षिणां दद्यात्॥ अत्रापि पूर्ववदाचार्यानुज्ञयान्येभ्योपि दानं॥ स्वल्पेद्रव्ये र
कामि विधानं भूयतिकर्तृके ग्रामरत्नादिदानमशक्तकर्तृके यथाशक्तिसुवर्णदक्षिणादानं चेत्यादिद्रष्टव्यं॥ ततः
पुण्याहवाचनादिदेवताविसर्जनमिति दीनानाथादीन्यथाशक्तितर्पयित्वा स्वयं भुंजीतेति सुवर्णधरादानप्रयोगः॥
एवं प्रयोगवीतिः सर्वत्र द्रष्टव्या॥ ॥अथ विश्वचक्रमहादानविधानं॥ तत्रैव ॥अथातः संप्रवक्ष्यामि महादानम
नुत्तमं॥ विश्वचक्रमिति ख्यातं सर्वपापप्रणाशनं॥ तपनीयस्य शुद्धस्य विषुवादिषु कारयेत्॥ अष्टं पलसहस्रेण
तदर्धेन तु मध्यमं॥ तस्यार्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतं॥ अन्यद्विंशपलादूर्ध्वमशक्तोपि निवेदयेत्॥ तप राम०
नीयस्य विश्वचक्रमिति संबंधः॥ विषुवादिषु कालेषु अमरतिकनिष्ठं। इदं सुवर्णं वक्ष्यमाणाविल्वादिसर्वदेवता ॥१०६॥

सहितस्येति ज्ञेयं॥ तादृशस्यैव करणोपदेशेन विश्वचक्रशब्दवाच्यत्वात्॥ षोडशारं ततश्चक्रं भ्रमन्नेमष्टकावृतं॥ अ
राः नाभिस्पृष्टमूलानेमिस्पृष्टाग्राः शलाकाकाराश्चक्रावयवाः॥ भ्रमच्छब्देनात्र भ्रमतास्त्वेणनिष्पादितं वलयाका
रत्वं लक्ष्यते॥ भ्रमंतीनां वलयाकाराणां निमीनां च क्रावयवविशेषाणां स्यांतरालानामष्टकेनावृतं बहिर्वेष्टितमि
त्यर्थः॥ नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजं॥ शंखचक्रे तु पार्श्वस्थे देव्यष्टकसमावृतं॥ नाभिपद्मेनाभिरूपार
षट्दलपद्मकर्णिकायामित्यर्थः॥ अष्टसु दलेष्वावरणरूपस्य देव्यष्टकस्य संनिवेशात्॥ योगारूढ हृद्देशस्थिता
धोहस्तद्वयं॥ उपरितनवामदक्षिणहस्तयोः शंखचक्रधरं॥ देव्यष्टकनारदीयपंचरात्रे॥ विमलोत्कर्षिणीज्ञाना क्रिया
योगा तथैव च॥ प्रह्वी सत्या तथेशानानुग्रहा तान्यश्च शक्तयः॥ सर्वा दक्षिणहस्तेन वरदेन विराजिताः॥ सव्येन चक्र
धारिण्यः स्त्रीरूपाश्चारुभूषणाइति॥ द्वितीयावरणे तद्वत्सर्वव्रज्जलशायिनं॥ अत्रिभृगुर्वसिष्ठश्च ब्रह्मा कश्यप ए
व च॥ मत्स्यः कूर्मो वराहश्च नारसिंहोथ वामनः॥ रामो रामश्च कृष्णश्च बुद्धः कल्की क्रमात्॥ अत्र द्वितीयावरणे
षोडशकोष्ठानि कृत्वा प्राक्कोष्ठे जलशायिनं स्थापयित्वा प्रादक्षिण्येन द्वितीयादिकोष्ठेष्वत्र्यादिकल्कि तान्स्थापये
दित्यर्थः॥ जलशायिलक्षणं विष्णुधर्मोत्तरे॥ देवदेवस्तु कर्तव्यः शेषसुप्तश्चतुर्भुजः॥ एकः पादोस्य कर्तव्यो लक्ष्म्युत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰वि

॥१०७॥

गतःप्रभो॥तथापरश्चकर्त्तव्यःशेषभोगांकसंस्थितः॥एकोभुजोस्यकर्त्तव्यस्तत्रज्ञानोप्रसारितः॥कर्त्तव्योनाभिदेशस्
स्थस्तथातस्यापरःकरः॥तथैवाम्यःकरःकार्योदेवस्यतुशिरोधरः॥संतानमंजरीधारीतथैवास्यापरःकरः॥नाभी
संभूतकमलेसुखासीनःपितामहः॥नालत्वग्रोतुकर्त्तव्योपद्मस्यमधुकैटभौ॥शंखचक्रगदादीनिमर्ज्ञानिप
रितोस्यसेदिति॥ऋर्षीणांतु॥जटिलाःश्मश्रुलाःशांताःकृशाधमनिसंततः॥कुंडिकाक्षधराःकार्याऋषयोद्विभु
जाःसदेति॥मत्स्यादीनांलक्षणंपंचरात्रे॥वामेशंखगदांदक्षेद्विभुजोमत्स्यरूपधृक्॥नरांघ्रिर्मत्स्यरूपीवमत्स्यरू
पोजनार्दनः॥एवमेवतुकूर्मकर्त्तव्यःकूर्मरूपकः॥मधुपिंगलवर्णाश्चचतुर्बाहुःपृथुदुंतं॥नरांगंसूकरास्यंचमनाकु
पीनंसुभीषणं॥श्रीवामकूर्परस्थांतुधरानंतोपदानुगौ॥एतद्रूपवरंदेववराहंमुक्तिदंयथा॥ज्वलदग्निसमाकारंसिं
हवक्त्रंनरांगकं॥दंष्ट्राकपालवदनंचलजिह्वंसुभीषणं॥हस्ताक्षंजटिलंकुक्षौमालोटपीनवक्षसं॥अभेघतीव्रन
खरंवामोरुकृतदानवं॥हतक्षोदारयंतंचकराभ्यांनखरैर्भृशं॥गदाचक्रधरंद्वाभ्यांनरसिंहंतुकारयेत्॥कुंडीछत्रध
रोदंभोवामनःपरिकीर्त्तितः॥क्षत्रांतकारणंघोरंउदहस्परशुकेरःजामदग्न्यःप्रकर्त्तव्योरामोरोषारुणेक्षणः॥युवा
प्रसन्नवदनःसिंहस्कंधोमहाबलः॥आजानुबाहुःकर्त्तव्योरामोबाणधनुर्धरः॥शंखचक्रधरःकार्योनीलोत्सलद

रम॰

॥१०७॥

लक्ष्मविः॥केस्मोदीर्घद्विबाहुश्चसर्वदेसक्षयंकरः॥काषायवस्त्रसंवीतःस्कंधसंसक्तचीवरः॥पद्मासनस्थोद्विभु
जोध्यायीबुद्धःप्रकीर्त्तितः॥खड्गोद्यतकरःक्रुद्धोहयारूढोमहाबलः॥म्लेच्छोत्सादकरःकल्कीद्विभुजःपरिकीर्त्ति
तइति॥तृतीयावरणेगौरीमातृविंशुर्वमभिर्युता॥गौर्यादिलक्षणंदानकांडतोवसेयं॥ब्राह्मीमाहेश्वरीचैवकौ
मारीवैष्णवीतथा॥वाराहीचमहेंद्राणीचामुंडाःसप्तमातरः॥धरोध्रुवश्चसोमश्चआपश्चैवानिलोनलः॥प्रत्यू
षश्चप्रभासश्चैतस्तेवसवईरिताः॥चतुर्थावरणेद्वादशादित्याःवेदाश्चलारएवच॥इंद्रोधातार्यमाचैवमित्रोवरुणएव
च॥भगोविवस्वान्पूषाचअंशुमान्विरेवच॥त्वष्टाविष्णुर्द्वादशैतेवेदांगेदर्शवकाः॥पंचमेपंचमेतानिरुद्राश्चै
कादशैवतु॥वीरभद्रश्चशंभुश्चगिरीशश्चैकपात्तथा॥अहिर्बुध्न्यःपिनाकीचअपराजितएवच॥भुवनाधीश्व
रश्चैवकपालीस्थाणुरेवच॥उग्रश्चैकादशाप्रोक्ताःरुद्रास्थाप्याःक्रमेणतु॥लोकपालाष्टकंषष्ठेदिङ्मातंगास्तथै
वच॥सप्तमेऽस्त्राणिसर्वाणिमंगलानिचकारयेत्॥लोकपालाष्टकंप्रसिद्धं॥ऐरावतःपुंडरीकोवामनःकुमुदोऽं
जनः॥पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः॥अस्त्राणिचक्रानिगारुड॥वज्रभल्लगदाशक्तिःतुर्भांकुशधनू
षिच॥स्वधितिश्चतिचास्त्राणितथाचामरमेवच॥आदर्शश्चेतिविहेयंमंगलंमंगलाष्टकं॥अंतरांतरतोदेवान्विसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान०प्र० ष्यमेपुनः॥अंतराणामंतरं नेमिनिष्पादितकोष्ठानामंतरतोमध्ये॥पुनरितिवचनात्सर्वाण्यानीतिदानविवेककारः
॥१०८॥ दानसागरकारस्तुविनायकनवग्रहस्कंदाश्विनीकुमारलक्ष्मीगंगायमुनाप्रतिमानांसन्निवेशइत्याह॥तत्पु
रुषवच्छेषसमंतात्परिकल्पयेत्॥ऋत्विग्वरणउपसंभारभूषणाछादनादिकं॥विश्वचक्रंततःकुर्यात्कृष्णाजिन
तिलोपरि॥तथाष्टादशधान्यानिरसाश्चलवणादिकान्॥ शर्करांकंमाष्टकंचैववस्त्राणिविविधानिच॥माल्यैश्च
फलरत्नानिवितानंचापिकारयेत्॥आदित्यादेवतात्रापिदेशकालगोविंदसज्ञादिसर्वंगद्यते॥अत्रविशेषोभवि
ष्यात्तेरश्चाधिवासयेत्ततश्चक्रंपश्चाद्धोमंसमारभेत्॥चातुरश्चरशिकास्तत्रचत्वारोपिवधापिवा॥होमंकुर्युर्यता
त्मानोवस्त्राभरणभूषिताः॥होमद्रव्यसमोपेताःस्रुक्स्रुवैस्ताम्रभाजनैः॥चक्रेप्रतिष्ठितानांतुसुराणांहोमइष्यते
॥तल्लिंगैर्जुहुयुर्मंत्रैःसर्वारिष्टप्रशांतयेइति॥अत्राधिवासस्तुलापुरुषातिदेशात्प्राप्तविनायकादिहोमचतुष्टयत्वे
तेत्सर्वकेजपांतेविशेषहोमंतल्लिंगकैर्वेदमंत्रैरसंभवेप्रणवादिचतुर्थ्यंतैर्नमस्कारैर्देवताहोमंकुर्युरित्यर्थः॥ततोमं दान०
गलशब्देनश्रुक्माल्यांबरोपहीतकुसुमांजलिः॥अनुमुत्वास्येनमंत्रेविशुत्वाथप्रदक्षिणं॥नमोविश्वमयाये ॥१०८॥
तिविश्वचक्रात्मनेनमः॥परमानंदरूपीत्वंपाहिनःपापकर्दमात्॥तेजोमयमिमंपश्चात्सदापश्यंतियोगिनः॥

हृदितत्वंगुणातीतविश्वचक्रंनमाम्यहं॥वासुदेवेस्थितंचक्रंचक्रमध्येतुमाधवः॥अन्योन्याधाररूपेणप्रणमामिस्थि
ताविह॥विश्वचक्रमिदंयस्मात्सर्वपापहरंपरं॥आयुधंचाधिवासश्चभवाद्धरमामतः॥इत्यामंत्र्यतुयोदद्याद्वि
श्वचक्रंविमत्सरः॥विमुक्तःसर्वपापेभ्योविष्णुलोकेमहीयते॥वैकुंठलोकमासाद्यचतुर्बाहुःसनातनः॥सेव्यतेस
रसांसंघैस्तिष्ठेत्कल्पशतत्रयं॥प्रणामेवास्त्वयंकृत्वावितरतिपस्तपनोविश्वचक्रंदिनेदिने॥तस्यायुर्वर्धतेनित्यं
लक्ष्मीश्चविपुलाभवेत्॥इतिसकलजगत्सुराधिवासंवितिपस्तपनीयषोडशारं॥हरिभवनमुपागतःससिद्धैश्चि
रमभिगम्यनमस्यतेशिरोभिः॥असुदर्शनतांयातिशत्रोर्मदनसुदर्शनतांचकामिनीनाम्॥ससुदर्शनेकेशवानु
रूपःकनकसुदर्शनदानदग्धपापः॥कृतगुरुदुरितानिषोडशारप्रवरसुदुर्लभदानतोनिरस्य॥प्रतितिचसमुरा
रिधाममिलाभवममितोभुवनेभयातिभूपः॥इतिविश्वचक्रमहादानविधानम्॥ ॥अथकल्पलतामहादानवि
धानं॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥महाकल्पलतानाममहापातकनाशनं॥पुण्यांतिथिसमासाद्यकृ
त्वाब्राह्मणवाचनं॥ऋत्विङ्मंडपसंभारभूषणाछादनादिकं॥तुलापुरुषवत्कुर्याल्लोकेशावाहनादिकं॥चामीक
रमयीःकुर्याद्दशकल्पलताःशुभाः॥नानापुष्पफलोपेताज्ञानांमुक्तविभूषिताः॥विद्याधरसुपर्णानांमिथुनैरुपशोभिताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० हरानादित्युभिः सिद्धैः फलानि च विहंगमैः॥ दृश्येति देमध्ये ऽवशिष्टाश्चैशप्रागादिदिक्पतिर्ज्ञेयं॥ लोकपानुसारितः प
॥१०९॥ कल्पयास्तासु देवताः॥ तासु दृश्या सुलतासु रेखाद्यादिरूपाः शक्तिपः कार्यमित्यर्थः॥ अग्नीशीमनंतरा शक्तिलवशास्थोपरि
न्यसेत्॥ अथस्ताल्लतयोर्मध्ये पद्मं गंधरेखशुभे॥ अग्नीवलसमानरूपां अलंकारां क्षिप्य ध्वकरां॥ तथानंतसमानरूपां॥
अधोदिक्ष्वतामनंतशक्तिं शंखकरां मध्ये प्रागादिदिगष्टकस्थापितलतानां मध्ये स्थापितयोर्लतयोरधस्ताल्लवशा
रास्रहस्तर्ध्वाधोभागयोः स्थापयेदित्यर्थः॥ इभासनस्थानुग्रडे पूर्वतः कुलिशायुधा॥ ग्रडेण उराशौ॥ रत्नत्रअस्थिता
नेयीस्रुवपाणिरथानले॥ रत्नीह गिरीड्डाक्रूया॥ तत्रस्थिताजवाहना॥ याम्यां च महिषारूढा गदिनी तेडुरालोपरि॥ ध
ते चैनैर्ऋतौ स्थाप्या सखड्गा रक्षिणापरे॥ दक्षिणापरे निर्ऋतिदिक्वावारुणी वारुणी श्वेतमेषस्या नागपाशिनी॥ पता
किनी च वायव्ये मृतस्थाश्चार्करोपरि॥ सौम्या तिलेषु संस्थाप्या शंखिनी निधि संस्थिता॥ निधिः कलशरूपः॥ माहे
श्वरी वृषारूढा नववनीते त्रिशूलिनी॥ श्यामामिति शेषः॥ मौलिर्याव रदास्तावल्कर्तव्या वालिकान्विताः॥ मौलिर्मो
मुकुटं यथा शिरपः॥ वालिका कर्णभूषणं॥ शान्त्यापेच पलादूर्ध्वमाह स्याच्चकल्पयेत्॥ सर्वासामुपरिष्टाच्च पंचवर्णवि राम०
तानकं॥ इदं सुवर्णापरिमाणं वालादि प्रतिमासहितकल्पलतासर्वांकस्येति ज्ञेयं॥ अनेन चोद्धाकुंभाश्चैव स्वयुग्मानि ॥१०९॥

चैव हि॥ आसादयेद्दिति शेषः॥ दर्शेति त्रिःष्टु प्रसंवध्यते॥ मध्यमे धेनुग्रह वेदर्लिंगेभ्यो मास्तदीरयेत॥ नमोनमः
पापविनाशिनीभ्यो ब्रह्मांडलोकेश्वरपालिनीभ्यः॥ अभीप्सिताधिकफलप्रदाभ्यो दिश्यस्तथा कल्पलतावधूभ्यः
॥ अत्राप्यनुमंत्रणानंतमेव दानं कार्यं॥ पाठक्रमस्यार्थक्रमेणाबाधात्॥ इति सल्लदिगंगनाप्रदानेन भयसूदनकारि
यः करोति॥ अभिमतफलदेशनाको केवसतिपितामहवत्सराणि विंशत्॥ पितृशतमथ तारयेद्भवाब्धेर्भवदुरि
तौघविनाशशुद्धदेहः॥ सुरपतिवनितासहस्रसंघैः परिवृतमंबुजसंभवाभिवंद्यः॥ इति कल्पलतामहादानविधा
नं॥ ॥ अथ सप्तसागरमहादानविधानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ सप्तसागरकं नाम सर्व
पातकनाशनं॥ पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनं॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनं बुधः॥ ऋत्विङ्मंड
पसंभारभूषणाच्छादनादिकं॥ कारयेत्सप्तकुंडानि कांचनानि विचक्षणः॥ प्रादेशमात्राणि तथा रत्निमात्राणि वा पुन
ः॥ रत्निस्त्वंगुलपर्वाणि विज्ञेयस्त्वेकविंशतिः॥ दशांगुष्ठपर्वाणि प्रादेशः परिकीर्तितः॥ कुर्यात्सप्तपलादूर्ध्वमास
हस्राच्च शक्तितः॥ संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि॥ कुंडानि स्यात्सर्वकारणि॥ प्रादेशमात्राणि विस्तारोत्से
धाभ्यामित्यर्थः॥ प्रथमं पूरयेत्कुंडं लवणेन विचक्षणः॥ द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा पुनः॥ चतुर्थं च गुडेनैव दध्ना पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमेवतु॥ षष्ठंशंखेन्यातदत्त्सम्मंतीर्थवारिणा॥ स्थापयेद्रत्नवरास्यांतर्वै हेमाराकांचनंशुभं॥ कोशवक्षीरमध्येतु घृतम
ध्येमहेश्वरं॥ भास्करंगुडमध्येतु दधिमध्येमराधिपं॥ शर्करायांन्यसेल्लक्ष्मीं जलमध्येतुपार्वतीं॥ सर्वेषुसर्वरत्नानि धान्या
निचसमंततः॥ सर्वरत्नानिचान्यानिपरिभाषायामुक्तानि॥ तुलापुरुषवच्छेषमत्रापिपरिकल्पयेत्॥ वारुणहोमोवरु
णप्रकाशमंत्रैर्होमस्तत्संपाते॥ नमोवःसर्वसिंधूनथाधारेभ्यःसनातनाः॥ जंतूनांप्राणदेभ्यश्चसमुद्रेभ्योनमोनमः॥ क्षी
रोदकाज्यदधिमाधवलावणेक्षुसारामतेनभुवनत्रयजीवसंघात॥ आनंदयतिवसुभिश्चयतोभवंतस्तस्मान्ममाप्य
घविघातमलंविदध्वं॥ यस्मात्समस्तभुवनेषुभवंतएवतीर्थामवासुरसुगंधमणिप्रतानं॥ पापक्षयामृतविलेपनभूष
णायलोकस्यबिभ्रतितदस्तुममापिलक्ष्मीः॥ इतिमंत्रैरुपस्थायप्रदद्यात्सप्तसागरान्॥ माधवोगुडः॥ सुराप्रकृतित्वा
त्॥ इतिदद्यातिरसाम्नतसंयुतांग्छुचिरंविस्मयवानिहसागरान्॥ अमलकांचनवर्णमयानसौपदमुपैतिहरेरमर
हितः॥ सकलपापविघातविराजितःपितृपितामहपुत्रकलत्रकं॥ नरकलोकसमाकुलमप्यसौप्रसरितिसौर्ययतेवि राम॰
वमंदिरमितिसप्तसागरमहादानविधानं॥ ॥अथरत्नधेनुमहादानविधानं॥ मात्स्ये॥ अथातःसंप्रवक्ष्यामि महादा ॥११०॥
नमनुत्तमं॥ रत्नधेनुरितिख्यातं गोलोकफलदंनृणां॥ पुण्यांदिनमथासाद्यतुलापुरुषदानवत्॥ लोकेशावाहनंकृत्वा

ततोधेनुंप्रकल्पयेत्॥ भूमौकृष्णाजिनंकृत्वालवणद्रोणसंयुतां॥ धेनुरत्नमयींकुर्यात्संकल्पविधिपूर्वकं॥ भूमौलिखि
तषोडशारचक्रायामितिशेषः॥ लवणमत्रकृत्रिमसैंधवादि॥ तेनोर्ध्वपादसवत्सत्वादिनिर्माणेन रत्नमयींधेनुंकुर्या
दित्यर्थः॥ स्थापयेत्पद्मरागाणामेकाशीतिंमुखेबुधः॥ पुष्परागशतंतद्वद्घोणायांपरिकल्पयेत्॥ घोणायांनासिकायां
ते॥ नासापुटद्वयस्यवक्ष्यमाणत्वात्॥ ललाटेहेमतिलकंमुक्ताफलशतंदृशोः॥ भ्रूयुगेविद्रुमशतंशुक्तीकर्णद्वयेस्थि
ते॥ दृशोरितिद्विवचनात्तन्मेविभज्यमुक्ताफलंस्थापयेदित्यर्थः॥ एवममत्रापि॥ कांचनान्निर्मितानिशृंगाणिनिशोवज्रशता
त्मकं॥ शृंगाणीतिबहुवचनात्तत्सोपिसमविभागःकार्यः॥ ग्रीवायांनेत्रपटकंगोमेदकशतात्मकं॥ नेत्रपटकंनेत्राख्यंवस्त्रं॥ त
च्चगोमेदकशतयुतंस्यात्॥ इंद्रनीलशतंपृष्ठेवैडूर्यशतपार्श्वके॥ स्फाटिकैरुदरंतद्वत्सौगंधिकशतंकटिं॥ तद्वदिति
सर्वेष्वेवडूर्यशतसंख्यातिदेशाच्छतसौगंधिकानि॥ सौगंधिकंपद्मरागः॥ सौगंधिकंकुरुविंदस्फटिकेभ्यःपद्मरागसंभ
तिशितिवराहमिहिरोक्तेः॥ खुराहेममयाःकार्याःपुच्छंमुक्तावलीमयं॥ अत्रहेमादिपरिमाणंयथाशक्तियाह्यं॥ सूर्यकां
तेंदुकांतौचघ्राणेकर्पूरचंदने॥ चकारात्कर्पूरचंदनेअपिघ्राणपुटयोःस्थाप्येइत्यर्थः॥ कुंकुमानिचरोमाणिरौप्यानाभि
चकारयेत्॥ गारुत्मतशतंतद्वदपानेपरिकल्पयेत्॥ गारुत्मतंमरकतं॥ तथान्यानिचरत्नानिस्थापयेत्सर्वसंधिषु॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यानि कुरुविंदप्रमुखतीनि॥ कुर्यात्स्वर्णकरयाज्ञिक्यं गोमयं च गुडात्मकं॥ गोमूत्रमाज्येन तथा दधिदुग्धस्वरूपतः॥ पुच्छाग्रे
चामरं दद्यात्समीपे ताम्रदोहनं॥ कुंडलानि च हैमानि भूषणानि च शक्तितः॥ कारयेद्देवमेवं तु चतुर्थांशेन वत्सकं॥ त
थासर्वासि धान्यानि पादाश्चेक्षुमयाः स्मृताः॥ नानाफलानि सर्वाणि पंचवर्णं वितानकं॥ धान्यानि पलानि च परितः स्था
प्यानि॥ एवं विरचनं कृत्वा तद्वद्धोमाधिवासनं॥ तद्वत्तुलापुरुषवत्॥ सुवर्णं दक्षिणां दत्वा धेनुमामंत्रयेत्ततः॥ इयं दक्षिणा
दानप्रतिष्ठासिद्ध्यर्थं गुडधेनुवदामंत्र्य इदं चोदाहरेत्ततः॥ गुडधेनुमंत्राश्च॥ या लक्ष्मीरित्यादयः॥ त्वां सर्वदेवगणधामयतः
पठंति रुद्रेंद्रचंद्रकमलासनवासुदेवाः॥ तस्मात्समस्तभुवनत्रयदेहयुक्ता मां पाहि देवि भवसागरपीड्यमानं॥ आमंत्र्य
चेत्थमभितः परिवृत्य भक्त्या दद्याद्विजाय गुरवे जलपूर्वकं तं॥ यः पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति
पदं मुरारेः॥ अत्रापि द्विजाय एकवचनमेकाग्निविधानमत्र प्रकृतोपवासः पाक्षपरं॥ चातुर्थ्याणापक्षे तु गुर्वन्तमस्या
न्येभ्यो दद्यादित्यर्थः॥ इदं चोपपादितं हिरण्यकामधेनुदाने॥ इति सकलविधिना रत्नधेनुप्रदानवितरति स विमानप्रा
प्यदेदीप्यमानं॥ सकलकलुषमुक्तो बंधुभिः पुत्रपौत्रैः सह मदनस्वरूपः स्थानमभ्येति शंभोः॥ इति रत्नधेनुमहादानवि
धानम्॥ ॥अथैतत्प्रयोगः॥ रत्नधेनुदाता पुण्यकाले पूर्वदिने उपवासादि कृत्वा प्रातः कृतनित्यक्रियः प्राणानायम्य

देशकालादिकीर्तनांते सकलकलुषक्षयमदनस्वरूपकल्पसेवकबंधुवर्गपुत्रपौत्रादिसहितवरविमानारोहसेवकगोलो
कप्राप्तिकामस्तद्वद्धरिपदप्राप्तिकामो वा अद्येमां रत्नधेनुमहादानं करिष्य इति संकल्प्य तुलापुरुषदानवद्गणपत्यादिपूजा
मातृपूजानांदीश्राद्धमाचार्यवरणादि कृत्वा कुंडमंडपवेदिकाशोधनयज्ञोपकरणसंपादनमंडपप्रवेशगर्वादिभिर्योगां
तं कर्म कुर्यात्॥ ततो गुरुः षोडशारं चक्रं विलिख्यापर्यास्तृते समस्थाजिने द्रोणापरिमितलवणेन प्राङ्मुखीमुदक्पादां
सवत्सां गां रत्नपिंडप्राग्रत्नप्रकारेण रत्नमयीं कृत्वा समंतादष्टौ दशधान्यानि नानाफलपुष्पवस्त्रमाल्यादीन्मासा
घृतधेनवे सवत्सायै नमः इति सवत्सां धेनुं प्रतिष्ठाप्य पूर्ववत् सर्वोपचारैः संपूज्य परिफलपुष्पाद्यपशोभितं पंचवर्णं वितानं
बध्नीयात्॥ ततः कुंडसमीपेषु सर्वौषधिपंचरत्नादिगर्भकलशस्थापनऋत्विगादिनियोगांते तैरभिप्रणायनेक्षेतेग्र
हादिस्थापनपूजाहोमचतुष्टयादिबलिदानदक्षिणादानांते अधिवासनेकृते तत्रैवोपोषिता गुर्वादयो वसेयुः॥ अथ प्रा
तः कृतस्नानः पुण्याहवाचनेकृते पूर्णाहुत्यादि होमशेषं कृत्वा पूर्वस्थापितकलशोदकैः तुलापुरुषोक्तमंत्रैर्यजमान
मभिषिंचेयुः॥ ततः शुक्लमाल्यांबरधरो यजमानो रत्नधेनुसमीपं गत्वा गृहीतकुसुमांजलिस्त्रिःप्रदक्षिणामावर्त्य वक्ष्य
माणमंत्रैरुपतिष्ठेत॥ या लक्ष्मीः सर्वलोकानां या च देवेष्ववस्थिता॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु॥ देहस्था या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान॰प्र॰ चरुद्राणां शंकरस्य च या प्रिया॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥
चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रियै मम॥ चतुर्मुखस्य या लक्ष्मीर्लक्ष्मीर्या धनदस्य च॥ लक्ष्मीर्या लोकपालानां साधे
११२ नुर्वरदास्तु मे॥ स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां च या॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे इति गुडधेनुमंत्रै
॥ तथा॥ त्वां सर्वदेवगणधाम यतः पठंति रुद्रेंद्रचंद्रकमलासनवासुदेवाः॥ तस्मात्समस्तभुवनत्रयदेवयुक्ता मां पाहि दे
वि भवसागरपीड्यमानं॥ इति मंत्रेणाचार्यमंत्र्य पुष्पांजलिं प्रक्षिप्य नमस्कृत्य वेद्यामग्निभागे प्राङ्मुख उपविश्य सकुशाय
वतुलशीजलानि गृहीत्वा देशकालौ संकीर्त्य अमुकामुकगोत्रेभ्योऽमुकामुकवेदाध्यायिभ्योऽमुकामुकशर्मभ्यो
ब्राह्मणेभ्यः सपत्नीकेभ्य इमां रत्नधेनुं पद्मरागमुखीं पुष्परागघोणां सुवर्णतिलकालंकृतां पंचाशत्संख्याकमुक्ताफलन
यनां तावत्संख्यविद्रुमभ्रुवं शुक्तिकर्णां स्वर्णशृंगीं वज्रशिरसं गोमेदरत्नपुतनेत्रवस्त्रग्रीवां इंद्रनीलपृष्ठां वैडूर्यपार्श्वां
स्फटिकोदरां सौगंधिककटिं हेमखुरां मुक्तावलीपुच्छां सूर्यकांतेंदुकांतकर्पूरचंदनघ्राणां कुंकुमरोमाणीं रौप्यना
भिं गारुत्मतापानां नानारत्ननिर्मितसर्वांगां शर्करजिह्वां गुडगोमयां घृतमूत्रां दधिदुग्धोपेतां चामरपुच्छाग्रां ताम्रदोहनहेमकंठ राम॰
लयैकैक्यभूषितां मिष्टपात्रामृतं दुग्धं चतुर्थांशकल्पितवत्ससहितां परितः स्थापिताष्टादशधान्यफलपुष्पपंचवर्णवितान ११२॥

८

नयुतां धेनपुतां वेणुकलशकलुषमनेसस्तूपलपर्वव वंधुजनपुत्रपौत्रादिसहितः स्थापिताष्टादशधान्यफलपु
ष्पपंचवर्णा वरविमानारोहणपूर्वकगोलोकप्राप्तिकामः तदुच्छ्रेष्ठपदप्राप्तिकामो वा तद्धरिपदप्राप्तिकामो वा
मत्स्यपुराणीयतुलापुरुषोक्तभागधेयस्य पापक्षयं ब्राह्मणेभ्यः संप्रददे न मम इति जलमुदङ्मुखोपविष्टः गुर्वादि
हस्ते क्षतरजेत। ते च ॐ स्वस्तीत्युक्त्वा सावित्रेणायत्युषा प्रतिगृह्णीयुः यथाशास्त्रं कामस्तु इति परे गुः॥ ततः कृतैतद्रत्नधे
नुमहादानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णमग्निदैवतं दक्षिणां संप्रददे न मम इति प्रत्येकं गुर्वादिभ्यो दक्षिणां दत्वा जाप
कद्वारपालेभ्यश्च दक्षिणां दत्वा दीनानाथांधपंग्वादीन्यथाविभवं तर्पयित्वा परमेश्वरार्पणं कुर्यादिति रत्नधेनुमहादा
नप्रयोगः॥ एवमुत्तरत्र प्रयोगो ज्ञातव्यः॥ ॥अथ महाभूतघटदानविधानम्॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महा
नमनुत्तमं॥ महाभूतघटं नाम महापातकनाशनं॥ पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनं॥ ऋत्विङ्मंडपसंभार
भूषणाच्छादनादिकं॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनादिकं॥ अत्रापि शस्ते नगोविंदस्नानादिकं गरस्वते॥ कारयेत्कां
चनं कुंभं महारत्नान्वितं बुधः॥ महारत्नानि तु माणिक्यमुक्ताफलविद्रुममरकतपुष्परागहीरकेंद्रनीलगोमेदवैडूर्या
णि॥ प्रादेशादंगुलशतं यावत्कुर्यात्प्रमाणतः॥ अत्र कांचनपरिमाणानि तान्यपि प्रागुक्तादिपरिमाणाः कुंभोपयावतानुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्दान॰प्र॰ ॥११३॥

रोनिनिष्पद्यते तावसुवर्णाग्राख्यं॥ अथोसरिमाणामितिकात्यायनोक्तेः॥ क्षीराज्यसहितांतत्कल्पवृक्षसमन्वितं॥ तदि
तिप्रागुक्तहेक्षवदिसर्थः॥ कल्पवृक्षस्थापनंचकुर्यात्तेः॥ पद्मासनगतांस्तत्रब्रह्मविष्णुमहेश्वरान्॥ वराहेणोद्धृतांत
द्धकूर्मास्थितांसपंकजां॥ वराहमहीलक्ष्मणोविश्वचक्रेऽभिहितं॥ वरुणंचासनगतंकांचनेमकरोपरि॥ हुताशनंमे
षगतंवायुंकृष्णमृगासनं॥ तथाकाशाधिपंकुर्यान्मूषकस्थंविनायकं॥ विन्यसेद्वृक्षमध्येतान्मेरुपंचकसंयुतान्॥ वे
दपंचकमितिहासपुराणेनसहितमग्रादिकं॥ वेदलक्षणमास्या॥ ऋग्वेदस्याक्षसूत्रंस्याद्यजुर्वेदस्यपंकजं॥ सामवे
दस्यवीणास्याद्दक्षिणेदक्षितोन्यसेत्॥ अथर्ववेदस्यपुनः स्रुक्स्रुवौकमलंकरे॥ करेदक्षिणेवामेच॥ पुराणवेदोवरदः
साक्षसूत्रकमंडलुः॥ एताः प्रथमघटमध्येविन्यसेत्॥ परितः सर्वधान्यानिचामरासनदर्पणं॥ पादुकोपानहच्छत्रदी
पिकाभरणानिच॥ ताम्रपात्रंचजलकुंभांश्चपंचवर्णवितानकं॥ विन्यसेदित्यनुषज्यते॥ स्नात्वाधिवासनांतेतुमंत्रमे
तमुदीरयेत्॥ नमोवः सर्वदेवानामाधारेभ्यश्चवर्णवितानकं॥ विन्यसेत्सुमहाभूताधिदेवेभ्यः शांतिरस्तुशिवंम
म॥ यस्मात्त्वत्रकिंचिदप्यस्तिमहाभूतैर्विनाकृतं॥ ब्रह्मांडेसर्वभूतेषुतस्मात्त्वांरक्षयात्तमे॥ इत्युच्चार्यमहाभूतघ
टंयोविनिवेदयेत्॥ सर्वपापविनिर्मुक्तः प्रयातिपरमांगतिं॥ विमानेनार्कवर्णेनपितृबंधुसमन्वितः॥ स्तूयमानोमर

दान॰ ॥११३॥

स्त्रीभिःपदंप्राप्नोतिवैष्णवं॥ षोडशैतानियःकुर्यान्महादानानिमानवः॥ नतस्यपुनरावृत्तिरिहलोकेभिजायते॥ इतिपद
तियइत्यंवासुदेवस्यपार्श्वेसमुतपितृकलत्रैःसभ्रणोतिहसम्यक्॥ पुरारिपुभुवनेवामंदिरेवार्कलक्ष्मीरनरप्ररवथपि
मोदतेसोपिकल्पं॥ ॥अथैतस्यप्रयोगः॥ यजमानस्तुलापुरुषोक्तविधिनागोविंदादिमातृपूजानांदीश्राद्धपुण्याह
वाचनाचार्यादिवरणमधुपर्कदानकुंडमंडपवेदिकासंभारसंपादनमंडपप्रवेशगुर्वादिनियोगांतंकुर्यात्॥ अथगुरुर्वे
द्यांपद्मगर्भषोडशारंचक्रंविलिख्यतन्मध्येशुद्धसुवर्णघटितंमहारत्नाचितमुक्ताप्रादेशादिपरिमाणंमहाभूतघटंविन्य
स्यतदंतस्तत्सपरिमाणोक्षीराज्यसहितंपिधायतन्मध्येपंचशाखालादिसर्वांतंकलक्षणंवृक्षंविन्यस्यब्रह्मादिप्रतिमात्रयंतदधः
स्थापयित्वापरितविदंपंचकप्रतिमाभूतवराहप्रतिमांचविन्यस्यतत्रैवाष्टदिक्षुलोकपालप्रतिमाविनायकप्रतिमांचविन्य
स्यसमंतात्दृष्टादशधान्यानिचामराहप्रतिमांचविन्यस्यतत्रैवाष्टसनदर्पणपादुकोपानच्छत्रदीपिकावासोभूषणताम्रपा
षोडशजलकुंभांश्चासाद्यमहाभूतघटंप्रतिष्ठापूर्वकंमहाभूतघटायप्रतिष्ठापूर्वकंमहाभूतघटायब्रह्मादिदेवतास
हितायनमइतिमंत्रेणावाहनासनादिरूपचारैःसंपूज्योपरिपंचवर्णवितानंबध्नीयात्॥ ऋत्विगादीन्होमादिषुविनियुज्य
तेरग्निप्रणायनेकृतेग्रहयज्ञेहस्थापनादिहोमचतुष्टयस्तुकेवचतुष्टयहोमप्रोक्षितेलोकेशबलिदानंकृत्वा॥ ततःपुण्याहवाच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्दा.न.प्र नपस्तोदकुम्भादिकमेत्तोषसमास्यनेनतरं गुर्वादयो यजमानमभिषिंचेयुस्तल्लोक्तमंत्रैः॥ततः स्नातो यजमानः शुक्लमा
॥११४॥ ल्यांबरधरो गृहीतकुसुमांजलिर्महाभूतघटं त्रिप्रदक्षिणीकृत्य नमो वः सर्वदेवानामित्यादि तस्माच्छ्रीरक्षयास्त
मइति मंत्रं पठित्वा तत्र पुष्पांजलिं प्रक्षिप्य नमस्कृत्य वेदिपश्चिमतः प्राङ्मुखो प्रविष्टः कुशतिलजलान्यादाया देशा
दि संकल्पं तिः अमुकगोत्रेभ्यो अमुकशाखाध्यायिभ्यो अमुकशर्मभ्यो गुर्वर्त्विग्भ्यः अमुं सौवर्णं महाभूतघटं महारत्नयुतश्चतः
स्थितसौवर्णकल्पवृक्षब्रह्मादिप्रतिमासहितं परितः स्थिताष्टदशधान्याचामरादियुक्तममुकपदकामो पुष्पाम्भः सं
प्रददे न ममेति दत्वा तैः सावित्रेणायजुषा प्रतिगृह्य कृते तन्महाभूतघटमहादानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं तु
भ्यमहं संप्रददे इति प्रत्येकं दक्षिणां दद्यात एकाग्निपक्षे त्वेकस्मै दद्यात॥ततो दीनानाथादीन्प्रतोष्य विसर्जनं कृत्वाफ
लमीश्वरायार्पयेत॥इति श्रीमहिवकुलानकृपाजीभृतेन श्रीमन्नागदेवात्मजेनानंतताचार्येण विरचिते विधानपारिजात
निबंधे चतुर्थस्तबके तुलापुरुषादिषोडशमहादानविधानानि॥ ॥अथ पर्वतदानानि॥पाद्मे मात्स्ये च॥मेरोः प्रदानं
वक्ष्यामि दशधा मुनिसत्तम॥तस्य दानात्त्रयो लोकाना प्रीति सुरपूजितान्॥पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च॥न तत् राम॰
फलमधीतेषु कृतेष्विह यदश्नुते॥तस्माद्विधानं वक्ष्यामि पर्वतानामनुत्तमं॥प्रथमो धान्यशैलः स्याद्द्वितीयो लवणा ॥११४॥

चलः॥गुडाचलस्तृतीयस्याच्चतुर्थो हेमपर्वतः॥पंचमस्तिलशैलः स्यात्षष्ठः कार्पासपर्वतः॥सप्तमो घृतशैलः स्या
द्रत्नशैलस्तथाष्टमः॥एजतो नवमस्तद्वद्दशमः शार्कराचलः॥वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः॥अयने वि
षुवे चैव व्यतीपाते दिनक्षये॥शुक्लपक्षे तृतीयायामुपरागे शशिक्षये॥विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः॥
शुक्लायां पंचदश्यां वा पुण्यर्क्षे वा विधानतः॥धान्यशैलादयो देया यथाशास्त्रं विधानतः॥तीर्थे वायतने वा विधानतः
॥तद्वदपि गोष्ठे वा भवनांगणे॥मंडपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखं॥प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधान पि५
तः॥तद्वदिति तुलापुरुषवच्चतुरस्रमित्यर्थः॥गोमयेनोपलिप्तायां भूमावास्तीर्य वै कुशान्॥तन्मध्ये पर्वतं कुर्याद्वि
रि५ ष्कंभैः पर्वतैर्वृतं॥धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः॥मध्यमः पंचशतिकः कनिष्ठः स्यात्त्रिभिः शतैः॥मेरुर्महा
हि३ व्रीहिमयस्तन्मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात॥महाव्रीहयो राजशाल्य इति हेमाद्रिः॥सुवर्णवृक्षत्रयं॥मंदरपा
रिजातकल्पवृक्षत्रयं॥तत्र मध्ये कल्पतरुर्दक्षिणे मंदार उत्तरे पारिजातं स्थाप्यः॥ते चाँहे चंदनसंतानौ पूर्वपश्चिमभा रि२
गयोः॥निवेशयेत्सर्वतः स्युविशेषाच्छर्कराचल इति शार्कराचलप्रकरणोक्तेः पूर्वे हरिचंदनः पश्चिमे संतान इति तत्र द्वयं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान·प्र· निवेशयेत्॥ विशेषाच्छर्कराचलदानप्रयुक्तत्वाच्छर्कराचलदाने वज्रपकर्तव्यता प्रतीयतेति नाम्ना त्रैमंदारादिवृक्षत्रयमेव कुर्यात्
शर्कराचलदाने पंचापि कुर्यादित्यर्थः॥ पूर्वेण मुक्ताफलवज्रयुक्तं याम्येन गोमेदकपुष्परागैः॥ वंशेन्द्रनीलैरनकं। गारुत्म
॥११५॥ तं मरकतं॥ सरोजरागः पद्मरागः॥ एतानि मुक्ताफलादीनि वक्ष्यमाणा एवादिदिग्व्यवस्थितरत्नतंभगर्भनिवेश्यानि॥
श्रीखंडखंडैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात्॥ ब्रह्मा च विष्णुर्भगवान्पुरारिर्दिवाकरोप्यत्र हिरण्मयः
स्यात्॥ मूर्द्धन्यवस्थानगतमत्सरेण कार्यास्त्वनेके च तथा द्विजौघाः॥ मूर्द्धन्यवस्थाः पर्वतमस्तकस्थाः द्विजौघाः पक्षि
णां समूहाः॥ ब्रह्मादिप्रतिमालक्षणं नवग्रहमखप्रकरणेभिहितं॥ अत्रौघशब्देन बहुत्वसिद्धे पुनरनेकग्रहणं द्विज
शब्दाभिधेयपार्थांतरसंग्रहार्थं॥ ते पक्षिसंघा मुनिसंघाश्च कार्या इत्यर्थः॥ एते प्रकृतत्वात्सौवर्णा एव कार्याः॥ चत्वारि शृं
गाणि च राजतानि नितंबभागोपि च राजतः स्यात्॥ अथेक्षुवंशावृतकंदरस्तु घृतोदकप्रस्रवणश्च दिक्षु॥ शुक्लां
बराण्यंबुधरावली स्यात्सर्वेषां पीतानि च दक्षिणेन॥ वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घनाली॥ अथेंद्र दान·
स्तु रूपार्यगणाः॥ घृतमेवोदकप्रस्रवणानि च॥ एवं दिग्वर्णार्पितानि शुक्लांबराणि मेघपंक्तिः॥ रौप्यान्महेंद्रप्रमुखा ॥११५॥

६२

नथाष्टौ संस्थाप्य लोकाधिपतीन्क्रमेण॥ महेंद्रादिलक्षणं प्रागुक्तम्॥ नानाफलानि च समंततः स्यान्मनोरमं मा
ल्यविलेपनं॥ वितानकं चोपरि पंचवर्णमम्लानपुष्पाभरणं सितं च॥ इत्थं निवेश्यामरशैलमग्र्यं मेरोस्तु विष्कंभ
गिरीन्क्रमेण॥ तुरीयभागेन चतुर्दिशं तु संस्थापयेत्पुष्पविलेपनाढ्यान्॥ अत्र प्रतिविष्कंभपर्वतं प्रधानतुरीयभागो
ग्राह्यः॥ चतुर्थांशेन विष्कंभपर्वतान्कारयेत् शय्यासितिलवणाचले वक्ष्यमाणत्वात्॥ पूर्वेण मंदरमनेकफलैश्च युक्तं
युक्तं गणैः कनकभद्रकदंबचिह्नं॥ कामेन कांचनमयेन विराजमानमाकारयेत्कुसुमवस्त्रविलेपनाढ्यं॥ क्षीरारुणो
दसरसा च वनेन चैव रौप्येण शक्तिघटितेन विराजमानं॥ अत्र व्रीहिमयमेरुसंनिधानात्सामांतरानुपदेशाच्च मंदरो
पि व्रीहिमय एव कार्यः॥ गणैरिति नराकृतिभिर्द्विभिर्गणैर्युक्तं च॥ कनकेन घटितभद्रकदंबवृक्षेण चिन्हितं
॥ क्षीरारुणितेनारुणोदसंज्ञकेन रूप्यघटितेन सरसा चैत्ररथाख्यवनेन विराजमानमित्यर्थः॥ याम्येन गंधमादन
श्च निवेशनीयो गोधूमसंचयमयः कलधौतजंबूः हैमेन यक्षपतिना घृतमानसेन वस्त्रैश्च राजतवनेन संयुतः स्यात्॥
कलधौतजं सौवर्णजंबूवृक्षः॥ रजतघटितगंधर्ववनेन युत इत्यर्थः॥ पश्चात्तिलाचलमनेकसुगंधपुष्पसौवर्णपि
प्पलहिरण्मयहंसयुक्तं॥ रजतपुष्पवनेन तथान्वितं तद्वसितोदसरसा तथाग्रे॥ संस्थाप्य तं विपुलशैलमथोत्तरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ शैलंतुपार्श्वेनपश्चिमायांमंदरंन्यसेत्॥पुष्पैश्चहैमवटपादपशोभितंतमाकारस्येल्वनवारोनुविराजमानं॥माक्षीकभद्रसर
॥११६॥ साचवनेनतद्वच्छ्रोणेनभास्करवताचयुतंविधाय॥माक्षीकंमधु॥मधुप्रधानंउत्तमपात्रंरूप्यभद्रनामकंसरसा॥रूप्य
निर्मितेनभास्करवतासावित्रवनेनचयुतमित्यर्थः॥अत्रमंदरादिषुक्षत्रयस्यमेरुमध्येस्थापनंकामदेवादेःप्रस
नुखलादिकंचयार्कंग्राचलेस्पष्टंभविष्यति॥एतेचकामदेवादयःकदंबादीनांनिजपर्वतवृक्षाणामधःस्थाप्याइ
तिहेमाद्रिः॥होमश्चतुर्भिरथवेदपुराणविद्भिर्दान्तैरनिंद्यचरिताकृतिभिर्द्विजेन्द्रैः॥पूर्वेणहस्तमितमत्रविधायकुंडं
कार्यस्तिलैर्यवघृतेनसमित्कुशैश्च॥रात्रौचजागरणमत्रकृतंगीततूर्यरवाहनेचकथयामिशैलोत्तमानां॥पूर्व
गातिमंडपस्यपूर्वभागेहस्तमात्रंकुंडंविधायतदीशानभागेतुलापुरुषोक्तलक्षणांदेवतावेदिंकृत्वातत्रविनायका
दिषट्त्रिंशद्देवताआवाह्यपूजयित्वाउर्जलिंगमिस्तल्लिंगकैर्मंत्रैस्तिलादिद्रव्येणहोमंकारयेदितिहेमाद्रिः॥अत्रवि
नायकादयोषट्त्रिंशद्देवताःद्वादशादित्याःएकादशरुद्राःदशलोकपालाःअष्टौवसवः॥ब्रह्माविष्णुशिवसूर्याःका राम॰
मधनदहंसकामधेनवश्चेत्येकाशीतिसंख्यादेवाद्रष्टव्याः॥होमानंतरंकर्तव्यमाह॥मेर्वादीनावाहनंकुर्यान्मंत्रैरभिर्य ॥११६॥

थाक्रमं॥तत्रमेरोः॥त्वंसर्वदेवगणधामनिधेविरुद्धमस्मद्गृहेष्वमरपर्वतनाशमाशु॥क्षेमंविधत्स्वकुरुशांति
मनुत्तमांनःसंपूजितःपरमभक्तिमतामयापाहि॥त्वमेवभगवानीशोब्रह्माविष्णुर्दिवाकरः॥मूर्तामूर्तपरंबीज
मतःपाहिसनातन॥यस्मात्त्वंलोकपालानांविश्वमूर्तेश्चमंदिरं॥रुद्रादित्यवसूनांचतस्माच्छांतिंप्रयच्छमे॥य
स्मादशून्यममरैर्नारीभिश्चशिरस्तव॥तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥एवमभ्यर्च्यतंमेरुंमंदरंचा
पिपूजयेत्॥यस्माच्चैत्ररथेनत्वंभद्राश्ववर्षेणच॥शोभसेमंदरक्षिप्रमतःपुष्टिकरोभव॥यस्माच्चूडामणिर्जंबू
द्वीपेत्वंगंधमादन॥गंधर्ववनशोभावानतःकीर्तिर्दृढास्तुमे॥उत्तरैःकुरुभिर्यस्मात्सावित्रेणवनेनच॥सुपार्श्व
शोभसेनित्यमतःश्रीरक्षयास्तुमे॥एवमामंत्र्यतान्शैलान्प्रभातेविमलेपुनः॥स्नात्वाथगुरवेदद्यान्मध्यमंपर्वतोत्तमं
॥विष्कंभपर्वतान्दद्यादृत्विग्भ्यःक्रमशोनृप॥गावोदद्याच्चतुर्विंशदथवादशपार्थिव॥शक्तितःसप्तवाष्टौवापंच
दद्यादशक्तिमान्॥एकापिगुरवेदेयाकपिलाचपयस्विनी॥अत्रकेचित्सहस्रदक्षिणांकल्पेतितत्रलांउक्तेर्वक्ष्य
माणलक्षणाभिधानदक्षिणांदद्यादित्याहुः॥पर्वतानामशेषाणामेषएवविधिःस्मृतः॥तएवपूजनेमंत्रास्तएवोपस्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्दा·न·प्र· ॥११७॥

रामताः॥अग्रहाणांलोकपालानांब्रह्मादीनांचसर्वशः॥स्वस्वमंत्रेणसर्वेषुहोमःशैलेषुपठ्यते॥वस्वादेःप्रत्येकामं
त्राभावात्तामनंत्रैर्होमादिकार्यं॥उपवासोभवेन्नित्यमशक्तौनक्तमिष्यते॥सर्वत्राक्षारलवणमश्नीयाद्भ
क्तिमान्॥अत्रब्रह्मपतःप्रोक्तमत्रेणाप्रतिष्ठिताः॥अन्याश्रवंतिभक्तानिजगद्ब्रह्मचवर्तते॥अत्रमेवयतोल
क्ष्मीरत्रमेवजनार्दनः॥धान्यपर्वतरूपेणपाहितस्मान्नमोनमः॥एवमुपस्थायाचार्यायदत्वान्येभ्योपिदत्वाद्धा
त्रेणे॥अनेनविधिनायस्तुदद्याद्धान्यमयंगिरिं॥मन्वंतरशतंसाग्रंदेवलोकेमहीयते॥~~[illegible]~~र्षुर्य
उत्तमांश्च॥अप्सरोगणगंधर्वैराकीर्णेनविराजितः॥विमानेनदिवःपृष्ठमायातिसुरसेवितः॥कर्मक्षयाद्राजराज्यं
प्राप्नोतीहनसंशयः॥इतिभाश्यादिदशशैलदानमूलवाक्यानि॥ ॥अथशैलदानदशकस्यसाधारणःप्रयोगः
कथ्यते॥पर्वतदानंचिकीर्षुर्यजमानःप्रागुक्तरीत्याकालादिकंप्राप्याधिवासनदिनेकृतोपवासःकर्मसंकल्पंविधा रा·म·
यविनायकंसंपूज्याप्सरोगंधर्वविराजमानदिव्यविमानकरणकद्युपृष्ठगमनानंतरसाग्रमन्वंतरशतावधिकाल ॥११८॥
देवलोकनिवासोत्तरभूलोकराजराजत्वप्राप्तिकामोविष्णुप्रीतिकामोवाधान्यपर्वतमहादानमहंकरिष्ये॥लवण

दिक्शैलेषुफलवाक्यानुसारेणफलंसंकीर्त्यतत्कामःश्वोमुकपर्वतदानंकरिष्यइतिसंकल्प्यतुलापुरुषोक्तप्रकारे
णमातृस्थानवृद्धिश्राद्धपुण्याहवाचनर्त्विग्वरणमधुपर्कपूजांकृत्वाचिकीर्षितधान्यादिपर्वतासादनंकुंडमंडपग्र
हवेदिकादियथाविधिकृत्वावेदिकायांगोमयोपलिप्तायांकुशास्तृतायांसहस्रद्रोणमितराजशालिनामकमहाव्री
हिभिरुत्तमंततदर्धेनमध्यमंद्रोणत्रयेणाधममितिस्वशक्त्यामेरुंकारयेत॥द्रोणप्रमाणंपरिभाषायामुक्तं॥कल
तत्कारस्तुप्रमाणस्यकरचरणस्यपुंसोद्वादशभिःप्रसृतिभिःकुडवोभवति॥यथोत्तरमेतच्चतुर्गुणेनप्रस्थाटकद्रो
णाइतिचतुःषष्ठ्याकुडवैद्रोणइतिमाचक्ष्यो॥धान्यमेरुपरिमध्येकल्पवृक्षंदक्षिणेमंदारंउत्तरेपारिजातंचाग्नौसत्वंप
श्चिमेसंतानंपूर्वेहरिचंदनमिति॥पंचसुवर्णवृक्षान्स्थापयेत॥अग्न्यादौत्रयमेवामेरुपूर्वादिदिक्षुब्रह्मविष्णुरुद्र
सूर्यप्रतिमाःपश्चिमेसंधान्यानिसंधान्यस्थापयेत॥तत्रैवचतुर्दिक्षुस्थितराजतेचलशृंगेषुमुक्ताफलवज्रादिर
त्नपुंजान्युत्स्थाप्य॥तद्बहिर्दिगष्टकेरौप्यमयेंद्राद्यष्टप्रतिमाष्टकंनिधायप्रवाललतास्थानीयैःश्रीखंडैःशिलात
लस्थानीयाभिःशुक्तिभिर्भूषयित्वाआर्द्रतनेनमेखलाकारेणनिबंधायांभूषयित्वातद्बहिःप्रागादिचतुर्दिक्षुश्वेतपीतक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेसरत्नवस्त्रागोमेधपङ्क्तिः स्थानीयानि निधायतद्बहिर्दिक्षु वेद्यास्थानीयेषु स्तुरं उन्नतकं दरखतसर्वाराजतपात्रकल्पि
तोत्स्वकपरि स्ववर्णापरितः स्थापितनानाफलमाल्यविलेपनमुपरिवद्धाम्लानपुष्पविभूषितपंचवर्णवितानेम
वविंवमेरुं विस्थतत्सर्वभागेमेरवर्थोपकल्पितद्वौ द्विचतुर्थेनाद्यापरिमितद्रोहिमयंमंदाराख्यविष्कंभपर्वतमुपरिस्था
पितसौवर्णानरूपगणायसौवर्णाभद्रकदंववतरुतत्तलस्थप्रसन्नमुखसौवर्णकामदेवप्रतिमम रूणोदसरः स्थानी
यक्षीरपूर्णारौप्यपात्रैरौप्यघटितचैत्ररथाख्यवननानाफलवस्त्रपुष्पविलेपनाद्यंकुर्यात्॥कामलक्षणाविश्व
कर्मीये॥चापवाणधरः कामोरतिप्रियान्तुमध्यमः॥आलीढानंदनोरागी रूपवान्विप्रमुपत्रकइति॥ततोदक्षिणोप
र्वचतुर्थांशगोधमनपंगंधमादनाख्यंविष्कंभपर्वतं उपरिस्थसौवर्णजंवूवृक्षंतन्मूलस्थापितसौवर्णाद्यमुखध
नदप्रतिमंमानससरः स्थानीयघृतपूरितरौप्यपात्रं रूप्यघटितगंधर्ववनेनानाफलवस्त्रमाल्यादिपूजितंकुर्यात्॥ राम॰ ॥११८॥
धनदलक्षणंश्रीप्रश्ने॥द्विभुजमापिगनेत्रंचगदिनंपीतविग्रहं॥पुष्पकस्थंधनाध्यक्षंध्यायेच्छिवसखंसदेति॥ततः
पश्चिमेमेरुचतुर्थांशशिलात्मकंविपुलाख्यंविष्कंभपर्वतमुपरिस्थसौवर्णपिप्पलंतन्मूलस्थप्राङ्मुखसौवर्णाहं

सप्रतिमंपितोदसरः स्थानीयदधिपूरितरौप्यपात्ररूप्यघटितवैभ्राजवनेनानाफलवस्त्रादिपूतंकुर्यात्॥तथो
त्तरमेरुचतुर्थांशमाषमयंसुपार्श्वाख्यंविष्कंभपर्वतमुपरिस्थसौवर्णवटंतन्मूलस्थापितदक्षिणाभिमुखसौव
र्णसवत्सधेनुप्रतिमंभद्रसरः स्थानीयमधुपूरितरौप्यपात्रंरूप्यघटितसावित्रवनंनानाफलादिपूतंकुर्यात्॥
एवमेवोत्तरत्रापिमेरुचतुर्थांशपरिमितेर्वक्ष्यमाणलक्षणादिद्रव्यैर्विष्कंभपर्वतरचनंकार्यं॥ततोमंडपस्यैक
भागेहस्तमात्रंकुंडंविधायतदीशानभागेग्रहवेदिंहस्तमात्रांकृत्वायजमानंमंडपप्रवेशगुर्वादिनियोगांतेगुरुः
कुंडप्रांतेसर्वांषष्ठ्यादिगर्भकंभंप्रतिष्ठाप्यकृत्विजोहोमायविनियुञ्ज्यतेरग्निस्थापनेकृतेस्वयंग्रहादिस्थापनपूजा
दिकृत्वाऽर्कचित्रभिर्विनायकादिस्वाविंशद्देवतालोकपालाष्टवस्वेकादशरुद्रवादित्यात्यग्रलविष्णुशिवस्वर्णकामदेवध
नदहंसकामधेनुरूपैकादशीतिदेवेभ्यः प्रसदेवतत्र्याद्दशाहुतीस्तिलयवोडुंबरसमित्कुशैर्धृतान्तैर्विभक्तहोमं
कारयेत्॥अत्रहस्तमात्रकुंडोपदेशात्सहस्रहोतव्यमितिदानविवेककारः॥ब्रह्माडपुराणोक्तेष्टशतहोत
व्यमित्युक्तं॥होमसमाप्त्यनंतरंकर्त्तावक्ष्यमाणमंत्रैर्मेर्वादीनाघस्यगंधमाल्योपहारादिभिः पर्वतान्पूजयेत॥मंत्रा
स्तु॥त्वंसर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेष्वमरपर्वतनाशयाशु॥क्षेमंविधत्स्वकुरुशांतिमनुत्तमानःसंपूजितःप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ रमभक्तिमतामया॥घ॥त्वमेवभगवानीशोब्रह्माविष्णुर्दिवाकरः॥मूर्त्तामूर्त्तंपरंबीजमतःपाहिसनातन॥यस्मात्वंलोक
॥११९॥ पालानांविश्वमूर्त्तेश्चमंदिरं॥रुद्रादित्यवसूनांचततःशांतिंप्रयच्छमे॥यस्माद्वृक्षमयरेनारीभिश्वदिरत्नव॥त
स्मात्मांपुरुषाशोषदुःखसंसारसागरात॥इतिमेरुमंत्रः॥अथमंदरावाहनं॥यस्माच्चूडामणिर्जंबूद्वीपस्त्वंगंधमा
दनं॥गंधर्ववनशोभावानतःकीर्त्तिर्दृढास्तुमे॥इतिगंधमादनावाहनं॥एवमावाह्यसंपूज्यपूर्वादिसहितोगीत
वाद्यादिपूर्वकंजागरणेनतांनिशांनीत्वाप्रातःकृतस्नानसन्निपातपूर्वादिभिःकृताभिषेकःशुक्लमाल्यांबरधरोय
जमानोविहितपूर्णाहुतिर्गृहीतकुसुमांजलिर्मेरुंप्रदक्षिणीकृत्यसाष्टांगंप्रणम्यतः प्रोक्तमिसादियाहितस्मान्त्र
मोनमइत्यंतमंत्रेणोपस्थायपुष्पांजलिंप्रक्षिप्यनमस्कृत्यप्राङ्मुखउपविश्योदङ्मुखेभ्योगुर्वादिभ्योमेर्वादीन्दद्यात
॥प्रयोगस्तु॥अद्येत्यादिदेशकालकीर्तनांतेअमुकगोत्रायामुकशर्मणेऽध्यापिनमममुकशर्मणोऽतेभ्यंगवेऽमरेणांगंध
र्वगणविराजमानदिव्यविमानकरणकचतुर्दशगमनानंतरस्थायमन्वंतरस्थानावधिसमयदेवलोकनिवासांतमहलो दान॰
कराजत्वप्राप्तिकामोवाङ्मंधान्यमयमेरुंसौवर्णमंदारादिवृक्षयुतंसौवर्णब्रह्मविष्णुशिवार्कप्रतिमायुतंमुक्ताहीर ॥११९॥
कादिभूषितंरौप्यमयपंचगंचतुर्वक्षशोभितंरूप्यमयेंद्रादिलोकपालप्रतिमायुतंरौप्यनितंबेदिशुस्थितभूतपीतक

बेरस्त्रक्वस्त्रमयांबुधरंनानाफलवितानाद्युपकरणसहितंतुभ्यमहंसंप्रददेनममेतितद्धस्तेजलंदद्यात॥स
चॐस्वस्तीत्युक्त्वासावित्रेणयज्ञुषाप्रतिगृह्यस्वशाखीयांकामस्तुतिंपठेत॥ततःकृतैतद्दानप्रतिष्ठार्थमिमा
गांतुभ्यंगुरवेदक्षिणात्वेनसंप्रददेनममेतिगारूपांदक्षिणांदद्यात॥चतुर्विंशतिगोपक्षेःषोगांगुरवेचतसृश्च
तस्त्रऋत्विग्भ्योदद्यात॥दशपक्षेपडुरवेएकैकामृत्विग्भ्यः॥पंचपक्षेसर्वेभ्यएकैकां॥एकपक्षेगुरवेएकांकपि
लां॥ऋत्विग्भ्यस्तुसुवर्णदक्षिणांदद्यादितिविवेकः॥ततःएवमेवाद्येत्यादिप्रयोगांदद्यात॥चतुर्विंशतिगोप
क्षेःषोगांगुरवेचतस्रश्चतस्त्रऋत्विग्भ्योदद्यात॥दशपक्षेषडुरवेएकैकामृत्विग्भ्यः॥पंचपक्षेसर्वेभ्यएकैकां॥
एकपक्षेगुरवेएकांकपिलां॥ऋत्विग्भ्यस्तुसुवर्णदक्षिणांदद्यादितिविवेकः॥ततःएवमेवाद्येत्यादिप्रयोगांते
इमंपूर्वास्थितंधान्यमयमंदरारव्यविष्कंभगिरिंउपरिस्थसौवर्णगणात्रयंसौवर्णभद्रकदंबमस्तलस्थितंधान्य
मयंमंदरारव्यविष्कंभगिरिंउपरिस्थसौवर्णगणात्रयंसौवर्णभद्रकदंबमस्तलस्थितसौवर्णकामदेवमरुणोरस
रःस्थानीयक्षीरपूर्णरौप्यपात्रेरूप्यघटितचैत्ररथवनेनानाफलवस्त्रपुष्पविलेपनाद्यंतुभ्यंमनजित्वसंप्रददेनममे
तिदद्यात॥दक्षिणांचपूर्ववत्प्रयोगेणादद्यात॥एवमेवदक्षिणपश्चिमोत्तरपर्वतान्गोधूमतिलमाषमयान्गंधमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प्र॰ दनविपुलसुवर्णापार्श्वसंज्ञान्यथानिवेशितंतत्तत्प्रदद्याथोनुक्रोशेनदद्यात्॥ततोदेवताविसर्जनंकृत्वायथाशक्तिब्राह्म
णान्भोजयित्वा॥क्षारालवणाभोजीभूत्वापरमैश्वर्यायफलंसमर्पयेत्॥इतिश्रीमद्विद्वज्जनकृपापात्रीभूतेनानंतभ
॥११०॥ चार्येणाविरचितेविधानपारिजातेधान्यादिमेरुदानदशकप्रयोगः॥ ॥अथलवणाचलदानम्॥मात्स्यपाद्मे चात्र
थातःसंप्रवक्ष्यामिलवणाचलमुत्तमं॥यत्प्रदानान्नरोलोकमाप्नोतिशिवसंयुतं॥उत्तमःषोडशद्रोणःकर्तव्योल
वणाचलः॥मध्यमस्यात्तदर्धेनचतुर्भिरधमःस्मृतः॥वित्तहीनोयथाशक्त्याद्रोणादूर्ध्वंचैवकारयेत्॥चतुर्थांशेनविष्कं
भपर्वतान्कारयेत्पृथक्॥अत्रापिपृथगित्युक्तेःप्रत्येकंमेरुद्रव्यचतुर्थांशेनविष्कंभपर्वतकरणमितिगम्यते॥ए
वमग्रेपिज्ञेयं॥विधानंपूर्ववत्कुर्याद्ब्रह्मादीनांचसर्वदा॥तद्वद्धेमतरून्सर्वाँल्लोकपालान्निवेशयेत्॥सरांसिकामदेवा
दीस्तद्वदत्रनिवेशयेत्॥कुर्याज्जागरमत्रापिदानमंत्रान्निबोधत॥सौभाग्यरससंभूतोयतोयंलवणोरसः॥तदात्मकेन
त्वंपाहिपापान्नगोत्तम॥यस्मादन्नरसाःसर्वेनोत्कटालवणंविना॥प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्रयच्छमे॥विष्णु
देहसमुद्भूतंयस्मादारोग्यवर्धनं॥तस्मात्पर्वतरूपेणपाहिसंसारसागरात्॥अनेनविधिनायस्तुदद्याल्लवणपर्वतं॥ राम॰ ॥११०॥
उमालोकेवसेत्कल्पंततोयातिपरांगतिं॥प्रयोगःपूर्ववत्॥सकलपापक्षयपुरःसरउमालोकप्राप्तिपूर्वककल्पावधिस

मयपार्वतीलोकनिवासोत्तरंपरमगतिप्राप्तिकामइतिसंकल्पवाक्येविशेषः॥इतिलवणाचलदानं॥ ॥अथगु
डाचलदानविधानम्॥पाद्मे॥अथातःसंप्रवक्ष्यामिगुडाचलमनुत्तमं॥यत्प्रदानान्नरःस्वर्गंप्राप्नोतिसुरपूजितं॥
उत्तमोदशभिर्भारैर्मध्यमःपंचभिर्मतः॥त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान्॥भारपरिमाणपरिभाषा
यामभिहितं॥पलसहस्रद्वयंतद्वद्दामंत्रराणांप्रज्ञाहोमवक्ष्यसुरार्चने॥विष्कंभपर्वतास्तद्वत्सरांसिवनदेवताः॥
होमोजागरणंतद्वल्लोकपालाधिवासनं॥धान्यपर्वतवत्कुर्यादितिमंत्रान्नारीणांपार्वतीयथा॥तथारसानांप्रव
रोवरोवरःसदैवेक्षुरसोत्तमः॥मन्मतस्मात्पराँल्लक्ष्मींदत्स्वगुडपर्वत॥यस्मात्सौभाग्यदायिन्याभ्राताखंगुडपर्वत॥नि
वासश्चापिपार्वत्यास्तस्मान्मांपाहिसर्वदा॥अनेनविधिनायस्तुदद्याद्गुडमयंगिरिम्॥पूज्यमानःसगंधर्वैर्गौरीलो
केमहीयते॥पुनःकल्पशतांतेतुसप्तद्वीपाधिपोभवेत्॥आयुरारोग्यसंपन्नःशत्रुभिश्चापराजितः॥अत्रसकलपाप
क्षयोत्तरगंधर्वपूज्यमानत्वपूर्वककल्पशतावधिसमयगौरीलोकप्राप्त्यनंतरसकलपराजितत्वायुरारोग्यसमेतस
प्तद्वीपाधिपत्यकामइतिसंकल्पवाक्येविशेषः॥अन्यत्सर्वंसमानं॥इतिगुडाचलदानम्॥ ॥अथसुवर्णाचलदानं॥
पाद्मे॥अथपापहरंवक्ष्येसुवर्णाचलमुत्तमं॥यस्यप्रदानात्सकलदानस्यफलमाप्यते॥उत्तमःपलसाहस्रोमध्यमःपंचभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० श्रौतैः ॥ तद्देवं नाम मत्तद्दृष्टिमयः प्रतिपादयेत् ॥ सर्वमेवं तत्र कुर्वीत स्वल्पवित्तोपि शक्तितः ॥ दद्यादेकपलादूर्ध्वं यथा
शक्त्या विमत्सरः ॥ धान्यपर्वतवत्सर्वं विदध्याद्दानेन तत्फलं दत्त्वाप्नोति हि त्रिलोकीं च यः ॥ यस्मादग्रेरपसंखं पवित्रं च जग
॥१२१॥ त्पति ॥ हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ॥ अनेन विधिना यस्तु दद्यात्काञ्चनपर्वतं ॥ स याति परमं स्थानं ब्रह्मालमा
नंदकारकं ॥ तत्र कल्पशतं तिष्ठेत्ततो याति परां गतिमिति ॥ अत्र गर्वादिभ्यो भेदो द्विहन मल्प द्रव्यविषयं ॥ परिमा
णाबहुत्वे तु चतुर्थांशादिग्रखेदस्त्वा तदनुकल्पोऽप्यपि विभज्य दद्यादिति हेमाद्रिः ॥ अत्र सकलपापक्षयोत्तर
नंदकारकब्रह्मलोकाधिकरणाककल्पशतावधिकालावस्थानोत्तरं परमगतिप्राप्तिकाम इति संकल्पवाक्ये विशेषः
॥ इति सुवर्णाचलदानम् ॥ ॥ अथ तिलाचलदानविधानं ॥ पाद्मे ॥ अथातः संप्रवक्ष्यामि तिलशैलं विधानतः ॥ यत्प्र
दानाद्व्रजत्याशु विष्णुलोकमनुत्तमं ॥ उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमो मतः ॥ त्रिभिः कनिष्ठो राजेंद्र तिलशैलः
प्रकीर्तितः ॥ पूर्ववच्चापरं सर्वं वक्ष्ये विष्कंभकादिकं ॥ दानमंत्रान्प्रवक्ष्यामि यथावद्द्विजपुंगव ॥ यस्मान्मधुवधे विष्णो
र्देहस्वेदसमुद्भवाः ॥ तिलाः कुशाश्च माषाश्च तस्माच्छं नो भवत्विति ॥ हव्यकव्येषु यस्मात्त्वतिलैरेवाभिरक्षणं ॥ भ राम०
वादुद्धर शैलेंद्र तिलाचल नमोस्तु ते इत्यामंत्र्य च यो दद्यात्तिलाचलमनुत्तमं ॥ स वैष्णवं पदं याति पुनरावृत्तिदुर्लभं ॥ ॥१२१॥

दीर्घायुष्यमवाप्नोति पुत्रपौत्रैश्च मानवः ॥ पितृभिर्देवगंधर्वैः पूज्यमानो दिवं व्रजेत् ॥ अत्र नानमंत्रान्प्रवक्ष्यामीत्युपक्र
म्य इत्यामंत्र्य च यो दद्यादित्यादिना तेषामंत्रणार्थत्वाभिधानाल्लवत्वान्त्वलादिषु सर्वत्रामंत्रणार्थता ज्ञेया ॥ अत्र सकल
पापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वितत्वोत्तरपितृदेवगंधर्वपूज्यमानत्वपूर्वकविष्णुलोकप्राप्तिकाम इति संकल्प
वाक्ये विशेषः ॥ अन्यत्समानम् ॥ इति तिलाचलदानम् ॥ ॥ अथ कार्पासाचलदानविधानं ॥ पाद्मे ॥ कार्पासपर्वतस्त
द्विंशद्भारैरिहोदितः ॥ दशभिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः ॥ भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः ॥ धान्य
पर्वतवत्सर्वमासाद्य मनुजोत्तमः ॥ प्रभातायां तु शर्वर्यां दद्यादिममुदीरयेत् ॥ त्वमेवावरणं यस्माल्लोकानामिह सर्वदा
॥ कार्पासाचल तस्मात्त्वमघौघध्वंसनो भव ॥ एवं कार्पासशैलेंद्रं यो दद्यात्सर्वतः सविधौ ॥ रुद्रलोके वसेत्कल्पं ततो राजा
भवेदिह ॥ अत्र सर्वपापक्षयपूर्वककल्पावधि समय रुद्रलोकवासानंतरेन रलोके राजत्वकाम इति संकल्पवाक्ये विशेषः
॥ अन्यत्पूर्ववत् ॥ इति कार्पासाचलदानम् ॥ ॥ अथ घृताचलदानविधानम् ॥ पद्मपुराणे ॥ अथातः संप्रवक्ष्यामि घृ
ताचलमनुत्तमम् ॥ तेजोमयमिदं दिव्यं महापातकनाशनम् ॥ पद्मपुराणे ॥ विंशत्या घृतकुंभानामुत्तमः स्याद्घृताचलः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान•प्र• ॥१२२॥ मध्यमस्तत्तदर्द्धेन तत्तदर्द्धेनाधमः स्मृतः॥ अल्पवित्तःयःकुर्वीत घाम्यामि ह विधानतः॥ कुंभपलसहस्त्र मितैः परिमाणावि
शेषतः॥ विष्कंभपर्वतांस्तद्वच्चतुर्भागेन कारयेत्॥ शालितंडुलपाराशौ कुंभोपरि निवेशयेत्॥ कारयेत्संहितान्सर्वान्य
थाशोभविधानतः॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः॥ अत्र घृतस्य द्रवद्रव्यत्वात्साक्षाद्दासादनीयोग्यत्वेपि कुं
भोपरि तिष्ठवराच्छतिधरपात्रांतरगतैः कुंभास्थितं घृतमासाद्य तद्गुपरि तंडुलस्तोपात्रासादनमिति गम्यते॥ अधिवा
संचकुर्वीतत यथोमसुरार्चनं॥ प्रभातातु शर्वर्यां गुरवे विनिवेदयेत्॥ घृताचलं तिष्ठंपार्श्वे ऋत्विग्भ्यः शांतमानसः॥
संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः॥ तस्माद्घृतार्चिर्विश्वात्मा प्रीयतामत्र शंकरः॥ यस्मात्तेजोमयं ब्रह्म घृते तस्य व्यवस्थि
तं॥ घृतपर्वतरूपेण तस्मात्त्वं पाहि भूधर॥ अनेन विधिना दद्याद्घृताचलमनुत्तमं॥ महापातकयुक्तोपि लोकमायाति शां
करं॥ हंससारसयुक्तेन मुक्ताजालमालिना॥ विमानेनार्कवर्णेन सिद्धविद्याधरार्चितः॥ विचरेत्पितृभिः सार्द्धं यावदाभूत
संप्लवं॥ अत्र आकल्पपातकनाशपूर्वक हंससारसयुक्तं किंकिणीघंटादि विमानकरणक शांकरलोकप्राप्तिपूर्वकसिद्ध दान• ॥१२२॥
विद्याधरार्चितत्वपूर्वकमाभूतसंप्लवावधि पितृसंसहितः शांकरलोककाम इति संकल्पवाक्ये विशेषः॥ शेषं वदन्यत्॥ इति घृतप
र्वतदानम्॥ ॥अथ रत्नपर्वतदानविधानम्॥ पाद्मे॥ अथातः संप्रवक्ष्यामि रत्नाचलमनुत्तमं॥ मुक्ताफलसहस्रेण पर्वत

स्यादिहोत्तमः॥ मध्यमः पंचशतिकस्त्रिशतेनाधमः स्मृतः॥ चतुर्थांशेन विष्कंभपर्वताः स्युः समंततः॥ पूर्वेण वज्रगोमे
दैर्दक्षिणेनेंद्रनीलकैः॥ वज्रगोमेदैर्युतो मंदरः कार्य इति शेषः॥ पद्मरागैर्युतः कार्यो विद्वद्भिर्गंधमादनः॥ वैडुर्यदु
मैः पश्चात्संमिश्रो विपुलाचलः॥ पद्मरागैः ससौवर्णैः कृत्तरेणात्तु विन्यसेत्॥ अत्र सुपार्श्वमिति शेषः॥ पूर्ववदृ
त्विग्भ्य इमान्मंत्रानुदीरयेत्॥ प्रदानाय इति शेषः॥ यथा देवगणाः सर्वे रत्नेष्ववस्थिताः॥ त्वं च रत्नमयो नित्यमतः पा
हि महाचलः॥ यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः॥ महारत्नप्रदानेन तस्मान्नः पाहि पर्वतः॥ अनेन विधिना यस्तु द
द्याद्रत्नमहागिरिं॥ स याति वैष्णवं लोकममरेश्वरपूजितः॥ यावत्कल्पशतं साग्रं वसेदिह नराधिप॥ रूपारोग्यगुणोपेतः
सप्तद्वीपाधिपो भवेत्॥ ब्रह्महत्यादिकं चेत्यादिह वामुत्र वा कृतं॥ तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा॥ अत्र ब्रह्मह
त्यादिसकलपापक्षयोत्तरममरेश्वरपूर्वक साग्रकल्पशतावधिकालं विष्णुलोकनिवासोत्तर रूपारोग्यगुणोपेतसप्त
द्वीपाधिपत्यकाम इति दानवाक्ये विशेषः॥ इति रत्नाचलदानविधानम्॥ ॥अथ रौप्याचलदानविधानं॥ पाद्मे॥ अथातः
संप्रवक्ष्यामि रौप्याचलमनुत्तमम्॥ यस्य दानात्तु रोयाति सोमलोकमनुत्तमं॥ दशभिः पलसाहस्रैरुत्तमो राजताचलः॥ पंचभि
र्मध्यमः प्रोक्तस्तदर्द्धेनाधमः स्मृतः॥ अशक्तो विंशतेरूर्ध्वं कारयेच्छक्तितः सदा॥ विष्कंभपर्वतांस्तद्वत्तुरीयांशेन कारयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ पूर्ववद्रजतान्कुर्यान्मंदरादीन्विधानतः॥कलधौतमयांस्तद्वल्लोकेशानर्चयेद्बुधः॥कलधौतं कांचनं॥ब्रह्मविष्ण्वर्कवत्कः का
र्यो नितंबोत्र हिरण्मयः॥रजतस्याद्यदन्येषां सर्वं तदिह कांचनं॥शेषं च पूर्ववत्कुर्याद्धोमजागरणादिकं॥दद्यात्तद्वत्प्र
॥१२३॥ भाते तु गुरवे रौप्यपर्वतं॥विष्कंभशैलानृत्विग्भ्यः संपूज्य स्वाग्विभूषणैः॥इमं मंत्रमुदं दद्याद्दर्भपाणिर्विमत्सरः॥पित
णां वल्लभं यस्माद्धरींद्रशंकरस्य च॥रजतं पाहि तस्मान्नः शोकसंसारसागरात्॥इत्थं निवेद्य यो दद्याद्रजताचलमु
त्तमं॥गवायुतसहस्रस्य फलं प्राप्नोति मानवः॥सोमलोके संगंधर्वैः किंनराप्सरसां गणैः॥पूज्यमानो वसेद्विद्वान्यावदाभू
तसंप्लवं॥अत्र गवायुतसहस्रदानफलानि पूर्वकं गंधर्वकिंनराप्सरोगणैः पूज्यत्वपूर्वकं यावदाभूतसंप्लवं तावत्सो
मलोकवसतिकाम इति संकल्पवाक्ये विशेषः॥अन्यत्सर्वं पूर्ववत्॥इति रौप्याचलदानं॥ ॥अथ शर्कराचलदानविधानं॥अ
थातः संप्रवक्ष्यामि शर्कराचलमुत्तमं॥यस्य प्रदानाद्विष्ण्वर्करुद्रास्तुष्यंति सर्वदा॥अष्टभिः शर्कराभारैरुत्तमः स्यान्महाच
लः॥चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः॥भारेणार्द्धभारेण कुर्याद्यः स्वल्पवित्तवान्॥विष्कंभपर्वतान्कुर्यात्तुरी दान॰
यांशेन मानवः॥धान्यपर्वतवत्सर्वमासाद्यमरसंयुतं॥मेरोरुपरि तद्वत्स्यात्स्थाप्यं हेमतरुत्रयं॥मंदारः पारिजातश्च तृतीयः ॥१२३॥
कल्पपादपः॥एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत्॥हरिचंदनसंतानौ पूर्वपश्चिमभागयोः॥निवेश्यौ सर्वशैलेषु वि

शेषाच्छर्कराचले॥मंदरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत्॥गंधमादनशृंगे तु धनदः स्यादुदङ्मुखः॥प्राङ्मुखो
वेदमूर्तिश्च हंसः स्याद्विपुलाचले॥हैमी सुपार्श्वे सुरभिर्दक्षिणाभिमुखी भवेत्॥धान्यपर्वतवत्सर्वमावाहनमखा
दिकं॥कृत्वाथ गुरवे दद्यान्मध्यमं पर्वतोत्तमं॥ऋत्विग्भ्यश्चतुरः शैलानिमान्मंत्रानुदीरयेत्॥सौभाग्यामृतसारोयं
परमः शर्कराचलः॥तन्मामानंदकारी त्वं भव शैलेंद्र सर्वदा॥अमृतं पिबतां ये तु निपेतुर्भुवि सीकराः॥देवानां तत्स
मः सोयं पाहि त्वं शर्कराचल॥मनोभवधनुर्मध्यादुद्भूता शर्करा यतः॥तन्मयोसि महाशैल पाहि संसारसागरा
त्॥यो दद्याच्छर्कराशैलमनेन विधिना नरः॥सर्वपापविनिर्मुक्तः प्रयाति शिवमंदिरं॥चंद्रादित्यप्रतीकाशमधिरु
ह्यानुजीविभिः॥सहैव यानमातिष्ठेत्ततो विष्णुपुरं व्रजेत्॥ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत्॥आयुरारोग्यसंपन्नो
यावज्जन्मायुतत्रयं॥भोजनं शक्तितः कुर्यात्सर्वशैलेष्वमत्सरः॥सर्वत्राक्षारलवणमश्नीयात्कुर्वतां तथा॥भोजनेक्षल
णानामिति शेषः॥पर्वतोपस्करान्सर्वान्प्रापयेद्ब्राह्मणालयं॥पद्रेपदिमानप्यधनोपि भक्त्या स्मरत्येतान्मनुष्यैति हरी
यमाणान्॥श्रृणोति भक्त्याप्यथ मतिं ददाति निःकल्मषः सोपि दिवं प्रयाति॥दुःखप्रणाशमुपैति परापमाने शैलेंद्र
भवभयभेदनेमनुष्यः॥यः कुर्यात्किमु मुनिपुंगवेह सम्यक्तस्मात्तमासकलगिरींद्रसंप्रदानं॥स शांतात्मा प्रसन्नमनाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रदान॰प्र॰ ॥ अत्र सकलकलुषक्षयानंतरं विस्वर्ककरू इतोषर्दवैकमनुज्ञो विसहितचंद्रादित्यप्रतीकाशविमानाधिरोहणपू
॥१२७॥ र्वं शिवमंदिरगमनोत्तरकल्पशतावधिसमयविष्णुलोकवासनोत्तरं सप्तद्वीपाधिपत्यतरजन्मायुतत्रयावच्छिन्ना
युरारोग्यकाम इति दानसंकल्पवाक्ये विशेषः ॥ अन्यत्सर्वं धान्यमेरुवत् ॥ इति विधानपारिजाते निबंधे धान्यादिदश
शैलदानानि ॥ ॥ अथ शिखरदानविधानम् ॥ विष्णुधर्मोत्तरे ॥ राम उवाच ॥ शिखराणां समाचक्ष्व दानं त्रिपुरनाशन
याति दत्त्वा तु दौर्भाग्यं दौर्गं संचनरोचनं ॥ शंकर उवाच ॥ शृणु राम प्रवक्ष्यामि शिखराणां यथाक्रमम् ॥ दानं देयं य
थायेन तच्छृणुष्व सनातनम् ॥ माघशुक्लतृतीयायां मार्गशीर्षस्य वा पुनः ॥ तृतीयायामथ वैशाखे शुक्लायां रोहिणी
युता ॥ प्रोष्ठपद तृतीयायां विशेषेण तु भार्गव ॥ गुडेक्षुवस्त्रलवणधान्यकाजातिचार्कीः ॥ खर्जूरतंदुलद्राक्षास्तै
र्द्रमलयजेन वा ॥ फलैर्मनोरमैरम्यैः शिखराणि प्रदापयेत् ॥ चार्करा इति प्रथमा तृतीयार्थे ॥ एषामन्यतमं देयं यथाश्र
विधानतः ॥ आत्मप्रमाणं कुर्वीत प्रादेशाभ्यधिकं शुभं ॥ भुविगोमयलिप्तायामिक्षुपत्राणि संस्तरेत् ॥ ततः कुर्वीत शिख दान॰
रं गौरीस्थानमनुत्तमं ॥ द्विहस्तममलं कृत्वा हस्तमात्रं शिरस्तथा ॥ भित्तिरिक्षुदलैः कार्या वेष्टयेद्रक्तवाससा ॥ दा ॥१२७॥
नद्वयेनात्मधूपयेद्गुग्गुनेदत्तं ॥ इक्षुपत्रकृते गौरीं तत्सोपरि निवेशयेत् ॥ चतुर्भुजं हिममयीं पूजयेत्कुंकुमेन तु

॥ गौरीलक्षणं देवीपुरारोः ॥ खड्गं कुंदवस्त्रवर्णा मा शर्वरी शान्तिविवर्जिता ॥ दक्षिणपद्मासनासीनां साक्षसूत्रकमंडलु
म् ॥ वरदोद्यतहस्ताब्जां सर्वकामफलप्रियां ॥ इति ॥ वेष्टयेत्सूक्ष्मवस्त्रेणादेवी शिखरमेव च ॥ अष्टांगे पूजयेत्सौ
रीमंत्रैरेतैस्तु भक्तितः ॥ नमो भवान्यै पादौ तु कामिन्यै जानुनी ततः ॥ वामदेव्यै तथा चोरू नाभिं चैव तु गांछियै ॥
आनंदायै तु हृदयं नहायै पूजयेत्स्तनौ ॥ शुभद्रायै मुखं पूज्यं ललितायै नमः शिरः ॥ एवं संपूज्य महादेवीं शिखरमभि
मंत्रयेत् ॥ यस्मात्त्रिवासः पार्वत्याः शिखरं त्वं सुरैर्हितः ॥ तस्मान्मां पाहि भगवं त्वं गौरीशिखरः सदा ॥ एवमामंत्र्य शि
खरं तृतीयायां यतव्रतः ॥ ततः स्नात्वा प्रभाते तु दद्यान्मंत्रेण भक्तितः ॥ यस्मात्त्वं सर्वदानानामुपरिष्टाद्व्यवस्थितः ॥ तस्मा
च्छिवः प्रीयतां मे दानात्फीरजाधिपः ॥ अर्द्धभागं चतुर्थं वा पंचमं वा ततो गुरोः ॥ दत्वा शेषं तु वेश्यानां ब्राह्मणानां स्वजु
नस्य च ॥ अनुज्ञो विस्वभक्तानां दुर्गतानां च कामतः ॥ एवं दत्वा तु शिखरं गौर्या भुंजीत वाग्यतः ॥ समुक्तकेशः संप्राप
क्षीरं घृतमथापि वा ॥ विधिनानेन यो दद्यात्फीर्याः शिखरमुत्तमं ॥ स वसेद्भवने देव्याः कल्पकोटिशतत्रयं ॥ पुण्यक्षया
दिहागम्य जायते पृथिवीपतिः ॥ अनेन विधिना देव्याः कल्पकोटिशतत्रयं ॥ अनेन विना देयं विधिहीनं न कारयेत्
॥ विधिहीनं कृतं सर्वं नदातुः फलदं भवेदिति ॥ ॥ अथ प्रयोगः ॥ शिखरदानं चिकीर्षुर्माघशुक्लतृतीयाद्युक्तकाले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५दान०प्र० कृतनित्यक्रियउपलिप्तेदेशेसमासीनोगणाधिपतिंसंपूज्यपुण्याहंवाचयित्वादेशकालादिसंकीर्तनांतेदौर्भाग्यदौर्ग
॥१२५॥ त्यरहितकल्पकोटिशततत्रयापावच्छिन्नसमयगौरीभवननिवासानंतरपृथिवीपतित्वकामःश्वोगुडाद्रिशिखर
दानमहंकरिष्यइतिसंकल्प्यगुरुंवृत्वावस्त्रालंकारगंधमाल्यादिभिःसमभ्यर्च्यगोमयेनोपलिप्तायांभूमौहस्तप
त्राणिसंस्तीर्यमूलदेशेद्विहस्तविस्तारमुपरिदेशेहस्तमात्रविस्तारंचतुरस्रंकुसूलिकाकारंस्वशरीरोर्ध्वप्रमाणा
तःप्रादेशाधिकपरिमाणामिक्षुदंडमयीतिनिर्मायतांभितिमभ्यंतररत्नैर्वस्त्रेणावेष्टयित्वागौरीमावाहनाद्युपचारैःप्र
तिष्ठापूर्वकमभ्यर्च्यकुंकुमगंधेनावलिप्यांगपूजांकुर्यात॥तद्यथा॥ॐभवान्यैनमःपादौपूजयामि॥कामिन्यैन
मोजानुनी॰वामदेव्यैनमऊरू॥जगद्धात्र्यैनमोनाभिं॥आनंदायैनमोहृदयं॰॥नंदायैनमःस्तनौ॥सुभद्रायैनमो
मुखं॰॥ललितायैनमःशिरःपूजयेत॥ततःकर्त्तापुष्पांजलिशिरस्थैःप्रदक्षिणामाकृत्वानुमंत्रयेत॥तत्रमंत्रः॥
यस्मात्त्रिवासःपार्वत्याःशिखरंत्वंसुरैर्वृतः॥तस्मान्मांपाहिभगवंस्त्वंगौरीशिखरःसदा॥इतिपुष्पांजलिंप्रक्षिप्यनमस्कृ राम०
त्यदेव्येततोजागरंकृत्वाप्रभातेकृतनित्यःशिखरपश्चिमभागेप्राङ्मुखउपविश्याद्येत्यादिसंकीर्त्तनांतेदौर्भाग्यदौर्ग ॥१२५॥
त्याभावपूर्वककल्पकोटिशततत्रयावच्छिन्नसमयगौरीभवननिवासानंतरपृथिवीपतित्वकामोहममुकगोत्रोऽमुक

शाखाध्यायिभ्योगुर्वादिभ्योबंधुशिष्टजनानुजीविभृत्यादिभ्यश्चेमंयथोपस्कृतंशिखरंसंप्रददेनममेतिगुर्वादिह
स्तेजलंदद्यात॥तेचस्वस्तीत्युक्त्वासावित्र्यायजुषाप्रतिगृह्यकामस्तुतिंस्वांस्वांपठेरन्॥ततःकृतेतच्छिखरदानप्रति
ष्ठार्थमिदंस्वर्णदक्षिणात्वेनसंप्रददेनममेतिदद्यात॥अत्रगुरवेशिखरार्द्धंतदर्द्धंवादत्वान्येभ्योविभज्यदेयं॥त
तःक्षीरंघृतंवावाग्यतोमुक्तकेशःप्राश्नीयात॥एवमिक्ष्वादिशिखरप्रयोगः॥इतिश्रीविधानपारिजातेगुडादिशिख
रदानानि॥ ॥अथाष्टानिमहादानानिदश्योच्यंते॥कार्ष्णे॥कनकाश्वतिलागावोदासीरथमहीगृहं॥कन्याचकपि
लाधेनुर्महादानानिवैदश॥तत्रादौसुवर्णदानं॥सुवर्णोत्पत्तिरुक्तास्कांदे॥महेश्वरस्ययद्रेतःपवित्रंशुक्रमुत्तमम
॥समाक्रम्यपुरागौर्यायुराधर्षमतोमतः॥देवतानांहितार्थायवन्हौप्राक्षिपतपुरा॥मुखेनैवापिबद्वन्हीरेतःशुक्रंपि
नाकिनः॥तदुष्मनपरीतसन्गंगायांप्राक्षिपत्सनः॥क्षपितश्चपुनर्गंगासमुद्रःसरिद्गणाः॥भूम्यांनिपातयामास
पर्वतेरम्यपातपत॥ततोयःपिंडवद्भूमिःसमभूमिकुलपर्वते॥ततस्तदैश्वरंरेतःस्वरसेनसयावकं॥दधात्समस्तभु
वनंजातंसंस्थिरंगांप्रति॥ततःस्कंदःसमभवत्स्कंदसंपर्कितज्जलं॥तत्स्कंदंस्वर्णमभवद्दिव्यादि॥वन्हिप्राणोपि॥ए
तत्पवित्रमतुलंसंभूतमिहसुव्रत॥शोभावीजंमहातेजोरूपसंज्ञातवेदसः॥सहजंकार्त्तिकेयस्यरुद्रभक्तेसमुद्भवं॥पवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ त्त्वात्सुरैः सर्वैर्धार्यते मुकुटादिषु॥ अग्निस्तु देवताः सर्वाः सुवर्णं च तदात्मकं॥ तस्मात्सुवर्णे दत्ते वै प्रीताः स्युः सर्वदे

॥१२६॥ वता इति॥ अथ सुरस्कंधस्यैवं वा तदनुज्ञया॥ वाञ्छते न विधानेन ताम्रेण घटेन॥ तानाधाय न्यस्य दत्त्वा यदैर्मंत्रैः॥ पौ

राणिकं गुरुं॥ हुत्वा त्रिपोग्निसंनिध्ये विसर्जयेत्रमस्य चांडजं॥ इमान्समुद्धरेन्मंत्रान्कुंचापाणिः प्रसन्नधीः॥ ॐ नमः सर्व

दानंदसर्वसंपद्विवर्द्धय॥ स्मान्समध्ये हे आपुषाय त्रासाश्रिया॥ नमस्ते नंतन मः पात्राक्षराप्रमेयनमोस्तु वामायसुना

मधेय॥ नमः समीराय हुताशनाय हुतांगनाय नमोस्त्वनंताय कंजासनाय॥ नमः सुरश्रेष्ठ हरीश्वराय नमोस्तु सावि

त्रिश्रिवेश्रियेति॥ सरस्वति प्रीति रति श्रिये ति मुपुष्टि तुष्टि स्मृति शांति कीर्ते॥ सर्वामराणां निधिरप्रमेयस्त्वमेव मंत्रेर्षि

मुनीश्वराणः॥ आधारभूतो हि चराचरस्य विश्वस्य यस्मात्सुवर्णतो सम्मतस्त्वं॥ नमोस्तु सौंदर्य निधे सुरेश्वान मो स्तु गांभीर्य

निधे समुद्र॥ नमो नमः कांतिनिधानइंद्रो तेजो निधे त्वां प्रणतोस्मि भानो॥ नमः पद्मापमद्राय नमस्ते स्वस्तिकाय च॥ नमः

श्रीवत्साय महापे मणिभद्राय ते नमः॥ नमोनंदिविवर्त्ताय नंद्यावर्त्ताय वर्तिने॥ नमस्कारकरूपाय कंदावर्त्ताय ते नमः॥ न दान॰

मो नरप्रतिष्ठाय नमो हेमप्रियाय च॥ नमो हिरण्यगर्भाय निधानेशाय ते नमः॥ एवं प्रदेत्ति योजना॥ तिललाजासु संपूर्णां ॥१२६॥

भूमौ दत्त्वा कुमुत्सृजेत॥ मंत्रेणानेन विधिवत्त्वकल्पोक्तेन खगोत्तम॥ अथेह पुरायकाले स्मिन्द्विजे देवाग्निसन्निधौ॥ यत्राः

श्रेयोभिवृद्ध्यर्थं मातापित्रोस्तथात्मनः॥ पुराणन्यायमीमांसावेदवादिभ्य एव च॥ तेभ्यो विद्याविधापिभ्यो नानागोत्रेभ्य

एव च॥ विप्रेभ्योनेकशर्मभ्यो निस्तानंदनिधिं परं॥ अहं संप्रददे तेभ्यो नानाश्रुतेन च॥ सुवर्णं रूप्यताम्रेण सत्वेन सवास

सा॥ सोपस्करेण पुरुषोत्तमविष्णुशिवात्मकः॥ प्रीयतां निधिदानेन श्रीयज्ञपुरुषोत्तमः॥ एवमुत्सृज्य तां तु विप्रेभ्यः प्र

तिपादयेत॥ स विभज्य यथाशास्त्रं न किंचिदवमानयेत॥ महादानमिदं यस्मात्तस्मादेकोपि नार्हति॥ अथान्येके चि

दिच्छंति समस्तविधिपारगाः॥ तत्प्रदानव्रतानि च सोप्येकोर्हति तत्र हे॥ एवं यः कुरुते दानं निधेः परपावनं॥ परं पदमवाप्नो

तिसंसारेपि नितरां॥ दानानामपि शेषाणामनंतं फलमश्नुते॥ निस्तानंदनिधानस्य प्रदानादपवर्गभाक्॥ यस्त्वेवं सहृद

त्रैव सदानंदविधानकृत॥ स कोटिकुलमुद्धृत्य अक्षयं वेधसः पदे॥ यथाकथंचिद्दत्त्वेति स्वकर्मगणसंयुतः॥ तदा तिलम

हीराज्यं प्राप्नोति त्रेतसंज्ञके॥ पुनः स्वधर्मसंयुक्तो राज्यं कृत्वा ससानुगः॥ प्राप्नोति परमं स्थानं नित्यमक्षयमव्ययं॥ तस्मादे

त्वपुनाराज्यं लभेद्धावेरपदे॥ आकल्पमप्यनल्पश्रीः श्रीनिधानाख्यमाख्यातं वैनतेय ते॥ तवापि सासखत्रेन किमन्यत्कथ

यामि ते॥ निस्तानंदनिधेर्दानाच्चिस्तानंदो भिजायते॥ यः कुर्यात्सोच्युतात्पुः स्यात्स दीर्घसंतानमाप्नुयात्॥ यस्तत्संकीर्तयेज्जन्म

पः श्रृणोति समाहितः॥ स दीर्घमायुराप्नोति मुच्यते सर्वकिल्बिषैरिति॥ ॥ अथास्य प्रयोगः॥ कर्त्ता सर्वर्तुदेशकालौ पुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध दान॰प्र॰ णोक्तफलप्राप्तिकाम आनंदनिधिमहादानं करिष्य इति संकल्प्यास्य महादानत्वात् ॥ प्रमात् रुजाभ्युदयिकश्राद्धं दे
॥१२७॥ त्वाचार्यं हुत्वाद्‌ध्वश्च हुत्वेकं त्विजश्च हत्वा तेभ्योव स्त्रमुद्रिका कुंडलादि दत्वा निष्यासादनं कुर्यात् ॥ तद्यथा ॥ नानारत्न
स्वर्णरौप्यताम्रमुद्रा यथाशक्ति संपाद्य वादश पलादिपरिमितस्वर्णयुतं ॥ रौप्यपिधानं ताम्रघटरूपमानंदनिधिं सु
सूक्ष्मवस्त्रैः वेष्टितं सुरूपालिप्तम तत्र लभ्य स्याष्टादशाख्यो परिपि स्वादिदेवता संनिधौ स्थापयित्वानंदनिधेः प्रतिष्ठापू
र्वकं ॐ निसानंदनिधये नम इति मंत्रेणावाहनाद्युपचारै रभ्यर्च्य सिद्धार्थ दूर्वाकुंकुम चंदनाक्षतानादायानंदनिधिं प्रदक्षि
णीकृत्य ॐ नमः सर्वदानं देसादि सर्वान् मंत्रैस्तृप्यस्याय महादानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां संप्रददे न मम
मेति दक्षिणां यथाशक्ति दद्यात् ॥ अस्य महादानस्य ग्रहीतुरेकस्य पात्रस्यासुलभत्वे ब्राह्मणेभ्यस्तं निधिं विभज्य दद्यादित्या
नंदनिधिदानप्रयोगः ॥ ॥ अथ भद्रनिधिदानविधानं ॥ वह्निपुराणे ॥ इंद्र उवाच ॥ भगवन्सर्वमाख्यातं हेषदानक्रि
याफलं ॥ इच्छाम्यपरं हं पुराणं सदाक्षय्यफलप्रदं ॥ दानं त्रैलोक्यनाथस्य हरेः प्रीतिविवर्द्धनं ॥ यस्य जन्मायुतानां तेपि
दानस्यांतो न विद्यते ॥ तद्वदस्व विभो येन दत्तेन त्रैः प्रतुष्यति ॥ द्विकालात्मा च वित्तैः स दानं दयो हरिः ॥ तत्कथं भगवन् राम॰
भक्तो भवेद्धेममयो हरिः ॥ केन दानेन तपसा व्रतेन यज्ञेन वा ॥ मुच्यते पातकाद्घोरात् जन्ममरणांतिकात् ॥ कथं भव ॥१२७॥

रः श्रीमान्धीमान्पुत्री प्रतापवान् ॥ अमितायुस्तथारोगः सकलैश्वर्यभाक् सुधीः ॥ कस्य जन्मायुतानां तेपि दानस्यांतो
न विद्यते ॥ केन तत्परमाप्नोति विस्तार्य तत्परमं पुमान् ॥ श्रीतु महामिदैव ब्रह्मन्वैस्मवं मन्यसे यदि ॥ तत्प्रसादादखिलं ज्ञा
नेन त्वमाचक्ष्व मे गुरो ॥ ब्रह्मोवाच ॥ आनंदं ब्रह्मणो रूपं यच्छ्रुत्यादिषु गीयते ॥ सर्वावासो विभुः साक्षात् दानं देन व्यव
स्थितः ॥ तस्माद्दानं ददं पुण्यं देयानंदनिधिं परम् ॥ विप्रायाच्युत तत्पाय वर्द्धापानंदमुत्तमं ॥ दानेनानेन भो शक्र धातु
त्रयपुत्रेत च ॥ इंद्र उवाच ॥ विधानं ब्रूहि मे ब्रह्मन् दानस्यास्य महाप्रभो ॥ ब्रह्मोवाच ॥ पुण्यां तिथिं प्राप्य तु पौर्णमासी
तथोपरागे त्वग्निसूर्ययोर्वा ॥ चतु[illegible]र्युगादिष्वयने द्वयेवा प्रबोधने प्रस्वपने च विष्णोः ॥ कुर्याद्यथोक्तं वरमेव कुंभं हि
रण्यमानेन यथात्मशक्त्या ॥ हिरण्यमानेन प्रक्षेत्त्यभारादिपरिमितसुवर्णानुसारेणाद्येन सुवर्णेन हीरकादिरत्न
सहितेन एरण्याया वत्कुंभः सामावत्र मात्रां कुर्यादित्यर्थः ॥ तथा पिधानं च रातं स्याच्छिरण्यभारेरातु सूरये तं ॥ तदर्द्धतो
र्द्धेन तदर्द्धतो वा स्वशक्तितः सर्पिपलैः शतेन ॥ तदर्द्धमर्द्धेन तु वित्तशक्त्या पलत्रयादूर्ध्वमपि प्रकुर्यात् ॥ तत्ताम्रभांडे
कनकं निधाय सवज्रनीलोत्पलपद्मरागं ॥ समुक्तवैदूर्यसविद्रुमं च तदाजतं पात्रमधोमुखं स्यात् ॥ तत्पिधानं ॥ स्वंतु
तं भद्रनिधिं सुविद्वान् हंसात्वा सनेप्रावरणीय युक्तं ॥ प्रावरणं तत्र छदेनोपयुक्ते सहिते ॥ कुर्वीतरे दर्पणचामराचं सपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰ प्र॰ दुकोपानहच्छत्रयुक्तं॥ तं शैलमवलोक्तमयुगमयुक्तं संपूजयेन्मंत्रवैरैश्च तैः॥ आदौ तु पंचामृतमाप्य विष्णुं संस्नाप्य सं
॥१२८॥ साहरं समर्च्य॥ ततश्च वैश्वानरं पावकमेव हुत्वा तथा मंत्रयेद्भद्रनिधिं ततस्तं॥ श्रीखंडकर्पूरसकुंकुमेन पंचाक्षरं नाम स्त्रियः
प्रलिख्य॥ नमस्तथोंकारयुतं च पात्रे तद्व्रजं तेष्वेवमथार्चयेत॥ त्वया समस्तामासिद्धयक्षविद्याधरैरुद्रगणैः किंनरैश्च
॥ गंधर्वविद्याधरदानवैद्रैर्युतं हृतं विश्वमितं नमस्ते॥ समग्रसंसारकरीत्वमेव विभोः सदानंदमयी च माया॥ समस्तक
ल्याणनिधेः समर्धिर्हरिप्रिये भद्रनिधे नमस्ते॥ एवं संपूज्य विधानेन ततो विप्रमथार्चयेत॥ किरीटांगदनिष्कान् कुंड
लांगुलिभूषणैः॥ अलंकृत्य सहस्रयं तद्वसीतां वरस्थं यत्नतः॥ पूजयेद्दत्तः॥ किरीटांगज्युतं ध्यात्वा मंत्रेणानेन भक्तितः
॥ भूदेवोसि त्वतो निसंनिसानंदमयो हरे॥ हरमेदुःकृतं कर्मकृपाकरनमोस्तुते॥ भूदेव भगवन्नाम भवभंगाकरे
श्वरः॥ भवभूतिकरो जिष्णो भवतिष्मान्नमोस्तुते॥ एवं संपूज्य हृदि ध्यात्वा तान्द्विजं विष्णुरूपिणम॥ ततो भद्रनिधिं दद्या
न्मंत्रेणानेन मानवः॥ स्वर्गो तोक्षासोनारो विस्मार्नाम महात्मनः॥ यवदर्भतिलैः सार्धमुदकं संपरिसज्जेत॥ पितसं
तारणार्थाय निसानंदविवस्वये॥ सर्वाघौघविनाशाय विस्मार्दानं मयाकृतं॥ तद्दानेन सत्तूपिशे॥ गोप्येन विधिना द राम॰
घार्देमसंख्यानकीर्तयेत॥ प्रकीर्तिते कोटियुगायुतं फलप्रगोपिते कल्पगणोर्न संशयः॥ इतीरमात्तायनेकीर्तयेत्सुधी ॥१२८॥

र्निधानमध्येनिहितं च यद्भवेत॥ एवं कृते स्यान्मनुजेः कृतात्मा भवेन्न चस्यान्नररांकदाचित॥ प्रयाति विष्णोः पदमव्य
यं तच्छिवात्मकानंदमयं ससाक्षाद्दिति॥ कर्त्तोरार्तिमादिकालेकृत संकल्पः शुद्धदेहो सोत्तरछदे कुशोत्तरे प्राग्ग्र
प्रकारेण यथा शक्ति विरचितं भद्रनिधिं क्षौमवस्त्रद्वयाहृतं स्थापयित्वा परितो दर्पणचामरपादुकोपानच्छत्रासपा
साद्यः पुरतो हरिहरौ स्थापयित्वा पंचामृतादिना संपूज्य नदीशानदेवौ स्वगत्वा तु सारेणाग्निं स्थापयित्वा घृताकृति
लै रष्टोत्तरशतादिसंख्यया ताः तु हुत्वा पट्टे त्वा श्रीखंडकुंकुमकर्पूरैः प्रणवादि श्रिये नमः इति पंचाक्षरमंत्रं निधिकुंभपि
धानपात्रे च लिखित्वा तत्रैव भद्रनिधिं पूजयित्वा गृहीतकुसुमांजलिभद्रनिधिं प्रदक्षिणीकृत्य त्वया समस्तेत्यादिमं
त्रेण पुष्पांजलिं प्रक्षिप्य नमस्कृत्य प्राङ्मुखं उदङ्मुखं किरीटांगदपीतवस्त्रादिना संपूज्य॥ भूदेवोसि
त्यादिमंत्रेणास्तुत्वा कुशायवतिलजलतस्रोमुखः शर्माहं सर्वपापक्षयस्कल्पितः तारणानित्यानंद विष्णुद्दिशिवात्मका
कानंदमयाव्ययविष्णुपदप्राप्तिकामोऽमु●काशर्मणे तुभ्यमिमं भद्रनिधिं सरत्नधातुत्रयात्मकं सक्षौमांबरयुग्मपाद
शीपादकोपानच्छत्रासनसहितं संप्रदद्दे नममेति तद्दस्ते जलं दद्यात॥ दानप्रतिष्ठार्थं च सुवर्णं दत्वा विसर्जयेदिति भद्र
निधिनप्रयोगः॥ ॥ अथ ज्ञातमानदानविधिः॥ ब्रह्मांडपुराणे॥ ब्रह्मो॥ भरण्यावहितो दानं ब्रवीमि तव नारद॥ ज्ञातमान

ध्दान॰प्र॰ मिति प्रोक्तं सर्वपापप्रणाशनं॥ आयुष्यं श्रीकरं पुण्यमारोग्यं संततिप्रदम्॥ पुण्यकालेषु सर्वेषु चंद्रसूर्यग्रहादिषु॥ नि
॥१२९॥ त्यं वा कारयेद्दानं जन्मर्क्षेषु विशेषतः॥ उत्तमे देशेषु सर्वेषु गृहे देवालयादिषु॥ यथासाधनसंपत्तिस्तथा दानं समाच
रेत्॥ गोमयेन भूमिं कृत्वा जलेन आलिप्य मध्ये तिलतंडुलैर्भक्ष्यैः॥ सरोरुहं केसरभूषणाढ्यं सकर्णिकं चाष्टदलं वि
लिख्य॥ तस्मिन्हिरण्यं शतमानमात्रं निधाय तस्योपरि संविचिंत्य॥ ब्रह्माणमीशं कमलासनस्थमाराध्य गंधादि
भिरादरेण॥ विप्रं तथा वेदविदं विचित्य सवस्त्रभूषातु समर्चयित्वा॥ दद्याद्धिरण्यं शतमानमस्मै संप्रीयतां त्वात्मभ
रिसुदीर्य॥ शतमानमात्रमिति शास्त्रानुसारे शाकृष्णलादिशतमित्यर्थः॥ यासौ दानं शतमानं हिरण्यं दद्याद्वा पुनः सर्व
मेवेति चोक्तं॥ अतः कुर्यात्प्रदेतत्स कृष्णानि संमासं हायनं वा तिलैस्तोवा॥ जीवन्नरं ज्ञानरूपं सुवर्णानां कांचनं चेतित
था हिरण्यं दद्यात् रोगापरिहारार्थं चेत्॥ उपचारैः षोडशभिः सर्वे येडानुमंत्रयं॥ अथाक्षरेणामंत्रेण॥ विचेराति भक्तितः
॥ यद्वास विश्वलिंगेन मंत्रेण प्रतिपादयेत्तु॥ आत्मनः पापनाशतः स्वर्णं कुर्यात्कृष्णान्धाक्षताद्भिः॥ अथ मेध्ये विविधे द्रव्यैः स्वकु
डु वापि विशेषतः॥ तस्मै दत्ता पमस्तु स्वस्वाचारयात्मने दिने॥ प्राङ्मुखाय स्वयं चोदङ्मुखः प्रयतमानसः॥ मंत्रेणानेन राम॰
संकल्प्य पापव्याधिविमुक्तये॥ पद्मोद्भवः पद्मकरः सप्ताश्ववाहनः॥ शतमानेन दानेन तुष्यात्सर्वजगद्गुरुः॥ इदं ज ॥१२९॥

न्मनि यत्पापं मम जन्मनि यत्कृतं॥ मम जन्मनि यद्बाल्ये वा तत्सर्वं क्षययत्वसौ॥ इति दानमंत्रैः॥ ततः क्षमाप्य तं विप्रं प्रणि
पत्य विसर्जयेत्॥ यथा प्रसन्नो भवति तथा सर्वं प्रकल्पयेदिति शतमानदानम्॥ ॥ अथ हेमदानविधानं॥ वायुपु
राणे॥ हेमदानमथो वक्ष्ये यदुक्तं वेधसा मम॥ अग्निगर्भं पवित्रं च आयुरारोग्यवर्द्धनं॥ निष्कमात्रपरिमाणांत
दर्द्धपादमेव वा॥ तंडुलाटकसंपूर्णपात्रे पात्रांतरं न्यसेत्॥ अर्द्धाटकतिलैः पूर्णं तस्योपरि घृतान्वितं॥ तिला
र्धमानतः पात्रं घृते तत्र हेम विन्यसेत्॥ गोमयेनोपलिप्तायां भूमौ तच्चितपं न्यसेत्॥ विप्रं च हिरण्यं च शंभुस्मृत्वा प्र
पूजयेत्॥ आत्मच्छायां हिरण्यं च तिलांस्तंडुलमेव च॥ विप्रोक्त दद्यादिदं प्रापद्विवेमे प्रीयतामिति॥ दद्याद्दानेन वि
धिना नित्यं मासस्य येनेथवा॥ संवत्सरे वा मत्योसि चेत्साप्नुरूपमवाप्नुत॥ अनेन श्रेष्ठ विविधान्कामानाप्नोत्येव न संशयः
॥ इति नानाविधसुवर्णदानम्॥ ॥ अथ प्रसंगादुक्ततरदानविधानं॥ नंदिपुराणे॥ अथ देवो विरूपाक्षः प्रस्ता
लीढं समाश्रितः॥ स्थानकं त्वारमादाय सर्वदेवमयं ततः॥ आकृष्य मंदरं चापं वासुकिं ज्यावनामितं॥ त्रिपुरस्य व
धार्थाय निर्निमेषैर्विलोचनैः॥ ततोऽस्य कनामकस्माद्रपतत्तत सलोचनात्॥ तस्माद्रुद्राक्षसंभवस्याख्याविरयो
न्वेलं॥ द्वितीयनेत्रादपतद्रस्तु बिंदुर्भवानकात्॥ तस्माद्गुणतेमुत्पन्ने पितृकर्मसु सासिते॥ रजतेन समायुक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दा० प्र० यस्यश्चास्तेषुकिंचन॥तत्तद्दक्षयमित्युक्तंहस्संपितृभिःस्वयंमिति॥स्कांदे॥यःप्रयछतिविप्रायरजतवापिनिर्मलं
॥१३०॥ ॥सविधूयाशुपापानिस्वर्गलोकेमहीयते॥रूपवान्सुभगःश्रीमानिहलोकेचजायते॥मात्स्येपि॥पितृणांर
जतंपात्रमथवारजतान्वितं॥शिवनेत्रोद्भवंयस्मात्तस्मात्पितृवल्लभं॥अमंगलंचयत्नेषुदेवकार्येषुवर्जये
त॥रजतंदक्षिणाप्याहुपित्तकार्येषुसर्वदेति॥तथा॥सुवर्णंसर्वदानानामंगलत्वेनप्रदीयते॥सुवर्णदानेरज
तमंगलमित्येवकेचनेति॥अतएतसुवर्णदानेरजतंदक्षिणेतिकेचिदितिहेमाद्रिराह॥रजतमंत्रस्तु॥रुद्रनेत्र
समुद्भूतंरजंपितृवल्लभं॥प्रदानादस्यमेरुद्रःप्रीयतांभक्तवत्सलः॥इतिरजतदानम्॥ ॥अथाश्वदानं॥स्कां
दे॥अश्वंप्रयच्छेद्वैदेहमचित्रंसुलक्षणं॥सतेनकर्मणाचैवगांधर्वलोकमश्नुते॥महाभारते॥सर्वोपकरणो
पेतंयुवानंदोषवर्जितं॥योश्वंसतिविप्रायस्वर्गलोकेमहीयते॥यावंतिरोमाणिहयेभवंतिद्विजेश्वर॥तावतो
वाजिदालोकानाप्नुवंतिसुपुष्कलान्॥मात्स्येदानमंत्रः॥उच्चैश्रवास्त्वमश्वानांराज्ञांविजयकारकः॥स्वर्यवार राम०
नमस्तुभ्यमतःशांतिंप्रयच्छमे॥इतिसामान्याश्वदानं॥अथश्वेताश्वदानं॥गारुडे॥अश्वमेधसमंयस्तुक ॥१३०॥
लोकर्त्तुंसमाहते॥अश्वदानंतुतेनेहकर्त्तव्यं॥विधिंतस्यप्रवक्ष्यामिब्रह्मणाकथितंपुरा॥श्वेतमश्वंशुभस्तत्तहेम

पल्याणभूषितं॥रौप्यैश्चकटकैःशुभैःकर्णिदंतोपशोभितं॥वस्त्रेणचरवैरक्तास्त्रैःक्षौमपुत्रैःसुवाससं॥शुभेनपदके
नैवसंवेतंस्वायुधान्वितं॥धाम्यस्तोयसंयुतंवध्वकक्षसुपट्टकं॥महार्णवेसमुत्पन्नस्त्वंविश्रवसपुत्रक॥मया
त्वंविप्रमुख्यायदत्तोहयसुखीभव॥इमंविप्रनमस्तुभ्यमश्वेतंतेप्रतिपादितं॥प्रतिगृह्णीष्वविप्रेंद्रमयादत्तंसु
शोभनं॥करोमिसमर्पणंहत्वेहयसुखीभव॥इमंविप्रनमस्तुभ्यमश्वेतंतेप्रतिपादितं॥प्रतिगृह्णीष्वविप्रेंद्रमयाद
त्तंसुशोभनं॥करोमिसमर्पणंहत्वाविप्रहस्तेजलंक्षिपेत॥यश्चपुरोगछित्वादानांतसमस्तसमाप्तिं॥भास्करंमनसि
ध्यात्वाआलोक्यस्वगृहंव्रजेत॥श्वेतमश्वंतुयोदद्यात्फलंदशगुणंभवेत॥वडवांचतथादत्वातुल्यमेवफलंल
भेत॥एवंकृतेनरव्याघ्रस्तूर्यलोकंव्रजेन्नरः॥ब्रह्महत्यादिपापानितथान्यानिवहून्यपि॥तानिसर्वाणिनश्यंति
दत्वात्वश्वंविधानतः॥त्रिंशात्तुर्वाचमेधावीत्रिंशाद्देवपराणपि॥सप्तसप्ताश्वदः पुत्रोनरकादुद्धरेपितृन॥तर्पयं
तिपितरःसर्वेन्नर्त्यंतिचहसंतिच॥वाजिप्रदःकुलेजातस्ततोवैमानिकावयं॥वाजिप्रदेनपुत्रेणाउद्धृतानरका
र्णवात॥हयदानफलंस्वर्लोकाअक्षयान्नराणामिति॥ ॥अत्रैवंप्रयोगं॥उक्तकालेएवोक्तगुणमश्वंसंपाद्य
स्नानमलंकृतसमार्त्तंडायेतिमंत्रेणापूजयित्वामहार्णवेसमुत्पन्नइत्यादिसुशोभनमित्यंतंमंत्रंपठित्वामुकगोत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा·न·प्र· यामुकन्नाखाध्यापिनेमुकगोत्रोहं सकलपापक्षयपूर्वाश्वमेधफलप्राप्तिकामस्त्विन्नां त्विन्नात्सर्वापरपितृन्नुद्धराप
॥१३१॥ र्थकाक्षयसूर्यादिलोकःप्राप्तयर्थं हेमपल्याराभूषितं रौप्यकद्विकरिदंत वज्रमयनेत्रं ताम्रमयखुरक्षौमपृष्ठस्व
र्णतिलकोपत्रोभितं सुवर्णकस्वायुधं॥सुग्रैवेयकं सुवाससासंवीतं धान्यराशोपरिस्थितं सूर्यदेवतमिमंश्वेता
श्वं तुभ्यमहं संप्रददे नममेति करोधृतं दद्यात्॥प्रतिष्ठार्थं दक्षिणां दत्वास्वस्ति स्यादिवाचयित्वाऽश्वपुरस्तात्सप्त
पदसमतिपदानि गत्वाभानुं ध्यात्वा दृष्ट्वा स्वगृहमियादिति॥इति श्वेताश्वदानम्॥ ॥अथ तिलदानम्॥महर्षेः
कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः॥ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो॥मात्स्ये॥विष्णोर्देहसमुद्भूताः
कुशाः कृष्णास्तिलास्तथा॥धर्मस्य रक्षणायालमेतान्प्राहुर्दिवौकसः॥संवर्त्तः॥नित्यं नैमित्तिके काम्ये तिलां
दत्वास्वशक्तितः॥प्रज्ञावानुत्तवाग्रीसंधनवांजायतेनरः॥कौर्मे॥कृष्णाजिने तिलान्कृत्वा सुवर्णं मधुसर्पिषी
॥द्रोणौवं वाससाच्छन्नं विधातव्यस्तु दक्षिणां॥आहिताग्नौ द्विजे दत्वा सर्वं तरति दुष्कृतं॥अत्र त्रिधेति हीनमध्य
मोत्तमभेदेन द्रोणमात्रेण द्रोणद्वितीयेन द्रोणत्रितयेनेति पक्षत्रयमिति हेमाद्रिः॥सदक्षिणमिति सर्वत्र वि रम·
शुधर्मोत्तरे॥तिलाः गावो हिरण्यं च अश्वःकन्या वसुंधरा॥दत्तान्येतानि विधिवत्तारयंति महाभयात्॥हेमाद्रौ॥म ॥१३१॥

लक्षैगेश्वत्थाधरेमाघमासिप्रजायते॥एकादश्यां कृष्णपक्षे सोपवासो जितेंद्रियः॥द्वादश्यां तु तिलान्दत्वा सर्व
पापात्प्रमुच्यते॥तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलोदकी॥तिलदाता च भोक्ता च षट्तिलाः पापनाशनाः॥
अप्रसङ्गस्य तिलैर्भक्त्वा सर्वपापविवर्जितः॥त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते॥तथा॥प्रस्थं तिलमयं
कृत्वा सुवर्णरजतान्वितम्॥दद्यात्कंबलसंवीतं कृष्णमार्गाजिनेन वा॥सर्वकाममदेन विनानेन दिवं व्र
जेत्॥कालक्षयादिहागत्य राजराजो भवेत्पुनः॥इति तिलप्रस्थदानं॥ ॥विष्णुस्मृतौ॥ताम्रपात्रे तिलान्कृत्वा
पलषोडशकल्पिते॥सहिरण्यं स्वशक्त्या च विप्राय प्रतिपादयेत्॥नाशयेत्त्रिविधं पापं वाङ्मनःकायसंभवं॥
स्कांदे॥तिलपात्राणि यो दद्याद्विप्रेभ्यः श्रद्धयान्वितः॥अमावास्यां समासाद्य नियतः सुसमाहितः॥सपितॄं
स्तारयित्वाशु नरकात्त्रस्तंगवः॥पितृलोकं समाप्नोति सचिरं सुखमश्नुते॥अत्रिः॥तिलपात्रं तु संपूर्णं यो दद्या
त्सु समाहितः॥ध्रुवं स गच्छति स्वर्गं नरो वै नात्र संशयः॥यमः॥तिलपात्रं च यो दद्यात्सलेहं वाथ पर्वणि॥सदक्षि
णां सत्वभावाच्च दद्याज्जनार्दनं॥नाशयेत्त्रिविधं पापं धर्मस्य वचनं यथा॥ब्रह्मपुराणे॥ताम्रपात्रं तिलैः पूर्णं
प्रस्थमात्रैर्द्विजायतु॥सहिरण्यं च यो दद्याच्छ्रद्धावित्तानुसारतः॥सर्वपापविशुद्धात्मा लभते तु परां गतिं॥कौर्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ स्म॰प्र॰ तिलपूर्णानां ताम्रपात्रं सहिरण्यं द्विजाय ते॥ प्रातर्दत्वा तु विधिवत्कल्मषं प्रतिहंति सः॥ तिलपात्रत्रयोपेतं कनिष्ठन्तु
॥१३१॥ मध्यमं॥ ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं॥ द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतम्॥ स्वर्णमेकं जघन्यं
तु द्विगुणं मध्यमे क्षिपेत्॥ त्रिगुणं चोत्तमे तद्वत्सुवर्णं परिकीर्तितं॥ सुवर्णदक्षिणां दत्वा सर्वपापक्षयो भवेदि
ति हेमाद्र्युक्तानेकविधतिलपात्रदानं॥ अथ माघशाखाकरात् तिलपूर्णकांस्यपात्रदानम्॥ आदित्यतासो॥
पितामहः॥ शृणुध्वं देवताः सर्वा ऋषयश्च तपोधनाः॥ मुच्यते येन विधिना हि मानवा मातृऋणात्॥ पितृसोत्रा
मणीकर्तुं यदि शक्तिर्न विद्यते॥ महासरस्तथा वापीकूपं कर्तुं च दीर्घिका॥ एवं कृते मातृऋणान्मुक्तो भवति मा
नवः॥ सद्दक्षिणां कांस्यपात्रमथ दत्वा प्रमुच्यते॥ ऋषय ऊचुः॥ भगवन्कांस्यपात्रस्य विधिं सम्यक् प्रकीर्तय॥ यस्मि
न्मासि यत्स्वरूपं यस्मिन्काले च दीयते॥ पात्रस्यायामदानं च धनमेतद्द्विजोत्तम॥ पात्रेणेन च दातव्यं न दत्वा ता
दृशाय च॥ पितामहः॥ शुद्धकांस्यस्य पात्रस्य प्रमाणं वेष्टयेत्पात्रप्रधानेन सुभक्तितः॥ स्नानं कृत्वा निमंत्र्य गां दो श्म॰
पितृन्देवांश्च तर्पयेत्॥ ततोऽभिमंत्रयेत्कंसं मंत्रेणानेन हरिमेधसा॥ गोमयेनाथ संलिप्य गृहमध्यं च सर्वतः॥ लिखेत्स ॥१३१॥
वंशं दद्यात्कुंकुमैरथ चंदनैः॥ ततो वह्निं स्थापयित्वा होमं कुर्याद्घृतैस्तिलैः॥ तत्र पात्रं प्रतिष्ठाप्य मंत्रयेत्त्रिमु

घृतः॥ गंधं च चंदनपुष्पादिधूपदीपैश्च नैवेद्यैः पूजितं॥ ततो ब्राह्मणमाहूय वस्त्रभूषणसंयुतं॥ परस्त्रीवर्जकं चांतमलं
कृत्य यथाविधि॥ पार्वणश्राद्धविधिवन्मातृश्राद्धं समाचरेत्॥ ततः संपूजयेद्विप्रं पुष्पधूपविलेपनैः॥ वस्त्रा
णि परिधाप्यामु सुभव्यानि भूषणानि च॥ अलंकृत्य यथाशक्त्या माघ्यां वा मतिवासरे॥ माघी माघपौर्णमासी॥ मतिवा
सरे मातृमृतिदिवसः॥ ग्रहणे रविसोमाभ्यां संक्रांतिषु युगादिषु॥ तथान्यपर्वणि यद्दत्तं माघ्यां तु द्विगुणं मातरम्॥ तद
क्षयफलं सर्वं प्राप्नोति मुक्तिरेव च॥ जीवंतीं मम येद्दत्वा भोज्यैरपि विनश्वरैः॥ मृतामुद्दिश्य दातव्यं माघ्यां सर्वं स्वश
क्तितः॥ अमावास्यां यथा दत्तं पितॄणां च मया पुरा॥ तथा माघ्यां मया दत्तं मातॄणां नात्र संशयः॥ दत्तं जन्म हुतं स्ना
तं विधिवत्तर्पणं कृतं॥ तदक्षय्यफलं सर्वमेवमाह महेश्वरः॥ विप्रं संपूज्य विधिवत्पात्रं तस्मै प्रदापयेत्॥ प्रणम्य वि
धिवद्भक्त्या मंत्रमेतदुदीरयेत्॥ कांस्यपात्रं मया दत्तं मातुर्ऋणापकाक्षया॥ भार्गववचनाद्यद्य मम मुक्तिर्भवेद्दृशात्॥
कांस्यपात्रं सुवर्णं च तिलांश्च स्वादुदक्षिणां॥ सत्यधर्म मया दत्तं मातृणान्मुक्तिर्भवेन्मम॥ कांस्यपात्रप्रदानेन तेन त्वष्टा
नेंद्रगीरकं॥ तथा हेमप्रदानेन परमात्मा नमस्यतां॥ आच्छादनं वस्त्रादीनं गृह्य मेतत्सनातनं॥ विप्राच्छादनदानेन परमा
त्मास्तु पूजितः॥ तिलसंख्याकृतं दुःखं स्वजनस्य मम सेवितं॥ तिलदानप्रभावेन ऋणान्मुक्तो भवाम्यहं॥ फलादिख

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 चिंतं कृत्वा तज्जलेन विनिःक्षिपेत् ॥ एवमुक्त्वा ततः पात्रं प्रदद्याद्ब्राह्मणाय च ॥ आसनोन्नततो वाच्य जननीसंभवादृणात्
 ॥ मुक्तः स्यां पात्रदानेन महेश्वरवचो यथा ॥ दत्वा विप्रस्य पात्रं तु होमं कुर्यात्प्रयत्नतः ॥ सोपस्करं सतांबूलं क्षमाप्य
तु विसर्जयेत् ॥ अन्येषामपि विप्राणां भोजनादि प्रदापयेत् ॥ भक्त्या ब्राह्मणान्सन्मानं दत्वा विप्रान्प्रयत्नतः ॥
एवं कृते विधाने तु ऋणान्मुक्तिर्न संशयः ॥ जननीसंभवादस्माच्चान्यथा कश्चिदेव हि ॥ पुरा मातृवधोद्भूतपा
पंकांकितचेतसा ॥ जामदग्न्येन रामेण प्रदत्तं कांस्यभाजनं ॥ वसिष्ठेन यथान्यस्तं त्वा विश्वामित्रेण धीमता ॥ उग्रह
नमिदं दत्तं पातकव्रातशान्तये ॥ अकृत्वा मातृवचनं पत्रौघैः पापसंस्थितैः ॥ कैश्चित्कृच्छ्रं कायैरर्न्हत्वा मातापश्चात्स्व
सादित्ता ॥ शापत्तो निष्कृतिर्ब्रूहि न वाक्यं यत्कृतं तत च ॥ शापो पि भवना देवि मातृणां तं तु रात्मनं ॥ कथयामास सा
तेभ्यः कांस्यपात्रं सुविस्तरं ॥ दत्वा दानं विनिर्मुक्ता भविष्यथ न संशयः ॥ भुजगैस्तत्कृतं पूर्वं मातृवधनगर्हितैः ॥
कांस्यपात्रप्रदानेन पापान्मुक्तास्ततो भवन् ॥ विधानं कांस्यपात्रस्य सर्वमेतन्मयोदितं ॥ अन्यथा न तरिष्यंति क्रमान्मा
तृसमुद्भवादिति ॥ ॥ अस्य प्रयोगः ॥ आश्विकाद्यमाघादिकाले कर्त्ता निषादो स्नात्वा देवर्षिपितॄन्संतर्प्य गृहमध्ये
गोमयोपलिप्तप्रदेशे कुंकुमेन चंदनेन वा षोडशदलं पद्मं विलिख्य तत्र पंचविंशतिपलमितकांस्यपात्रं तिलप्रस्थ

सप्तकसुवर्णमुपरिस्थस्वर्णमाषचतुष्टयं भव्यवस्त्रवेष्टितं विन्यस्य तत्र हरिं हरं वा विधिवदभ्यर्च्य परितः सप्त
धान्यफलानि चासाद्य पात्रमभ्यर्च्य तामुत्तरतोग्निं प्रतिष्ठाप्य गृह्योक्तविधिनाज्यान्तं तिलैर्यवैश्च त्रिविधविष्णु
दैवत्यमंत्रेणाष्टोत्तरशतं हुत्वा पश्चान्मातृको माताहिकेभ्यो जीवन्मातृकस्तां वस्त्रगंधाभरणादिनालंकृ
त्य एवं तत्कल्पसंप्रतिगृहीतारं गंधवस्त्रालंकारैरलंकृत्य श्रेष्ठसाधिसंकीर्त्य नां तेः अमुकगोत्रायामुकब्राह्म
णाय इदं पंचविंशतिपलं कांस्यपात्रं प्रस्थसप्तकतिलपूर्णं चतुर्माषस्वर्णयुतं श्रेष्ठवस्त्रसंयुतं परितः स्थापि
तसप्तधान्यफलयुतं मातृऋणापकामस्तुभ्यमहं संप्रददे न मम इति तिलकुशजलं दत्वा सावित्रेण प्रतिग्राह्य स्वकाम
स्तीति पाठयित्वा कृतैतत्कांस्यपात्रदानप्रतिष्ठार्थं सुवर्णं दत्वा प्रणम्य कांस्यपात्रं संपादितमित्यादिमंत्रान्पठित्वा मा
तृऋणान्मुक्तोसीति ब्राह्मणेनोक्तः पुनरभिहृतिमिदं त्वा क मंत्रैः वं समाप्य ब्राह्मणान्विप्र रूप्य यथाशक्ति ब्राह्मणा
न्भोजयेदिति कांस्यपात्रदानप्रयोगः ॥ ॥ अथ तिलपात्रीदानविधानम् ॥ यमः ॥ सर्वपातकसंघातैः कामतो
वाप्यकामतः ॥ मुक्तिं तस्य प्रवक्ष्यामि स्वर्गसाधनमेव च ॥ शुक्लैः कृष्णैर्यथालब्धैर्द्वित्रिचात्पंगलोच्छ्रितः ॥ एतैस्ति
लैः समे देशे कर्त्तव्यः पुरुषायतः ॥ यथाविभवविस्तारो यदि वा शक्तितो नरैः ॥ प्रतिमां स्थां गुलास्थाप्यासौ वर्णितेन मा

५ दान॰ प्र॰ यवी॥ माधव लक्ष्मणां नार द्वीये॥ आरम्भ्य वामोर्ध्वे कारमयस्यच्युक्रमेण तु॥ त्रां त्वचक्रगदापद्मद्धानो माधवः स्मृतः॥ क्षौ
द्रेणापयसा दध्ना घृतेनाप्यरयेत्ततः॥ स्थापयेन्नवं तं तत्स्वरूपं पुष्पस्रग्वस्त्रभूषितं॥ क्षौद्रेणोति मध्वादि सूचितं घृत च
॥१३५॥ तुष्टयं तिलद्रोणः पूर्वादि दिक्षु स्थापयित्वा तत्कमरूपं माधवप्रतिमां तत्र स्थापयेद्द्विजर्षभः॥ उक्त्वा भ्यर्च्य तत्सर्वं
ब्राह्मणो श्रोत्रियेर्थिने॥ दद्यान्माधवे ध्येवैत्रांखविविष्णुवेषो न्नरापरो॥ अत्तानाश्चद्विवामोहाह्यो भाद्वाजन्मजन्मनि॥
अर्जितं यन्मया किंचिद्दुष्कृतं मधुसूदन॥ तत्सर्वं विलयं यातु दानेनानेन माधव॥ एवमुच्चार्य तत्सर्वं ब्राह्मणाय नि
वेदयेत्॥ पावज्जोवह्कृतं पापं तस्य नाशाद्देवनश्यति॥ इति पाद्मे तिलद्रोणविधानम्॥ ॥अथ तिलपद्मदानं॥ महाभा
रते॥ यमः॥ सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलं॥ तद्दत्वा लभते विप्र ज्ञानं कथयामि ते॥ रहस्यं सर्वदानानां क
थ्यमानं मया शृणु॥ पुरा पाप्मिन्भारते वर्षे दानानामतिदुर्लभं॥ तिलपद्ममिति ख्यातं सुरासुरनमस्कृतं॥ मा
घमासे तु संप्राप्ते शुक्लपक्षे द्विजोत्तम॥ गोमयं मंडुलं कृत्वा चतुरस्रं महामते॥ नवं स्थंडिलमास्तीर्य कृष्णाजिनसम राम॰
न्वितं॥ द्रोणाच्चरं तिलानां स्तेये निधाय वसनोपरि॥ निष्कत्रयं सुवर्णस्य स्थापयेच्छ तथोपरि॥ वासं तत्रांगत्राद्यं भुक्ति ॥१३५॥
मुक्तिप्रदायकं॥ ध्यायेद्वा चतुर्भुजं देवं प्रणतार्तिहरं हरिं॥ शंखचक्रगदापाणिं पीतवाससमच्युतं॥ आसीनं कर्णिका

मध्ये सर्वशक्तिसमन्वितं॥ कृतांजलिपुटो भूत्वा नमस्कृत्य पुनः पुनः॥ पूजयेत्परमेशानं श्रद्धावित्तानुसारतः॥ इंदु
नीलमहानीलमणिमुक्ताफलादिभिः॥ आराधयेद्यथाशक्त्या देवदेवं जनार्दनं॥ गंधैः पुष्पैस्तथा दीपैर्नैवेद्यै
श्च मनोरमैः॥ क्षीरान्नैर्घृतपक्वैश्च फलैर्दिव्यैरनेकशः॥ पुष्पाणां प्रकरैश्चैव गीतनृत्यादिभिस्तथा॥ इत्थमाराध्य
देवेशं तां पद्मं विनिवेदयेत्॥ पंचसौगंधिकोपेतं श्रद्धायुक्तेन चेतसा॥ पंचसौगंधिकं परिभाषायां तत्र यमः॥ तिल
प्रस्थं घृतप्रस्थं दध्याढकमतः परम्॥ स्थापयेत्सार्धवत्तत्स्य धान्यपात्राणि षोडश॥ एवमाराध्य तत्सर्वं प्रतिलक्ष्मी गा
मयं शुभम्॥ एकरात्रं द्विरात्रं वा त्रिरात्रमथवा द्विजः॥ तिलाहारो भवेत्सर्वं उपवासमथापि वा॥ कुर्यात्स्वकार्यं सु
स्वर्थं वासुदेवमनुस्मरन्॥ ततो द्वादश्यां तत्पद्मं शुचिर्भूत्वा समाहितः॥ विप्राततः कुलशीलाय ब्राह्मणाय कुटुंबि
ने॥ जितेंद्रियाय शांताय प्रसन्नायात्मवेदिने॥ दातव्यं तेन पद्मेन तिलपद्मं विधानतः॥ प्रीयतां माधवो देव इत्युक्त्वा
तमनुस्मरन्॥ हिरण्यगर्भं देवेशं पद्मनाभं जनार्दनं॥ हिरण्याक्षगुणागारं सर्वपापहरेश्वरं धनधान्यसमस्कं च सर्वसं
पत्समन्वितं॥ पुत्रपौत्रादिसंयुक्तं दासीदाससमन्वितम्॥ आरोग्यं चक्षुमंत्रं च सर्वदुःखविवर्जितं॥ कुरु मां परमो
रं भक्तोपमितिचिंतयन्॥ इत्थं प्रसाद्य देवेशं दद्यात्सतिलात्मकं॥ स्वयं भवति पूतात्मा पितृन्यान्पितामहान्॥ प्रपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान०प्र ताम्महांश्चवर्मात्मा तारयेताखिलं कुलं॥ धर्ममर्थं च कामांश्च मोक्षमाप्नोति संशयं॥ सर्वपापरतो वापि मुच्यते सर्वपा
॥१३५॥ तकैः॥ इच्छंति पितरः पुत्रान्पौत्रांस्तद्दत्तांसंभवान्॥ अस्मिन्वंशे भवेत्कश्चित्तिलपद्मप्रदास्यति॥ यस्तु राजा धन
पतिः सम्यक्तो तीव धार्मिकः॥ आराध्य विप्रं विधिना वस्त्रालंकारभूषणैः॥ वाहनादिभिरन्यैश्च ग्रामक्षेत्रादिकैस्त
था॥ पद्मफलं ज्ञापतेत स्वद्विजेदानपरस्य च॥ परिछिन्नं भवेन्नैतु नात्र कार्या विचारणा॥ पात्विदं विधिवद्दद्यात्तिलप
द्मं सुधार्मिकः॥ तस्य दानफलं यस्यात स्यतां नात्र विद्यते॥ इति भारते तिलपद्मदानम्॥ ॥ हेमाद्रावम्बदत्तु
त्तं॥ अथातः संप्रवक्ष्यामि अल्पद्रव्यं महाफलं॥ सर्वकाले देवे च कर्तव्यमिह कथ्यते॥ गोमयालिपिते देशे अंब
रादिप्रकीर्ये च॥ तन्मध्ये निक्षिपेद्धीमांस्तिलभारत्रयं शुभं॥ भारः पलसहस्रं द्वयमिति दानोद्योते॥ पद्ममष्टदलं
कुर्यात्कर्णिकाकेसरान्वितं॥ रत्नानि केसरांते कार्यं तदर्थं स्वर्णेन वा पुनः॥ तिलमध्ये न्यसेत्पद्मं तन्मध्ये च महेश्वरम्॥
आराध्य विधिवद्रुद्रं वामादीनि प्रपूजयेत्॥ त्रीन्निरूपं सुवर्णेन निष्कमात्रं प्रकारयेत्॥ वामा ज्येष्ठा तथा रौद्री काला रम०
विकरणी तथा॥ बाला प्रमथनी देवी दमनी च यथाक्रमं॥ यथाक्रममिति पूर्वादिष्वष्टदलेषु॥ अथानंतश्च सूक्ष्मश्च
शिवश्चाप्येकनेत्रकः॥ एकरुद्रस्त्रिमूर्तिश्च श्रीकंठश्च शिखंडकः॥ विद्येशानर्चयेदेतांस्तद्वाह्ये च दलाग्रतः॥ अ ॥१३५॥

र्चयेत्पुंडरीकैश्च पद्मैर्वा सितपत्रकैः॥ धूपं च गुग्गुलं दद्याद्दीपं नैवेद्यमेव च॥ एवमभ्यर्च्य देवेशं होमं कृत्वा च ब्रह्मदक्षि
णाम्॥ ततो विप्रं समाहूय पुण्यकाले उपस्थिते॥ यथा देवं तथा विप्रमर्चयित्वा विधानतः॥ इमं मंत्रं ततः प्रोक्त्वा त
स्मै विप्राय दापयेत्॥ एतत्तिलमयं पद्मं मंत्रसन्निहितो हरः॥ एतद्दानात्सतिंद्रौ शिवो मे प्रीयतामिति॥ यथा सोम
गवान्देवः सर्वभूतांतरस्थितः॥ तेन सत्येन मे पापं विलयं यातु सर्वतः॥ एवं यस्तिलपद्मस्य विधानं सम्यगाचरेत्
॥ सर्वपापविनिर्मुक्तः स याति शिवमंदिरमिति॥ ॥ अथ रुद्रैकादश तिलदानविधानम्॥ ब्रह्मांडपुराणे॥ अतः
परं प्रवक्ष्यामि तिलदानमनुत्तमं॥ यद्दत्वा पुरुषः स्त्री वा विरिंचिलोकमाप्नुयात्॥ आपूरयेद्घटं प्रस्थं पंचत्रिवप्रीति
करं न्स्यां॥ रुद्रैकादश वृष्यात्तु विप्रानेकादशाव्रती॥ प्राङ्मुखः प्रयतासीनान्गंधादिभिरथार्चयेत्॥ तिलप्रस्थ
द्वयं पात्रे प्रत्येकं निक्षिपेत्ततः॥ प्रत्येकं मंडलं हैमं पात्रेषु विनिरस्येत्॥ पात्राणि चैव मास्यस्य शिववुध्या यथाक्रमं॥
रुद्रैकादशमंत्रैश्च दद्यादुदकपूर्वकं॥ वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः॥ अजैकपादहिर्बुध्न्यः पिनाकी
चापराजितः॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः॥ स्थाणुर्भगश्च भगवान्रुद्रा एकादश स्मृताः॥ अत्र प्रण
वादि चतुर्थ्यंत नमोंतान्मंत्रान्ज्ञातव्याः इति॥ ॥ अथ तिलगर्भदानम्॥ ब्रह्मांडे॥ अतः परं प्रवक्ष्यामि तिलगर्भमनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४शा॰न॰प्र॰ न्नमम॥ तत्संप्रसन्नात्मनुज्ञोहोघमायुरवाप्नुयात॥ अपमत्युंजयोपायोव्याधिनिर्मोक्षणात्क्रमः॥ तिलगर्भइति
ख्यातोरहस्यः पापनाशनः॥ यदाग्रहोपरोधः स्याज्जन्मर्क्षे स्यात्तिसंकटाः॥ व्याधीनांचसमुत्पात्तमुत्पातस्या
॥१३६॥ पिवोदयः॥ तिलगर्भस्तदाकार्यः सर्वदोषोपशांतये॥ निमित्तानंतरंकुर्यात्तनैमित्तिकविधिक्रमं॥ गोमये
नोपलिप्तायांसिप्तावास्तीर्यवाससी॥ शालीनामाढकंमध्येततर्द्वतंडुलंन्यसेत॥ तेस्तपद्मंप्रविलिस्तार्यमष्टपत्रं
सकर्णिकं॥ कर्णिकायांन्यसेत्पद्मंसौवर्णंशक्तितः कृतं॥ नवरत्नानितत्पद्मेनिधायतत्रानियत्नतः॥ ततस्तत्रा
स्वतः शुद्धांस्तिलान्कुर्यात्समंततः॥ गर्भवद्वाससाम्भपः समास्तीर्यततः शनैः॥ गर्भतस्तोनिमंत्रेणसमाधा
ययथाविधि॥ तत्रोपवेश्यपुरुषमज्ञः कृतसमुच्छितं॥ तस्यांगेषुन्यसेन्मंत्रेमत्युंजयमनुक्रमात॥ तंचदेवंविलक्ष
क्षमर्दचंद्रेविभूषणं॥ कल्पयित्वार्चयेन्मंत्रैः पंचब्रह्मभिराहृतात॥ योनिमंचलः॥ पस्थाप्तस्यशिरोगर्भोयस्योपो
निहिताणथी॥ श्रांन्यहृतायस्यंतमात्रासमंत्रोणामत्याहेतिवाप्नसनेपिनोप्रसिद्धः॥ सत्युंजयमंत्रन्यासउक्तेन॥ शा॰
त्रैनकेन॥ श्रेवकंयजामहेइतित्रिरावांन्यसेत॥ सुगंधिंपुष्टिवर्द्धनमितिहृदये॥ उर्वारुकमिवबंधनादितिबाह्वोः ॥१३६॥
॥ मृत्योर्मुक्षीयमामृतादितिनाभौ॥ इत्यौपुराणो॥ पादेगुल्फेचजंघेवोरुनधनेकटिमेदृयोः॥ नाभौकुक्षिहृयेपार्श्वे

कक्षयोःकुचयोर्हृदि॥ स्कंधेहृत्कायांचकूर्परेमणिबंधके॥ कनिष्ठानामिकामध्यास्तर्जन्यंगुष्टपाणिषु॥ कंठेच
ककुदिवक्त्रेनासिकाकर्णचक्षुषि॥ ललाटेमूर्ध्निचद्वाभ्यांवर्णान्मंत्रस्यविन्यसेत॥ पंचब्रह्ममंत्राः सद्योजाताद
यस्तैत्तिरीयेप्रसिद्धः॥ ततस्यमूर्ध्निपुनः पद्मंसौवर्णंपूर्ववत्कृतं॥ विन्यसेद्वस्त्रमावेष्ट्यतिलैरापूरयेत्ततः॥ तं
गर्भमर्चयेत्पश्चित्तपिताम्रतोद्रवं॥ श्रमृतस्त्राविणांचंद्रंस्वेनमंत्रेणमंत्रवित॥ ततःशाता हृतंमंत्रंमृत्युंज
यमनुस्मरेत॥ ततउत्थापयेत्तस्माद्गर्भस्थानात्समाहितः॥ पुनःसंप्रोक्ष्यवाहृणपापावमानीभिरेवचेः॥ पूर्वदे
हविनिर्मुक्तःशंकरोस्मीतिचिंतयेत॥ ब्राह्मणायविनीतायजानिनेवीतमत्सरे॥ ब्रह्मनिष्ठायतत्सर्वंसंप्रदद्यादि
लोदिकं॥ प्रीयतांभगवांश्चंभुस्त्र्यंबकमौलिरितिब्रुवन॥ अनेनविधिनायस्तुतिलगर्भंसमाचरेत॥ अकालम
त्युर्नभवेत्तस्यनास्यवसंशयः॥ व्याधीनांविप्रमोक्षःस्यान्महतामपिनिश्चयः॥ ग्रहदोषाःप्रशाम्यंतिप्रसीदंति
ग्रहाःपुनः॥ उत्पातानांप्रशांतिश्चत्रिविधानामपिक्षणात॥ त्रिविधानांभौमांतरिक्षदिव्यानां॥ अत्रतिलगर्भो
पशमनशंकरभगवतातिलदानानियजमानकर्तृकाणि अन्यदाचार्यकर्तृकमितिज्ञेयम॥ अथास्यप्रयोगः
॥ यदाग्रहपीडादिस्यात्तदाकर्ताजन्मर्क्षेग्रहपीडाः कालमृत्युनाशदीर्घायुष्यादिफलप्राप्तिकामस्तिलगर्भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानमहं करिष्ये इति संकल्प्य गुणवंतमेकं ब्राह्मणमाचार्यं कृत्वा गोमयोपलिप्ते भूभागे वासो युग्ममास्तीर्य तदुपरि
अर्धाढकपरिमित तंडुलैरष्टदलपद्मं कृत्वा कर्णिकायां यथाशक्ति सौवर्णपद्मं नवरत्नसहितं विन्यस्य परितः
शुद्धान् तिलानुपविष्टयजमानावसानापर्यायान्ब्राह्मणावचनात्पुनः शुद्धान् स्थापयित्वा ऽन्येन वाससा गर्भवर
धारणां कल्पयित्वा गर्भयोनिमंत्रेणाभिमंत्र्य तत्र यजमानमलंकृतं बद्धमुष्टिकमुपवेश्य तदंगोष्ठमस्तुं जयस्मा
त्स्वर्णकृत्वा प्रकारेणाहत्वा तेन विरूपाक्षं चंद्रमौलिं भावयित्वा पंचब्रह्ममंत्रैर्यजमानमभ्यर्च्य पुनरन्येन सौवर्णपद्म
मधोमुखं तन्मूर्ध्नि स्थापयित्वा वाससावेष्ट्य तिलैरापूर्यत तमंतस्थपुरुषं तिलरूपगर्भमस्तुं जयमंत्रेण पुनर्रवपित्वा
ऽष्टनखाविशंचव द्रमंत्रेणासंपरकुंब्राता वस्त्रान्तस्तुंजयमंत्रं ब्राह्मणैः सह तत्रपित्वा तिलानपसार्य तस्माद्गर्भाद्यजमान
मुत्थाप्य पावमानीभिः पावमानीभिः संप्रोक्षयेत्॥ अथ यजमानः सर्वदेहविनिर्मुक्तः शंकरोऽहमस्मीति भावयित्वा द
क्षुवेणोपविष्टायाचार्यायेत्वा मुख्याः अमुकगोत्रायामुकशर्मणे दीर्घायुष्यजन्मर्क्षग्रहपीडाकालमृत्युत्रिविधोत्पा
तसूचितारिष्टमाध्याद्युपास्थितबाधानिवृत्तिकाम इमं तिलगर्भवासः स्वर्णपद्माद्युपस्करसहितं तुभ्यमहं संप्रद दा०प्र०
दे न मम इति स्वात्देयद्रव्यतृतीयांशादिरूपां दक्षिणां दत्वाऽनेन तिलगर्भदानेन भगवान् शंकरः प्रीयतामिति वदेत्॥ इ ॥१३७॥

इति तिलगर्भदानप्रयोगः॥ ॥अथ त्रिपद्मदानं॥ ब्रह्मांडे॥ अथ दानं प्रवक्ष्यामि त्रिपद्ममिति विश्रुतं॥ आयुष्यं श्री
करं पुण्यमारोग्यं पापनाशनं॥ माघमासे विशेषेण जन्मर्क्षे च कारयेत्॥ व्याधिग्रस्ते च दातव्यं दुःस्वप्नाद्भुतदर्शने॥
अभ्यास्मरूभयंयच्चप्येत्सर्वदोषोपशांतये॥ भूमौ गोमयलिप्तायां तिलैराढकसंमितैः॥ पद्ममष्टदलं कृत्वा कर्णिका
केसरान्वितं॥ तस्मिन्विधाय सौवर्णं तत्र कृत्वा सरोरुहं॥ वस्त्रेणाच्छाद्य तं धीमान् पूजयेत्परमेष्ठिनं॥ विप्रवैतानिकं धर्मज्ञा
स्वस्थं शांतमानसं॥ अभ्यर्च्य दापयेत्तस्मै मंत्रमेतमुदीरयेत्॥ संप्रीयतां मे भगवानात्मभूश्चतुराननः॥ दानेनानेन स
र्वात्मा जगत्स्रष्टा जगत्पतिः॥ तथा मत्तं दुलैरेवं ततीयलवर्णानतु॥ अम्मत्यप्रदितीयमिसर्थः॥ विष्णवे स्थापयेच्चैव दा
नमंत्रं निबोधत॥ जगत्स्वामी जगद्धाता पिता माता जगन्मयः॥ दानेनानेन मे विष्णुः प्रीयतां मे जनार्दनः॥ त्रिनेत्रः पार्वती
नाथः शंकरोतु मे। दानेनानेन विश्वात्मा चंद्रार्द्धकृतशेखरः॥ इति मंत्रैः समुच्चार्य दद्याद्देवं पृथक्पृथक्॥ ज्ञात्वा रूपमया
न्हे कृत्वा ब्रह्मविष्णुमहेश्वरान्॥ एवं कृते तु यत्पुण्यं तत्प्रजायते मुनिपुंगवाः॥ न तद्वर्णयितुं शक्यं कल्पकोटिशतैरपि॥ इत्याह
भगवान्ब्रह्मा नारदाय महात्मने॥ उक्तं मया यितत्सर्वं पृष्टाकं मुनिसत्तमाः॥ माघादिकाले गोमयलिप्ते देशे आढकमितति
लैरष्टदलपद्मं कृत्वा तत्र सौवर्णपद्मं निधाय तत्र ब्रह्माणमर्चयित्वा विप्राय देयो संप्रीयतामिति मंत्रेण दद्यादेवमेवं तंडुल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान.प्र. लवणाख्यप्रदानमितिप्रयोगः॥ ॥अथतिलपीठदानम्॥वायुपुराणे॥तिलपीठमथोवक्ष्येसारदानमयंशुभे॥पीठेऽरत्नि
॥१३८॥ द्वयायामेतिलद्रोणसमन्विते॥ओंनमःशिवायगणेशानरूपिणंपरिशिवमर्चयेत्॥गणेशाद्यरूपमाहात्म्येयः॥चतुर्भुजोगजमु
खोमूषकस्थश्चतुंदिलः॥विषाणांचाक्षसूत्रंचपरशुंमातुलिंगकं॥दधानोविघ्नराजःस्यादिति॥मुकुटेगंधैश्चपु
ष्पैश्चकर्पूरंधूपयेत्ततः॥क्षौमेचवाससीदद्यात्पुस्तकंतत्रविन्यसेत्॥ओंनमश्चमितिपतिश्रुभ्रगणानायंस्ति लाम्बयः॥ओं
मश्चहस्तातिप्रातःपापमीशेशोभ्मयोहतु॥इतिदत्वेऽस्मिन्नरंपतिपापान्याकाशजानिच॥अनिबद्धकयोत्थानिपरनिंदाकृ
तानिच॥कूटसाक्षीकृतोत्थानिपैशुन्यजनितानिच॥वेदनिंदागुरोर्निंदातयोश्चश्रवणेनच॥हंतिपापान्यशेषाणितिपी
ठप्रदानतः॥शिवलोकेचकल्पांश्चमोदतेदशपंचच॥इतितिलपीठदानम्॥ ॥अथतिलादर्शदानं॥तत्रैव॥अथा
मत्तंप्रवक्ष्यामितिलदानमनुत्तमं॥पूर्ववत्कल्पितेपीठेचतुर्हस्तेपरिष्कृते॥आदर्शविमलंन्यस्यतत्रदेवंमनोमयं॥
विष्णुरूपवरेण्यंतुविन्यस्यपरितोन्यसेत्॥विष्णुरूपंनारदः॥शंखचक्रगदापद्मधरोवामोर्ध्वबाहुतः॥विष्णुर्विधेयो दान.
भगवानिति॥पीतवस्त्रयुगंदिक्षुचक्रादीन्यायुधानिच॥पंचलोहप्रतिष्ठानितुलसीभिःसमर्चयेत्॥भानोमयनमस्ते ॥१३८॥
स्तुसौम्यरूपवृषध्वज॥मयाकृतानिपापानिसर्वाणाशुविनाशय॥इतिदत्वेऽस्मिन्नरंपतिमानसानिकृतानिवै॥परद्रोह

प्रवृत्तानिकामलोभोद्भवानितु॥देवदेवायचक्रिणे॥त्रिलोकीनाथदेवेशसर्वभूतकृपानिधे॥गजदानेनतुष्टस्त्वं
प्रयच्छममवांछितम्॥इत्युच्चार्यार्थदत्वातंप्रणिपत्यनमेत्प्रभुं॥सुरेंद्रलोकमासाद्यक्रीडतेकालमक्षयं॥वर्षाबु
दसहस्राणिक्रीडित्वासुचिरंदिवि॥ततोभूलोकमासाद्यसार्वभौमनृपोभवेदिति॥आदित्यपुराणे॥निवेदय
तियोनागंभक्त्यास्वर्णघंटंकृतं॥सूर्यायपर्वदिवसेतस्यपुण्यफलंशृणु॥समन्तेरावणाग्रस्थैर्गजयूथैःशु
शोभनैः॥प्रक्रीडतिमहायानैःशतसंख्यैरनेकशः॥सप्तद्वीपसमुद्रायांक्षितौनरपतिर्भवेत्॥भुक्त्वातुविपुलान्
भोगान्प्रलयेसमुपस्थिते॥सूर्ययोगंसमासाद्यसतत्रैवप्रलीयते॥इतिसूर्यगजदानविधानम्॥अथदासीदानवि
धानम्॥कूर्मपुराणे॥दासींदद्याद्यथाशक्तिमल्पेनालंकृतांशुभां॥सुवर्णैरजतैःसार्द्धंविधिवद्दक्षिणायुतां॥वि
त्तानुसारेणतांदत्वाविप्रायगृहमेधिने॥मोदतेस्वर्गलोकेयावत्कल्पशतत्रयं॥वन्हिपुराणे॥दासीदानंप्रकृसो
त्तं॥स्थिरनक्षत्रसंयुक्तेसोमसौम्यग्रहान्विते॥दानकालंप्रशंसंतिसर्वतःपर्वणिवापुनः॥अलंकृत्ययथाश
क्त्यावासोभिर्भूषणैस्तथा॥ब्राह्मणायप्रदातव्यामंत्रेणानेनभक्तितः॥मंत्रस्तु॥इयंदासीमयातुभ्यंश्रीवत्सप्र
तिपादिता॥सदाकर्मकरीभोग्यायथेष्टंभद्रमस्तुते॥इति॥पंचवर्षाधिकासातुचत्वारिंशत्समावधि॥दासीद्विजाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ दानेष्वयं विधिः॥ दत्वाक्षमापयेत्पश्चाद्ब्राह्मणं वस्त्रकांचनैः॥ अनुगत्वानुसीमांतं द्विजं विसर्जयेत्ततः॥ एवं दत्वा म
॥१३९॥ हाराज कृतकृत्यो भवेत्तु मान॥ इहलोके परे चैव समग्रं न्यग्यखंडितः॥ तथा॥ दासीं समीक्ष्य बहुशो गृहकर्मदक्षां यो
ब्राह्मणाय कुलशीलवते ददाति॥ विद्याधराधिपतिभिस्तु विभूजितेसौ मर्त्यः प्रयाति त्वजनैः सह विष्णुलोकम्॥
इति दासीदानम्॥ ॥ अथ रथदानं॥ गारुडे॥ गंत्रीतु रंगमंयुक्तं यो दद्याति द्विजातये॥ सर्वकामसमृद्धात्मा स राजा
जायते भुवि॥ गंत्री रथविशेषः॥ सचक्राक्षयुगोपेतां मल्लवारणभूषितां॥ आस्तीर्य शाप्यास्तरणं योक्त्रयुक्तां सकूब
रं॥ युक्तं चतुर्भिस्तुरगैर्ध्वजप्राकाराशान्वितो युतं॥ बलीवर्दयुतं वापि द्विजाय प्रतिपादयेत॥ पुराणे न्हि विप्रमाहूय स्वं
त्वा वस्त्रादिभूषितं॥ स दक्षिणां यथाशक्त्या दद्यात्सयतमानसः॥ दानमंत्रास्तु॥ गंत्रीमिमां प्रयच्छामि विश्वकर्माधि
दैवतां॥ दानेनानेन भगवान्प्रीयतां मे हरः प्रभुमानिति॥ एवं प्रदद्यविधिवद्गंत्रीमंत्रेणमानवः॥ विमानेनार्कवर्णेन
दिवं व्रजति मोदते॥ इहलोके भवेद्राजा बलवान्धर्मवत्सलः॥ कूर्मपुराणे प्रकारांतरेणोक्तं॥ रथं चतुर्बलीवर्दयु दान॰
टं धामाद्यं त्रिधा॥ विधानमस्ति सर्वैश्च रथोपकरणैर्युतं॥ स दक्षिणां च विप्राय दत्वा त्रिदिवपुरं व्रजेत्॥ ध्यान्याष्टतमम ॥१३९॥
श्वादद्याद्यामयुतं॥ त्रिधेति शक्त्यनुसारं त्रिविधं कश्च वर्णादक्षिणायुतमिसर्थः॥ रथोपकरणानि॥ पुराणोक्तौतोत्राहिति

॥स्कांदे दानमंत्रस्तु॥ रथाय रथ्यं नाथाय नमस्ते विश्वकर्मणे॥ विश्वरूपाय नाथाय रूपाणायनमो नमः इति॥ इति
रथदानम्॥ ॥ अथ प्रसंगाच्छिबिकादानं॥ वन्हिपुराणे वसिष्ठः॥ शृणुष्वान्यन्महीपाल महादानमनुत्तमं॥
येन वै दत्तमात्रेण मुच्यते नरकार्णवात्॥ मार्गशीर्षे शुभे पक्षे समुपोष्य हरेर्दिने॥ शुक्लपक्षे माघफाल्गुणयो
रपि॥ द्वादश्यां हरिमभ्यर्च्य फलशो परिसंस्थितं॥ शंखशार्ङ्गगदाचक्रधरं शेषाहिशयं॥ शिबिकां वक्रवंशा
त्यामनुरूपमपीशुभां॥ आनीय संविधिविन्यासः शुभ्रवस्त्रसमन्वितां॥ संपूर्णचसंदुकां ज्ञागारं तत्र कारयेत्॥ गं
डूकां सोपधानां॥ विधाभिज्ञेनसंपन्नविरंगंधशालविविन्नमं॥ आज्ञासारं शुचिं दक्षकलत्रोपत्यभूषितम्॥ प्रातः
संभार्यमभ्यर्च्य वासोभिः कर्णभूषणैः॥ उपानच्छुरिकावस्त्रूपदकंचुकिवेष्टकाः॥ आदर्शोस्यगिकापानीयपात्रं
कांस्यभाजनं॥ वत्सारो वृषभो देया धेनवश्च सुलक्षणाः॥ शिबिकावाहकानां तु तथैव छत्रधारिणः॥ वृत्तिर्देया
तथाऽन्नं च वर्षार्हं ब्राह्मणस्य च॥ वर्षे वर्षे वाहकानां ब्राह्मणस्य तथैव तु॥ वृत्तिर्देयास्तु विपुला वर्षे वर्षे तु वार्षि
की॥ इहमुत्रात्र तत्पत्रारां कुरुकेशव मे विभो॥ छत्रं लब्धीत यद्दत्तं ब्राह्मणाय शुभं॥ देवदेव जगन्नाथ विश्वरूपा
नघप्रभो॥ शिबिकायाः प्रदानेन प्रीतो भव जनार्दन॥ दत्वानुज्ञानविद्वेषसपत्नीकाय पवित्रिणो॥ सुरापः स्तेयकृत्त्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰
॥१५०॥

गीग्रसहस्रयुकृतत्स्यागः॥शिबिकादानमाहात्म्यमुच्यतेपातकात्सुद्रं॥पितृपक्षमातृपक्षपत्नीपक्षस्तथैवच॥आ
त्मानंबंधुपक्षंचतारयेच्चरकार्णवात्॥भुक्त्वासुविपुलान्भोगानिहामुत्रसुखप्रदान्॥सपत्नीकःसपितृकोवि
ष्णुसायुज्यमश्नुते॥अत्रसंभावितब्रह्महत्यादिपातकावलिनाऽपितृमातृपत्नीपक्षात्मबंधुपुरुषनरकार्णवतार
णार्थंकैहिकामुष्मिकभोगानुभवपूर्वकस्वंवपुसहितस्वात्मविष्णुसायुज्यकामःइमांगुष्ठछत्रोपानच्छुरिका
ध्वजधेनुचतुष्टयसमन्वितांवाहकैःछत्रधरसमन्वितांतुभ्यमहंसंप्रददेइतिदानवाक्यं॥इतिशिबिकादानम्॥ ॥
अथभूमिदानम्॥कौर्मे॥गोचर्ममात्रंभूखंडमपिकेवासंवाञ्छितः॥त्रिधासदक्षिणांकृत्वादत्वाशिवपुरंव्रजेत्
॥त्रिधेतित्रिविधंकस्वर्णकूपदक्षिणाभेदेत्रिधेत्यर्थः॥दानबृहस्पतिः॥अपिगोचर्ममात्रेणसम्यग्दत्तेनमानवः॥धू
तपापाविशुद्धात्मास्वर्गलोकेमहीयते॥दशहस्तेनदंडेनत्रिंशद्दंडंनिवर्त्तनम्॥दशतान्येवगोचर्मब्राह्मणेभ्योददत्स
तिपः॥यत्किंचित्कुरुतेपापंपुरुषोलोभमोहितः॥तत्सर्वंभूमिदानेनक्षिप्रमेवनिरूपति॥वृद्धवसिष्ठस्तु॥दशाह
स्तेनदंडेनदशहस्तात्समंततः॥पंचवाप्यधिकांदद्यादेतद्गोचर्मवक्ष्यते॥मत्स्यपुराणेतु॥सप्तहस्तेनदंडेनदशहस्तात्समं
ततः॥पंचवाप्यधिकांदद्यादेतद्गोचर्मकथ्यते॥त्रिंशद्दंडानिवर्त्तनं॥त्रिभागहीनंगोचर्ममानमाहप्रजापतिः॥तद्दर्शमथवा

राम॰
॥१५०॥

दद्यादपिगोचर्ममात्रकं॥भवनस्थानमात्रंवावासोपिपापैःप्रमुच्यते॥यत्किंचित्कुरुतेपापंजन्मप्रभृतिमानवः॥अपिगोचर्ममा
त्रेणभूमिदानेनशुद्ध्यति॥गावांशतंवृषश्चैकोयत्रतिष्ठत्ययंत्रितः॥तद्धिगोचर्ममात्रंतुप्राहुर्वेदविचक्षणाः॥एवंनानाप्र
कारेषुगोचर्मसमध्यमाधमभेदेनशक्त्याव्यवस्थातेयथा॥तथा॥श्रोत्रियायकुलीनायविनीतायतपस्विने॥वृत्तस्थायदरि
द्रायसर्वभूतहितायच॥ईदृशायप्रभूमिंदद्यादल्पामपिवासव॥कुलानितारयेद्धीरःसप्तसप्तच॥अभावसर्वसत्पात्रेस
नियोजयेत्॥भूम्यापापार्जिता॥वृद्धवसिष्ठः॥अपिपापकृतांराज्ञांप्रतिगृह्णातिसाधवः॥पृथिवींवाम्ब्रिंदिच्छंतिपावनंत्व
तदुत्तमं॥भूमिदानंमंत्रोमात्स्ये॥यथाभूमिप्रदानस्यकलांनार्हंतिषोडशीं॥दानान्यन्यानिमेशान्तिर्भूमिदानाद्भवत्विहे
ति॥दक्षिणाचसुवर्णमेव॥यदाहमांडुव्यः॥नहिभूमेःपरंवस्तुगोःसुवर्णाच्चकिंचन॥अतोभूविप्रविप्रातेःसुवर्णंद
क्षिणामतेति॥महाभारते॥नचोषरांननिर्दग्धांमहींदद्यात्कथंचन॥नश्मशानपरीतांचनचपापिनिषेवितां॥स्वदत्तां
परदत्तांवाभूमिंयोहरेतनरः॥षष्टिंवर्षसहस्राणिविष्ठायांजायतेकृमिरिति॥इतिभूमिदानम्॥ ॥अथगृहदानं॥कौ
र्मे॥शक्तितःसर्वकिमेनपर्णागृहमपिविधा॥सदक्षिणांद्विजेदत्वाब्रह्मलोकंव्रजेन्नरः॥सर्ववित्तेनसर्वप्रकारेण॥कांस्य
ताम्रादिभाजनसर्वधान्यघृततैलउख्याकांगोवलीवर्दहासीहसोलखलमुसलपीगगदिस्तृपेणावित्तेनविधापर्वंवदुत्तमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४हान॰प्र॰ दिपक्षत्रयेणासहस्रिणाग्रहदानान्मुखीप्राप्तेवित्तसमैः सर्ववस्तुषु॥ प्रत्तासुस्वविवस्त्रयंचर्थपात्रेदेयमतोगृहं॥ गृहदे॥ ऐष
॥१४१॥ कंदारवंवापिमन्ममयंवापिशान्तितः॥ सर्वोपकरणोपेतंयोदद्याद्विपुलंगृहं॥ ब्राह्मणायदरिद्रायश्रोत्रियायकुटुंबि
ने॥ क्रीडित्वासुचिरंस्वर्गेमानुष्यंलोकमास्थितः॥ भवत्यथाहितैश्वर्यैः सर्वकामसमन्वितः॥ व्यासः॥ गृहंदीपप्रमो
द्योतंशयनाद्यायनभोजनैः॥ उपस्करैश्चसंपन्नंसर्वधान्यप्रपूरितं॥ ब्राह्मणायदरिद्रायसुशीलायददातियः॥ तथा
ध्ययनशीलायश्रद्धायुतस्यापियत्फलं॥ दैवैःपितृगणैर्युक्तःसर्वभोगसमन्वितः॥ ब्रह्मलवर्षशतान्येवदशतिष्ठसनामयः
तस्मादिहसमागस्यसप्तद्वीपाधिपोभवेत॥ बहुप्रजोबहुधनोद्विजोवावेदपारगः॥ उपस्कराःमंचतूलिकोपधानका
स्यभाजननाद्यैः॥ सर्वधान्यानिपरिभाषायांहेयानि॥ ——पुराणे॥ पक्केष्टकामयंकृत्वाशैलेयंवापिदारुजं॥ मन्मयं
वापिभवनंशुभलक्षणसंयुतं॥ मत्स्यवारणशोभाढ्यंधेन्वाचैवसमन्वितं॥ अर्जुनैःसरलैरम्यैःशालैश्चैवमनोरमैः॥
तिनिसैःसर्जवृक्षैश्चकदंबैःसहवंजुलैः॥ शुभस्थानसमुत्पन्नैर्वास्तुलक्षणसंयुतम॥ आर्जुनादिवृक्षोपादानंवास्तु राम॰
शास्त्रोक्तवृक्षविशेषग्रहणार्थं॥ एतैर्दारुभिर्भवनंकृत्वेतिसंबंधः॥ स्थापनंचयथाथाम्नायंशुभेश्चैवतुशोधनम॥ भर्जे ॥१४१॥
नेसिंचनंचैवसातनोपिनकारयेत॥ मंगलान्युपहारांश्चवास्तुविधीतितांस्तथा॥ देवतापंचकंतत्रचत्वारिंशत्समन्वितं॥

अत्रवास्तुमंडलोद्धारप्रजाप्युक्तोमात्स्ये॥ एकाशीतिपदंकृत्वारेणुभिःकनकेनवा॥ पश्चात्तिपिष्टेनानुलिंपेत्सूत्रेणा
लोड्यसर्वतः॥ दशपूर्वापरारेखादशचैवोत्तरायताः॥ सर्ववास्तुविभागेषुविज्ञेयानवकाद्वन॥ एकाशीतिपदंकृत्वा
वास्तुवित्सर्ववास्तुषु॥ पदस्थान्पूजयेद्देवांस्त्रिंशतंचदशैवतु॥ द्वात्रिंशद्वाह्यतःपूज्याःपूज्याश्चांतस्त्रयोदश॥ म
ध्यनवपदस्त्वेकश्चत्वारस्त्रिपदस्मृताः॥ विंशतिस्त्वेकपदकास्तावंतोद्विपदाःस्मृताः॥ एवंप्रतिष्ठितादेवाश्चत्वा
रिंशाश्चपंचवा॥ नामतस्तान्प्रवक्ष्यामिस्थानान्यानिचबोधत॥ ईशकोणादिषुसुरान्पूजयेत्क्रमथोशान॥ ईशानश्चै
वपर्जन्योजयंतःकुलिशायुधः॥ सूर्यःसत्योभृशश्चैवआकाशोवायुरेवच॥ पूषाचवितथश्चैवगृहक्षतयमौतथा॥
गंधर्वोभृंगराजश्चमृगःपितृगणास्तथा॥ दौवारिकोथसुग्रीवःपुष्पदंतोजलाधिपः॥ असुरःशोषपापौचरोगोहि
र्मुख्यएवच॥ भल्लाटःसोमसार्पौचअदितिश्चदितिश्चवै॥ बहिर्द्वात्रिंशदेतेषुतदंतश्चसुरान्शृणु॥ आपश्चैवा
पसवित्रोजयोरुद्रस्तथैवच॥ अर्यमासविताचैवविवस्वान्बुधाधिपः॥ मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात
॥ अष्टमस्त्वापवत्सश्चपरिधौब्राह्मणाःस्मृताः॥ आपश्चैवापवत्सश्चपर्जन्योग्निर्दितिस्तथा॥ पृथ्वीधरःक्रमात॥
अष्टम॥ पदिकानांतुरीयमेवंकोणेष्ववशेषतः॥ तन्मध्येतुबहिर्विंशद्विपदास्तेतुसर्वदा॥ अर्यमाचविवस्वांश्चमित्रःपृथ्वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ घरस्तथा॥ब्रह्मणः परितो दिक्षु त्रिपदास्तेतु सर्वदा॥अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा॥ब्रह्मणः परितो दि
॥१४२॥ क्षु त्रिपदास्तेतु सर्वतः॥एतत्सर्वं कं गृहारंभेतु कुर्यादिसुक्रं तत्रैव॥वास्तोपरीक्षिते सम्यग्वास्तुदेहे विचक्षणः॥वा
स्तूपशमनं कुर्यात्समिद्भिर्वलिकर्मणा॥जीर्णोद्धारे प्रकुर्वीत तथा च नववेश्मनि॥नवप्रासादभवने प्रासादपरिव
र्तने॥द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च॥वास्तूपशमनं कुर्यात्सर्वमेव विचक्षणः॥एकाशीतिपदं लिख्य वास्तुम
ध्ये तु पिष्टकैः॥होमस्त्विमस्खले कार्यः कुंडे हस्तप्रमाणके॥यवैर्हुत्वा तिलैश्चैव समिद्भिः क्षीरवृक्षजैः॥पालाशैः
खादिरैश्चापामार्गोदुंबरसंभवैः॥कुशाद्दूर्वाभवैर्वापि मधुसर्पिःसमन्वितैः॥कार्यस्तत्र च मिर्बिल्वैर्बिल्वजैरथापि
वा॥होमांते भक्ष्यभोज्यैश्च वास्तुदेहे बलिं हरेत्॥तद्विशेषं नैवेद्यमिदं दद्यात्क्रमेण तु॥ईशाकोणाद्धृतान्नात्रं शिखिने वि
निवेदयेत्॥अं दनं सोत्पलं दद्यात्पर्जन्याय घृतान्वितं॥जयंताय ध्वजं पीतं पेष्टं कूर्मं च विन्यसेत्॥इंद्राय पंचरत्नानि पि
ष्टं च कुलिशं तथा॥वितानकं च सूर्याय धूम्रं सत्याय तथैव च॥भृशाय घृतौदनं मत्स्यानंतरिक्षाय शष्कुलीश्चांतरि
क्षाय दद्यात्सक्तूंश्च वायवे॥लाजाः पूष्णे तु दातव्या वितथाय चणकौदनं॥गृहक्षताय मध्वान्नं यमाय पिशितौदनं॥गंधौदनं राम॰
च गंधर्वेभ्यो भृंगाय मेषस्य जिह्विकां॥मृगाय यावकं दद्यात्पितृभ्यः कृसरां तथा॥दौवारिके दंतकाष्ठं पिष्टं कृसरां बलिं तथा॥सुग्रीवे ॥१४२॥

पूपकं दद्यात्पुष्पदंताय पायसं॥कुशास्तं वेन संयुक्तं तथा पद्मं च वारुणे॥पिष्टहिरण्मयं दद्यादसुराय सुरामतः॥घृतौ
दनं च शोषाय यवान्नं पापयक्ष्मणे॥एतत्पुरी रक्तरोगाय नागे पुष्पफलान्वितं॥भक्ष्यं मुख्याय दातव्यं मुद्गौदनमतः परं
भल्लाटस्यान्नकं दद्यात्सोमाय मधुपायसं॥सार्गाय शाल्लिजं पिष्टमदित्यै लोपिकां तथा॥दितेस्तु पूरिकां दद्यादित्येवं
बाह्यतो बलिः॥क्षीरमाप्याय दातव्यमायवत्साय वै दधि॥सावित्रे ललडुकं दद्यात्समरीचं कुशौदनं॥सवितृ गुडपू
पांश्च जयाय घृतचंदनं॥विवस्वते पुनर्दद्याद्रक्तचंदनपायसं॥हरितालौदनं दद्यादिंद्राय घृतसंयुतं॥गुडौदनं
तु मित्राय रुद्राय घृतपायसं॥आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे॥पृथ्वीधराय मांसानि कूष्मांडानि च दा
पयेत्॥शर्करापायसं दद्यादर्यम्णो पानमेव च॥पंचगव्यं यवांश्चैव तिलाक्षतहविश्चरुं॥भक्ष्यं भोज्यं विविधं ब्रह्मणो
विनिवेदयेत्॥एवं संपूजिता देवाः शांतिं कुर्वंति ते सदा॥सर्वेषां कांचनं दद्याद्ब्राह्मणो गोपयस्विनी॥राक्षसानां बलिं
दद्यान्मांसौदनसमन्वितं॥ईशानभागमारभ्य श्वेतं च विनिवेदयेत्॥मांसौदनं सरुधिरं हारिद्रौदनमेव च॥आग्नेयी
दिशमाश्रित्य विदार्यै विनिवेदयेत्॥दध्योदनं सरुधिरं मत्स्यखंडैश्च संयुतं॥पीतरक्तं बलिं दद्यात्तेनाप्यायतु राक्षसी॥
वायव्यां पापराक्षस्यै मत्स्यमांससुरासवं॥पायसं चापि दातव्यं स्वनाम्ना सर्वतः क्रमात्॥नमस्कारानुयुक्तेन प्रणवाद्येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वतः॥ ततः सर्वौषधिस्नानं यजमानं कारयेत्॥ द्विजांस्तत्र जपेद्भक्त्या प्रणवाद्येन सर्वतः॥ ततः सर्वौषधिषेचान्ते गृ
हसमागताः॥ एतद्वास्तुपशमनं कृत्वा कर्म समाचरेत्॥ कर्म गृहारंभादिकं॥ प्रासादभवनोद्यानप्रारंभे परिवर्त्त
ने॥ नववेश्मप्रवेशे च सर्वपापैकनाशये॥ वास्तुपशमनं कृत्वा ततः सूत्रेण वेष्टयेत्॥ रक्षोघ्नं पावमानेन सूक्तेन
भवनादिकं॥ नत्स्वमंगलं वाद्यं च कुर्याद्ब्राह्मणवाचनम्॥ अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः॥ गृहे वायतने
कुर्यान्न तद्दुःखमवाप्नुयात्॥ न च व्याधिभयं वापि न च बंधुधनक्षयः॥ जीवेद्वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः॥ इति॥ गृह
नमंत्रोत्र सैव वर्त्ते॥ इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं॥ तव विप्र प्रसादेन ममास्त्वभिनवं गृहं॥ एवमेकैकशो दत्वा
प्रणिपत्य क्षमापयेत्॥ स्वस्तीति ब्राह्मणैर्वाच्यं कोऽदादिति च पठितैः॥ यद्यस्य विहितं सर्वं तत्तस्मै प्रतिपादयेदिति
॥मात्स्ये पि॥ प्राप्ते सन्नदिने कार्यमैशान्यां हस्तसंमितं॥ चतुरस्रं समं कुंडं मेखलायोनिभूषितम्॥ पूर्वोत्तरे हस्तमि
ताथ वेदिर्गृहादिदेवेश्वरपूजनाय॥ सर्वार्चनं त्वत्र शिवाच्युतानां सूर्यस्य कार्यं फलमाल्यगंधैः॥ द्वारि तु कार्याणि
च तोरणानि पत्रैरपि क्षीरवनस्पतीनां॥ देवांश्च संस्थाप्य सरत्नकुंभं स्वगोधपात्रं वरवस्त्रयुक्तं॥ तथा॥ गृहस्योक्तेन वि
धानेन कृत्वाथाग्निमुखं ततः॥ गव्येन पयसा दध्ना स्थालीपाकं च कारयेत्॥ तस्यैते वे च चरुं जुहोति मध्यस्थिताग्नौ

गृहदेवताभ्यः॥ बलिं च सम्यग्विधिवत्प्रयुक्तं क्षीरेण धारां परितस्तु दद्यात्॥ ब्राह्मणांश्चयेत्सर्वपरितुष्टं क्षमापये
त्॥ शय्यां दक्षिणाभागे तु सोपधानां सदीपिकां॥ सितवस्त्रैः सुसंछन्नां लक्ष्मीनारायणान्वितां॥ लक्ष्मीनारायणा
प्रतिमोक्ता कामिके॥ पद्मासनगतं कुर्याद्देवं च चतुर्भुजं॥ दक्षिणाधः करे पद्मं शंखमूर्ध्वकरे न्यसेत्॥ वामोर्ध्वे च भवेच्च
क्रं लक्ष्मीरेष्टपरः करः॥ वामोत्संगगता लक्ष्मीः स्वर्णपात्रकरा भवेत्॥ दक्षिणास्तभुजो देव्याः पृष्ठे देवस्य चक्रिणः इति
॥सितांबरं कुंडलहेमभूषितं केयूरकंठाभरणाभिरामं॥ पत्नीसमेतं च करेण गृह्य तां दाता पठन्मंत्रमिमं गृहस्थः॥ एह्ये
हि नारायण दिव्यरूप सर्वामरैर्वंदितपादपद्म॥ शुभाशुभानंद शुचाम धीश लक्ष्मीयुत त्वं हि गृहाण विप्र॥ नमः
कौस्तुभनाथाय हिरण्यकवचाय च॥ क्षीरोदार्णवसुप्ताय यज्ञगम्याय ते नमो नमः॥ नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः
॥चराचरस्य जगतो गृहभूताय ते नमः॥ भूर्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः॥ नंदति यावत्कल्पांतं तथास्मिन्
भवने गृहे॥ लक्ष्म्या सार्द्धं न देवेश पुत्रपौत्रैर्युता गृहे॥ पंचयज्ञक्रियायुक्तो वसेयं च द्वतास्तकम्॥ एवमुक्त्वाथ देवेशं सपत्नी
कं द्विजोत्तमं॥ तिलप्रस्थोपरिस्थायां शय्यायामुपवेश्य च॥ वेदे दिदं ततो वाक्यं सर्वधान्ययुतं त्विदं॥ सर्वोपस्करसंयु
तं गृहं गृहाण त्वं द्विजोत्तम॥ तत्रोपकरणं सर्वं दंपत्योर्विनिवेदयेत्॥ एतद्दानफलं मयि तत्त्वैव॥ य एवं सर्वसंपन्नं पक्वेष्टवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्दा॰न॰त्र॰ निवेदयेत॥ कल्पकोटिसहस्राणि यावद्ब्रह्मलोके महीयते॥ सर्वौलिंगदानदातृत्वाविधियोऽप्याविधिः सर्वकं॥ वत्सलक्ष्मीनारायणौ वेदमे
॥१४४॥ नारायणासमीपतः॥ मन्त्रमयं चैव यो दद्यात् गृहं चोपस्कारान्वितं॥ पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत॥॥ कलिक
लुषविमुक्तः सजितः सिद्धसंघैरमरसचमरमालावीज्यमानोऽप्सरोभिः॥ पितृन्मातृनथ कुलपुत्रपौत्रप्रपौत्रान् पितरं क
निमग्नांस्तारयेदेक एवेति॥ अथैषां वचनानामेकवाक्यतया गृहदानप्रयोगः प्रदर्श्यते॥ ॥गृहदानं दित्सुः प्रागुद
ग्वा समासन्नं जलामनुपहितामनूषरां वास्तुशास्त्रोक्तगुणाभ्युपपन्नां भूमिं गत्वा तत्र समे गोमयेनोपलिप्ते चतुरस्रे दे
शे शंकुच्छायादिना प्राचीं कल्पयित्वा तत्र सुधादिलिप्तेन सूत्रेण समान्तरालं पूर्वापरायतं दक्षिणोत्तरायतं सूत्रस्ता
कास्फालनेन प्रागपरायतं दक्षिणोत्तरायतं नव नव रेखाः प्रकल्प्य कोष्ठात्मकमेकाशीतिपदं वास्तुमण्डलं विरच्य तन्मध्यकोष्ठं नवक
मेकीकृत्य तत्र ब्रह्माणं विन्यस्य तत्पूर्वादिचतुर्दिक्कुस्थकोष्ठत्रयमेकीकृत्य तेषु क्रमाद् अर्यमणं विवस्वंतं मित्रं पृथ्वीधरं
विन्यस्य तेषामुभययार्श्वस्थैशानादिकोष्ठेषु चतुष्टये प्रादक्षिण्येनापवत्सं सवितृं विबुधाधिपं राजयक्ष्माणं विन्यसेत॥ राम॰
तत्र आपवत्सस्यैशानकोष्ठद्वयं सवितुराग्नेयकोष्ठे सावित्रं विबुधाधिपं नैर्ऋत्यकोष्ठे जयं तेरा जयक्ष्मवायव्यकोष्ठे रुद्रं ॥१४४॥
विन्यस्याथ बहिरीशानादिसर्वकोष्ठेषु प्रादक्षिण्येन शिख्यादिदिसंतान्विन्यसेत॥ एवं पंचचत्वारिंशद्देवता होमसहिते स्थले काय इस्रा

घृतप्रकारे होमं कृत्वा ततः इशानकोणे घृताक्तान्नशिखिने विनिवेदयेद्दिग्बाहुक्रमेणास्यासर्वेभ्यो बलिं दद्यात्॥ प्रतिमे
कल्पाभावे सर्वेभ्यः पायसबलिं दद्यात्॥ ततः कृताभिषेकः कर्ता ब्राह्मणान् दक्षिणाद्यादिभिः संतोष्य तेभ्यो वास्तुशा
स्त्रानुसारेण पक्वेष्टकादिमयं गृहं निर्माय सुधाधात्वादिभिरलंकृत्य गृहोपकरणैर्गृहं संपूर्णं कृत्वा सति संभवे गृहां
गणे ऽत्राग्नेयदिग्भागे मंडपं कृत्वा तोरणावस्त्रादिनालंकृत्य पूर्ववद्वास्तुपूजां होमौ कृत्वा कलशोदकेनाभिषिक्तो यज
मानो गीतमंगलवाद्यादिभिर्गृहं रक्षोघ्नपावमानमंत्रैः त्रिःसूत्र्या प्रदक्षिणामावेष्टयपरितः क्षीरधारां पातयित्वा गृह
मध्ये दक्षिणाभागे ऽष्टदलपद्मं लिखित्वा तदुपरि प्रस्थमात्रांस्तिलान् प्रक्षिप्य तत्रोपधानादिसर्वोपस्कारसहितां सुपरिस्था
पितसुवर्णनारायणप्रतिमां शाय्यामभिवाय तत्र नारायणांसहस्रप्रतिग्रहीतारं ब्रह्माणं कुंडलवस्त्रमुद्रिकाकेयूरादिभिः सप
त्नीकमलंकृत्य तं करे गृहीत्वा सुलग्ने मंगलघोषे जायमाने गृहं प्रवेशयेत्॥ तत्र तं गाराल्यधिनारायणाद्यमात्येला
दिवसेदस्वंद्दतारकमिति ततः पूर्वोक्तः पठनीयः॥ ततः पूर्वस्यामपित्राग्न्योपरि उदङ्मुखं सपत्नीकमुपवेश्य स्वयं प्राङ्मुखः
उपविश्य कुशतिलजलान्यादाय अद्येत्यादिदेशकालादिसंकीर्त्य अमुकगोत्रायामुकशर्मणे वेदाध्यायिने अमुकशर्मणे ब्राह्मणाय

ध्दान॰प्र॰
॥१४५॥

इदंगृहंपक्वेष्टकादिरचितंयथाशक्तिसंपादितकांस्यताम्रादिभाजनंसर्वधान्यफलवराशार्करादिरसगोबलीवर्ददासी
दासमंचकतूलिकावितानादिर्वीपस्करणसहितंसदीपप्रद्योतंसर्वमन्यदेवतंसकलुषक्षयानंरसिद्धसंघप्रजि
तत्लाश्वरःकरकलितचामरवीज्यमानत्वसहितसंविभावितनरकनिमज्जनपित्रादिपुरुषत्रातपुत्रपौत्रादिबंधुतारणा
पूजितत्लाश्वरःकरकलितचामरवीज्यमानत्वसहितसंविभावितनरकनिमज्जनपित्रादिपुरुषत्रातपुत्रपौत्रादिबंधु
तारणपूर्वकेस्वंतेपक्वेष्टकारचितगृहदानेनकल्पकोटिशतावधिकालब्रह्मलोकेमहित्वकामइति॥ नोत्लनदारुजगृह
दानेतुकल्पकोटिशतावधिसमयनारायणसमीपक्षीरार्णवनिवासकामइति॥ दातव्यमन्यथापिगृहविशेषानुसारेण
त्वानुभ्यमहंसंप्रददेनममेतिशालगृहंतानलंदत्वा॥ इदंगृहंगृहाणत्वसर्वोपस्करसंयुतं॥ तवविप्रप्रसादेनममास्त्व
भिनवंगृहं॥ गृहंमयाप्रविभक्तंस्पर्ध्यगृहमाल्यंद्विजोत्तम॥ प्रीयतांमेजगद्योनिर्वासुदेवःपीडजनार्दनमितिमंत्रंपठेत॥ ततःप्र राम॰
तिग्रहीतादेवस्यत्वेत्यादिनाप्रतिगृह्यस्वस्त्यस्तुकाम्यथाशास्त्रंकामस्तुतिंपठेत॥ ततःकृतैतत्गृहदानप्रतिष्ठार्थंइ ॥१४५
दंसुवर्णमग्निदैवतंदक्षिणाचेनतुभ्यमहंसंप्रददइतिसुवर्णसहस्रमारभ्यैकसुवर्णावरांदक्षिणांयथाशक्तिदद्यात॥
ततस्तस्मैपादुकोपानच्छत्रचामरादिकंयथाशक्तिदत्वा॥ संपन्नंवाण्यसंपन्नंवागृहोपस्करमस्थवरां॥ सर्वसंपूर्णमेवास्तुत्वस्म

स्मात्द्विजोत्तमेतिसंप्रार्थ्यतदनुज्ञयास्वगृहंगत्वाब्राह्मणान्भोजयित्वास्वयंभुंजीतेतिगृहदानप्रयोगः॥ ॥अथमठदानं॥
स्कांदे॥ कृत्वासर्वप्रयत्नेनआयतनासनसंयुतं॥ पुण्यकालेद्विजेभ्योर्थेपतिभ्योवानिवेदयेत॥ सर्वान्कामानवाप्नोतिनि
ष्कामोमोक्षमाप्नुयादितिमठदानम॥ ॥अथप्रतिश्रयदानम॥ भविष्यपुराणे॥ प्रतिश्रयेषुविस्तीर्णेकारितेसजलेच
ने॥ दीनानाथजनार्थायवदकिंनकृतंभवेत॥ मार्कंडेयपुराणेपि॥ कुर्यात्प्रतिश्रयंगृहंपथिकानांहितावहं॥ निजवोहे
कदेशवासार्थंनांयोनिवेदयेत॥ अक्षयंपुण्यमुद्दिष्टंतस्यस्वर्गापवर्गदं॥ सर्वकामसमृद्धोसौदेववद्दिविमोदते॥ प्रतिश्र
योधर्मशालेतिलोकेप्रसिद्धः॥ यमः॥ आसनंपादशौचंचदीपमन्नंप्रतिश्रयम॥ ददत्येतानियःपंचसयज्ञःपंचदक्षिणः॥ अ
न्नैःप्राणाहिज्ञेयोरूपदोवस्त्रदःस्मृतः॥ सहिसर्वप्रदोनामयोददातिप्रतिश्रयं॥ अश्वमेधसहस्रस्यराजसूयशतस्यच॥
पुंडरीकसहस्रस्यफलमाप्नोतिमानवः॥ इतिप्रतिश्रयदानम॥ ॥अथाश्रमदानं॥ वाराहे॥ त्रिभौमंवाद्विभौमंवाकुर्या
देकभूमिकं॥ मठंविचित्रशालाढ्यंविशालंभव्यतोरणं॥ ध्यानाध्ययनहोमादिव्याख्यानमण्डितं॥ पुष्पवाटिकालीभिर्वासम
न्वितंक्षेत्रभूमिकं॥ विन्यस्तपुस्तकाधारंभक्तजनसंकुलं॥ नानाफलाकुलोद्यानराजिमंडलमंडितम॥ निर्मलस्वादुपानी
यसुसंभृतजलाशयं॥ यतीनांपथिकानांचनिवासमुतदुःखितां॥ पादुकोपानहच्छत्रकौपीनवसनासनं॥ उपयुक्तपदार्थानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० मन्येषामतिलब्धये॥ ग्रामं वा विपुलां भूमिं प्रस्थाप्य श्रद्धयान्वितः॥ एवं समाश्रमं कृत्वा तापनाय हिताय हं॥ अन्येषामपि लो
॥१५६॥ कानां दुःखिनामाश्रयार्थिनां॥ समाश्रमं प्रयच्छामि प्रीयतां मे जगत्पतिः॥ एवं दत्वा महाराज नसुचित्तं समाश्रयम्॥ अश्व
मेधमवाप्नोति मोक्षं चैवाधिगच्छति॥ इत्याश्रमदानम्॥ ॥अथ कन्यादानं॥ तत्र बृहस्पतिः॥ सहस्रमेव धेनूनां शतं चान
डुहां समं॥ दशानडुत्समं यानं दशयानसमो हयः॥ दशवाजिसमा कन्या भूमिदानं च तत्समं॥ तस्मात्सर्वेषु दानेषु कन्याद
नं विशिष्यते॥ भविष्ये॥ कन्यामलंकृतां दद्यात्समाहूय नराधिप॥ विद्यार्थिने ब्राह्मणाय कन्यादानं तदुच्यते॥ इयं कन्यास
वर्णादिभिर्दशमे कन्यकाप्रोक्ता इति वयोविशेष उक्तः प्राप्त रजादर्शनेनैवं विवक्षितां॥ तस्मादुद्वाहयेत्कन्यां नचेदृतुम
ती भवेदिति विशेषोक्तेः॥ हेमाद्रौ संवर्त्तः॥ अष्टवर्षा भवेद्गौरी नवमे नग्निका भवेत्॥ दशमे कन्यका प्रोक्ता द्वादशे वृष
ली स्मृता॥ वृषली स्वरूपं तु॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता॥ सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः इति
॥अंगिराश्च॥ अप्राप्तरजसा गौरी प्राप्ते रजसि रोहिणी॥ अव्यंजनकृता कन्या कुचहीना तु नग्निका॥ सप्तव दान०
र्षा भवेद्गौरी दशवर्षा तु कन्यका॥ प्राप्ते तु द्वादशे वर्षे कुमारीत्यभिधीयते॥ रोमकाले तु संप्राप्ते सोमो भुंजीत कन्यकां॥ रजः ॥१५६॥
काले तु गंधर्वः वह्निस्तु कुचदर्शने॥ तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्॥ विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः

ः॥ याज्ञवल्क्यः॥ वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ ब्रह्मांडे॥ कन्यां तु
पया भक्त्या स्वलंकृत्य सप्रयत्नतः॥ कुलीनाय गुणाढ्याय कन्यां दद्याद्विशेषतः॥ कन्यां वरयमाणाय दद्यादेष विधिः स्मृतः॥
स्कांदे॥ सुरूपां लक्षणोपेतामव्यंगांगीं कुलोद्भवां॥ कन्यां भ्रातृमतीं चैव धर्मार्थी समुद्वहेत्॥ विशालनेत्रां सुमुखीं नी
लकुंचितमूर्धजां॥ आताम्रपाणिपादां कंबुग्रीवां सुमध्यमां॥ विशालजघनां चारुनितंबस्थलभूषितां॥ अस्थूलगुल्फ
दशनामरुणाधरतालुकां॥ अपिंगाक्षीमकपिलामरूक्षस्वरसां शुभाम्॥ अस्थूलगंडनासाग्रां चारुताम्रां कूर्मनीषि
षाः॥ मनुः॥ चतुर्णामपि वर्णानां प्रेत्य चैव हितान्॥ अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत॥ ब्राह्मो दैवस्तथा चार्षः
प्राजापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः॥ राक्षसं क्ष
त्रियस्यैकमासुरं वैश्यशूद्रयोः॥ पंचानां च त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह॥ पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचनेति॥ ए
तेषां लक्षणम्॥ गुणवते वरायालंकृत्य कन्या प्रदीयते स ब्राह्मः॥ मनुः॥ यज्ञे तु वितते सम्यक् कर्म कुर्वते चर्त्विजे॥ अ
लंकृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः॥ कन्याप्रदानं विधिवदार्षो धर्मः स उच्य
ते॥ अनयासह धर्मं चर्यतामिति उक्त्वा यत्र कन्या दीयते स प्राजापत्यः॥ छद्मादिना यत्र कन्यापह्रियते स पैशाचः॥ राक्षसो ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ सं॰ प्र॰ ब्रह्मणः गांधर्वः समयान्मिथः॥ द्रविणादानाद्यत्र कन्या दीयते सत्वासुरः॥ वसिष्ठः॥ सर्वेषामेव चैतेषां नामैकजन्मानुगं
॥१४७॥ फलं॥ हारकस्मितिगौरीणां सप्तजन्मानुगं फलं॥ अष्टानां विवाहानां फलं विवाहप्रकरणे द्रष्टव्यम्॥ गंधर्वगोरक्षमयात्रा
त्रयं प्रपद्यते॥ पैठीनसिः॥ सवर्णायाः करो ग्राह्यः पाणिग्रहणकर्मणि॥ शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया॥ वसन
स्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥ कश्यपः॥ वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम्॥ नामसंकीर्तयेद्विद्वान्कन्यायाश्चै
वमेव हि॥ यमः॥ नांदीश्राद्धे विवाहे च प्रपितामहपूर्वकं॥ नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकं॥ तिष्ठेत्स्वर्वा मुखोद
तावरः प्रत्यङ्मुखो भवेत्॥ मधुपर्कान्वितायैनां तस्मै दद्यात्सदक्षिणां॥ उदपात्रं ततो गृह्य मंत्रेणानेन दापयेत्॥ गौरीं कन्या
मिमां विप्र यथाशक्तिविभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ दानप्रतिष्ठासिध्यर्थं सुवर्णां दक्षिणां ददेत्॥
वरस्य यस्य याज्ञास्यात्तस्य स्यात्सा त्वचोचितः॥ मधुपर्कः प्रदातव्यो ह्यन्यत्राखेचरा ततः॥ व्यासः॥ मृत्कासमृद्गृहे लग्ने
सावित्रीग्रहणं तथा॥ उपोषितः शुचिर्दद्यादर्चिताय वराय तु॥ हह स्मृतिः॥ चतुष्पादं गृहे कन्यां हासीछत्रीरथं ततः॥ रा॰ म॰
तिष्ठेत्तान्द्विजो दद्याद्भूम्यादीन्गृहवेश्मच॥ याज्ञवल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा॥ मातालभावे सर्वे ॥१४७॥
षां प्रकृतौ यदि वर्त्तते॥ यस्माप्रकृतिस्थायां दद्युः कन्यास्वज्ञातपः॥ स्कांदे॥ आमोक्ष्य सुवर्णानपरकीयां तु कन्यका

॥ धर्मेणाविधिना दातुमसगोत्रोपि युज्यते॥ अनुदानानिलैर्गौ॥ भूमिर्गावश्च दासीच दासो वासांसि शक्तितः॥ महिष्यावाजि
नश्चैव देयाः स्वर्णमणिस्तथा॥ ततः स्वगृह्यविधिना होमार्थं कर्म कारयेत्॥ यथाचारं विधेयानि मंगलानि कुतुकानि च॥
हेमाद्रौ दक्षः॥ अप्रजायां तु कन्यायां न भुंजीत कदाचन॥ दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥ नास्ति सत्या
त्तेभीतिर्नास्तितेन कांड्रयं॥ तीर्णास्त्वं सर्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि॥ दौहित्रस्य दर्शनेनैतदितिपितरः सदा॥ यत्किंचि
त्कुरुते दानं तद्दानं सायकल्पते॥ दत्वा मांनश्रोचेतक्षुधितानाडितापिवा॥ न भ्रातुः स्वाभिभर्त्ताबातर्थैवान्नरसा हस्त्रा॥
कुर्यान्मनुं न चैवास्या आगता वापि पोषयेत्॥ शोचंति जामयो यत्र विनश्यत्याशु तत्कुलं॥ न भुंजंति च यत्रैव वदहं सेव प्रजि
ताः॥ तस्मादेताः सदाभ्यर्च्या भूषणाच्छादनादिभिः॥ तिलराशिः कृतायावद्दिवाकर संमुच्छ्रितः॥ वर्षी तारस्वतेत स्पाति
ले मेकं तु पावता॥ संक्षयं लभतेतावद्ब्रह्मलोकश्च निश्चितं॥ कश्यपः॥ अग्निहोमातिरात्राणां शांतं त्रातशोकृतं॥ लभ
ते कन्यकां दत्वा मंत्रहोमैरलंकृतां॥ अनड्वाहसहस्राणां दशानां धुर्यवाहिनां॥ सुपात्रे विधिवद्दानं कन्यादानं च त
त्समं॥ साक्षात्कन्यादानासंभवे संवर्त्तः॥ देवादिकप्रदानं वा योदद्यात्तिद्यायहेः॥ विमाने न विचित्रेण किंकिणीजालमा
लिना॥ महेंद्रभवनं याति सेव्यमानोप्सरोगणैरितीति कन्यादानम्॥ ॥ अथ द्विजस्थापने॥ हेमाद्रौ दक्षः॥ मातापितृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ विहीनां स्तसंस्कारो वहनादिभिः॥ यः स्थापयति तस्येह पुण्यसंख्या न विद्यते॥ कालिकापुराणे॥ कारयित्वा तयोः स्वाहंस्त्रो
॥१४८॥ त्रियाणां कुलेषु च॥ वेदविद्वीशीलवत्सु द्विजेषु काद्दशस्वथ॥ ततो गृहाणि रम्याणि कुर्यादेकादशैव तु॥ कारयित्वा तु धा
न्यैश्च विविधैस्तानि पूरयेत्॥ दासीगोमहिषीश्चापि शयनासनपादुकाः॥ भाजनानि विविधानि ताम्रमृन्मयकानि च
॥ पात्राणि भोजनार्थं च उत्कृत्य चोपस्करं चयत्॥ योजयेदग्निहोत्राणि ग्राहयेत्तांश्चैव वः सर्वशान्तितो वाद्यं तत्रांतं॥ पृथ
कू पृथक् लांगला तानि वर्त्तनशाता ऽर्हतः॥ विषयं स्वर्वदंरवे दंशामयामार्द्दमेव वा॥ योजयेदग्निहोत्राणि ग्राहयेत्तां द्वि
जोत्तमान्॥ विधिपूर्वं यथा न्यायमात्मानः श्रेयसे नरः॥ अदुष्टकुलजानां च विधिरे ब्रह्मिरं तनः॥ यश्चमे ध्यान्द्विजान्म दे
योजयेद्धव्यकव्ययोः॥ न भवेत फलं तस्य वैदिकोपयंमु तिर्धुवा॥ यत्र दानव्रतान्यंचतीर्थयात्रादिकं चयत्॥ यएवं कारये
त्सीमां स्तेन सर्वमनुष्ठितं॥ ज्ञात्वा स्ववित्तसामर्थ्यमेकं चापि हि हायेद्दिजं॥ सोपितत्फलमाप्नोति यावत्वेव शतं संयुतं॥ इति द्वि
जस्थापनम्॥ ॥अथ राजस्थापनं॥ आदित्यपुराणे॥ भूमिपालं च्युतं राज्यमाधत्त संस्थापयेत्तु नः॥ तस्यावासो भु दान॰
वनेऽत्र हनाकपृष्ठे न संशयः॥ विष्णुधर्मोत्तरेपि॥ भूपालं यश्च्युतं राज्यात्स्वराज्ये स्थापयेत्तु नः॥ स याति त्रिदिवे कोसालोकं वा ॥१४८॥
वेच्छकोऽश्वतुर्दश॥ इति राजस्थापनं॥ ॥ अथ कपिलाधेनुदानं॥ व्यासः॥ रुक्मशृंगीं रौप्यखुरां सवत्सां कांस्यदोहनं

सवत्सां कपिलां दत्वा वेश्मान्सप्त समुद्धरेत्॥ यावंति चास्य रोमाणि सवत्साया भवंति हि॥ सुरभीलोकमासाद्य मतेतावतीः समा
ः॥ दानमंत्रो मात्स्ये॥ कपिले सर्वभक्तानां पूजनीयासि रोहिणी॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे इति॥ यमोपि
॥ रुक्मशृंगीं रौप्यखुरीं मुक्तालांगुलभूषितां॥ कांस्योपदोहनां धेनुं वस्त्रच्छन्नामलंकृतां॥ दत्वा द्विजेंद्राय नरः स्वर्गलोके
महीयते॥ दशधेनुप्रदानेन तुल्यैकैककपिला स्मृता॥ आदित्यपुराणे॥ सहस्त्रं यो गवां दद्यात्कपिलां चापि सुव्रत॥ सममेव
पुरा प्राह ब्रह्मा ब्रह्मविदांवर॥ कौर्मे॥ दत्वा सौवर्णिके शृंगे खुराः पंचपलान्विताः॥ पंचाशत्पलिकं ताम्रं कांस्यं चैतावदे
व च॥ वस्त्रं तु त्रिगुणं धेन्वा दक्षिणा च चतुर्गुणा॥ एतैरलंकृतां दद्याद्दांतामश्रान्तभूषितां॥ कपिलां विप्रमुख्याय स्वर्गमोक्षफ
लप्रदं॥ सप्तजन्मकृतात्पापान्मुच्यते दशसंयुतः॥ दशभिः पुरुषैः संयुतः स्वयं॥ यान्प्रार्थयते कामांस्तांस्तानाप्नोति मान
वः॥ अन्ते स्वर्गापवर्गौ च फलमाप्नोत्यसंशयः॥ पंचपलान्वितेति रूप्यस्य परिमाणम्॥ वस्त्रदक्षिणायोस्त्रिगुणपादिकं गोदान
सामान्योपकृतवस्त्राद्यपेक्षया ज्ञातव्यम्॥ विधिस्तु गोदानप्रयोगे वक्ष्यते॥ इयमेव वर्णभेदेन दशधोक्ता॥ वाराहे॥ सुवर्ण
कपिला पूर्वा द्वितीया गौरपिंगला॥ तृतीया चैव रक्ताक्षी चतुर्थी गुडपिंगला॥ पंचमी बहुवर्णा स्यात्षष्ठी च श्वेतपिंगला
॥ सप्तमी श्वेतपिंगाक्षी त्वष्टमी कृष्णपिंगला॥ नवमी पाटला ज्ञेया दशमी पुच्छपिंगला॥ एता दश समाख्याताः कपिलास्तेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान०प्र० रानने॥ सर्वास्वेता महाभागास्तारयंति न संशयः॥ संग्रामेषु प्रनष्टास्ताश्च सर्वपापप्रणाशना श्चेति इति श्रीमद्विद्वज्जनकृपापात्रीभूतश्री
॥१४१॥ मदनगणाचार्यविरचिते विधानपारिजाते सुवर्णादिसप्तमहादानविधानं॥ ॥अथातिदानं॥ भविष्ये॥ त्रीण्याहुरतिदाना
नि गावः पृथ्वी सरस्वती॥ नरकादुद्धरंत्येते जपवापनदोहनैः॥ तत्रादौ गोदानं निरूप्यते॥ भारते॥ दानानामिह सर्वेषां गवां
दानं विशिष्यते॥ गावः श्रेष्ठाः पवित्राश्च पावना जगदुत्तमाः॥ ऋते दधिघृताभ्यां च नेह यज्ञः प्रवर्तते॥ तेन यज्ञविशेषं च गो
मूलं संप्रचक्षते॥ लिंगपुराणे॥ अग्र्यग्रासाणि विप्राणां देवतायतनानि च॥ एयं ते शुक्लतायासां किं देयमधिकं ततः॥ हा
रीतः॥ बहुक्षीरां च यो गां वै ब्राह्मणायोपपादयेत्॥ उत्तारयेत्स स्वात्मानं सप्तसप्तकुलानि च॥ देवलः॥ सुवृत्तांगां ल
क्षणवतीं युवतीं वत्ससंयुतां॥ बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः॥ भारते॥ प्रासादाश्च त्रिवर्णाः स्यात्ताम्र
त्वोज्वलाः शुभाः॥ वराश्चास्य रसोपेतास्तत्र गच्छति गोप्रदः॥ जाबालिः॥ हेमार्थी मधिहात्र स्वपोगां दद्याद्वस्यान्विता॥ त्रि
विंतपूर्णा पृथिवी तेन दत्ता न संशयः॥ अदेयः अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च॥ हव्यकव्यव्यपेताय गौर्न दे राम०
या कथंचन॥ व्यासः॥ न कृशां पापवत्सां वा वंध्यां रोगान्वितां तथा॥ न व्यंगां न परिश्रांतां न दद्याद्ब्राह्मणाय गां॥ विश्वामित्रः ॥१४१॥
॥ नैकशृंगां चलच्छृंगां स्फुटितां सीचलत्खुरां॥ न दद्याद्विस्तीर्णां चैव गां शुभामेव दापयेत्॥ भारते॥ एकां गां दशगुर्दद्याद्

शाद्दद्याच्च गोशती॥ शतं सहस्रं वा गा दद्यात्सर्वे तुल्यफलाः स्मृताः॥ नंदिपुराणे॥ विधिना तु यदा दद्यात्पात्रे धेनुं सदक्षिणां
॥ तदा तारयते जंतुः सप्त कुलानामयुतैः शतैः॥ ॥अथ गोदानविधिः॥ विश्वामित्रः॥ प्राङ्मुखीं गामवस्थाप्य सवत्सां
तां सुपूजितां॥ पुच्छदेशेन दाता वै स्नातो बद्धशिखो भवेत्॥ उदङ्मुखस्तु विप्रः स्यात्पात्रे स्वे विप्रपाणिं तु प्राग्ग्रं तु निधाय
येत्॥ सतिलं सकुशं चापि गृहीत्वा दानमाचरेत्॥ अनेनैव तु मंत्रेण पात्रहस्ते जलं क्षिपेत्॥ यज्ञसाधनभूता या विश्व
स्याघप्रणाशिनी॥ विश्वरूपधरो देवः प्रीयतामनया गवा॥ अनुव्रजेच्च तां धेनुं ब्राह्मणेन समन्वितां॥ गोमंतीं तु ततो
विद्यां जपेत प्रयतः शुचिः॥ उद्दिश्य वासुदेवं च प्रीयतामिति चानघ॥ पात्रे मनसि संचिंत्य सतोयमक्षुवि निक्षिपेत्॥
जलेनाप्लावितापद्मनाभः सनातनः॥ अनंतभोगशायनः प्रीयतां परमः पिता॥ गोमती विद्या तु भारते॥ गा
वो मामुपतिष्ठंतु हेमशृंगाः पयोमुचः॥ सुरभ्यः सौरभेयाश्च सरितः सागरं यथा॥ गावः पश्याम्यहं नित्यं गावः पश्यंतु
मां सदा॥ गावोऽस्माकं वयं तासां यतो गावस्ततो वयं॥ यमः॥ गावः सुरभयो नित्यं गावो गुग्गुलसन्निभा॥ गावः प्रति
ष्ठा भूतानां गावः पश्यंतु मां सदा॥ गावोऽस्माकं वयं तासां यतो गावस्ततो वयं॥ यमः॥ गावः सुरभयो नित्यं गावो गुग्गु
लसन्निभा॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्॥ अन्नमेव परं गावो देवानां हविरुत्तमं॥ पावनं सर्वभूतानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान॰ख॰ रक्षंति च वहंति च॥ हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि॥ ऋषीणामग्निहोत्रेषु गावो होमे प्रतिष्ठिताः सर्वेषामेव भू
॥१५०॥ तानां गावः शरणमुत्तमं॥ गावः पवित्रं परमं गावो मंगलमुत्तमं॥ गावः सर्वस्य लोकस्य गावो धन्याः सनातनाः॥ न
मो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ ब्राह्मणाश्चैव गावश्च कुल
मेकं द्विधा कृतं॥ एकत्र मंत्रास्तिष्ठंति हविरन्यत्र तिष्ठतीति॥ दक्षिणामाह वसिष्ठः॥ सुवर्णं दक्षिणामाहुर्गोदाने
विशेषतः॥ सुवर्णं परमं ह्याहुर्दक्षिणार्थे न संशयः॥ गोप्रदानेन तारयते सप्त पूर्वान्परांस्तथा॥ सुवर्णं दक्षिणां दत्वा
तावद्द्विगुणमश्नुते॥ सुवर्णं परमं दानं सुवर्णं दक्षिणा परा॥ सुवर्णं पावनं प्राहुः परिमाणं परं तथा॥ परिमाणं प
रमिति परिमाणविशेषोक्तेरैच्छिकपरिमाणांतरं व्यावर्त्यते॥ एतच्च शक्तविषयं॥ अशक्तस्य तु॥ यजमानस्ततो दद्या
द्यथाशक्त्या तु दक्षिणामिति व्यासस्यैव वचनैः सुवर्णपरिमाणात्स्वल्पमप्यनुज्ञानादिति दानोद्योतकृत्॥ गोदा
नमात्र प्रार्थनामंत्रानाह वसिष्ठः॥ घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः॥ घृतनद्यो घृतावर्तास्ता मे संतु सदा राम॰
गृहे॥ घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं॥ घृतं मे सर्वतश्चैव गवां मध्ये वसाम्यहमिति॥ अत्र केचित्पुच्छदे ॥१५०॥
वर्षिपितृतर्पणमिच्छंति॥ इति गोदानविधानं॥ ॥अथ मत्स्यपुराणोक्तगोदानं॥ धेनुं सुपतिष्ठांगीं हेमशृंगीमको

पमां॥ सुशीलां राजतैः पादैस्त्रिवस्त्रसुसंवृतां॥ सदोहपात्रां कुतपे निविष्टचरणां तथा॥ कुतपोत्र नेपालकंबलः॥ च
रणाविकरणात्॥ सपक्षिणां प्रदद्यात्सोक्षयं स्वर्गमाप्नुयात्॥ गविरोमाणि यावंति सप्रसूतिकुलस्थितौ॥
तावंत्यब्दानि वसति स्वर्गे दाता न संशयः॥ सप्रसूतीरिति॥ प्रसूतिः तत्सहितो कुलस्थितिः कुलपरंपरा यस्याः सा
तस्यामित्यर्थः॥ एतच्च तगणपुराणं कपिलादानतः स्मृतं॥ दक्षांशैर्वर्णिकेष्वंगेषु गुणाः पंचपलान्विताः॥ पंचानान्त्य
लिंकं कांस्यतानं चापि तत्थैव च॥ दातास्यात्स्वर्गमाप्नोति यावदाभूतसंप्लवं॥ कांस्यं दोहनपात्रं॥ ताम्रपृष्ठे शौक्ष्याद
कं॥ दक्षिणा तु सुवर्णमित्युक्तं प्राक्॥ ॥अथ समानवत्सादानं॥ भारते॥ समानवत्सां कपिलां धेनुं दत्वा पयस्वि
नीं॥ सुशीलां वस्त्रसंवीतां ब्रह्मलोके महीयते॥ समानवत्सा समानवर्णवत्सा भिसर्थः॥ रोहिणीं तुल्यवत्सां तु धेनुं
दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसंपन्नां सूर्यलोके महीयते॥ सुव्रतां सुशीलां॥ समानवत्सां श्वेतां तु धेनुं दत्वा पयस्वि
नीं॥ सुव्रतां वस्त्रसंवीतामिंद्रलोके महीयते॥ समानवत्सां शबलां धेनुं दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसंवीतां सोमलो
के महीयते॥ समानवत्सां कृष्णां तु धेनुं दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसंवीतामग्निलोके महीयते॥ वातरेणुसवर्णां तु
सवत्सां कामदोहनीं॥ प्रदाय वस्त्रसंयुक्तां वायुलोके महीयते॥ समानवत्सां धूम्रां तु धेनुं दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ वीतामग्निर्लोके महीयते॥ वातरेणुसवर्णां तु सवत्सां कामदोहनीं॥ प्रदायवस्त्रसंयुक्तां वायुर्लोके महीयते॥ समानवत्सां
॥२५१॥ धूम्रां तु धेनुं दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसंवीतां यमलोके महीयते॥ समानवत्सां कृष्णां तु धेनुं दत्वा पयस्विनीं॥ सुव्र
तां वस्त्रसंवीतामग्निर्लोके महीयते॥ वातरेणुसवर्णां तु सवत्सां कामदोहनीं॥ प्रदाय वस्त्रसंयुक्तां वायुर्लोके महीयते॥
समानवत्सां धूम्रां तु धेनुं दत्वा पयस्विनीं॥ सुव्रतां वस्त्रसंवीतां यमलोके महीयते॥ अघ्न्या हेमसवर्णां तु सवत्सां कांस्य
दोहनां॥ प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते॥ अघ्न्या गौः॥ आप्यायध्वमघ्न्या इति श्रुतेः॥ हिरण्यवर्णां तु सवत्सां कां
स्यदोहनां॥ प्रदाय वस्त्रसंवीतां ब्राह्मणे कौबेरं लोकमाप्नुयात्॥ इति समानवत्सादाने॥ ॥अथ दशवर्णाधेनुदा
नं॥ तत्रैव॥ गां दद्याद्दरिद्राय विप्राय गृहमेधिने॥ स्वर्णालंकृतशृंगीं च वस्त्रघंटासमन्विताम्॥ रूप्यग्रांत्रिसमस्तं
च ललाटस्थितदर्पणां॥ एवं तत्र च सा मुक्तालांगुलभूषितां॥ कांस्योपदोहनां ताम्रलवणादि तरोदकैः॥ त्रिस
मस्तं त्रिभिः शीलक्षीरसंतानैः समलंकृतां॥ गवां पुच्छं गृहीत्वा यस्सुवर्णेन पातिता॥ गृहस्थो वेदविद्विप्रो दापयेत्
त्यतिग्रहे॥ भोगसौख्यप्रदा श्वेता धूम्रा भापापनाशनी॥ कृष्णा स्वर्गप्रदा ज्ञेया गौरी च कुलवर्द्धनी॥ रक्ता रूपप्रदा ज्ञेया पी राम॰
ता दारिद्र्यनाशिनी॥ पुत्रप्रदा कृष्णसमारा नीला धर्मविवर्द्धनी॥ कपिला सर्वपापघ्नी नानावर्णा च मोक्षदेति दशवर्णाधे ॥२५१॥

नुदानम्॥ ॥विष्णुधर्मोत्तरे॥ हेमशृंगीं रौप्यखुरां मुक्तालांगुलभूषितां॥ अहतांबरसंवीतां तथा कांस्योपदोह
नां॥ त्रिरात्रं स्थंडिले सुप्त्वा त्रिरात्रं गोरसाशनः॥ तत्तां तु तर्पिते दत्वा वाससा संहते द्विजे॥ सदक्षिणां महाभाग
त्रिरात्रं गोरसैस्ततः॥ प्राशासंधारणं कृत्वा गवां लोके महीयते॥ यावंति धेनो रोमाणि तावद्वर्षाणि मानवः॥ दत्वैवं क
पिलां विप्रः प्राप्नोत्यप्यधिकं फलं॥ एवमनेकपुराणेषु गोदानमुत्तमम्॥ ॥अथ देवतागोदानम्॥ तत्रैव॥ उपरागदिने
मथा साघस्नानतर्प्य पितॄंस्तथा॥ कृतोपवासः संप्राश्य पंचगव्यं नरेश्वर॥ घृतक्षीराभिषेकं च कृत्वा विष्णोः शिव
स्य वा॥ समभ्यर्च्य यथान्यायं पुष्पादिभिरनुक्रमात्॥ उदङ्मुखीं प्राङ्मुखीं वा गृहे स्थितां पयस्विनीं॥ राहोः सहस्रस
तां गौः॥ सपुत्रां वस्त्रसंवीतां सितयज्ञोपवीतिनीं॥ स्वर्णशृंगीं रौप्यखुरां सुवर्णोपरि संस्थिताम्॥ ब्राह्मिता दक्षिणायु
क्तां ब्राह्मणाय निवेदयेत्॥ गवामग्रेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ गावो
ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं॥ प्रदक्षिणां ततः कृत्वा धेनुं द्विजवरं च तं॥ इ
मां त्वं प्रतिगृह्णीष्व धेनुं दत्तां मया तव॥ समे पापापनोदाय गोविंदः प्रीयतामिति॥ मंत्रांतरं वह्निपुराणे॥ या धेनुः कल्पपस्या
सीरं देवी गोतमस्य च॥ सर्वकामफला देवी इह लोके परत्र चेति॥ एवमुच्चार्य संविप्रो विदमंत्रैस्ततो देवाह्वयेत्॥ शृंगा

५ दान॰प्र॰ मूलयोर्ब्रह्मविष्णू आवाहयामि॥ शृंगाग्रे सर्वतीर्थानि॰ शिरोमध्ये महादेवं॰ ललाटाग्रे देवान्॰ नासावंशेष
॥१५२॥ ण्मुखं॰ नासापुटयोः कंबलाश्वतरौ॰ कर्णयोरश्विनौ॰ नेत्रयोः शशिभास्करौ॰ दंतेषु वायून्॰ जिह्वायां वरुणं॰
हुंकारे सरस्वतीं॰ गंडयोर्मासपक्षौ॰ ओष्ठयोः संध्याद्वयं॰ ग्रीवायामिंद्रं॰ कुक्षौ रक्षांसि॰ उरसि साध्यान्॰ जंघयोर्ध
र्मं॰ खुरमध्ये गंधर्वान्॰ खुराग्रेषु पन्नगान्॥ खुरपश्चिमाग्रेष्वप्सरोगणान्॰ पृष्ठे एकादशरुद्रान्॰ सर्वसंधिषु व
सून्॰ श्रोणीतटे पितॄन्॰ लांगूले देवपत्नीः॥ वालसमूहे आदित्यान्॰ गोमूत्रे गंगां॰ गोमये यमुनां॰ क्षीरे सरस्व
तीं॰ दधिनर्मदां॰ सर्पिषि हुताशनं॥ रोमसंधिषु देवकोटीः॰ उदरे पृथिवीं॰ स्तनेषु चतुःसागरान् आवाह्य संप्र
जयेत्॥ उपकल्पयेत्॥ उपकल्पयेत्॥ अनुव्रजेत्तं गच्छंतं पदान्यष्टौ नराधिप॥ अनेन विधिना धेनुं यो विप्राय प्र
यच्छति॥ सर्वकामसमृद्धात्मा विष्णुलोकं स गच्छति॥ शिवाय विष्णवे वापि यस्तां दद्यात्तपस्विनीं॥ धेनुं स्नानोप
हारार्थं स परं ब्रह्म गच्छति॥ सूर्यं वा शक्तिमुद्दिश्य पदं याति परं तथा॥ इति॥ ॥अथ वृषभैकादशगोदानम्॥ दान॰
स्कांदे॥ गावः सर्वप्रयत्नेन देया एताः प्रयत्नतः॥ धेनवो योनवः शक्तेः स्याद्देया प्रयत्नतः॥ सर्वेषामेव रुद्राणां ॥१५२॥
प्रीत्यर्थं सुप्रसन्नधीः॥ दश गावः सवृषभा वृषभैकादशी स्मृता॥ शिवाय विनिवेद्यैवं शिवलोके महीयते॥ भविष्ये

तु॥ दश गावः सवृषभाः वृषभैकादशी स्मृता॥ सूर्याय विनिवेद्यैव महत्फलमवाप्नुयात्॥ द्वादशादित्यतुल्यात्मा
अणिमादिगुणैर्युतः॥ सौरादिसर्वलोकेषु सूर्यवन्मोदते वशीति॥ ॥अथ वृषभैकगोशतदानं॥ शिवध
र्मे॥ सवृषं गोशतं दद्याच्छिवायातीव शोभनं॥ त्रिसप्तकुलजैः सार्धं भ्रूणपत्फलमाप्नुयात्॥ सूर्यकोटिप्रतीका
शो विमानैः सर्वकामिकैः॥ शतरुद्रबलोपेतो वीरभद्र इवापरः॥ गत्वा शिवपुरं दिव्यं मंत्रेशाधिपतिर्भवेत्॥ सवृ
षं गोशतं दत्वा भास्कराय नराधिप॥ त्रिसप्तकुलजैः सार्धं सूर्यलोके महीयते॥ इति देवताभ्यो गोदानम्॥ ॥अथ
स्वरूपगोदानवचनानामेकवाक्यतया प्रयोगः प्रदर्श्यते॥ संभारान् संभृत्य कृतनित्यक्रियो यजमानः पर्वकाले ग
रोचनां स्मृत्वा कुशतिलयवजलान्यादाय घासादि संकीर्त्य कामनानुसारेण संकल्प्य श्रीपरमेश्वरप्रीत्यर्थं गोदान
महं करिष्ये तदर्थं ब्राह्मणस्य पूजनं वरणं च करिष्ये इत्युक्त्वा ब्राह्मणं संपूज्य तुभ्यमहं गां ददामि इदं स्वेति प्रत्युक्ते तत्
क्षे जलं दद्यात्॥ ततः कर्तव्येऽस्मिन् गोदाने अभ्यर्च्य गंधाक्षततांबूलस्रग्फलालंकारवासोभिः अमुकगोत्रममुक
शाखाध्यायिनममुकशर्माणमेवंविधोऽहं संप्रदानत्वेन त्वामहं वृणे इति स्वीकृते व्रतेन दीक्षामिति पठेत्॥ ततो
यामं गेष्ठिति मंत्रेण सामेधेनुमिति वासवत्सां गां सज्जयेत् शृंगाद्यादिभिः॥ शृंगखुरादिनालंकृत्य सवस्त्रेणाच्छादयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०भ्र० तत्रमंत्रः॥आग्रादत्तंमयादत्तंशुद्धंचैवसुनिर्मलं॥सुरभेवत्सदानेनप्रीयतांपरमेश्वरइति॥सुरभेत्वंजगन्माता देवि
ष्णुपदेस्थिता॥ग्रासंगत्स्वामयादत्तंगोमातस्त्वातुमर्हसीतिगोग्रासंदत्वागावोमेग्रग्रतःसंलिप्सार्द्धमेत्रैगांप्रदक्षि
॥१५३॥ णीकृत्यप्राङ्मुखस्थितगोःपुछेप्राङ्मुखस्तर्पणांकुर्यात॥स्वस्वशाखोक्तविधिनादेवर्षिपितृतर्पणांकृत्वामंत्रान्
पठनप्रसिंचेत॥मंत्रास्तु॥आब्रह्मणाोयेपितृवंशजाताइस्मारम्पतेभ्यःस्वधातोयमिदंददामि॥१॥पितृवंशेमृताये
चेसारम्यधर्मतोयंमयादत्तमक्षय्यमुपतिष्ठतां॥४॥उच्छिन्नबांधवायेचलुप्तपिंडोदकक्रियाः॥तेतृप्तिमखिलायां
तुगोपुछोदकतर्पणात॥ब्रह्माद्यादेवताःसर्वाऋषयोमुनयस्तथा॥असुरायातुधानाश्चमातरश्चंडिकास्तथा॥
दिक्पालालोकपालाश्चग्रहदेवाधिदेवताः॥तेसर्वेतृप्तिमायांतुगोपुछोदकतर्पणात॥ विश्वेदेवास्तथादित्याः
साध्याश्चैवमरुद्गणाः॥ क्षेत्रपीठोपपीठानिनदानद्यश्चसागराः॥पातालेनागकन्याश्चनागाश्चैवसपर्वताः॥
पितृगणाश्चगुह्यकाःप्रेतागंधर्वोरगराक्षसाः॥पृथिव्यांयश्चतेजश्चवायुराकाशमेवच॥रविमुख्यंतरिक्षेचयेचपाता
लवासिनः॥ब्रह्माशिवाःशिवातथाविष्णुःसिद्धिलक्ष्मीःसरस्वती॥तपोवनानिमार्गावानम्पत्तःपरमेश्वरः॥क्षेत्रौषधि दान०
लताव्रक्षावनस्पत्यधिदेवताः॥कपिलःशेषनागश्चतक्षकोनंतएवच॥अन्येजलचराजीवाश्चसंख्यातास्त्वनेक ॥१५३॥

श्चः॥चतुर्दशयमाश्चैवयेचान्येममकिंकराः॥सर्वेपियक्षराजानःपशिगाःपशवस्तथा॥स्वदजोद्भिज्जजीवाश्चअं
डजाश्चजरायुजाः॥अन्येपिवनजाजीवादिवानिशिविहारिणः॥अजागोमहिषारूपायेचान्येपशवस्तथा॥शांतिरा
शुभदास्तेसुर्गोपुछोदकतर्पणात॥आब्रह्मस्तंबपर्यंतमित्यारभ्येदमस्तुतिलोदकमिस्तेनाः॥ततोगविदेवता
न्यासः॥पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ॥तासांमध्येतुयानंदातस्यैदेव्यैनमोनमः॥श्रृंगेब्रह्माग्ले वि
ष्णुर्मुखेरुद्रःप्रतिष्ठितः॥मध्येदेवगणाःसर्वरोमकूपेमहर्षयः॥नागाःपुछेखुराग्रेषुतेचाष्टकुलपर्वताः॥मू
त्रेगंगादयोनद्योनेत्रयोःशशिभास्करौ॥एतेयस्यांस्थितादेवाःसाधेनुर्वरदास्तुमे॥गावःश्रेष्ठाःपवित्राश्चपावना
जगदुत्तमाः॥ऋतेदधिघृताभ्यांचनेहयज्ञःप्रवर्त्तते॥अग्न्यागाराणिविप्राणांदेवतायतनानिच॥यस्यांतेशकृतायां
सांकिंदृश्यमधिकंततस्तितीति॥अथगोप्रार्थना॥यालक्ष्मीःसर्वभूतानांयादेवेष्ववस्थिता॥धेनुरूपेणासादेवीमम
पापंव्यपोहतु॥विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः॥चंद्रार्कशक्तियाधेनुरूपासास्तुश्रियेमम॥चतुर्मु
खस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच॥लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे॥त्वंस्वधापितृयज्ञानांस्वाहाय
ज्ञभुजांतथा॥सर्वपापहराधेनुस्तस्माच्छांतिंप्रयछमेइतिमंत्रैरनुमंत्र्यपुष्पांजलिंदत्वाकुशातिलयवतुलसीजला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰वि॰ न्यासायश्चघेत्याद्युक्त्वा इमां गां रुद्रदैवत्यां सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठां मुक्तापुच्छां वस्त्राच्छादितां कांस्यदो
॥१५४॥ हां पितामह अमुकगोत्राय इत्यादि पूर्ववच्चतुर्थ्यंतं प्रयुज्य स्वगोत्रादिग्रहणपूर्वकममुकशर्माहं तुभ्यमहं संप्र
ददे न मम इति तत्हस्ते जलं दद्यात्॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशनी॥ विश्वरूपधरो देवः प्रीयताम
नया गवा॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ जलशायी ब्रह्म
पिता पद्मनाभः सनातनः॥ अनंतभोगशयनः प्रीयतां परमो हरिः॥ इमां त्वं प्रतिगृह्णीष्व धेनुं दत्तां मया तव॥ सनो
पापपनोदाय गोविंदो भवतु द्विजेति पठित्वा नमेत्॥ ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा देवस्य त्वेति पठित्वा प्रतिगृह्णा
मीत्युक्त्वा कोदादिति कामस्तुतिं पठेत्॥ ततः कर्ता कृतैतत्गोदानप्रतिष्ठार्थं इमां सुवर्णदक्षिणामग्निदैवतां
तुभ्यं संप्रददे न मम इति सुवर्णं दद्यात्॥ ततो गोसहितं ब्रह्मणं विप्रमनुव्रजन् गोमंत्रान् पठेत्॥ सा यथा॥ गावोस्माकं
वयं तासां यतो गावस्ततो वयं॥ ब्राह्मणाश्चैव गावश्च कुलमेकं परं मतं॥ एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति॥ ततो राम॰
गावः सुरभयो नित्यमित्यादि पवित्राभ्यो नमो नमो नमः इति पठित्वा गावो ममाग्रतः संत्विति गां प्रदक्षिणीकृत्य द्वि ॥१५४॥
जं विसृजेत्॥ सुरदक्षिणा मम ये अभ्योदत्वा ब्राह्मणान् संपूजनेन सम्यग्यथाशक्ति ब्राह्मणान् भोजयित्वा स्वयं स्वसाचेति

फलमीश्वराय समर्प्य बंधुभिः सह भुंजीत॥ गौरेकस्यैव दातव्या॥ गौरेकस्यैव दातव्या श्रोत्रियाय विशेषतः॥ सा
हि तारः पतेत्पूर्वान्सप्तसप्त च सप्त च॥ नैकां बहुभ्यो दातव्या यतो दोषकरी भवेदिति हेमाद्रौ वांगिरसोक्तेः॥
इति प्रत्यक्षगोदानप्रयोगः॥ ॥ अथोभयतोमुखीदानं॥ मात्स्ये॥ रुक्मशृंगीं रौप्यखुरां मुक्तालांगूलभूषितां॥
कांस्यपात्रदोहनां राजन्सवत्सां द्विजपुंगवे॥ प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुतां॥ यावद्वत्सो योनिगतो
यावद्गर्भं न मुंचति॥ तावद्गौः पृथिवी ज्ञेया सशैलवनकानना॥ द्रविणसंयुतामिति द्रविणमत्र दक्षिणात्मकं॥
तच्चात्रिपलामध्येपलाद्याकल्पितमता॥ वाराहे तु॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्वितां॥ तद्दिनं पाय
साहारः पयसा वा तिवाहयेत्॥ सुवर्णस्य सहस्रेण तदर्द्धेनापि वा पुनः॥ तस्याप्यर्धशतं वाथ पंचाशद्वा तदर्द्ध
कं यथाशक्त्यापि दातव्यं वित्तशाठ्यविवर्जितमिति परिमाणांतरमुक्तम्॥ इमां द्वाशोभयमुखी भयास्नाता मम मा
स्तु वै॥ ममवंशो विश्वदेवस्य स्वस्तिकरो भव॥ इरावती धेनुमती च वत्सादेवस्य लातरदनंतरं॥ प्रतिगृह्णामि
त्वां धेनुं कुटुंबार्थं विशेषतः॥ स्वस्तिर्भवतु मे नित्यं रुद्रमातर्नमो नमः॥ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृ
ह्णातु॥ क इदं कस्मा अदादिति मंत्रं च संपठेत्॥ विसर्जयेद्ब्राह्मणं देवीं गां च तस्य गृहं नयेत्॥ मात्स्ये॥ प्रसूयमानां यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्त्वाश्चैवं तु द्रविणसंयुतां ॥ ससमुद्रगुहा भूमिः सशैलवनकानना ॥ चतुरंता भवेद्दत्ता पृथिवी नात्र संशयः ॥
यावंति धेनुरोमाणि वत्सस्य च नराधिप ॥ तावत्संख्यान्युगगणान्देवलोके महीयते ॥ पितॄन्पितामहां
श्चैव तथैव प्रपितामहान् ॥ उद्धरिष्यत्यसंदेहं नरकाद्भूरिदक्षिणाः ॥ घृतक्षीरवहाः कुल्या दधिपायसकर्दमाः
॥ यत्र तत्र गतस्तस्य भवेद्वै क्षितकामदः ॥ गोलोकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव ॥ स्त्रियश्च तं चंद्रस
मानवक्त्राः प्रतप्तजांबूनदतुल्यवर्णाः ॥ महानितंबस्तनवृत्तमध्या भजंत्यजस्रं नलिनाभनेत्राः ॥ यावद्वत्सप
दौ वै मुखं योन्यां च दृश्यते ॥ तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥ सर्वतः शुद्धवर्णा या पादेषु च विशेषः
॥ कपिला सा तु विज्ञेया सर्वपापप्रणाशिनीत्यादि ॥ ॥ अथैतत्प्रयोगमाहस्म वनः ॥ एतस्याः प्रधानकालः
प्रसवकालो नान्यकालं प्रतीक्षेत ॥ व्यतीपातविषुवायनषडशीतिमुखविष्णुपदीग्रहणांतोः सर्वपुण्यका
लास्तदैवस्युर्यदा सार्द्धप्रसूता तदा स्नातो ब्राह्मणांश्च तन्नील ससन्नीच्च क्रियाधेय गोरूपं तमाकूयं प्रणीपत्य
श्चपाद्य गवत्रंतिचार्त्तोहं भीतोस्माद्गाधाद्दपारात्संसारार्णवात्समुद्धारयामि दूष्प्रवरान्दत्तापरान्नात्मानं
च स्वामीन भवं तं दानपात्रमासाद्य तन्मप्पनुग्राह्यतं तु बुध्येमां गां कृशाभार्थलिश्रयानेन तथा त्वि सुके देशफ राम० ॥१५५॥

लादिसंकीर्त्य पुराणोक्तफलकामो विष्णुप्रीतिकामो वा उभयतोमुखीगोदानमहं करिष्य इति संकल्प्य प्रवराघुक्ता
रपूर्वकं ब्राह्मणांशूत्वा तस्मै पद्मानि दत्त्वा संतोष्य सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं कांस्यदोहां मुक्ताफलवस्त्रादि के
गोसमीपे स्थापयित्वा तामनुमंत्रयेत ॥ त्वं महीमवनिर्विश्वधेनामिति मंत्रं पठित्वा व्याप गावो अग्मन्नुत भद्रमक्र
न्निति गोसूक्तेन गां पूजयेत ॥ ततो वत्समुखे निर्गते घृतसुवर्णयुतकांस्यपात्रे गोपुच्छं निक्षिप्य घृतान्तं हस्त्वा प्रा
ङ्मुखो दाता सपत्नीकः उदङ्मुखावस्थितब्राह्मणाय गोत्राघुच्चारपूर्वकं नामसंकीर्त्य स्वनामोच्चार्य नपूर्वकमि
मामुभयतोमुखीं सुवर्णशृंगीं रूप्यखुरां ताम्रपृष्ठीं कांस्यदोहनां युतां रुद्रदैवत्यां श्रीविष्णुप्रीतये तुभ्यमहं गां
संप्रददे न मम इत्युक्त्वा प्राङ्मुखावस्थितगोपुच्छं तिलकुशजलयुतं ब्राह्मणहस्ते निक्षिपेत ॥ तत एतान्मंत्रान्पठे
त ॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥ जलेशायी प्रधिस्थापिता पद्मना
भः सनातनः ॥ अनंतभोगशायनः प्रीयतां प्रतयानया ॥ इमां गृहाणोभयतोमुखीं भवांस्त्राता मम मास्त्वैवे ॥ ममवं
शविवृद्ध्यर्थं सदा स्वस्तिकरो भव ॥ तत इरावती धेनुमतीति जपित्वा देवस्य त्वेति चोक्त्वा प्रतिगृह्णातु भवानिति व
देत ॥ ततः प्रतिगृह्णामि ॥ धेनो त्वां प्रतिगृह्णामि कुटुंबार्थविशेषः ॥ स्वस्ति भवतु मे नित्यं रुद्रमातर्नमोस्तु त इति मंत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ पठित्वा देवस्यत्वेसंते प्रतिगृह्णामीति त्वोत्वा काइदं कस्मादिति कामस्तु तिं पठेत्॥ द्यौस्त्वा ददातु॥ पृथिवीत्वा प्रति
गृह्णात्विति स्वात्मप्रतिगृहीता रौ क्रमेण पठेयातां॥ ततः कृतैतद् उभयमुखीगोदानप्रतिष्ठार्थं यथाशक्त्यनुसारेण पलत्र
॥१५६॥ यादिपरिमितं स्वर्णं दक्षिणां संप्रददे न ममेति दक्षिणां दत्वा विप्रवेदप्रतिरोप्य रत्नानि ग्रामक्षेत्रधान्यानि वस्त्रा
णि रसांश्च यथाशक्ति दद्यात्॥ ततः प्रतिग्रहीता॥ गार्भी अस्योषधीनामिति मंत्रं पठन् दक्षिणपाणिना वत्समाकर्ष
येत्॥ अथ निर्गते वत्से वत्सं ग्रिमुयसमाधाय गोपुच्छे ये देवा वासोदिवीति देवास्तर्पयेत्॥ सहस्तोमा इति ऋषीन्॥ उ
शंतस्त्वेति पितॄन्॥ इमंमे गंगे इति नदीः॥ अद्रिभिः सुतो मतिरिति पर्वतान्॥ वनस्पते शतवल्श इति वनस्पतीन्
॥ समुद्रज्येष्ठा इति समुद्रान्॥ अहिरिव भोगैरिति नागान्॥ मधुवाता इत्योषधीः॥ त्वद्भ्यो भूमिरिति पृथिवी॥ इलेघा
वापृथिवी मही द्यौः॥ उर्वी न पृथ्वी बहुले गभीरे इति शेषां॥ आब्रह्म स्तंबपर्यंतमिति तर्पयेत्॥ ततश्च आचम्य स्वगृह्यो
क्तप्रकारेण आज्यभागांतं कृत्वा गौरीमिमायेति मंत्रेणा चतुर्दशीत्याज्याहुतीर्हुत्वा होमशेषं समाप्य यथाशक्ति ब्राह्मणा एम॰
भोजनं संकल्प्य स्वस्त्ययनं वाचयीत॥ अथास्य कर्मणः फलश्रुतिमुदाहरंति॥ अभक्ष्यभक्षणमपेयपानं चाथ अग्राह्यग्रहणं सघ ॥१५६॥
एवमुक्नाति॥ उपाध्यायीं स्वसुतां स्वामिभार्यां मातरं मातृष्वसारं मातुलानीं भगिनीं भागिनेयीं त्रिविध्यजायां धात्रीं मम

मप्यगम्यां गत्वोभयत्रीरसं सपरिवां ब्राह्मणाय दद्यात्॥ परिकरेभ्यः सुवर्णरत्नरूप्याणि क्षेत्राणि ग्रामधान्यानि
वस्त्राणि रसाल्वसा घाश्चैवं दत्वा धायांगधाः शतं गवां तदर्धं तदर्धं वा सर्वस्वं वा सहतया ब्राह्मणाय दद्यान्महापावकवि
मुक्तोपि विमुक्तः स्यादिति॥ अथ ब्राह्मणान्विसृज्य तेन सह गच्छेत् गामनुव्रज्य गोमतीविद्यां पठेत्॥ सा यथा॥ गावः सुरभ
यो नित्यं गावो गुग्गुलगंधिकाः॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्॥ अन्नमेव परं गावो देवानां हविरुत्त
मं॥ पावनं सर्वभूतानां क्षरंति च वहंति च॥ हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि॥ ऋषीणामग्निहोत्रेषु गावो हो
मे प्रतिष्ठिताः॥ सर्वेषामेव देवानां गावः शरणमुत्तमं॥ गावः पवित्रं परमं गावो मंगलमुत्तमं॥ गावः सर्वस्य लोकस
गावो धर्माः सनातनाः॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ घृतक्षी
रप्रदा गावो घृतयोन्यो घृतोद्भवाः॥ घृतनद्यो घृतावर्तास्ता मे संतु सदा गृहे॥ घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं॥ घृ
तं मे सर्वतश्चैव घृतं मे मनसि स्थितं॥ गावो ममाग्रतः संतु गावः पृष्ठत एव च॥ गावो मे सर्वतः संतु गवां मध्ये वसाम्य
हमिति॥ ततः स्वगृहमेत्य ब्राह्मणान्भोजयित्वा स्वयं क्षीराहारः पायसाहारो वा तद्दिने भवेदिति मयमखारे महीनदी
दमरत्नोक्त उभयतोमुखीदानप्रयोगः॥ ॥ अथ वैतरणीधेनुदानं॥ ब्रह्मवैवर्ते॥ युधिष्ठिरं प्रति मार्कंडेयः॥ या सा वैतरणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान ख्रवि नामयमद्वारेमहीनदी॥तस्याप्रमाणांरूपंचश्रृणुसर्वभयावहम॥ज्ञातयोजनविस्तीर्णापृथुलेसामहासरित॥अगा
धानंतरूपासादृष्टमात्राभयावहा॥पूयशोणिततोयासामांसकर्दमनिर्मिता॥क्रिमिभिःसंकुलंपूयंवज्रतुंडैरयोमु
॥१५७॥ खैः॥शिशुमारैश्चमकरैर्वज्रकंटैरिसंयुतैः॥अन्यैश्चजलजैर्घोरैर्युक्तासामर्मभेदिभिः॥पतंतितत्रवैमर्त्याःक्रंदमा
नाःसुदारुणं॥हाभ्रातःपुत्रतातेतिप्रलंबंतोमुहुर्मुहुः॥चिरमंतर्निमज्जंतिम्लानिंगच्छंतिपापिनः॥चतुर्विधैःप्राणिगणै
र्दृश्यासामहानदी॥तरंतितस्यादानेनस्वयमथानुपतंतिते॥धार्मिकादानशीलाश्चतांतरंतिनरोत्तमाः॥सानुकूलाभ
वेधेननदीवैतरणीनरां॥तच्छृणुष्वनरश्रेष्ठकथ्यमानंयुधिष्ठिर॥अयनेविषुवेपुण्येव्यतीपातेदिनक्षये॥अन्ये
षुपुण्यकालेषुदीयतेदानमादरात॥पाटलांमथवाकृष्णांवाकुर्याद्वैतरणींशिवां॥स्वर्णश्रृंगींरौप्यखुरांकांस्यपात्रसु
दोहनां॥कृष्णवस्त्रयुगाछन्नांसप्तधान्यसमन्वितां॥कार्पासद्रोणशिखरेआसीनांताम्रभाजने॥हैमंयमंप्रकुर्याद्वैलोहद
ण्डसमन्वितं॥महामहिषमारूढंमर्त्यपाशांकुशपरं॥इक्षुदंडमयंबध्वाउडुपंपट्टबंधनैः॥उडुपोपरितांधेनुंसूर्यदेहसमु
द्भवां॥कृत्वाधिवासयेद्विद्वांश्छत्रोपानहसंयुतां॥सप्तधान्यानिपरिभाषायामुक्तानि॥उडुपःप्लवः॥ततोयममुडुपगतांधेनुं राम॰
चवासोगंधपुष्पादिभिःसंपूज्याधिवासयेदित्यर्थः॥इममुच्चारयेन्मंत्रंसाक्षतोदकमंडलं॥यमद्वारेमहाघोरेयासावैत ॥१५७॥

तरणीनदी॥तांततुंगांददाम्येनांतुभ्यंवैतरणींमहमिति॥इत्यधिवासनमंत्रः॥अथैवप्रतिग्रहीतुर्विप्रस्यवस्त्रालंका
रादिभिर्वरणंकार्यंतन्मंत्रः॥विष्णुरूपद्विजश्रेष्ठभूदेवपंक्तिपावन॥सदक्षिणामयातुभ्यंदत्तावैतरणीत्वियं॥धर्मराजं
चविप्रंचधेनुंवैतरणींतथा॥सर्वंप्रदक्षिणीकृत्यब्राह्मणायनिवेदयेत॥पुच्छंगृहीत्वातद्देनोरग्रेकृत्वाचब्राह्मणं॥
धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहाभये॥उत्तितीर्षुरहंदेविवैरोपनमोस्तुते॥अनुव्रजेद्गच्छंतंसर्वंतत्स्वगृहंनयेत॥अनु
व्रजनेधेनुकेत्वमितिमंत्रः॥उक्तकालेषुदानासंभवेव्यासः॥आसन्नमृत्युनादेयागौःसवत्सातुपूर्ववत॥तदभावेतु
गौरेवनरकोत्तरणायवै॥तदायदिनशक्नोतिदातुंवैतरणींतुगां॥शक्तोमोरुक्तोदादद्याच्छ्रेयोरधान्मतस्पृतु॥तदामर
णात्सर्वकालोत्रअरुक्नुरोगरहितःपुत्रादिः॥ब्रह्मवैवर्ते॥एवंकृतेमहीपालसरित्सुखदाभवेत॥तीर्थेतेचततयाधेन्वा
सासरिज्जलवाहिनी॥सर्वाहूदानवाप्नोतियेद्विजायेचमानुषाः॥रोगीतुरोगनिर्मुक्तस्तथैवायदिसंस्थितः॥इतीर
युक्तंनवर्मस्तोपुराणंमयावैतरणीप्रदानम॥श्रृणोतिभक्त्यापठतीहसम्यक्सयातिविष्णोःपरमप्रमेयमितिवैतरणी
धेनुदानम॥ ॥अथप्रसंगादृषभदानम॥भविष्योत्तरे॥वृषदानफलंदिव्यंश्रृणुष्वकथयामिते॥पवित्रंपावनं
चैवसर्वदानोत्तमोत्तमम॥दशधेनुसमानश्चानेकश्चैववधुरंधरः॥दशधेनुप्रदानाद्धिवृषएकोविशिष्यते॥वृषभश्चापिपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ ष्यंगोत्थवेगःपांडुनंदन॥युवाभद्रःसुशीलश्चसर्वदोषविवर्जितः॥धुरंधरस्यापयंतिस्येकएवकुलंमहत॥त्राताभ
॥१५८॥ वतिसंसारात्राश्चकार्यविचारणा॥अलंकृत्यहेमशृंगंतंपुराणेन्हिसमुपास्थिते॥अलंकृत्यस्वर्णशृंगंगवस्त्रादिना॥
रौप्यलांगूलसंयुक्तंब्राह्मणायनिवेदयेत॥मंत्रेणानेनराजेंद्रतंशृणुष्ववदामिते॥धर्मस्त्वंवृषरूपेणजग
दानंदकारकः॥अष्टमूर्त्तेरधिष्ठानमतःपाहिसनातनः॥दत्त्वैवंदक्षिणायुक्तंप्रणिपत्यविसर्जयेत॥सप्तजन्म
कृतंपापंवाल्यंनःकायकर्मजं॥तत्सर्वंविलयंयातिगोदानस्यकृतेनवै॥यानंवृषभसंयुक्तंरौप्यमानंसुशोभन
म॥आरुह्यकामकंदिव्यंस्वर्लोकमधिरोहति॥यावंतितस्यरोमाणिगोवृषस्यमहीपते॥तावद्वर्षसहस्राणिगवां
लोकेमहीयते॥गोलोकादवतीर्णस्तुइहलोकेद्विजोभवेत॥सत्रयाजीमहातेजाःसर्वब्राह्मणपूजितः॥यमः॥दां
तंधुरंधरंदत्वाधृत्योपानहसंयुतं॥दशधेनुप्रदानाच्चयत्फलंतत्समश्नुते॥महाभारते॥युवानमिंद्रियोपेतंशते
नसहयूथपं॥गवेंद्रंब्राह्मणेंद्रायभूरिशृंगमलंकृतम॥वृषभंयेप्रयच्छंतिश्रोत्रियायपरंतप॥ऐश्वर्यंतेभिजायं दान॰
तेजायमानाःपुनःपुनः॥नातेनसद्गवीनामितिनिश्चयः॥इतिप्रत्यक्षवृषभदानं॥ ॥अथहेमरूप्यवृषदानम॥व ॥१५८॥
न्हिपुराणे॥वसिष्ठः॥येनेश्वरोदरिद्रोवाकरोतिविधिनान्वय॥दानंसर्वगुणोपेतंतच्छृणुष्ववदामिते॥भारादित्रिपलं

तंचवृषंकृत्वाविधानतः॥पुत्रंधेन्वाथवादद्याच्छक्तितोन्यसत्तम॥यामयाधेनवःप्रोक्ताःवृषावंतएवहि॥हरयेतानियो
क्तास्तुहेरायचतथावृषाः॥गोमयेनसमालिप्तेपद्वस्त्रसमावृते॥वृषंहेममयंरौप्यंवारत्वेनससंयुतः॥वस्त्रनील
मयेशृंगेमौक्तिकेचक्षुषीरदाः॥द्वात्रिंशच्छुक्लवत्तानिविद्रुमोष्ठौचनासिके॥मरकतंचविनिर्दिष्टंकर्णौवैहरितामय
के॥पद्मरागस्यवैपादाःखुराःरौप्यमयाःस्मृताः॥राजतानिचरोमाणिक्षौमवस्त्रेणकंबलं॥पट्टेनपृथगुद्दिष्टंसर्वेषा
मप्ययंविधिः॥वृषरोमस्फाटिकस्यापिलिंगोमणिःप्रकीर्तितः॥तथाधेनुर्यथान्यायंतासुवर्णस्यमनुकारयेत॥अभीष्ट
देवतापूजांकुर्वीततदनंतरं॥मंत्रेणानेनराजेंद्रद्विजायविनिवेदयेत॥गोवृषायततोदानेमःक्ष्यालानीकस्यनिष्कलः
॥जातरूपमयःसोयंतारितामाननसंशयः॥एतत्सविप्रवाक्दानंभक्त्यायःप्रतिपादयेत॥तत्फलंसमवाप्नोतिस्वाम्यस्य
नात्रसंशयः॥इतिसुवर्णरूप्यवृषदानम॥ ॥अथात्रधेनवःसाधारणपात्रप्रथमागुडधेनुस्यादितिसारभ्यदशामीस्या
त्स्वरूपतइत्यंतेनवाक्येनस्वरूपंगोसहपाठागुडधेन्वादिदानानिनिरूप्यंते॥मात्स्ये॥यास्तुपापविनाशिन्यःकथिता
दशधेनवः॥तासांस्वरूपंवक्ष्यामिनामानिचनराधिपः॥प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा॥तिलधेनुस्तृतीयातुच
तुर्थीजलसंज्ञिता॥क्षीरधेनुश्चविख्यातामधुधेनुस्तथापरा॥सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी॥रसधेनुस्तुनवमीद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० शमीस्यात्स्वरूपत इति॥कुंभाद्घृतादिधेनूनामितरासातु राशयः॥वक्ष्यमाणप्रकारेण घृतादिधेनूनां कुंभा॥इतरासा
॥१५७॥ तुराशय इति विवेकः॥सुवर्णधेनुमप्यत्र केचिदिच्छंति मानवाः॥नवनीते न तैलेन तथान्येपि महर्षय॥ घृतद्धिधानम
पितत्रैव॥मात्स्ये॥गुडधेन्वादिदानस्य यद्रूपमिह यत्फलं॥तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनं॥कृष्णाजिनं चतु
र्हस्तप्राग्ग्रीवं विन्यसेद्भुवि॥गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः॥लघ्वेणकाजिनं तद्वद्वत्सस्यापि च प्रकल्पयेत
॥प्राङ्मुखीं स्थापयेद्धेनुमुदक्पादां सवत्सकां॥एणकाजिनं बालस्य स्याज्जिनं॥प्राङ्मुखीं प्राक्शिरसं॥सवत्सकां
उत्तरभागस्थित वत्ससहितां॥उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयं॥वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृ
ता॥अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु॥चतुर्थांशेन वत्सः स्याद्गृहविभानुसारतः॥भारः पलसहस्रं द्वयमि
तिपरिभाषायामुक्तं॥धेनुवत्सौ घृतास्यौ तौ सितसूक्ष्मांबरावृतौ॥शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ॥
सितसूत्रशिरालौ तौ सितकंबलकंबलौ॥द्वितीयः कंबलः शाटीवलवाची॥ताम्रगडुकपृष्ठौ तौ सितचामररोम दान०
कौ॥गंडुकं ककुत्स्थानं॥पृष्ठस्पष्टं॥एतौ ताद्यौ कार्यौ॥एवमन्यत्रापि ज्ञेयं॥विद्रुमभ्रू युगोपेतौ नवनीत स्तनान्वि ॥१५८॥
[illegible]तौ॥क्षौमपुच्छौ कांस्यदोहाविंद्रनीलकतारकौ॥तारकोक्ष्याः कनीनका॥सुवर्णशृंगाभरणौ रजतखुरसंयुतौ॥खु

राः खुरपर्यायः॥नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ॥गंधकरंडः कूर्पूरादिपरिमितपात्रविशेषः॥अत्रानु
क्तेपरिमाणानां सुवर्णादीनां सारतः परिमाणात अपफलविशेष इति माया यथाशक्ति ग्रहणं॥इत्येवं रचयित्वा तु धू
पदीपैरथार्चयेत॥धूपदीपग्रहणं पूजासाधनोपलक्षणं॥तेन सर्वा पूजा स्यात॥दद्यात्तुड मयीं धेनुं मंत्रानेतानुदी
रयेत॥मंत्राश्चानुमंत्रणेऽस्य॥एवमामंत्र्य ग्रेवक्ष्यमाणत्वात॥यथा॥या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थि
ता॥धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु॥देहस्था या च रुद्राणी शंकरस्य सदा प्रिया॥धेनुरूपेण सा देवी मम पापं व्य
पोहतु॥विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसो॥चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥चतुर्मुखस्य
या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥स्वधा या पितृमुख्यानां स्वाहा यज्ञभु
जां च या॥सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥एवमामंत्र्य तां धेनुं ब्राह्मणाय निवेदयेत॥विधानमेतद्धेनूनां सर्वा
सामिह पठ्यते॥सर्वासां पूर्वोक्तघृतादिधेनूनां॥ स्वरूपधेनोस्तु पूर्वोक्तशृंगादिकल्पनमेव॥एतदेव विधानं स्यात
एवोपस्कराः स्मृताः॥मंत्रावाहनसंयुक्ताः सदा पर्वणि॥यथा श्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः॥अत्रेषयत्तफल
दाः सर्वपापहराः शुभाः॥अयने विषुवे पुण्ये व्यतीपाते तथा पुनः॥गुडधेन्वादयो देया उपरागादिपर्वसु॥अत्र घृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० द्विधेनुष्वुद्रव्यपरिमाणामपि गुडधेनूक्तमेव स्यात्॥ वेदाधानमेतद्धेनुनामित्युक्तत्वात्॥ विधानमितिकर्तव्यं॥ उपस्करा
॥१६०॥ घृतवस्त्रस्रुक्स्रुवौ स्त्रक्षौमादयः॥ विशेषस्तत्रवक्ष्यते॥ इति गुडधेन्वादिसामान्यविधानम्॥ ॥अथ गुडधेन्वादिदश
कप्रयोगः॥ कर्त्ताविषुवादिपर्वणि तत्कालेपुण्यदेशेवर्त्तमानो देशकालादिसंकीर्त्य मम सकलदुरितक्षयपूर्वका
शेषयत्नजन्मफलसमफलप्राप्त्युत्तरभुक्तिमुक्तिप्राप्तिकामोऽमुकधेनुदानमहं करिष्य इति संकल्प्य गणेशपूज
नपुण्याहवाचने कृत्वाचार्यमृत्विग्लक्षणं यथाशक्ति वस्त्रमुद्रिकाकुंडलादिभूषितं कृत्वा वृणुयात्॥ ततो गोमयो
पलिप्तायां कुशास्तीर्णायां भुवि चतुर्हस्तं प्राग्ग्रीवमुदग्लोमकं कृष्णाजिनं प्रसार्य तत्र भारद्वयपरिमितेन गु
डाद्रिनोत्तमं॥ भारद्वयपरिमितेन मध्यमं॥ एकभारपरिमितेनाधमामितिवा स्वानुसारेण संपादितगुडादिना प्राक्कु
शिरसमुदक्पादधेनुं कल्पयित्वा वक्ष्यमाणद्रव्यैरंगानि कल्पयेत्॥ तद्यथा॥ मुखं घृतपूर्णपात्रेण॥ शुक्तिभ्यां क
र्णौ॥ इक्षुदंडैः पादान्॥ मुक्ताफलाभ्यामीक्षणे॥ इंद्रनीलाभ्यां तारके॥ सिततंतुभिः शिराः॥ सितकंबलेन गलकंबलं॥ दा०प्र०
ताम्रेण ककुत्पृष्ठं च॥ सितचामरै रोमाणि॥ विद्रुमाभ्यां भ्रुवौ॥ नवनीतेन स्तनान्॥ क्षौमेण पुच्छं॥ सुवर्णेन शृंगे॥ रौ ॥१६०॥
प्येण खुरान्॥ नानाफलैर्दंतान्॥ गंधकरंडकेन घ्राणं कल्पयित्वा॥ कांस्यदोहनपात्रं वत्सं सितसूक्ष्मवस्त्राच्छन्नां चैव

नोकृत्तरदेशे लघुकृष्णाजिने धेन्वर्थोपकल्पितगुडादिद्रव्यचतुर्थांशेन वत्सं कृत्वा मुखादिस्थानस्थानादिद्रव्यैः सहितं
कुर्यात्॥ मुक्ताफलादिहीनं चतुर्थांशत्वमल्पत्वान्नेयं॥ ततो धेनुं सवत्सामावाहनाद्युपचारैः प्रतिष्ठाप्यैवं गुडधेन्वै स
वत्सायै नमः इत्यादिनाममंत्रैर्यथाविध्यभ्यर्च्याथ गृहीतकुसुमांजलिः सवत्सां धेनुं प्रदक्षिणीकृत्य॥ या लक्ष्मीः सर्वभूता
नामित्यादि तस्मात्शांतिं प्रयच्छ मे इत्यंतेन श्लोकपंचकेनानुमंत्र्य पुष्पांजलिं धेनोरुपरि विकीर्य नमस्कृत्य धेनुपश्चा
द्भागे प्राङ्मुख उपविश्य कुशायवतिलजलान्यादाय ॐ अद्येत्यादि उक्त्वा अमुकगोत्रायामुकशर्मणेमुकवेदांतर्गता
मुकशाखाध्यायिने ब्राह्मणाय सकलपापक्षयपूर्वकाशेषयत्नजन्यफलसमफलप्राप्तिसहितभुक्तिपूर्वकमुक्तिका
मः इमामेतावत्परिमितगुडादिद्रव्यकल्पिताममुकधेनुं घृतास्यां शुक्तिकर्णां इक्षुपादां शुचिमुक्ताफलेक्षणामिं
द्रनीलतारकां सिततंतुशिरां सितकंबलगलकंबलां ताम्रमयककुत्पृष्ठां सितचामररोमिकां विद्रुमभ्रूयुगां नव
नीतस्तनां क्षौमपुच्छां कांस्यदोहां सुवर्णशृंगीं रूप्यखुरीं नानाफलमयदंतां गंधकरंडकघ्राणां सितसूक्ष्माम्बराच्छ
न्नामेतत्कल्पितचतुर्थांशोपकल्पितवत्सां तुभ्यमहं संप्रददे न मम इति सगोत्राय एवं कंपुच्छदेशे दद्यात्॥ अ
थ प्रतिग्रहीता सावित्र्या यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत्॥ ततो दाता कृतैतत्गुडधेनुदानप्रतिष्ठार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान.प्र.
॥१६१॥

मिदं सुवर्णमग्नेर्दैवतं दक्षिणां तुभ्यमहं संप्रददे इति दद्यादिनानाथानघ यं गत्वा दीन्यथाशक्ति तोषयित्वाचार्यं क्षमाप्य
यथाशक्ति ब्राह्मणभोजनं दत्वेश्वरार्पणं मर्पयेत्॥ इति गुडधेन्वादिदानप्रयोगः॥ ॥यत्तु वन्हिपुराणादावितोपिन्यून
परिमाणाद्यैर्गुडादिधेनुकथनम्॥ तदेतत्फलविशेषपक्षपातप्रकारांतरमसद्भक्तविषयमिति न विरोधः॥ यथा वन्हिपुराणे॥
प्रथमा गुडधेनुः स्यादित्याद्यभिधायोक्तं॥ नवनीतेन तैलेन मधुभिः प्रोक्तास्तथापराः॥ कुंभाः स्यूरसधेनूनां द्रोणेनैव न
संशयः॥ सर्वाः समफलाः प्रोक्ता मध्यमोत्तमकन्यसाः॥ इत्यादि॥ ॥अथ प्रकारांतरेण तिलधेनुदानम्॥ विष्णुधर्मो
त्तरे ग॥ तिलधेनुं प्रवक्ष्यामि केशवप्रीणनाय च॥ यां दत्वा ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः॥ अगारदाही गरदः सर्वपा
पयुतोपि च॥ महापातकयुक्तश्च संयुक्तश्चोपपातकैः॥ मुच्यते तत्क्षणेनैव पापैर्विष्णुलोकं च गच्छति॥ अनुलिप्ते मही
पृष्ठे वस्त्राजिनकुशावृते॥ धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां॥ धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकं॥ स्वर्ण
शृंगीं रौप्यखुरां घ्राणवतीं तथा॥ कुर्याच्छर्कराजिव्हां गुडास्यामविकं बलां॥ इक्षुपादां ताम्रपृष्ठां शुचिं मुक्ताफले
क्षणां॥ प्रशस्तपत्रश्रवणां फलदंतवतीं शुभां॥ स्रग्दामपुच्छां कुर्वीत नवनीतस्तनान्वितां॥ सितसूत्रशिरालां च
सितसर्षपरोमिकां॥ फलैर्मनोभक्ष्यैर्मणिमुक्ताफलान्वितां॥ सितवस्त्रयुगच्छन्नां घंटाभरणभूषितां॥ सितसूत्रशिरा राम.
॥१६१॥

लां च सितसर्षपरोमिकां॥ फलैर्मनोभक्ष्यैर्मणिमुक्ताफलान्वितां॥ सितवस्त्रयुगच्छन्नां घंटाभरणभूषितां॥ इद्दकु
संस्थानसंपन्नां कृत्वा श्रद्धासमन्वितः॥ कांस्योपदोहनां दद्यात्केशवः प्रीयतामिति॥ या लक्ष्मीः सर्वभूतानामित्यादि
तस्माच्छांतिं प्रयच्छ मे इत्यंतानुमंत्रणमंत्राण्युक्ताः॥ वन्हिपुराणोक्तता दशधेन्वामेव मंत्रांतरमुक्तं॥ तिलास्त्वयि त्वदे
वत्या निर्मिताश्चेह गोसवे॥ ब्रह्मणा तन्मयी धेनुरतः प्रीणातु केशव इति॥ ततः प्रदक्षिणीकृत्य पूजयित्वा प्रणम्य च॥
सदक्षिणामथ तुभ्यं दत्वेतु स्त्वा विसर्जयेत्॥ अनेन विधिना दत्वा तिलाख्यां धेनुं नराधिप॥ सर्वपापविनिर्मुक्तः परं ब्रह्मा
धिगच्छति॥ यश्चापि दृष्टा तु विधिवद्दीयमानां प्रमोदयेत्॥ दीयमानां प्रपश्यंति ये च संहृष्टमानसाः॥ तेप्यशेषाघनिर्मु
क्ताः प्रयांति परमां गतिं॥ प्रशांताय सुशीलाय वेदव्रतधराय च॥ धेनुं तिलमयीं दद्यान्न शोचति कृताकृते॥ त्रिरात्रं
पस्तिलाहारस्तिलधेनुप्रदो भवेत्॥ एकाहमथवा मर्त्यस्तत्कृतेनांतरात्मना॥ दानादिभिर्भुक्तपापस्य नस्य पुण्यवतो नृपा॥
यो द्वापरादप्यधिकं कथितं तत्त्वमक्षरं॥ इति विष्णुधर्मोक्ततिलधेनुदानं॥ ॥अथ वाराहपुराणे॥ तिलधेनुं प्रदातव्या
दितु पक्रम्य चतुर्भिः स्रुतिकाभिस्तु प्रस्थ एकः प्रकीर्तितः॥ तेषां षोडशभिर्भवेद्धेनुश्चतुर्भिर्वत्सको भवेत्॥ इक्षुदंडमयाः पादाः द
ताः पुष्पमयाः शुभाः॥ नासा गंधमयी तस्या जिव्हा गुडमयी भवेत्॥ पुच्छे स्रक्कल्पनीया स्याद्घंटाभरणभूषिता॥ ईदृशीं क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ स्थापयित्वा तु स्वर्णशृंगीं प्रकल्पयेत्॥ कांस्यदोहां रौप्यखुरां पूर्ववद्धेनुविधानतः॥ तिलधेनुं ततो दद्याद्धान्यद्रोणं नियतें
॥१६२॥ द्रियः॥ आत्मानं तारयेद्दुर्गान्नरकान्नात्र संशयः॥ इति कांकुडवः॥ सेतिकेति क्वचित्पाठः॥ कुडवश्च द्वादशप्रसृति
परमितिः॥ तेषां तु शतैः षोडशभिरित्यर्थः॥ महाभारतेपि॥ सुलभी भवति॥ तथा॥ धेन्वाः प्रमाणेन समं प्रमाणं॥ धेनुं
तिलानामपि च प्रदाय॥ पानीयदायी च यमस्य लोके न यातनां कांचिदुपैति मर्त्यः॥ तथा॥ गोमया विघ्या धेनुं ति
लानामभिमंत्रयेत्॥ रसरत्नमयी स्वान्नसत्रोच्चेत्कृताकृते॥ गोते मतो विद्या गावो मामित्यो लोकाः पाकृ॥ इति तिलधे
नुदानम्॥ ॥अथ विश्वामित्रप्रोक्तसप्तव्रीहिधेनुदानम्॥ सप्तव्रीहिमयाः सप्त धेनवः परिकीर्तिताः॥ यथा तिलम
यी धेनुस्तथैवैतास्तु कारयेत्॥ यवव्रीहिमयी धेनुर्गोधूमास्तिलापरा॥ माषमुद्गमयी चैव सप्रियंगुश्च सप्तमी॥ सुक्ते
र्यवादिः प्रत्येकं प्रकृतिः॥ उपस्करं तु सर्वासु तिलधेनुवदीरितं॥ एतासामेव धेनुनुदानम्॥ सप्तव्रीहिमयाः सप्त धेनव
परिकीर्तिताः॥ यथा तिलमयी धेनुस्तथैवैतास्तु कारयेत्॥ यवव्रीहिमयी धेनुर्गोधूमास्तिलापरा॥ माषमुद्गमयी चै
व सप्रियंगुश्च सप्तमी॥ सुक्तेर्यवादिः प्रत्येकं प्रकृतिः॥ उपस्करं तु सर्वासु तिलधेनुवदीरितं॥ एतासामेव धेनूनामंगानि राम॰
तिलधेनुवत्॥ सप्तव्रीहिमयीः सप्त यो दद्यातीह मानवः॥ स याति परमं स्थानं वापुनतः स्वर्गमान॥ ब्रह्महा च सुरापश्च तस्क ॥१६२॥

रो गुरुतल्पगः॥ धेनुदानेन दत्तेन सोपि याति विष्णोः परं पदं॥ अत्र सप्तव्रीहिमया इति पदे व्रीहिशब्दः शस्य आदि
ग्रहोध्याहार्यः॥ इति विश्वामित्रोक्तव्रीह्यादिसप्तधेनुदानम्॥ ॥अथ घृतधेनुदानं विष्णुधर्मोत्तरोक्तमुच्यते
॥वसिष्ठः॥ तिलाभावे तथा दद्यात् घृतधेनुं यतव्रतः॥ येन भूय विधानेन तदिहैकमनाः शृणु॥ वासुदेवं ज
गन्नाथं घृतक्षीराभिषेचनैः॥ संपूज्य पूर्ववत्सर्वैर्गंधपुष्पादिभिर्नरः॥ अहोरात्रेनाम्नास्त्वभिष्टूय घृतार्चिषं
घृतार्चिषं जगन्नाथाय देवाय नम इति नाम्ना स्तुत्वेत्यर्थः॥ गव्यस्य सर्पिषः कुंभं पुष्पमालाविभूषितं॥ कांस्यो
पधानसंयुक्तं सितवस्त्रयुगान्वितं॥ हिरण्यगर्भसहितं मणिविद्रुममौक्तिकैः॥ अत्र पलसहस्रपरिमाणः कुं
भः॥ द्वादशपलाधिकपंचशतपलपरिमाण इति केचित्॥ हिरण्यगर्भेति मध्यवर्तिहिरण्यसहितां ब्रह्ममूर्तिं स
हितं वा॥ मणिविद्रुममौक्तिकैरिति सहार्थे तृतीया॥ इक्षुयष्टिमयान्पादान्खुरान्रौप्यमयांस्तथा॥ सौवर्णे चाक्षि
णी कुर्याच्छृंगे चागुरुकाष्ठजे॥ अत्र सुवर्णादि यथाशक्ति परिमाणानां॥ सप्तधान्यमये पार्श्वे यत्नोर्णान्च कंबलं
॥पत्तोर्णावीतकौशेयं कुर्यात्तुरुष्ककर्पूरैर्घ्राणं फलमयांस्तनान्॥ तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखं॥ तुरुष्कं
शिल्हकं॥ सिल्हारस इत्यर्थः॥ क्षौमवस्त्रेण लांगूलं रोमाणि सितसर्षपैः॥ ताम्रपात्रमयं पृष्ठं कुर्याच्छुक्लासमन्वितं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ ईदृक्सरूपां संकल्प्य घृतधेनुं नराधिप॥ तद्वत्कल्पनया विधानं घृतवत्सं प्रकल्पयेत॥ तद्वद्धृतधेनुवत्॥ कल्पनया
॥१६३॥ चतुर्थांशेन॥ तं च विप्रं महाभागं मनसैव घृतार्चिषं॥ कल्पयित्वा ततस्तस्मै प्रयतः प्रतिपादयेत॥ एतां मम मोपका
राय गृहाण त्वं द्विजोत्तम॥ प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः॥ इत्युद्दाहस्त्वविधिवद्दद्याद्धेनुं नराधिप॥ स्कांदे
ऽस्यां मंत्र उक्तः॥ घृतं गावः प्रसूयंते घृतं भूम्यां प्रतिष्ठितं॥ घृतमग्निश्च देवाश्च घृतं मे संप्रगच्छतां॥ दक्षिणात्वा
त्र सुवर्णं सा चैकसुवर्णादि यथाशक्ति॥ देवीपुराणेप्येवंविधघृतधेनुमुक्त्वोक्ता देवताविशेष उक्तः॥ य
था॥ स्नापयित्वा भवानीं तु घृतक्षीरैर्यथाविधि॥ पूजयेत्पुष्पमालाभिर्नैवेद्यैः सुमनोहरैः॥ तद्भक्त्योपप्रदातव्या
मंगल्याग्राह्यवेद्दिने॥ इमां मम मोपकाराय गृहाण त्वं द्विजोत्तम॥ प्रीयतां नंदिनी देवी मंगला चर्चिका उमा॥ इ
त्युच्चार्यार्चितां धेनुं यो दद्यात्सर्पिषो नरः॥ देव्यालोकमवाप्नोति निष्कामो घृतधेनुदः इति॥ आदित्यपुराणे त्वेवमे
वं घृतधेनुमुक्त्वोक्तं॥ आदित्यं तु जगन्नाथं घृतक्षीराभिषेचनैः॥ संपूज्य पूर्ववत्पुष्पैर्गंधधूपादिभिर्नरः॥ अहो
रात्रोषितो भूत्वा धेनुमेतां प्रदापयेत॥ इमां मम मोपकाराय गृहाण त्वं द्विजोत्तम॥ प्रीयतां मम देवेशो रविस्तिमि राम॰
रनाशनः॥ इत्युद्दाहस्त्वविधिवद्दद्याद्धेनुं नरोत्तमः॥ द्वैकरात्रं स्थित्वा च घृताहारो नराधिप॥ मुच्यते सर्वपापेभ्यः पि ॥१६३॥

त्यन्नब्रह्मपुरं नयेदिति घृतधेनुदानं॥ ॥ अथ नवनीतधेनुदानं॥ भविष्ये॥ घृतधेनुविधानेन नवनीतमयी शुभा॥ दात
व्या नरपते धेनुर्म्लेच्छाधिकाविवर्जिता॥ मंत्रः स एव निर्दिष्टो घृतधेनौ तु यः स्मृतः॥ शृणु पार्थ महाबाहो प्रदानफलमुत्त
मं॥ घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः॥ नवनीतप्रदो याति तत्र कामैः प्रपूरितः॥ पितॄनूर्ध्वं नयेत्सप्त पुरुषांस्तस्य येऽप्य
धः॥ सकामानामियं पुष्टिः कथिता रघुसत्तम॥ निष्कल्मषपदं याति निष्कामास्तत्प्रदायकः॥ इति नवनीतधेनुदानं॥ ॥
अथ जलधेनुदानप्रकारो विष्णुधर्मोत्तरे॥ जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया॥ देवदेवो हृषीकेशः सर्वेशः सर्वदः सर्वभा
वनः॥ जलकुंभं नरव्याघ्र सुवर्णरजतान्वितं॥ रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वितं॥ सितवस्त्रयुगच्छिन्नं दूर्वापल्लव
शोभितं॥ कुष्ठमांसीमुरोशीरवालकामलकैर्युतं॥ प्रियंगुपत्रसहितं सितवस्त्रोपवीतिनं॥ सच्छत्रं सउपानत्कं दर्भविष्टरसंस्थि
तं॥ चतुर्भिः संवृतं भूप तिलपात्रैश्च यथापि विभवमाहृतः॥ संकल्प्य जलधेनुं च कुंभं तमभिपूज्य च॥ पूजयेद्वत्सकं तद्वत्कल्पि
तं जलमयं बुधः॥ एवं संपूज्य गोविंदं जलधेनुं सवत्सकां॥ सितवस्त्रधरः शांतो वीतरागो विमत्सरः॥ दद्याद्द्विजाय प्राज्ञाय प्रीत्य
र्थं जलशायिनः॥ जलशायी जगद्योनिः प्रीयतां मम केशव॥ इति वोच्चार्य भक्त्या च विप्राय प्रतिपादयेत॥ अथ पक्षं त्रिरात्रं वा स्थे
यमहोरात्रमतः परम्॥ अनेन विधिना दत्वा जलधेनुं नराधिप॥ सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः॥ शरीरारोग्यमाबाधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० प्रशमः सार्वकामिकः॥ नराणां भवति दत्तायां जलधेन्वां न संशय इति॥ अत्र जलकुंभे त्वाढ्यापरिमाणं॥ कुंभोत्र कलशो
॥१६४॥ न तु परिमाणविशेष इति दानविवेकोक्तेः॥ सुवर्णाद्यन्वितत्वं च सुवर्णशृंगाकृति॥ रजतं खुराकृतिं॥ तिलपात्राणि ता
म्रमयानि॥ दधिपात्रं कांस्यमये॥ ताम्रानि पार्श्वद्वये॥ कुष्टादीनि घ्राणदेशे॥ प्रियंगुपत्रं श्रवणे॥ यज्ञोपवीतं शिरसि॥
वत्सश्चतुर्थांशेन॥ दक्षिणा च सुवर्णमारभ्य यथाशक्ति॥ एतच्चेतरधेनुवद्विशेषात्तत्साम्यादितरेषु तथात्वमिति म्या
येन ज्ञेयमिति॥ आदित्यपुराणे तु जलधेनुदानमनेनैव समानार्थम॥ विशेषस्तु॥ ततः संपूज्य चादित्यं जलधेनुं सवत्सकां
॥ दद्याद्द्विजाय देवाग्रे प्रीत्यर्थं हिरण्यतु॥ आदित्यस्वयोगाद्यो निःश्रीयतामिहिरः सदा॥ इति चोच्चार्य तां गां तु विप्राय प्रतिपा
दयेत॥ हिरण्यरत्नधेनुश्च प्रदेया विधिना ऽमुच्यते सर्वपापेभ्यः सर्वान्कामानवाप्नुयात॥ अनेन विधिना दद्याज्जलधेनुं
महामुने॥ सर्वाल्हादानवाप्नोति याश्चाप्याप्यतिमानवैः॥ सर्वपापविनिर्मुक्तः पितरं सपितामहं॥ प्रपितामहं तथा पूर्वं पु
रुषाणां चतुष्टयं॥ आत्मानं तारयेत्सोत्र तत्र स्वस्ताच्चतुष्टयं॥ तारयेत्स मुनीन्द्रेह जलधेनुप्रदो नरः॥ पश्चाग्लोतिविधि राम०
वत्तस्याप्येवंविधाः कुले॥ चतुर्दश तथा चैव दत्तश्चानुमोदतः॥ दीयमानां प्रपश्यंति जलधेनुं हि ये नराः॥ तेप्यशेषाघनि ॥१६४॥
र्मुक्ताः प्रयांति परमां गतिमिति॥ अत्र विष्णुधर्मोत्तरोक्तजलधेन्वादौ न कृष्णाजिनास्तरणं॥ अनुक्तत्वाद्दर्थाभावाच्च॥ मत्स्यो

क्तेस्येव॥ तत्रत्यातिदेशवाक्यादित्यवगंतव्यं॥ ॥ हेमाद्रौ देवीपुराणे॥ तोयधेनुं तु वै वत्स यथा देवी प्रसीदति॥ कुंभ
तोयप्रसंपूर्णे रत्नवस्त्रगुणान्वितं॥ समस्तबीजसंयुक्तं दूर्वापल्लवशोभितं॥ समस्तबीजं सर्वधान्यं॥ दूर्वाक्षतशं
खदधिकुष्टामलकचंदनैः॥ माल्यछत्रसमासक्तं तिलपात्रेण संयुतम॥ दधिक्षीरघृतपात्रेपिधानेनोपकल्पयेत
॥ तत्सर्वं कल्पयेत तद्वत्तं तोयमयं बुधः॥ देवीमभ्यर्च्य विधिवत्सोपवासोथ नक्तवान॥ देवीभक्तेषु दद्याद्यः सर्वान्का
मानवाप्नुयात॥ जयारिस्रस्नी देवी देवानां भयनाशनी॥ विद्यमानमयी दुर्गे सर्वगे सुभगे नमः॥ इति देवीपुराणे जल
धेनुदानम॥ ॥ स्कंदेपि॥ जलधेनुं च यो दद्यात्तस्य दानफलं शृणु॥ प्रपासभा तडागं वा कूपवापिसुपुष्कलं॥ कृत्वा
कुंभान्सुवर्णांश्च गंधमाल्यैरलंकृतान॥ प्रपा पानीयशाला॥ सभा जनाश्रयः॥ तडागो जलाशयः॥ कूपः प्रसिद्धः॥
एतत्कृत्वा यत्फलं स्यात्तत्फलं स्यादित्यर्थः॥ सुवर्णाच्छोभनवर्णान॥ पुष्पैश्च विविधाकारैरभ्यर्च्य द्विजसत्तमान॥
भक्ष्यभोज्यैः सुतृप्तानि तिलपात्राणि स्थापयेत॥ दक्षिणा पुष्कला देया चैभ्य एव न संशयः॥ आपः शिवाश्च सौम्याश्च त
र्पयंतु पितॄन्मम॥ कमंदानाय भवं त्विति चैवेवं वदेत॥ एवं दत्वा तां धेनुं ब्रह्मलोके महीयते॥ इति स्कंदोक्तजलधेनु
दानं॥ ॥ अथ क्षीरधेनुदानं॥ विनताश्च उवाच॥ क्षीरधेनुं प्रवक्ष्यामि तां निरोध नराधिप॥ अत्तलिप्ते महीपृष्ठे गोमये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान・प्र・ नरोत्तमः॥गोचर्ममात्रमानेनकुशानास्तीर्यसर्वतः॥क्षीरकुंभंततःस्थाप्यचतुर्थांशेनवत्सकं॥सुवर्णमुख
॥१६५॥ शृंगाणिचंदनागरुकाणिच॥प्रशस्तपत्रश्रवणांतिलपात्रोपरिन्यसेत॥मुखंगुडमयंतस्याजिह्वाशर्करया
तथा॥फलप्रशस्तेत्रास्तदंताश्चमुक्ताफलमयेक्षणा॥इक्षुपादादर्भरोमासितकंबलकंबला॥ताम्रपृष्ठाकांस्य
दोहापट्टसूत्रमयंतथा॥पुच्छंचनपत्राढ्यनवनीतमयस्तना॥स्वर्णशृंगीरौप्यखुरांपंचरत्नमयीम्भवि॥चत्वा
रितिलपात्राणिचतुर्दिक्षुनिधापयेत॥सप्तव्रीहिसमायुक्तोदिक्षुसर्वासुनिक्षिपेत॥सप्तव्रीहिसमधान्यानि॥
एवंलक्षणसंयुक्तांक्षीरधेनुंप्रकल्पयेत॥आद्यवस्त्रयुग्मेनगंधपुष्पैःसमर्चयेत॥धूपदीपादिकंदत्वाब्राह्मणा
यनिवेदयेत॥आच्छाद्यालंकृतंहस्तांमुद्रिकाकर्णभाविवैः॥पादुकोपानहच्छत्रंदत्वादानंसमर्पयेत॥दीयते
इतिदानं॥अनेनैवतुमंत्रेणक्षीरधेनुंप्रकल्पयेत॥यालक्ष्मीःसर्वभूतानामित्याधेननराधिप॥कल्पयेदनुमंत्र
येत॥आप्यायस्वेतिमंत्रेणक्षीरधेनुंप्रसारयेत॥प्रसार्येदुपतिष्ठेत॥गृह्णामित्वांदेविभक्त्येतिग्रा
हकोमंत्रमुच्चरेत॥यथा॥गृह्णामित्वांदेविभक्त्याकुटुंबार्थेविशेषतः॥भरस्वकामैर्मांसर्वैःक्षीरधेनोनमोस्तुते॥ राम・
एवंधेनुंप्रदत्वावक्षीराहारोदिनंभवेत॥त्रिरात्रंतुपयोभक्षोब्राह्मणोराजसत्तम॥दीयमानांप्रशंसंतितेयातिप ॥१६५॥

रमांगति॥एतांहेमहस्त्रिरात्रेतेनाथस्वशक्तितः॥शतार्धमथवाप्यर्धंतस्याप्यर्धंस्वशक्तितः॥दद्याद्धेनुंमहा
राजञ्छृणुतस्यापियत्फलं॥दिव्यंवर्षसहस्रंतुरुद्रलोकेमहीयते॥पितृपैतामहैःसार्धंब्रह्मणोभवनंव्रजेत
॥दिव्यंविमानमारूढोदिव्यगंधानुलेपनः॥क्रीडित्वासुचिरंकालंविष्णुलोकंसगच्छति॥आदित्यसंका
शैर्विमानैर्वरमंडितैः॥गीतवादित्रनिर्घोषैरप्सरोगणशोभितैः॥तत्रोपविष्टराजासौविष्णुसायुज्यतांव्रजे
त॥पठ्यंशृणुयाद्वापिपठेद्वाभक्तिभावितः॥सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति॥इतिक्षीरधेनुदान
म॥ ॥अथदधिधेनुदानं॥स्कांदेएवं॥विनताम्बउवाच॥दधिधेनोर्महाराजविधानंशृणुसांप्रतं॥अनुलि
प्तेमहीभागेगोमयेननराधिप॥गोचर्ममात्रंतुपुनःपुष्पप्रकरसंयुतं॥कुशैरास्तीर्यसुधाम्भसा[illegible]कृत्वात
रौ॥दधिकुंभंचसंस्थाप्यसप्तधान्यस्यचोपरि॥चतुर्थांशेनवत्संतुसौवर्णमुखसंयुतम॥प्रशस्तपत्रश्रवणां
मुक्ताफलमयेक्षणाः॥चंदनागरुशृंगीचमुखंवैगंधमालिका॥जिह्वाशर्करयाराजन्घ्राणंश्रीखंडवंतीत॥
फलम्लमयादंताःसितसूत्रसकंबलः॥ताम्रपृष्ठादर्भरोमापुच्छंसूत्रमयंतथा॥स्वर्णशृंगीरौप्यखुराव
भवेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दा॰न॰ नीतमपत्तनी॥ इक्षुपादांबुसंसक्तसर्वाभरणभूषितां॥ आघ्राघवस्त्रयुग्मेन पुष्पगंधैः सुपूजितां पश्चान्मया
॥१६६॥ यकुलीनाय साधुवृत्ताय धीमते॥ श्रद्धादमादियुक्ताय तां द्विजाय प्रदापयेत्॥ पुच्छदेशोपविश्याथ मुद्दिश्यार्कसोमा
ग्रकोः॥ पादुकोपानहच्छत्रं दत्वा मंत्रमनुस्मरेत्॥ मंत्रस्तु॥ या लक्ष्मीरित्यादि॥ अनुस्मरेत्तनेन तां॥ सावित्री
ति मंत्रेणात्दधि धेनुं प्रदापयेत्॥ एवं दधिमयीं धेनुं दत्वा राजर्षिसत्तम॥ एकाहारो दिनं तिष्ठेत् द्धाचन्दपनं दृन
॥ यजमानो वसेद्राजन् त्रिदिनं च द्विजोत्तमः॥ प्रतिग्रहीता॥ दीयमानां प्रपश्यंति तेपि यांति परां गतिम्॥ य
त्रनद्यो मधुवहा यत्र पायसकर्दमाः॥ ऋषयो मुनयः सिद्धास्तत्र गच्छंति वैनृपाः॥ यइदं शृणुयान्नित्यं पठेद्वा
भक्तिभावितः॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति॥ इति दधिधेनुनम्॥ ॥अथ मधुधेनुदानं॥ स्कांदे।
मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशनीं॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥ कुशोपम उत्तरं कृष्णाजिनं राम॰
पश्चिमे महीपृष्ठे इति समासः॥ धेनुं मधुमयीं कृत्वा संपूर्णां घटरूपकां॥ तद्वच्चतुर्थभागेन वत्सकं परिकल्पयेत्॥ ॥१६६॥
चत्वारि तिलपात्राणि चतुर्दिक्षु च विमसेत॥ सौवर्णं तु मुखं कृत्वा शृंगे अगरुचंदने॥ एवंताम्रमयं तस्याः पृष्ठं स्या

हृपतो॥ स्वस्त्या गेहग्रहस्येभ्यश्च शांतिः कार्या प्रयत्नतः॥ ब्राह्मे मुहूर्ते चोत्थाय वक्ष्यमाणविधानतः॥ श्लोकमेकं पठे श्रुत्वन्
वे विघ्नोपशांतये॥ दुरितापहो दुरितानि हन्यान्नमस्तु जयोमस्तु जयं च हन्यात्॥ नृसिंहदेवोपि च हन्तु दुष्टान्सौभगं करोतु नो भयनाश
श्रुणु॥ ध्यात्वा नारायणं देवं नृसिंहं सर्वविघ्नहं॥ दुरिष्टहन्मस्तु हंता रक्षी चैव वाभयंकरः॥ रक्षां चैव प्रदातव्याये नमंत्रेणातं
द्भुरक्ष॥ इतः स्थानांतरं गच्छ पुनर्मा पाहि मारक॥ इति रक्षाभिमंत्रणामंत्रः॥ मुचिर्मंत्वाथ रोगपंगं कुशैः संमार्जयेद्विजः॥ मा
ग्रनः॥ ग्रंथ्यादिकं चेत्तत्कंठे ह्यज्वरस्थाने विनिर्दिशेत॥ ग्नामीपलाशोलाजैश्च दूर्वाभिश्च तिलैस्तथा॥ संतं तद्धवनं कुर्याद्दैव
तानां यथाक्रमं॥ दुर्गारुद्रौ नारसिंहो वा वासवश्चेति देवताः॥ अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा॥ क्रमाद्धाविरापारा स
वासांसि सुरभिं तथा॥ आलगान्नभोजयेत्सम्यक् तिलचरौ श्चमोरकैः॥ बलिभिः पुष्पकैर्गंधैः स्वाहा हेतिकुपतीन्यजेत॥ ग्र
हपूजां च कर्तव्यायथा विभवमात्मनः॥ शिष्टैरिष्टैश्च भुंजीत प्रदद्यात् दक्षिणां॥ एवं कृते नरैश्रेष्ठलन्मारको भयते प्रजा
॥ तस्मादेवं प्रकर्तव्यं सर्वविघ्नोपशांतये॥ जातवेदसैमं त्रेणा दुर्गा होमं समाचरेत्॥ म्रसुंजयेन मंत्रेणा रुद्र होमो भवे द्विज॥ ना

नि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसिंहस्यागायत्र्यायतंड्ड्इतीड्के॥तत्पुरुषायविद्महेनारसिंहायधीमहि॥तन्नोहंसिःप्रचोदयादितिनृसिंहगायत्री॥यस्ति
मंविधिमुक्तंअवर्तंतेकामकारतः॥समसुनाग्रस्यतेवैमारकेरानसंन्नायः॥इतिगर्गोक्तमहापीडाशांतिविधानं॥ ॥अ
थप्रयागेकाम्यमरणविधानं॥भविष्योत्तरे॥समाःसहस्त्राणितुसप्तवैजलेचरश्चकामयोपतीनेचषोडश॥महाहवेषष्टिरशी
तिगोग्रहेस्वनात्राकेभारतचाक्षयागतिरितिपत्रस्थचित्तीर्थेदेहसागफलमुक्तं॥तदिहप्रयागस्तपक्षेत्रातित्रयादतित्रा
यचड्डवति॥तत्रापिमाघादिकालेऽतित्रायांतरंभवतीतितेयं॥अत्रफलोत्स्याविधिरुत्तेयः॥स्पष्टोविधिःस्कांदेसेतंस्त्रि
स्थलीसेतौ॥यथाकथंचित्तीर्थस्मिनप्राणत्यागंकरोतियः॥तस्यात्मघातदोषोनप्राप्नुयादीप्सितानपि॥यस्मभोगवतश्च
त्रतिष्ठस्थीमयिद्विज॥मत्समःखल्वसौपिद्धापिजन्मनिजायते॥पाम्भेविसुराह॥देहत्यागंतथाधीराःकुर्वंतिममसन्नि
धौ॥मत्तत्रंप्रविशंसेवनपुनर्जन्मतेनराः॥कौर्म्ये॥व्याधितोयदिवादीनःक्रुद्धोवापिभवेन्नरः॥गंगायमुनमासाद्यपस्तुप्रा
णान्परित्यजेत॥दीप्तकांचनवर्णाभैर्विमानैर्भानुवर्णिभिः॥गंधर्वाप्सरसांमध्येस्वर्गेमोदतिमानवः॥ईप्सितांल्लभतेका
मान्वदंतिमुनिपुंगवाः॥सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः॥वरांगनासमाकीर्णैर्मोदतेशुभलक्षणाः॥गीतवादित्र
निर्घोषैःप्रसुप्तःप्रतिबुध्यते॥यावन्नलभतेजन्मतावत्स्वर्गेमहीयते॥ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मात्वयत्तमः॥हिरण्य

रत्नसंपूर्णेसमृद्धेजायतेकुले॥वटमूलंसमाश्रित्ययस्तुप्राणान्परित्यजेत॥सर्वाल्लोकानतिक्रम्यरुद्रलोकंसगच्छति॥तथा
॥याग्तिर्यागमुक्तास्यसत्त्वस्थस्यमनीषिणः॥सागतिस्त्वंजतःप्राणानगंगायमुनसंगमे॥गंगायमुनयोर्मध्येकर्षाग्निं
यस्तुसाधयेत॥अहीनांगोप्यरोगोपिपंचेंद्रियसमन्वितः॥यावंतिरोमकूपाणितस्यगात्रेषुमानद॥तावद्वर्षसहस्राणि
स्वर्गलोकेमहीयते॥ततःस्वर्गात्परिभ्रष्टोजंबुद्वीपपतिर्भवेत॥सभुक्त्वाविपुलान्भोगांस्तत्तीर्थंलभतेपुनः॥जलप्रवे
शायःकुर्यात्संगमेलोकविश्रुते॥राहुग्रस्तोयथासोमोविमुक्तःसर्वपातकैः॥सोमलोकमवाप्नोतिसोमेनसहमोदते॥
षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच॥स्वर्गतःसर्वलोकेषुमुनिगंधर्वसेवितः॥ततोभ्रष्टस्तुराजेंद्रसमृद्धेजायतेकुले
॥अधःशिरास्तुयोज्वालामूर्ध्वपादःपिबेन्नरः॥शतवर्षसहस्राणिस्वर्गलोकेमहीयते॥तस्माद्भ्रष्टस्तुराजेंद्रअग्निहोत्रीभ
वेन्नरः॥भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंलभतेपुनः॥यःस्वदेहंविकर्त्तित्वाशकुनिभ्यःप्रयच्छति॥विहगैरुपभुक्तस्यश्रृ
णुतस्यापियत्फलं॥वाराहेपि॥तत्रयोमुंचतिप्राणान्वटमूलेषुसुंदरि॥सर्वाल्लोकानतिक्रम्यममलोकंप्रपद्यते॥येमृता
वटमूलेतुममचित्तव्यवस्थिताः॥भित्वासर्वाणिस्थानानितेमांपश्यंतिनिस्त्रशाः॥तथा॥अकामोवासकामोवावटमूले
तुसुंदरि॥शीघ्रंप्राणान्प्रमुंचेतपरीक्षेसरमंपदं॥मात्स्येमारतेकौर्मेरोच॥नलोकवचनात्तातनवेदवचनादपि॥मतिरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कामतीयातेप्रयागमरणंप्रति॥तेत्वयाप्रयागमरणंप्रतिपामतिःसालोकवचनात्रोत्क्रामानसाज्ञा॥तथावेदवचनात्सर्व
तआत्मानंगोपायेदिसादिरूपाच्चनोत्कमरणीयेसर्वः॥मात्स्ये॥उर्वशीपुलिनेरम्येविपुलेहंसपांडुरे॥परित्यजतियःप्रा
णाञ्छणुतस्यापियत्फलं॥षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच॥सेवतपितृभिःसार्द्धस्वर्गलोकेनराधिप॥उर्वशी
गुणसंपन्नप्रेदेवलोकेनरोत्तम॥रजतेसततंतत्रसर्वगंधर्वकिंनरैः॥ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्च्युतः॥
उर्वशीसदृशीनांतुकन्यानांलभतेशतं॥मध्येनारीसहस्राणांबह्वीनांचपतिर्भवेत॥स्वर्णग्रामसहस्राणांभोक्ताभवति
भूमिपः॥कांचीनूपुरशब्देनसुप्तोसौप्रतिबुध्यते॥भुक्त्वातुविपुलान्भोगान्स्तत्तीर्थंलभतेपुनः॥तथा॥कोटितीर्थं
समासाद्ययस्तुप्राणान्परित्यजेत॥कोटिवर्षसहस्राणिस्वर्गलोकेमहीयते॥ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादि
वश्च्युतः॥सुवर्णमणिमुक्ताढ्येकुलेजायेतरूपवान॥तथा॥अनाशकफलंवक्ष्ये॥भगवंस्तत्रकीदृशं॥यंचलोकम
वाप्नोतिविमुक्तःसर्वकिल्बिषैः॥मार्कंडेयउवाच॥शृणुराजन्प्रयागेतुअनाशकफलंमहत॥प्राप्नोतिपुरुषोधीमा
न्श्रद्दधानोजितेंद्रियः॥अहीनांगोप्यरोगश्चपंचेंद्रियसमन्वितः॥अश्वमेधफलंतस्यगच्छतस्तुपदेपदे॥कुलानितारये — राम॰
द्राजन्दशपूर्वान्दशापरान॥मुच्यतेसर्वपापेभ्योगच्छेच्चपरमंपदं॥तथा॥पंचयोजनविस्तीर्णंप्रयागस्यतुमंडले — ॥१६६॥

त्रमृयतथा॥पायसास्त्वित्रस्तुमपाःकार्याःसितकंबलकंबलं॥मुखंगडमयंकृत्वाजिह्वांशर्करयान्वितां॥मौ
क्तिकेनयनेतस्याःसर्वलक्षणसंयुतां॥दंताःफलसंयुक्ताःसमधान्यसमन्वितां॥आछाद्यवस्त्रयुग्मेनघंटा
भरणभूषितां॥कांस्योपदोहनींकृत्वागंधपुष्पैस्तुपूजितां॥अयनेविषुवेचैवव्यतीपातेदिनक्षये॥संक्रां
तावुपरागेचसर्वकालमतंद्रितः॥द्रव्यब्राह्मणसंपत्तिदृष्ट्वापात्रेप्रदापयेत॥ब्राह्मणायदरिद्रायश्रोत्रिया
यकुटुंबिने॥वेदवेदांगवेत्रेचआर्यावर्त्तोद्भवायच॥इदन्नायप्रदातव्यामधुधेनुर्नराधिप॥उच्छदेशोपविष्टा
यविप्रायगंधालंकारमालिने॥स्वर्णाग्रपादक्षिणांश्राद्धिन्नशाठ्यंवर्जितः॥उदक्पूर्वंतुकर्त्तव्यंपश्चाद्दानंसमर्पये
त॥रसज्ञासर्वदेवानांसर्वभूतहितेरता॥प्रीयतांपितृदेवाश्चमधुधेनोनमोस्तुते॥मधुवातेतिमंत्रेणप्रदेयायत
चेतसा॥अहंग्रस्यामिलोदेविकुटुंबार्थेविशेषतः॥कामान्कामदुघेधुक्ष्वममधेनोनमोस्तुते॥दत्वाधेनुंमहा
राजश्छत्रिकोपानहौतथा॥दातातततःपायसेनमधुनाचदिनंनयेत॥ब्राह्मणोपित्रिरात्रंतुमधुपायसभुग्भवेत॥स्व
र्गंगत्वातुयत्पुण्यंतत्त्रिबोधनराधिप॥यत्रनद्योमधुवहापत्रपायसकर्दमाः॥ऋषयोमुनयःसिद्धास्तत्रगच्छतिधेनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान॰प्र॰वि॰ दः॥सभुक्त्वाविपुलान्भोगान्विष्णुलोकंसगच्छति॥दत्वासर्वान्स्वापरानात्मानंचैकविंशतिं॥सनयेद्विष्णुसायुज्यंमधु
॥१६७॥ धेनुप्रसादतः॥यइदंश्रृणुयाद्विप्रःश्रावयेद्वासमाहितः॥सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति॥इतिमधुधेनु
दानं॥ ॥अथइक्षुरसधेनुदानं॥स्कांदएव॥रसधेनुंमहाराजकथयामिसमासतः॥अनुलिप्तेमहीपृष्ठेकृष्णाजि
नकुशोत्तरे॥रसस्यतुघटंराजन्संपूर्णंत्विक्षुचसहि॥तद्वत्संकल्पयेत्प्राज्ञश्चतुर्थांशेनशोभनं॥इक्षुदंडमयाः
पादाःखुरारजतनिर्मिताः॥सुवर्णशृंगाभरणाश्चवस्त्रपुच्छाघृतस्तनी॥पुष्पकंबलसंयुक्ताशार्करामुखजिह्विका
॥दंताःफलमयास्तस्याःपृष्ठंताम्रमयंतथा॥पुष्परोमातुराजेंद्रमुक्ताफलकृतेक्षणा॥सप्तव्रीहिसमायुक्तात्वंतु
र्दिक्षुसदीपिका॥सर्वोपस्करसंयुक्तासर्वगंधविभूषितां॥चत्वारितिलपात्राणिचतुर्दिक्षुनिवेशयेत्॥विप्राय
वेदविदुषेश्रोत्रियायाहिताग्नये॥पुराणोतेविशेषेणसाधुवृत्तायधीमते॥ताहृशायप्रदातव्यारसधेनुःकुटुं
बिने॥दातास्वर्गमवाप्नोतिसर्वपापविवर्जितः॥दाताचग्राहकश्चापितस्यैकाहंरसभोजनं॥सोपाथानंभवे राम॰
त्तस्यसर्वत्रतुफलंभवेत्॥दीयमानांतुपश्यंतितेयांतिपरमांगतिं॥धेनुंतुपूजयित्वाथगंधधूपस्त्रगादिभिः॥पूर्वो ॥१६७॥

त्तायेचमंत्रांश्चतानेवप्रयतःपठेत्॥तेचयात्लक्ष्मीरित्याद्यः॥एवमुच्चारयित्वातुरसधेनुंप्रदापयेत्॥दत्वाएवंनपरां
श्चैवत्वात्मानंचैकविंशकं॥नयेत्तुपरमंस्थानंयस्मान्नावर्ततेपुनः॥एषातेकथिताराजन्रसधेनुरनुत्तमा॥इ
तिरसधेनुदानम्॥ ॥अथशर्कराधेनुदानम्॥स्कांदेविनताश्वगः॥तद्वच्छर्कराधेनुंश्रृणुराजन्यथार्थतः॥अ
नुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥धेनुःशर्करयाराजन्संदिष्टाभारचतुष्टयं॥उत्तमाकथ्यतेसाचचतुर्थांशेनस
वत्सकः॥तदर्धंमध्यमाप्रोक्ताश्चतुर्थांसेनकन्यसा॥तद्वद्वत्संप्रकुर्वीतचतुर्थांशेनमानवः॥अष्टमांशेनवाकुर्या
च्चतुर्थांशेनवत्सकं॥अष्टमांशेनार्धभारेण॥स्वशक्त्याकारयेद्धेनुंयथात्मानंनपीडयेत्॥सर्वव्रीहीनिसंस्थाप्यचतु
र्दिक्षुसमंततः॥सर्वबीजानिसर्वधान्यानि॥सौवर्णीमुखशृंगाणिशोमौक्तिकैर्नयनानिच॥गुडेनचमुखंकार्यंजिह्वा
पिष्टमयीतथा॥कंबलंपट्टसूत्रेणकंठाभरणसंयुता॥कंबलंगलकंबलं॥इक्षुपादाश्रौप्यखुरानवनीतमयस्तना
॥प्रशस्तपत्रश्रवणासितचामरभूषिता॥पंचरत्नसमायुक्तादर्भरोमसमन्विता॥कांस्योपदोहनासम्यक्गंधपु
ष्पैसमन्विता॥ईदृग्विधानसंयुक्तावस्त्रैराच्छादितोपरि॥गंधपुष्पैरलंकृत्यब्राह्मणायनिवेदयेत्॥श्रोत्रियायदरि
द्रायसाधुवृत्तायधीमते॥वेदवेदांगविदुषेविशेषेणाग्निहोत्रिणे॥अनसूयवेप्रदातव्यानमत्सरयुतायवैः॥अप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 नेविषुवे पुरोपष्यतीपाते च षडशीतिमुखे॥ एषु पुण्येषु कालेषु यद्दृष्टान्तो निवेदयेत॥ सत्पात्रं तु द्विजं दृष्ट्वा स्वागतं श्रोत्रियं
॥१६८॥ गृहे॥ तादृशाय प्रदातव्या पुच्छदेशे स्थिताय च॥ पूर्वामुखस्थितो दाता अथ वा उत्तरामुखः॥ धेनुं पूर्वमुखीं कृत्वा
वत्समुत्तरतोऽन्यसेत॥ दातुरुत्तरामुखत्वे धेनोः प्राङ्मुखत्वमित्यर्थः॥ दानकाले तु ये मंत्रास्तान्पठित्वा समर्चयेद
त॥ तत्र या लक्ष्मीरित्यादयः॥ आघ्राय चैव तं विप्रं मुद्रिकाकर्णवेष्टकैः॥ स्वशक्त्या दक्षिणां दद्यात् अं च पुष्पं च चं
दनं॥ धेनुं समर्पयेत्तस्य मुखं च न विलोकयेत॥ एकाहमर्कराहारो ब्राह्मणस्त्रि दिनं वसेत॥ ब्राह्मणोऽप्यहीता॥
सर्वपापहरा धेनुः सर्वकामप्रदायिनी॥ सर्वकामसमृद्धस्तु जायते नात्र संशयः॥ दीयमानां प्रपश्यन्ति ते पियां
तिपरां गतिं॥ य इदं शृणुयाद्भक्त्या पठते वापि मानवः॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ इति शर्कराधे
नुदानम॥ ॥ अथ कार्पासधेनुदानम॥ वराह उवाच॥ अतः परं प्रवक्ष्यामि धेनुं कार्पासिकीं शुभां॥ विश्वस्य गुरुत्वग
स्यर्थं ब्रह्मणा चांशुकं कृतं॥ गुरुत्वं गोप्यस्थानं लिंगादि॥ कार्पासमूलं तन्त्वावितेना साधुत्तमास्मृता॥ साच कार्पास
भारेणाधेनुः श्रेष्ठा प्रकीर्तिता॥ मध्यमा च तदर्द्धेन तस्याप्यर्द्धेन कन्यसा॥ पूर्ववस्त्रधान्यं च हिरण्यं च तथैव च॥ वत्सकं राम॰
तु चतुर्थांशाद्दानमंत्रा विधीयते॥ कुर्वीत पूर्ववद्दत्तं वस्त्रधान्यसमन्वितं॥ पूर्ववत्तिलधेनुवत॥ हिरण्यं देहं सहस्रो सी ॥१६८॥

रौ प्रियाम्यहम॥ तस्माद्भवतु संप्रीतस्त्वं प्रसादाज्जनार्दन॥ इति॥ नारद उवाच॥ भगवंश्रोतुमिच्छामि व्रतानामुत्तमस्य हि॥ वि
धिं मासोपवासस्य फलं चास्य यथोदितं॥ यथाविधि नरैः कार्यं व्रतचर्या यथा भवेत॥ आरभ्यते यथा सर्वं समाप्तिश्च यथा भ
वेत॥ यावत्संख्या च कर्त्तव्या तदाचक्ष्व पितामह॥ व्रतमेतत्तु श्रेष्ठं विस्तरेणाममानघ॥ ब्रह्मोवाच॥ साधु नारद ते पृष्टो विष्णो
राराधनं प्रति॥ सद्व्रतं ते मुनिश्रेष्ठ विस्तरेण ब्रवीमि ते॥ सुराणां च यथा विष्णुस्तपतां च यथा रविः॥ मेरुः शिखरिणां यद्वदेन
तेयश्च पक्षिणां॥ तीर्थानां तु यथा गंगा प्रजानां च यथा नृपः॥ श्रेष्ठं सर्वव्रतानां च तद्वन्मासोपवासनं॥ सर्वव्रतेषु यत्पुण्यं स
र्वतीर्थेषु यत्फलं॥ सर्वदानोद्भवं वापि लभेन्मासोपवासकृत॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा वै भूरिदक्षिणैः॥ न तत्पुण्य
मवाप्नोति यन्मासपरिलंघनात॥ तेन तप्तं हुतं दत्तं तेन तप्तं कृतं स्वधा॥ यः करोति विधानेन नरो मासमुपोषणं॥ प्रविश्य
वैष्णवं यज्ञं तेनाभ्यर्च्य जनार्दनं॥ गुरोराज्ञां ततो लब्ध्वा कुर्यात्मासोपवासनं॥ वैष्णवानि यथोक्तानि कृत्वा सर्वव्रतानि तु॥ द्वा
दशपादीनि पुण्यानि ततो मासव्रतं चरेत॥ अतिकृच्छ्रं पराकं च कृत्वा चान्द्रायणं व्रतं॥ मासोपवासं कुर्वीत ज्ञात्वा देहबला
बलं॥ वानप्रस्थो यतिर्वापि नारी वा विधवा मुने॥ मासोपवासं कुर्वीत गुरुविप्राज्ञया ततः॥ आश्विनस्यामले पक्षे एकादश्या
मुपोषितः॥ व्रतमेतत्तु गृह्णीयाद्यावत्रिंशद्दिनानि तु॥ वासुदेवं समभ्यर्च्य कार्त्तिकं सकलं नरः॥ मासे चोपवसेद्यस्तु स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तिफलभाग्भवेत्॥अच्युतस्यालयेभक्त्या त्रिकालंकुसुमैःशुभैः॥मालतीशेवरैःपद्मैःकमलैश्चसुगंधिभिः॥कुंकु
मोशीरकर्पूरैर्विलिप्यवरचंदनैः॥नैवेद्यधूपदीपाद्यैरर्चयेत्पुरुषोत्तमं॥मनसाकर्मणावाचापूजयेद्गरुडध्वजं॥
कुर्यान्नरात्रिविषयंनाहन्निर्जितेंद्रियः॥नाम्नामेवतथालापंविप्राःकुर्यादहर्निशं॥भक्त्याविप्रैःस्तुतिश्चापिस्व
षावांश्चविवर्जयेत्॥सर्वसत्वदयायुक्तःशांतश्चनिरहिंसकः॥उपोषावासनसंस्थोवावासुदेवंप्रकीर्त्तयेत्॥स्मृत्वालो
कनगंधादिस्वादनंपरिकीर्त्तनं॥अत्रस्पवर्जयेत्सर्वंग्रासानांचाभिकांक्षणान्॥गात्राभ्यंगंशिरोभ्यंगंतांबूलंचविलेप
नं॥व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतं॥नव्रतस्थःस्पृहेत्किंचिद्विकर्मस्थान्नचालयेत्॥देवतायतनेतिष्ठेत्रगृ
हस्थश्चरेद्व्रतं॥कृत्वामासोपवासंचयथोक्तविधिनानरः॥नारीवाविधवासाध्वीवासुदेवंसमर्चयेत्॥अन्यूनाधि
कमेवंतुव्रतंत्रिंशद्दिनैरिदं॥कृत्वामासोपवासंचनिपतात्माजितेंद्रियः॥ततोऽर्च्चयेतदेवस्यपांडुरूपोगरुडध्वजं॥र
ञ्जयेत्पुष्पमालाभिर्गंधधूपविलेपनैः॥वस्त्रालंकारवाद्यैश्चतोषयेच्छुभंतंनरः॥स्नापयेतहरिंभक्त्यातीर्थंचंदनवा
रिणा॥चंदनेनानुलिप्तंगंधपुष्पैरलंकृतं॥वस्त्रदानादिभिश्चैवभोजयेत्द्विजोत्तमान्॥दद्याच्चदक्षिणांतेभ्यःप्रणिप
त्यक्षमापयेत्॥विप्रांक्षमापयित्वातुविसर्जाभ्यर्च्यपूजयच॥एवंवित्तानुसारेणभक्तिपूर्व्वेनशक्तितः॥कृत्वामासोपवा

राणावसमुद्भवे॥सोमप्रियेसुधेन्वाख्येसौरभेयिनमोस्तुते॥दत्तेयमिंदुनाथायज्ञाशांकायमनायचा॥अत्रिनेत्रप्रजा
तायसोमराजायवैनमः॥इतिदानमंत्रः॥यस्त्वेवंपरयाभक्त्याब्राह्मणायप्रयच्छति॥सयातिचंद्रलोकंतुसोमेनसह
मोदते॥नरोगीनज्वरीकुष्ठकुलेतस्यप्रजायते॥पुत्रदारसमायेतोजीवेच्चशरदांशतमितिकार्यासधेनुदानम्॥॥
अथलवणधेनुदानम्॥भविष्ये॥कृष्णउवाच॥शृणुराजन्प्रवक्ष्यामिलवणाख्यंहकल्पितां॥गोमयेनानुलिप्ते
तुदर्भसंस्तरसंस्थितम्॥आविकंचर्मविन्यस्यपूर्वाग्रामुखसंयुतं॥वस्त्रेणाच्छादितंकृत्वाधेनुंकुर्वीतबुद्धिमान्॥
आढकेनैवकुर्वीतबहुवित्तोल्पवानपि॥स्वर्णाभ्रंगीशिरोप्यखुरामिक्षुपादांफलस्तनी॥कार्पासत्रार्करयाजिह्वां
धघ्राणवतींतथा॥समुद्रोदरजांश्रुक्तिंकर्णौचपरिकल्पयेत्॥शृंगेगोचंदनकाष्ठाभ्यांमौक्तिकेअक्षणीउभे॥कपो
लौसक्तुपिंडाभ्यांयावानासेप्रकल्पयेत्॥कंबलंपट्टसूत्रेणग्रीवायांकर्णिकांन्यसेत्॥पृष्ठेवैताम्रपात्रंस्यात्पाने
गुडपिंडिका॥लांगूलेकंबलंदद्याद्रसानक्षीरप्रदेशके॥योनिप्रदेशेचमधुसर्वतःस्तफलान्विता॥एवंसम्यक्परि
स्थाप्यलवणास्यहतांतुगा॥स्थापयेद्वत्सकंचापिचतुर्भागेनमानवः॥एवंधेनुंसमभ्यर्च्यवस्त्रमाल्यविभूषणैः॥
स्नात्वादेवार्चनंकुर्यात्ब्राह्मणानभिपूजयेत्॥कृत्वाप्रदक्षिणांगांचपुत्रभार्यासमन्वितः॥ब्राह्मणायसुशीलायदद्यात्तुयुक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ यवैन्नप॥ दद्यात्सर्वेषु सर्वेषु मंत्रेणानेन मानव॥ लवणो वै रसाः सर्वे लवणोः सर्वदेवताः॥ सर्वदेवमये देवि लवणाख्येन
मोस्तु ते॥ एवमुच्चार्य मंत्रं तं विप्राय प्रतिपादयेत॥ सम्यक्प्रदक्षिणां कृत्वा दक्षिणासहितां नृप॥ प्रक्षिणा महि
॥१६१॥ न कृताः भवति भारत॥ सर्वदानानि दत्तानि सर्वेनैकफलानि च॥ सर्वे रसाः सर्वमंत्राः सर्वमेतच्चराचरं॥ सौभाग्यं च य
राहृद्धिः शरीरारोग्यसंपदः॥ नृणां भवति दत्वा तु रसधेनुं न संशयः॥ स्वर्गं च नियतं वासौ मावदाहूतसंप्लवः॥ यत्तो
राकं बलगलं लवणाख्ये के हत्वा फलस्तनवतीमपि चर्मपृष्ठे॥ दत्वा द्विजाय विधिवद्रसधेनुमेतां गोलोकमेति
सकलेश्वरलोचयाति॥ इति लवणधेनुदानम॥ ॥अथ कर्पूरादिधेनुदानं॥ विष्णुधर्मोत्तरे॥ कर्पूरधेनुं प्रवक्ष्यामि स
र्वगंधमयीं शुभां॥ यां दत्वा सर्वगंधाख्यप्रदत्ता स्युर्न संशयः॥ चंद्रस्य हेयथवा भानोः कान्तिकां विषुवस्तथा॥ द्वादश्याम
यने पुण्ये पर्वकाले कर्पूरगंधं शुभं॥ ब्राह्मणाय दरिद्राय श्रुतवृत्तरताय च॥ भूमावास्तीर्य नेत्रं तु शुभ्रं क्षौमं बरं शुभं॥
चित्रयदं नेत्रसंज्ञं॥ लोके नेति प्रसिद्धं तु परिशुक्लांबरं स्तीर्य मिसर्पधः॥ सिल्हकः शल्लकीरसः राले ति प्रसिद्धः॥
कार्याश्चतुःपला धेनुः पलमात्रस्तु वत्सकः॥ अथवा पलिका धेनुः वत्सः कार्यस्तु कार्षिकः॥ स्वर्णशृंगी रौप्य राम॰
रांघ्रघण्टं कुंकुमसंभवं॥ मृगनाभिमया दंत्ता ग्रंथिपर्णमयं मुखं॥ अक्षिणी सिल्हकमये कर्णावगरुकाष्ठ ॥१६१॥

सं विष्णुलोके महीयते॥ एवं मासोपवासांश्च सम्यक्कृत्वा त्रयोदश॥ निर्वापयेत्ततस्तान्वै विधिनानेन तत्त्वतः॥ कारयेद्वै स्वं
यत्तमेकादशं पांसुयोषितः॥ पूजयित्वा तु देवेशमाचार्यानुरूपाहरिं॥ सर्वान्नं विधिना सम्यगभिवाद्य गुरुं तथा॥ ततोनु भोज
येद्विप्रान्भोजयीत यथाविधि॥ विष्णुभक्तकुलाचारान्विष्णुपूजनतत्परान॥ पूजयित्वा द्विजान्सम्यग्भोजयित्वा त्रयोदश
॥ तावंति वस्त्रयुग्मानि भोजनाच्छादनानि च॥ योगाय दद्यान्निभ्रुश्रान्तीनसत्त्वाति चैव हि॥ दद्यात्स्वैव दक्षिणांश्चभः पूजयि
प्रणाम्य च॥ ततो नु कल्पयेच्छय्यां शय्यास्तरणसंयुतां॥ साच्छादनां शुभां श्रेष्ठां सोपधानामलंकृतां॥ कारयित्वात्मनो मूर्त्तिं
कांचनीं तु स्वशक्तितः॥ न्यसेत्तस्यां तु शय्यायामर्चयित्वा स्रगादिभिः॥ आसनं पादुके छत्रं च वस्त्रयुग्ममुपानहौ॥ पवित्रा
णि च पुष्पाणि शय्यायामुपकल्पयेत॥ एवं तु शय्यायामर्चयित्वा स्रगादिभिः॥ आसनं पादुके छत्रं च वस्त्रयुग्ममुपा
नहौ॥ पवित्राणि च पुष्पाणि शय्यायामुपकल्पयेत॥ एवं तु शय्यां तु संकल्प्य प्रणिपत्य च तान्द्विजान्॥ प्रार्थयेच्चानुमोद
र्थं विष्णुलोकं व्रजाम्यहं॥ एवमभ्यर्थितो विप्रा वेदब्रूयुर्व्रतिनं नरं॥ व्रज व्रज नरश्रेष्ठ विष्णोः स्थानमनामयं॥ विमाने वै स
वंदिव्यं शय्यायां परिकल्पितं॥ तेन विष्णुपदं याति सदानंदमनामयं॥ ततो विसर्जयेद्धीमान्प्रणिपत्यानुगम्य च॥ ततस्त
पूजयेद्भक्त्या गुरुं ताम्रपात्रस्थवं॥ प्रणम्य शिरसा शय्यां तेन गुरवे तां प्रदापयेत॥ कृत्वा मासोपवासांश्च नरो विष्णुत्वं विशेत॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४वि॰पा॰ कृत्वामासोपवासंश्चनिर्वाप्यविधिवन्मुने॥कुलानांशतमुद्धृत्यविष्णुलोकंव्रजेन्नरः॥यस्मिंजातोमहाभागकुलेमासो
॥१७०॥ पवासकृत॥नारीवासुमहाभागायथोक्तंव्रतमास्थिता॥कृत्वामासोपवासंश्चव्रजेद्विष्णुंसनातनं॥नारदउवाच॥स
दुष्करमिदंदेवमूर्छाग्लानिकरंस्मृतं॥व्रतंमासोपवासाख्यंभक्तिंजनयतेऽच्युते॥पीडितस्यमहादेवमूर्छितोव्रतिनस्त
था॥सागोवाऽनुग्रहोवाथकिंतुकार्यंपितामह॥ब्रह्मोवाच॥व्रतस्थंकर्शितंदृष्ट्वामुमूर्षुंवातपोधन॥दृष्ट्वानुवेश्मव
स्तस्यकुर्यात्तस्यानुग्रहं॥अमृतंपाययेत्क्षीरमिच्छमानंसकृत्त्रिशि॥अमृतंगव्यमित्यर्थः॥पयेदृतंविष्णुरेतत्प्रा
णाःक्षुत्सीदितोव्रती॥अतिमूर्छान्वितंक्षीणांमुमूर्षुंक्षुत्स्वपीडितं॥पाययित्वाश्वतंक्षीरंरक्षेद्दत्वाफलानिवा॥अहोरा
त्रंचयोनित्यंव्रतस्थंपरिपालयेत॥पयोमूलफलंदत्वाविष्णुलोकंव्रजेत्ततः॥एवंमासोपवासस्यमाहात्म्यंप्राग्रासंत्राये॥
अव्रतघ्नागुरोर्द्विजैःपरीक्षेद्ब्राह्मणाज्ञया॥नैतेव्रतंविनिघ्नंतिहविर्विप्रानुमोदितं॥क्षीरोषधिगुरोराज्ञात्वापोमूलंफ
लानिचा॥रवंकृत्वाभिरक्षेत्तसगुडंपाययेत्ततः॥पाययेद्दक्षितोपिस्यात्समाप्नोतिपुनर्व्रतं॥इत्थंविष्णुर्व्रतंविष्णुर्दाताविष्णु
र्व्रतीतथा॥सर्वंविष्णुमयंज्ञात्वाव्रतस्थंक्षीणमुद्धरेत॥यदामुमूर्षुर्निश्चेष्टःपरिग्लानोतिमूर्छितः॥तदासमुद्धरेत्क्षी रामः
रामिश्रंतंविप्रुस्वास्थितं॥परिपाल्यव्रतीदेहंव्रतशेषंसमापयेत॥यथोक्तंद्विगुणंतस्यफलंविप्रमुखोदितं॥इंद्रियार्थे ॥१७०॥

जौ॥देवदारुमयंपृष्ठंशृंगंगुग्गुलसंभवं॥कुष्ठंकपोलकंप्रोक्तंउशीरंचर्मचैववस्तु॥उदरेचंदनंदद्यात्त्वग्रम्येनस्त्वेमे
वच॥एवंनिर्मायकर्पूरधेनुंवस्त्रेणापूजितां॥विप्रंसंपूज्यकर्पूरैर्वस्त्रयुग्मेनचैवहि॥कर्पूरधेनुंविप्रेंद्रगृहसोले
मांसुपूजितां॥पुष्पगंधास्थितासामेकमलाप्रीयतामिति॥अनेनैवतुमंत्रेणदानंविप्रायदापयेत॥दत्वाधेनुमि
मांराजन्गंधर्वाणांसमोभवेत॥कल्पत्रयंवसेत्स्वर्गेराजराजोभवेदिह॥सर्वान्कामानवाप्नोतिगोरीलोकेमहीयते॥
तथा॥दत्वागंधमयीधेनुंकामानांफलमाप्नुयात॥एवंकस्तूरिकाधेनुश्चेद्दाविन्नाज्ञसारतः॥पाद्येदद्यान्नपमंत्रेष्टमंत्रमे
नमुद्दिश्ययेत॥एवंपूर्वोक्तंमंत्रं॥अत्रकस्तूरीपदप्रक्षेपकार्यःकर्पूरपदस्थाने॥इतिकर्पूरधेनुदानम्॥ ॥अथसुव
र्णधेनुदानम्॥विष्णुधर्मोत्तरे॥यदुक्तंराजपिराजेंद्रऊहितंविष्णुनापुरा॥ततेविस्तरतोराजन्कथयाम्यनुपूर्वशः॥
सुवर्णस्यसुवर्णस्यकुर्यात्सपरिकल्पितां॥अत्रद्वितीयसुवर्णशब्दःपरिमाणार्थः॥अश्वद्वाद्वेउत्तमार्थः॥रौप्यवत्स
कसंयुक्तांमुक्ताफलविभूषितां॥प्रवालभृंगोपयुतांपद्मरागाक्षिशालिनी॥घृतपात्रस्तनवतीकर्पूरागुरुनासिकां
॥यतयाञात्रिचक्षुर्वार्कशरसनोपेतांमहाशान्त्रमुखवासितां॥शंखभृंगांतरांशुक्तिललाटस्थानकल्पितां॥फलदंतां
वस्त्रयुग्मपार्श्वांक्षौमसुकंबलां॥इक्षुपादांनालिकेरश्रवणांगुडजानुकां॥पंचगव्यापानवतींकांस्यदोहसमन्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ तां॥ सुपर्दस्तच्चलां शस्लां समस्तधान्यसमन्वितां॥ सुवर्णधेनुं विप्राय प्रतिपाद्येद्दीननरः॥ दानमंत्रस्तु॥ हिरण्य
॥१७०॥ रेतोः पुरुषः पुराणः कृष्णपिंगलः॥ तस्य हेमच्छविः स्रष्टा विप्राय प्रतिपाद्येद् भ्वात्मा प्रीयतामिति॥ अनेनैव
तु मंत्रेण धेनोर्दानं प्रकीर्तितं॥ अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयं॥ कुलानां तु सहस्रं स्वं स्वर्गं नयति वै बुधः
॥ किमन्यैर्बहुभिर्दानैः पर्याप्तं हेमधेनुना॥ धेनुनेति श्रौंदसः॥ सुवर्णधेनुं दत्वा हि कृतकृत्यो भवेन्नरः॥
हिरण्यगर्भो भगवान् प्रीयतामिति कीर्तयेत॥ उपवासविशुद्धात्मा दद्यात्सोमग्रहे॥ रक्षः पित्राचात्तरे हेंत
पत्रेंपंति नसधिप॥ कार्त्तिक्यां प्रयतो दद्यात्कादत्रपां कार्तिकस्य वा॥ दत्वा तत्पदमाप्नोति यत्र गत्वा न शोचति॥ इति सु
वर्णधेनुदानं॥ ॥ वन्हिपुराणेपि॥ सुवर्णधेनुभ्राम्यत्र सुवर्णाश्च चतुर्दश॥ सुनिर्मितस्तु सुवर्णश्च समभिमध्य
मा मता॥ चतुर्भिः कम्पसा प्रोक्ता चतुर्थांशेन वत्सकः॥ गुडधेनुविधानेन दत्ता सर्वफलप्रदा॥ विश्वामित्रः॥ हि
रण्यरेताः पुरुषः पुराणः कृष्णपिंगलः॥ तत्र हेमच्छविः स्वष्टा विभ्वात्मा प्रीयतामिति॥ हिरण्यगर्भो भगवान्प्री राम॰
यतामिति कीर्तयेत॥ सुवर्णधेनुं दत्वा च कृतकृत्यो भवेन्नरः॥ इति वन्हिपुराणोक्तं सुवर्णधेनुदानम्॥ ॥ अथ ॥१७०॥
प्रमेहघ्नसुवर्णधेनुदानम्॥ वृद्धगौतमः॥ धेनुं स्वर्णमयीं कुर्यात्तद्वैराविधिनाततः॥ सुवर्णशृंगीं रत्नाढ्यां तथा रौप्य

खुरामपि॥ तथा च तर्णकं कुर्यादष्टभागेन सर्ववत्॥ तर्णको वत्सः॥ ब्राह्मणं श्रुतसंपन्नं वैष्णवं शुभलक्षणं॥
आचारवंतं धर्मिष्ठं द्विजश्रेष्ठ्यरोधृतं॥ गृहमाहूय विधिवत्स्नपयेद्विधिवच्च तं॥ यथाविभवमभ्यर्चाच होमस्तवेव
देवहि॥ मंत्रैस्तवेभ्यवैः सम्यकृपानात्रपः सनिधस्वतां॥ हैमांतेनामदद्याच्च मंत्रेणानेन मेहवान॥ चक्रं सुद
र्शनं यस्य राजतेंतुजस्तथैव च॥ प्रमेहं हरतु क्षिप्रं विष्णुर्गरुडवाहनः॥ इति दानमंत्रः॥ दानं प्रमेहरोगघ्नमेतत
त्कार्यं मनीषिभिः॥ कृते नानेन चैषां ग्रंथि प्रमेहा दारुणा अपि॥ अत्र पूर्ववदिति राजतं द्रव्यदानवदितिज्ञेयं
॥ इति प्रमेहाघ्नसुवर्णधेनुदानम॥ ॥ अथ वंध्यात्वहरसुवर्णधेनुदानं॥ वायुपुराणे॥ चतुर्विधा तु या
वंध्या भवेद्वत्सवियोजनात्॥ वक्ष्ये तस्याः प्रतीकारं तत्स्वरूपं निबोध मे॥ हिरण्येन यथाशक्त्या पावसस्तु साकार
येद्दृढां॥ धेनुं पलेन॥ वत्सं च पादेन गुरुरब्रवीत्॥ धेनुं रूप्यखुरीं तस्या रत्नपुच्छं नियोजयेत्॥ घंटां गले च ब
ध्नीयात्सवत्सां पूजयेच्छुचिः॥ स्नानागरुकर्पूरैर्गंधमाल्यैः सुशोभनैः॥ उपचारैः षोडशभिर्नैवेद्यं यथा यसं
भवेत॥ मोदकं च तथापूपं गुडलवणमेव च॥ नीरकं च सुविस्तीर्णं भक्ष्यैर्वेणुमये द्दढे॥ धेनोरप्रदातव्यं ब्रा
लणात्रिगुचैवहि॥ षडष्टी द्रव्यावाद्यानं दत्वांतरमेव च॥ ओमस्तां सर्वज्ञा स्वार्थे कुशालं धर्मवेदिने॥ विद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान-प्र. नयसंपन्नं शांतं चैव जितेंद्रियम्॥ अलोलुपं सर्वजनप्रियं कल्मषवर्जितं॥ आहूय भक्त्यासंपूज्य वस्त्राद्यैर्गं
धपुष्पकैः॥ तेनैव कारयेत् पूजां मादत्तो धेनुवत्सयोः॥ होमं च कारयेत्तत्र समिदाज्यचरुतिलैः॥ मंत्रं सोमो धे
॥१७१॥ नुमिति समुच्चार्य ततः पुनः॥ प्राङ्मुखायोपविष्टाय प्रदद्यात्तामुदङ्मुखः॥ मंत्रेणानेन विधिवच्च तु छेदं हस्ते
निधाय च॥ धेनुर्या गिरिसंसत्सु वासिष्ठ सुरभी च या॥ दुहिता यातथा भानो रुद्रैश्च वरुणस्य च॥ याश्च गावः प्रवर्त्तं
ते वने एष वनेषु च॥ श्रीणां तु ताम मम सदा पुत्रपौत्रप्रदाः सुखं॥ प्रपद्यंतु दिवारात्रमविच्छेदं च संतते॥ इति दानमंत्रः
॥ एवं दत्वा तु तद्दानं प्रणिपत्य विसर्जयेत्॥ एवं कृते तु वैधव्यलनश्यत्येव न संशयः॥ इति वैधव्यहरस्वर्णधे
नुदानं॥ ॥ अथ प्रस्विन्नपाणिपादत्वहरस्वर्णधेनुदानम्॥ तत्रैव॥ प्रस्विन्नपाणिपादः स्याद्योहरेत्तु रसा
दिकं॥ वक्ष्यामि तस्य तीकारं दानहोमादिकर्मणा॥ पलार्द्धेन तदर्द्धेन तदर्द्धेनाथवा पुनः॥ कुर्याद्धेनुं सुवर्णेन
वत्सस्तस्याद्दतो भवेत्॥ पादतश्चतुर्थांशेन॥ एवं कृत्वा तु तां धेनुं वस्त्रेणाविष्ट्य शोभनां॥ गुडस्योपरि संस्थाप्य
पूजयेद्गंधपुष्पकैः॥ गुडस्य च परीमाणं चत्वारिंशत्पलं भवेत्॥ तदर्द्धं तदर्द्धमेव स्याद्यथाविभवमेव च॥ -- राम.
------ दधिक्षीरचतुष्टयं॥ -- पंचकेकर्णः स्यात्पश्चाद्दक्षिणो नरतः क्रमात्॥ शृंगाणि च पुनः तस्याः कुंकु ॥१७१॥

मेनानुलेपयेत्॥ एवं विधाय तां धेनुमाचार्यः स्वर्गरूपिणीं॥ धर्मज्ञो यज्ञवेत्ता च कुशलः क्रोधवर्जितः॥ अनुद्वेगकरोन्येषां
पुराणार्थविद्‌ज्ञावित्॥ समिदाज्यतिलैश्चापि मंत्रैरेभिः क्रमेण तु॥ आयं गौरिति मंत्रेण समिद्धोमः प्रशस्यते॥ चोभि
यदेति मंत्रेण आज्यहोमो व्याहृतिभिरष्टोत्तरसहस्रकं॥ एवं च होमं निर्वर्त्य कुर्यात्तस्याभिषेचनं॥ अग्नेः पूर्वोत्तरे दे
शे स्थापयेत्कुंभमव्रणं॥ श्वेतेन वाससाच्छाद्य मन्त्रिकां गुग्गुलं क्षिपेत्॥ गोरोचनां संभवे च पंचभंगान् निक्षिपेत॥
मंत्रैरथायो हिष्ठेति तिसृभिस्तंतुरोगिणां॥ हिरण्यवर्णा इति च पावमानेन चैव हि॥ त्रीन्त्रीवातान् वाकेन त्वं नो इति प्रथ
ममेव हि॥ कृत्वाभिषेचनं कुर्याच्छुक्लांबरधरस्य तु॥ आहुतीनां च संपातैः पाणिपादौ च लेपयेत्॥ ततस्तां पूजयेद्दे
वेरोगीगंधाक्षतादिभिः॥ गावः सुरभय इति तु तां मंत्रेणाभिमंत्रितः॥ आचार्याय यथा तां दद्यात्प्राङ्मुखाय उदङ्मुखः॥
मंत्रेणानेन विधिवत्सजितायन संशयः॥ आदित्यस्य सुता या तु देवानां याश्च धेनवः॥ पितॄणामपि यक्षाणां गंधर्वा
णां च सर्वशः॥ यक्षाणां गुह्यकानां च वसिष्ठसुरभिस्तथा॥ एता गावो मम क्षिप्रं धेनोः स्याः प्रदानतः॥ रसचौर्येण
यज्जातं वैरूप्यं पाणिपादयोः॥ तत्सर्वं नाशयित्वा तु धेनवः संतु तोषिताः॥ इति दानमंत्रः॥ अनेन विधिना स्वर्णधे
नुदानं करोति यः॥ पूर्वकर्मविपाकोत्थं दुःखं सर्वं प्रणश्यति॥ दक्षिणां ब्राह्मणे दद्याद्यथाशक्त्याथ भक्तितः॥ ब्राह्म

दान॰प्र॰ णान्भोजयेद्वापिवंध्वनपिचभोजयेत्॥स्वयंतत्वाच्चभुंजीतमष्टाहारैस्तुसंयतः॥दानेनानेननियतंरोगोयंनश्यतेध्रु
॥१७२॥ वं॥इतिपाणिपादप्रस्वेदघ्नसुवर्णधेनुदानम्॥इतिश्रीमद्धिक्कलनकुलपालीभूतेनश्रीमन्नागदेवभट्टात्मजेनश्री
मदनेनाचार्येणविरचितेविधानपारिजातेसमस्तधेनुदानविधानानि॥अनेनश्रीपरमेश्वरःप्रीयतां॥ ॥अथगा
वःपृथ्वीसरस्वतीगोदानांतरंक्रमप्राप्तस्यपृथ्वीदानस्यदशदानमध्येनिरूपितत्वात्तोपविद्यादानंप्ररूपते॥विष्णु
धर्मोत्तरे॥विद्याकामदुघाधेनुर्विद्याचक्षुरनुत्तमं॥विद्यादानात्परंदानंनभूतंनभविष्यति॥विद्यावान्सर्वकामानां
भाजनंपुरुषोभवेत्॥तस्माद्विद्यांहिददातासर्वदत्तंभवेदिह॥पराध्यापनशक्तोहिपुरुषस्तपदच्युते॥तपस्तस्यरमं
तस्यब्रह्मलोकसमस्मृतं॥बृहस्पतिः॥सहस्रमेवधेनूनांशतंचानडुहांसमं॥दशयानतुल्यंमयानंदशयानसमोहयः
॥दशवाजिसमाकन्याभूमिदानंततोधिकं॥भूमिदानंमहापुण्यंविद्यादानंततोधिकं॥तैत्तिरीयश्रुतिरपि॥स्वाध्या
यप्रवचनेएवेतिनाकोमौद्गल्यः॥तद्धितपस्तद्धितपइति॥प्रवचनंप्रकृष्टवचनमध्यापनमित्यर्थः॥नंदिपुराणे॥वि
द्याश्चतुर्दशप्रोक्ताःक्रमेणचयथास्थिताः॥षडंगाश्चतुरोवेदाधर्मशास्त्रंपुरातनं॥मीमांसातर्कमितिचएतावि राम॰
द्याश्चतुर्दश॥पुरातनंपुराणं॥आसामेवांतरोसंख्याःपराविद्याःसहस्रशः॥आयुर्वेदःसस्यवेदोवहुभेदःप्रकीर्तितः ॥१७२॥

सस्यवेदःकृषिशास्त्रं॥सर्वात्माचात्मविद्याचसंसारभयनाशनी॥सर्वदुःखांतकरणीसर्वपापविनाशनी॥तथा॥एकेको
जीवतिप्राणीकयापिकिलकुत्रचित्॥सर्वत्रफलदाविद्याकुलानांत्रातमुद्धरेत्॥शिल्पविद्यांतरोदत्वायातिवै
श्मरोगांतिकं॥कलाविद्यांनरोदत्वावैस्मवंलोकमाप्नुयात्॥सस्यविद्यांनरोदत्वाप्रजापतिपुरंव्रजेत्॥आयुर्वे
दंनरोदत्वालोकात्याप्रोतिनिर्मलात्॥तर्कविद्यांनरोदत्वावारुणंलोकमाप्नुयात्॥मीमांसातुधेदत्वाशास्त्रमि
ष्टपुरेवसेत्॥धर्मशास्त्रंनरोदत्वास्वर्गलोकेमहीयते॥दशमन्वंतरान्मर्त्यस्तारयेन्नरकादिह॥वेदविद्यांनरोद
त्वास्वर्गेकल्पत्रयंवसेत्॥आत्मविद्यांतुयोदद्यात्तस्यसंख्यानविद्यते॥पुराणस्यागादिंतुसम्यगपिवर्षशताद्भुतैः॥
एतावच्छक्यतेवक्तुंपत्कल्पायुतमुत्तमं॥सत्यलोकेवसेन्मर्त्योयत्रब्रह्मावसेत्प्रभुः॥पुराणविद्यादातारस्त्वनंतफ
लभागिनः॥तथा॥श्लोकंप्रहेलिकांगाथामथान्यद्वासुभाषितं॥दत्वाप्रीतिकरंयातिलोकमप्सरसांसदा॥रामाय
णंभारतंचदत्वास्वर्गेमहीयते॥पुराणंतर्कशास्त्रंचछंदोलोकारलक्षणं॥वेदमीमांसिकंदत्वाशिवधर्मतथैवच॥
सप्तद्वीपपृथिव्यांतुनरोराजाभवेद्धिसः॥पाणिनीयंनिरुक्तादिवेदांगानिस्मृतीस्तथा॥दत्वाज्ञानमवाप्नोतिवेदां
तंचविशेषतः॥निःसंदेहमितिएतेद्गावःपृथ्वीसरस्वती॥ ॥अथसंग्रहणविधिः॥गारुडे॥स्वयंशुचिःशुचीन्विप्रान्त्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ सन॰प्र॰ तः स्नातो जितेंद्रियः॥ दंभोनाशयपाशैतु पाठयेत्तास्तथाविधान्॥ अनध्यायस्मरिरहस्त्रीचातश्चावयत्नयि॥ ए
॥१७३॥ वंविधानतो यस्तु तवमेकां प्रयच्छति॥ त्रिविंतप्राणार्पयितेन दत्तान संशयः॥ तथा॥ यावंति वेदगीतानि पुराण
वेदव्रतानि च॥ तावंति वेददानेन प्राप्नुयाद्भक्तिभावतः॥ उपाध्यायस्य यो वृत्तिं दत्वाध्यापयते द्विजान्॥ किंत्र द
त्तं भवेत्तेन धर्मकामार्थदर्शिनं॥ छात्राणां भोजनाभ्यंगवस्त्रभिक्षामथापि वा॥ दत्वा प्राप्नोति पुरुषः सर्वान्कामा
न्न संशयः॥ अथ विद्याप्रतिमादानानि तत्रैव॥ अथ दानविधिं वक्ष्ये रहस्यं परमं मतं॥ पंविवायनरो घोराद्वि
रयाद्बोपसर्पति॥ आम्नायरूपाणि विधाय सम्यगिमानि पूर्वोदितलक्षणानि विभुर्दनानामणि भवितानि कृत्वा
दिवेदक्रमतो निवेद्य पः॥ पूर्वोदितलक्षणानीत्सनेन महाभूतघरदाने प्रदर्शितं॥ तत्रापि देयमिह्युच्यते॥ वासां
सि देयानि यथाक्रमेण पीतानि शुक्लान्यथ लोहितानि॥ नीलानि चैव कुसुमानि दत्वा संसमगंधाक्षतधूपदीपैः
॥ आमोदिमोदकघृतंघृतपायसं च सक्षौद्रमन्नमथयप्पचहृतं क्रमेण॥ तेभ्यो निवेद्य विधिवत्प्रयतः प्रणम्य सम्यक्कृ राम॰
प्रदक्षिणाविधिं विदधीत विद्वान्॥ तेषां पूजाविधिः कार्योणापच्याधीमतां वरः॥ व्याहृत्यं व्याहृतीः कुर्यादावाहनवि ॥१७३॥
सर्जने॥ मंत्रैरेतैस्ततः कुर्यादमीषामनुमंत्रणं॥ ऋग्वेद पद्मपत्राक्षरक्षरक्षक्षिपाशुभं॥ ग्रारणां त्वां प्रपन्नोस्मि वेदि

मेहितमुत्तमं॥ यजुर्वेद नमस्तेस्तु लोकत्राणपरायण॥ त्वत्प्रसादेन मे कामानि खिलाः संतु संततं॥ सामवेद महावाहो ते
हि साक्षाद्धोक्षजः॥ प्रसादसुमुखो भूत्वा कृपयानुग्रहाण मां॥ अथर्व सर्वभूतानां त्वदायत्ते हिताहिते॥ शांतिं कुरु
ष्व देवेश पुष्टिमिष्टां प्रयच्छ नः॥ इति संप्रार्थ्य देवेशान्विप्रेभ्यः प्रतिपादयेत्॥ प्रदद्यादेकमेकस्मै सुवर्णं त्रिपलान्वितं॥
दद्यादेकपलोपेतमेकैकमिह दुर्बलः॥ अथ स्मृत्यन्तितो वापि दानमेषां विधीयते॥ एतदेव प्रमाणं स्यादेतेषामप्र
ति निर्मितौ॥ अनधीतवतो वेदान्वेददानविधिस्त्वयं॥ सदाध्ययनयुक्तस्य त्वध्यापनमेव हि॥ वेदाननधीतवतो
वेदाध्ययनवर्जितस्य॥ इति वेददानं॥ ॥ अंगानामप्यध्यापनविधिर्वेदाध्यापनविधिना व्याख्यातः॥ अथ स्मृतिदानं
॥ नंदिपुराणे॥ श्रुतिस्मृतिश्च विप्राणां चक्षुषी द्वे प्रकीर्तिते॥ काणस्तत्रैकया हीनो द्वाभ्यामंधः प्रकीर्तितः॥ स्मृतयो धर्म
शास्त्राणि॥ तासां प्रणेतारो ऋषिशातिर्याज्ञवल्क्येनोक्ताः॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥ यमापस्तंबसं
वर्त्ताः कात्यायनबृहस्पती॥ पराशरो व्याससंशंखलिखितादक्षगौतमौ॥ शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजका इ
ति मनुनात्वष्टादशोक्ताः॥ विष्णुः पराशरो दक्षसंवर्त्तव्यासहारिताः॥ शातातपो वसिष्ठश्च यमापस्तंबगौतमाः॥ देव
लः शंखलिखितौ भारद्वाजोशनोत्रयः॥ शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारकाः॥ तथा॥ भार्गवी नारदीया च बा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ हस्पत्यंगिरस्यपि॥स्वायंभुवस्यशास्त्रस्यचतस्त्वःसंहितामताः॥ अंगिराः॥जाबालिर्नचिकेतस्यस्कंदोलौगा
॥१७४॥ क्षिकाश्यपौ॥व्यासःसनत्कुमारश्चशंतनुर्जनकस्तथा॥व्याघ्रःकात्यायनश्चैवजातूकर्णःकपिंजलः॥बौधा
यनःकणादश्चविश्वामित्रस्तथैवच॥उपस्मृतयइत्येताःप्रवदंतिमनीषिणः॥यमः॥एतैर्यानिप्रणीतानिधर्मशा
स्त्राणिवैपुरा॥तान्येवातिप्रमाणानिनहंतव्यानिहेतुभिः॥स्मृतयोधर्ममूलंहिधर्मःसर्वार्थसाधनं॥अतःस्मृति
भुदत्त्वासुसर्वदानफलंलभेत॥दानंचसाक्षादध्यापनंपरंपरयावापुस्तकदानंवा॥अनुक्तदक्षिणमपिसदक्षि
णंदेयं॥तथाहिभविष्ये॥अदत्तदक्षिणंदानफलंभवेत॥दानंचसाक्षादध्यापनंपरंपरयावापुस्तकदानंवा॥
अनुक्तदक्षिणमपिसदक्षिणंदेयं॥तथाहिभविष्ये॥अदत्तदक्षिणंदानंव्रतंचैवनरोत्तम॥विफलंतद्विजा
नीयाद्भस्मनीवहुतंहविः॥सौवर्णंपरमंदानंसुवर्णंदक्षिणापरा॥सर्वेषांचैवदानानांसुवर्णंदक्षिणोच्यते॥दे
यद्रव्यतृतीयांशंदक्षिणांपरिकल्पयेत॥अनुक्तदक्षिणेदानेदशांशंवापिकीर्तितः॥सुवर्णंरजतंतांम्रंतंदुला राम॰
धान्यमेवच॥नित्यश्राद्धंदेवपूजासर्वमेतदक्षिणं॥नित्यंदेयानिराजेंद्रगावःपृथ्वीसरस्वती॥दातारंतारयंत्येतेजे ॥१७४॥
पवाहदोहनैरिति॥वराहे॥विद्यादानविधिंवक्ष्येयथातत्त्वेनतेपुनः॥येतेनयत्फलंपश्चात्तुरस्यसमासतः॥उक्तेसमा

रम्येकालेनिम्नोन्नतविवर्जिते॥सुसमेभूप्रदेशेचगोमयेनोपलेपयेत॥पुष्पप्रकरसंपन्नेगीतवाद्यसमा
कुले॥वेदिकांचतुरस्रांचदंडेनैवकारयेत॥पुस्तकंतत्रसंस्थाप्यगंधपुष्पैःसमर्चयेत॥सौवर्णालेखनीका
र्यामषीभांडंचरौप्यकं॥जययन्त्राहंसमुद्राश्चआरभेल्लेखकःसुधीः॥विनीतश्चाप्रमत्तश्चवशाशास्त्रनिष्पत्ति
मानयेत॥पुस्तकंतत्रसंस्थाप्यगंधपुष्पैर्ब्राह्मणस्यसुहृत्तस्यवाचकस्यद्विजन्मनः॥शोधयित्वातुतच्छास्त्रं
देयंवैमोक्षमिच्छता॥पुस्तंदक्षिणांदद्याद्वस्त्रालंकारभूषणं॥भुंक्तेचवस्त्रयुग्मंतुदद्याच्छास्त्रंसमासितः
॥संपूर्णमितरार्थः॥वस्त्रयुग्मेनसंवीतंपुस्तकंप्रतिपादयेत॥वाचकंपूजयेद्धीमान्वस्त्रालंकारभूषणैः॥श्रो
ष्यतामितिवक्तव्योब्राह्मणःसुसमाहितः॥अनेनैवविधानेनविद्यादानफलंलभेत॥दुर्भिक्षेसमनुप्राप्तेदा
तुरन्नस्ययत्फलं॥तत्फलंकोटिगुणितंपुस्तकैकप्रदानतः॥यत्पुराणंपजगतांनराणां॥तत्पुराणंकोटिगुणितं
विद्यादानान्नसंशयः॥वह्निपुराणे॥शुभेह्निशुभनक्षत्रेमंडपंशुभवेदिकां॥चतुस्तंभवितानंचकृत्वातत्रोप
लेपयेत॥तत्रस्यासनंदिव्यंदिव्यगंधाधिवासितं॥संस्थाप्यपुस्तकंतत्रधर्मशास्त्रस्यधीमतः॥ब्राह्मणान्
संपूज्यदानलक्षणपारगान॥आनह्यवसंपूज्यवस्त्रालंकारभूषणैः॥घृतधेन्वाप्रदत्त्वैदद्याद्गुणावते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०ख० ततः॥ अनेनैव विधानेन ब्राह्मणान्शीलसंयुतान्॥ अध्याप्य ब्रह्मशास्त्रादि ब्रह्मसायुज्यतामियात्॥ स्वसासा
मर्थ्यं तु॥ धनैर्वापि पुस्तकैर्वा तैर्गुरुं तद्वा सुतर्पितं॥ अध्यापयेच्छुभं शिष्यानभिज्ञातान्सुमेधसः॥ एवं विद्याप्र
॥१७५॥ दानं तु सर्वदानोत्तमोत्तमं॥ सर्वदा सर्ववर्णानां नरकात्त्राणमुत्तमं॥ ॥ अथ पुराणदानानि॥ तत्र पुराणल
क्षणं॥ सौरपुराणे॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च॥ वंशानुचरितं चैव पुराणं पंचलक्षणं॥ अत्र नो
पपुराणानामखिलत्वोपलक्षणं स्मृतम्॥ ब्राह्मं पुराणं तत्राद्यं संहिता भूरिविस्तृतं॥ श्लोकानां दशसाहस्रं तान्स
पुण्यकथायुतं॥ पाद्मं द्वितीयं कथितं तत्तृतीयं वैष्णवं स्मृतं॥ चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतं॥ ततो भाग
वतं प्रोक्तं भागद्वयविभूषितं॥ चतुर्भिः पर्वभिः प्रोक्तं भविष्यत्तदनंतरं॥ मार्कंडेयं तथाग्नेयं नारदीयमतः परं॥ दश
मं ब्रह्मवैवर्तं लैंगमेकादशं स्मृतं॥ भागद्वयेन संयुक्तं ततो वाराहमुत्तमं॥ संयुक्तं सप्तभिः खंडैः स्कांदं चैव सवि
स्तरं॥ ततस्तु वामनं नाम भागद्वयविराजितं॥ मात्स्यं च गारुडं प्रोक्तं ब्रह्मांडं च ततः परं॥ भागद्वयेन कथितं ब्रह्मांडमि दाम०
ति संहितं॥ मात्स्ये पुराणानि दशाष्टौ च संप्रतं तदिहोच्यते॥ नामतस्तानि वक्ष्यामि शृणु धर्मार्थसत्तमाः॥ ब्रह्मणाभि
हितं पूर्वं यावन्मात्रं मरीचये॥ ब्राह्मं तद्दशसाहस्रं पुराणं परिकीर्त्यते॥ लिखित्वा तच्च यो दद्याज्जलधेनुसमन्वितं॥ ॥१७५॥

वैशाख्योच्यते बुधैः॥ पाद्मं तत्पंचपंचाशत्सहस्राणीह पठ्यते॥ तत्पुराणं च यो दद्यात्सुवर्णकमलान्वितं॥ ज्येष्ठमा
सि तिलैर्युक्तं सोश्वमेधफलं लभेत्॥ वाराहकल्पवृत्तांतमधिकृत्य पराशरः॥ यत्राह धर्मानखिलांस्तद्युक्तं वैष्ण
वं विदुः॥ तदाषाढे च यो दद्याद्घृतधेनुसमन्वितं॥ पौर्णमास्यां विपूतात्मा स पदं याति वारुणं॥ चतुर्विंशत्सह
स्राणि वायुप्रोक्तं तदीरितं॥ श्रावणे श्रावणीमासि गुडधेनुसमन्वितं॥ यो दद्याद्विधिसंयुक्तो ब्राह्मणाय कुटुंबि
ने॥ वायुलोके स पूतात्मा कल्पमेकं वसेन्नरः॥ यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः॥ वृत्रासुरवधोपेतं त
द्भागवतमुच्यते॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरा नराः॥ तद्वृत्तांतोद्भवं लोके तद्भागवतमुच्यते॥ लिखित्वा
तच्च यो दद्याद्धेमसिंहसमन्वितं॥ पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम्॥ विधिस्तु॥ शोधयित्वा भागवतं
चित्रायो दद्यात्पद्यान्वितं॥ क्षौमवस्त्रेण संवीतं व्यासपीठे परिस्थितं॥ ब्राह्मणाय विशुद्धाय विष्णुभक्तिपरा
य च॥ वस्त्रालंकारसहितमुपवीतसमन्वितं॥ स्वर्चितं स्वर्चितायैव गंधपुष्पादिधूपकैः॥ दद्यात्कुसुमपरो धीमा
ञ्जन्मबंधापनुत्तये॥ श्रीभागवत नमस्तेस्तु साक्षाल्लक्ष्मीशरीरक॥ नारायणाख्यं प्रपन्नोस्मि रक्ष मां दुःखसागरात्
॥ यथा श्रेष्ठं पुराणेषु त्वं वै भागवतोत्तम॥ तथा मां विमलं कुर्या दीनं चैव शरणागतं॥ इदं भागवतं नाम पुराणं ब्रह्मसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ मितं॥ इदं चैत्री विष्णुभक्ताय प्रीत्यर्थं चक्रपाणिनः॥ ब्रह्मंस्त्वं सर्वधर्मज्ञ वासुदेवपरायण॥ श्रीभागवतदानेन त्रा
॥१७६॥ हि मां शरणागतं॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं॥ भवसागरात॥ एवं भागवतं दत्वा वैस्नवामरिसउ
चा॥ श्राविभंगत आदाय ब्राह्मणान्भोजयेत्ततः॥ एवं कृत्वा महाभागो विष्णुसायुज्यमाप्नुयात्॥ अष्टादशस
हस्राणि पुराणं तत्प्रकीर्त्तितं॥ सत्याख्यानं विन्यासेराद्दत्वा विस्वालिपयव्रजेत्॥ ६॥ ॥ यत्राह नारदो धर्मान्वृ
हत्कल्पाश्रितांस्त्विह॥ पंचविंशत्सहस्राणि नारदीयं तदुच्यते॥ तदिदं चाश्वयुजां तु यो दद्याद्धेमसंयुतं॥ उत्त
मां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभां॥ यत्राधिकृत्य शाकुनीन्धर्माधर्मविचारणां॥ पुराणं नव साहस्रं मार्कंडे
यमितुच्यते॥ परिलिख्य च यो दद्यात्सौवर्णां कदिसंयुतं॥ कदिः कदिसत्वं॥ करीति क्वचित्॥ कार्त्तिक्यां पौंडरीकस्य
यज्ञस्य फलभाग्भवेत्॥ यत्तदीशानकल्पस्य प्रवृत्तं धिकृत्य च॥ वशिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते॥ लिखि
यित्वा यो दद्याद्धेमपद्मसमन्वितं॥ मार्गशीर्ष्यां विधानेन तिलधेन्वा समन्वितं॥ एतच्च षोडशसाहस्रं सर्वक्रतुफ राम॰
लप्रदं॥ यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः॥ अघोरकल्पवृत्तांतप्रसंगेन जगत्स्थितिः॥ मनवे कथयामा ॥१७६॥
स भूतग्रामस्य लक्षणं॥ चतुर्दशसहस्राणि तथा पंचशतानि च॥ भविष्यच्चरिते प्रायो भविष्यं तदिहोच्यते॥ तत्पौ

षे मासि यो दद्यात्पौर्णमास्यां विमत्सरः॥ गुडकुंभसमायुक्तमग्निष्टोमफलं लभेत्॥ रथंतरस्य कल्पस्य वृत्तांतमधिकृ
त्य च॥ सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतं॥ यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः॥ तदष्टादशसाहस्रं ब्रह्मवै
वर्त्तमुच्यते॥ पुराणं ब्रह्मवैवर्त्तं यो दद्यान्माघमासके॥ पौर्णमास्यां समभवनं ब्रह्मणो याससंत्रायं॥ शिवतत्वं चाधिकृ
त्य अब्रवीद्धर्ममंग्रसा॥ यत्राग्निलिंगमध्यस्थः प्राह देवो महेश्वरः॥ धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च॥ कल्पे
तल्लैंगमित्युक्तं पुराणं ब्रह्मणा स्वयं॥ तच्चैकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति॥ तिलधेनुसमायुक्तं स याति शिव
साम्यतां॥ वराहस्य पुनर्माहात्म्यमधिकृत्य च॥ विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते॥ कांचनं गरुडं कृत्वा ति
लधेनुसमन्वितं॥ पौर्णमास्यां मधौ दत्वा विष्णुलोके महीयते॥ यत्र माहेश्वरान्धर्मानधिकृत्य षण्मुखः॥ कल्पे
तत्पुरुषवृत्ते चरितैरुपबृंहितं॥ स्कांदं नाम पुराणं तं देकाशीति निगद्यते॥ सहस्राणि शतं चैकमिति मर्त्ये
षु पद्यते॥ परिलिख्य च यो दद्याद्धेमशूलसमन्वितं॥ शैवं पदमवाप्नोति मकरोपगमे रवेः॥ त्रिविक्रमस्य माहा
त्म्यमधिकृत्य चतुर्मुखः॥ त्रिवर्गमभ्यधात्तत्तु वामनं तत्प्रकीर्त्यते॥ पुराणं दशसाहस्रं कूर्मकल्पानुग
शिवं॥ यस्तत्तद्विषुवे दद्याद्वैष्णवं यात्यसौ पदं॥ यत्र धर्मार्थकामानां मोक्षस्य च रसातले॥ माहात्म्यं कथयामास कूर्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपीजनार्दनः॥इंद्रद्युम्नप्रसंगेनऋषीणांशक्रसंन्निधौ॥सप्तदशसहस्राणिलक्ष्मीकल्पानुषंगिकं॥योदद्याद्रथ
तेकूर्मेहेमकूर्मसमन्वितं॥गोसहस्रप्रदानस्यसफलंप्राप्नुयान्नरः॥अतीतेनायकल्पादौप्रवृत्तस्यजनार्दनः॥म
त्स्यरूपीचमनवेनरसिंहोपवर्णनं॥अधिकृत्याब्रवीत्समकल्पंद्वेन्नमनुव्रतः॥तन्मात्स्यमितिजानीध्वंसह
स्राणिचतुर्दश॥विषुवेहेममत्स्येनधेन्वाचैवसमन्वितं॥योदद्यात्पृथिवीतेनदत्ताभवतिचाखिला॥यदाचगा
रुडेकल्पेविश्वांडाद्गरुडोद्भवं॥अधिकृत्याब्रवेन्नरः॥योददातिपरांसिद्धिमाप्नोसक्षीणसंततिः॥ब्रह्माब्रह्मांडमा
हात्म्यमधिकृत्याब्रवीत्पुनः॥तच्चद्वादशसाहस्रंब्रह्मांडंद्विशताधिकं॥भविष्याणांचकल्पानांश्रूयतेयत्रवितद्ब्रह्मा
ण्डपुराणंतुब्रह्मणासमुदाहृतं॥योदद्यात्तद्व्यतीपातेयत्नोर्णायुगसंयुतं॥राजसूयसहस्रस्यफलमाप्नोतिमानवः॥
हेमधेन्वायुतंतच्चदत्त्वाब्रह्मपदप्रदं॥इत्यष्टादशपुराणदानविधिः॥ ॥अथोपपुराणानि॥वामने॥अपि
लान्युपपुराणानियानिप्रोक्तानिसूरिभिः॥आद्यंसनत्कुमारोक्तंनारसिंहमतःपरं॥तृतीयंनारदंप्रोक्तंकुमारेण
तुभाषितं॥चतुर्थंशिवधर्माख्यंसाक्षान्नंदीशभाषितं॥दुर्वाससोक्तमाश्चर्यंतथासौरंसांबंपाराशरंतथा॥इत्याद्यु
पपुराणानिज्ञेयानिमनुजैःसदा॥दानोद्योतेमात्स्ये॥सर्वेष्वपिपुराणेषुसात्विकादिफलंस्मृतं॥सात्विकेषुपुराणेषुमा

हात्म्यमधिकंहरेः॥राजसेषुचमाहात्म्यमधिकंब्रह्मणोविदुः॥तद्वदग्नेश्चमाहात्म्यंतामसेषुशिवस्यच॥संकीर्णेषु
सरस्वत्याःपितॄणांचनिगद्यते॥लिखित्वोपपुराणानिसहिरण्यानिपर्वणि॥ब्राह्मणेभ्यःप्रयच्छेत्तस्यविद्यापारगोभ
वेत्॥मात्स्ये॥अष्टादशपुराणानिकृत्वासत्यवतीसुतः॥भारताख्यानमखिलंचक्रेतदुपबृंहितं॥लक्षेणैकेनत
त्प्रोक्तंवेदार्थपरिबृंहितं॥तदेकस्यप्रदानेनवेदशास्त्रप्रदोभवेत्॥वाल्मीकिनापियत्प्रोक्तंरामोपाख्यानमुत्तमं॥
ब्रह्मणाभिहितंतच्चशतकोटिप्रविस्तरं॥उद्धृत्यनारदेनैववाल्मीकायसमर्पितं॥वाल्मीकिनाचलोकेषुधर्मकामा
र्थसाधने॥प्रवर्तितंचतुर्विंशत्सहस्रपरिसंमितं॥रामायणंलिखित्वातुयःसस्वर्णंप्रयच्छति॥तस्यप्रसन्नोभवतिरा
मोराजीवलोचनः॥लक्षांकंभारतंचलोकेवेदोपबृंहितं॥धर्मार्थकाममोक्षाणांसारंभारतमुत्तमं॥तस्यैकस्यप्रदा
नेनवेदशास्त्रप्रदोभवेत्॥खंडमाहात्म्यमपिचयोदद्याद्द्विजपुंगवे॥तस्यपुण्यस्यनांतोस्तिभवेत्तत्फलमुत्तमं॥ ॥
अथवेदादिदानमंत्राः॥तेषांपूजाविधिःकार्योगायत्र्याधीमतांवर॥स्वाहेत्यंतैस्ततःकुर्यादावाहनविसर्जने॥मंत्रैरे
तैस्ततःकुर्याद्दमीषामनुमंत्रणं॥ऋग्वेदपद्मपत्राक्षरक्षमांभवसागरात्॥शास्त्रांगैःप्रपन्नोस्मिदेहिमेहितमुत्तमं
॥१॥यजुर्वेदनमस्तेस्तुलोकत्राणपरायण॥त्वत्प्रसादेनमेकामाःनिखिलाःसंतुमेसदा॥२॥सामवेदमहाबाहोत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰ष॰ हिसाक्षाद्दधोक्षजः॥ प्रसादसुमुखो भूत्वा कृपयानुगृहाण मे ३॥ अथर्वसर्वभूतानां त्वदायते हिताहिते। शांतिं कुरु
॥१७८॥ ष्व देवेश पुष्टिमिष्टां प्रयच्छ वः॥४॥ इति संप्रार्थ्य वेदज्ञान्विप्रेभ्यः प्रतिपादयेत्॥ प्रदद्यादेकमेकस्मै सुवर्णं त्रिपला
न्वितं॥ दद्यादेकपलोपेतमेकैकमिह दुर्बलः॥ अथ स्वशक्तितो वापि दानमेषां विधीयते॥ इति संप्रार्थ्य वेदज्ञान्वि
प्रेभ्यः प्रतिपादयेत्॥ एतदेव प्रमाणं स्यादेतेषां महर्षिनिर्मिते॥ अनधीतवतो वेदान्वेददानविधिः स्वयं॥ सदध्ययन
शक्तस्य शिष्याध्यापनमेव हि॥ एवमेव स्मृतीनां च दानं मन्वादिनामपि॥ ॥अथ सामान्यतः सर्वविद्यादानमंत्रः
॥ॐ सर्वविद्याश्रयं ज्ञानकारणं ललिताक्षरं॥ पुस्तकं संप्रदास्यामि प्रीता भवतु भारती॥१॥ गृहे रक्षतपाय घत्स्वाध्या
पाध्यायनं कृतं॥ सरस्वति जगन्मातर्दंगज्ञानापहारिणि॥२॥ साक्षाद्ब्रह्मकलत्रं त्वं ड्रुहद्रादिभिः स्तुत॥ तन्ममाध्य
यनोत्पन्नं जाड्यमुहरवरानने॥३॥ विद्यादानेन विद्यामेभवेज्जन्मनि जन्मनि॥ तद्विज्ञानं महाविष्णुः प्रसन्नो भवतु द्विजः॥४॥
इति सर्वपुस्तकदानमंत्राः॥ वेदशास्त्रपुराणानि यत्किंचित्ज्ञानसाधनं॥ विद्यादानं नरः कृत्वा ब्रह्मसायुज्यमाप्नु राम॰
यात्॥ इति मदनरत्ने दानविवेकोद्योते विद्यादानप्रकारः समाप्तः॥ लिखितं श्रीमदनंतभट्टेन वेदानां सर्वस्मृतीनां ॥१७८॥
सर्वपुराणानां भारतस्य रामायणस्यान्यस्य च श्रवणविधिरस्वरसमत्कृतविधानपारिजाते चतुर्थस्तबके निरूपित

इति पुनरत्र नोच्यते॥ ॥अथ शिवशास्त्रादिदानं॥ नंदिपुराणे॥ शुभनक्षत्रदिवसे शुभे चापि दिनग्रहे॥ लेखयेत्पुस्त
देवेशानरुद्रब्रह्मजनार्दनान॥ एवं दिरवदनो भूत्वा लिपिज्ञो लेखको न्नमः॥ विद्याधारं प्रकुर्वीत हेमरूप्यमयं शुभं॥
नागदंतमयं वापि शुभं दारुमयं तु वा॥ मनोरमं गृहं रम्यं श्लक्ष्णं यंत्रप्रयोगजं॥ संकोचयंत्रसंयुक्तं विकासेन समन्वितं
॥तत्र विद्यां विनिहितां कुर्यात्पुस्तकसंस्थितां॥ तथा॥ एवं विद्वांस्तु मेधावी शास्त्रं सत्कृत्य सत्कृतं त्वशः॥ प्रदद्याद्विप्रमैर्वैर्दि
व्यैः सुरायतनवेश्मसु॥ लेखको बुद्धिमान्स्नातः शुक्लमाल्यांबरोत्करः॥ आरभेत्तु यंथोद्देशा पूजदेवान्पितृस्तथा॥ ब्राह्म
णान्स्वस्ति वाच्याथ शास्त्रं संचारयेत्सुधीः॥ श्लोकपंचकमारोतु दशकं वापि लेखयेत्॥ ततो नक्षत्रयोगेन द्वितीये हनि
तल्लिखेत्॥ तादृशेनैव विधिना पूरणे पहैः शुभसंयुतैः॥ ततः समाप्ते शास्त्रे तु पुनः पुणाहसंयुतेः॥ कुर्यात्तद्गुरुरग्रेश्च
पानभोजनवस्त्रभिः॥ उभयं चार्पितं ह्येखि समीकुर्यात्स्ववाचयेत्॥ उभयं एवं मृतं रं चलेखं पुस्तकं समीकुर्यात्स्वना
धिकमात्रादिलेखनहीकरणं पूर्वं पुस्तकवच्छुद्धं कुर्यादिति सर्थः॥ तथा॥ एवं विद्वांस्तु मेधावी शास्त्रं सत्कृत्य सत्कृ
तत्वशः॥ प्रदद्याद्विप्रमैर्वैर्दिव्यैः सुरायतनवेश्मसु॥ आरोप्य पाने रत्नाढ्ये शुभे वस्त्रपरिष्कृते॥ छत्रचामरशोभाढ्ये
रत्नदंडातपत्रिणि॥ गजवाजिरथस्थं च महाशोभासमन्वितं॥ पुरतो गीतनृत्यो च ननन्नैर्वाद्यघोषणाच॥ मंगलैः वेदनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०३० घौषैस्तद्देवायनिवेदयेत्॥नानारूपोपहारैश्चसंपूज्यतुदिवौकसः॥दत्वाचपुस्तकंतत्रपित्तरागांधर्ममुद्दिश्यबांधवानांच
॥१७१॥ त्सर्वानामनंतफलमिच्छता॥ततोदत्वाविधानेनतांविद्यांशिवमंदिरे॥ततश्चदक्षयेद्विप्रांश्छिवभक्तांश्चमानवान्॥यथा
शक्तिचकर्तव्याउत्सवाःस्वेषुवेश्मसु॥दानपात्रमुक्तं देवीपुराणे॥सदाध्ययनयुक्तायविद्याविद्याप्रदायिने॥यां
तिलोकांश्चशुभान्मर्त्याः पुण्यभाजोनराधिपेति॥इतिशिवशास्त्रादिदानं॥ ॥अथत्रिपुरुषदानं॥मत्स्यपुराणे॥सुवर्णरक्ति
कांचीतुशतेनैकेनशक्तितः॥कार्योब्रह्माथविष्णुश्चशंकरश्चतथैवच॥पलद्वादशमानेनपीठंलोहेनकारयेत्॥देवा
नांस्थापनार्थायचक्रवरिष्ठमंडलं॥तत्रब्रह्मादयस्थाप्यायमदूतप्रोत्मसेत्॥चतुर्मुखश्चतुर्बाहुःपद्महस्तःपिताम
हः॥विष्णुश्चतुर्भुजश्चक्रीवंदीगरुडवाहनः॥त्र्यंबकोद्विभुजःशूलीवृषारूढस्त्रिलोचनः॥यमदूतःपाशपाणिर्दि
त्ववान्विकृताननः॥सतुलोहमयःकार्यस्त्वन्येस्वर्णमयाःशुभाः॥ततोविधायदेवानांपूजांपुष्पफलादिभिः॥य
जमानःकरोत्वङ्गहोत्वानिशितंनवं॥ततोब्रह्मादिदेवानांदानंकुर्यात्प्रयत्नतः॥इदंचिरस्छिरश्छिन्नंप्रीतिइत्स्या राम०
स्वपुण्यात्मनः॥इत्युच्चार्यशिरश्छिंद्यात्दूतस्ययमदिङ्मुखः॥ततश्चतुर्भिर्विप्रैस्तुकार्यंब्राह्मणवाचनं॥ब्राह्मणवाचनेपु ॥१७१॥
ण्याहवाचनंततोब्रह्मादिदेवानांदानंकुर्यात्प्रयत्नतः॥देवालयेगृहेवापितीर्थेवाप्यत्रकुत्रचित्॥ब्राह्मणायचतान्दद्

द्यात्स्वयंगायत्रीशालिने॥सुवर्णदक्षिणायुक्तानेकस्माअत्रत्रयमेवेश॥अपमृत्युभयत्रस्तोयोरक्षोद्धतात्रयं॥त
स्यमृत्युर्विनश्यतदानादस्मान्नसंशयः॥मृत्युनाग्रस्यमानोपिजीवत्येवजरस्पृश्यः॥चामीकरप्रतिकृतित्रितयंविधा
यब्रह्मादिदानमिहयःपुरुषःकरोति॥रोगान्विरस्यसकलानपिदुर्निवारानेवापमृत्युभयमेतिनरःकदापि॥इत्यपमृ
त्युहरब्रह्मादित्रिपुरुषदानं॥ ॥अथनवग्रहदानं॥ब्रह्मांडपुराणे॥ग्रहदानक्रमंवक्ष्येसर्वसिद्धिकरंपरं॥सर्व
शांतिकरंनृणांसर्वपापप्रणाशनं॥विषुवत्ययनेराहुग्रहणेशशिसूर्ययोः॥जन्मर्क्षेसौरवारेवापंचदन्नपातथै
वच॥प्रणापकालेषुसर्वेषुप्रणपदेशोविशेषतः॥ग्रहदानंतुकर्तव्यंनिःसंश्रेयोभिकांक्षिणा॥हस्तमात्रेद्विहस्तेवात्रि
हस्तेवाथनारद॥चतुरस्रांसमांभूमिंगोमयेनोपलेपयेत्॥रेखाःप्राच्यउदीच्यश्चचतस्रस्तथासमाः॥नवकोष्ठेषुप
झानिविन्यसेच्छुक्लतंडुलैः॥आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥राहुःकेतुरितिप्रोक्ताग्रहालोकहितावहाः
॥एषांहिरण्यरूपाणिकारयित्वायथाविधि॥विनिष्केणाथवाकुर्याद्यथाशक्त्यापृथक्पृथक्॥हिरण्यरूपाणिहि
रण्यप्रतिमाः॥तल्लक्षणमत्राग्रेवक्ष्यते॥आदित्यंमध्यमेकोष्ठेदक्षिणेंगारकंन्यसेत्॥उत्तरेतुगुरुंविद्याद्बुधमुत्तरतः
केतुःसन्निवेशोयथाविधि॥तद्वर्णपुष्पगंधाद्यैरर्चयेत्स्वस्वमंत्रकैः॥दानंभस्त्रोयथादाकुर्यात्तद्वावात्रतुनारद॥मल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प्र॰ यनादियत्कांयेसर्वेविप्रेणाकारयेत॥ स्नानकालेतुसंप्राप्तेस्नात्वातिलकुशोदकैः॥ प्रयतोयजमानस्तुधौतवस्त्रःप्रसन्न
॥१८०॥ धीः॥ अर्चयित्वास्वयंदद्याद्भास्करप्रमुखान्ग्रहान्॥ प्रत्येकमेकंविप्रेभ्यःस्ववर्णमंत्रमीरयेत्॥ यथासनःपद्मकरोद्वि
बाहुःपद्मद्युतिःसप्ततुरंगवाहनः॥ दिवाकरोलोकगुरुःकिरीटीमयिप्रसादंविदधातुदेवः॥१॥ श्वेतांबरःश्वेत
विभूषणश्चश्वेतद्युतिर्दंडधरोद्विबाहुः॥ चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिमह्यंप्रददातुदेवः॥२॥ रक्तांबरोरक्तव
पुःकिरीटीचतुर्भुजोमेषगमोगदाभृत्॥ धरासुतःशक्तिधरश्चशूलीसदाममस्याद्वरदःप्रशांतः॥३॥ पीतांबरःपीत
वपुःकीरीटीचतुर्भुजोदेवगुरुःप्रशांतः॥ दधातिदंडंकमंडलुंचतथाक्षसूत्रंवरदोस्तुमह्यं॥४॥ श्वेतांबरःश्वेतवपुः
किरीटीचतुर्भुजोदैत्यगुरुःप्रशांतः॥ तथाक्षसूत्रंचकमंडलुंचजयंचबिभ्रद्वरदोस्तुमह्यं॥५॥ नीलद्युतिःशूलध
रःकिरीटीगृध्रस्थितस्त्रासकरोथात्तं॥ फलमवाप्नुयात॥ प्रथमंगुरवेदद्यादन्येभ्योवाप्रदापयेत्॥ गुरुरत्न
पूजाकर्त्ता॥ अथवादक्षिणांदेयात्सुवर्णंवाससीशुभे॥ सूतउवाच॥ इत्याहभगवान्ब्रह्मानारदायमहात्मने॥ त राम॰
थाहमंवुवंदानंपुष्पाकंमुनिसत्तमाः॥ इतिनवग्रहदानं॥ ॥ अथदशावतारदानं॥ विश्वामित्रःदानानामुत्तमं ॥१८०॥
दानंहेमविष्णोस्वरूपकात॥ मत्स्यःकूर्मोवराहश्चनारसिंहोथवामनः॥ रामोरामश्चकृष्णश्चबौद्धःकल्कीचतेदश॥

॥१०॥ वामेशंखंसृष्टौपीतंदेवकूर्मेलक्षणं॥ इति॥ सर्वेषामेषांलक्षणमुक्तं॥ विश्वचक्रदाने॥ यथाशक्त्यापुकु
पीतसुवर्णेनविधानतः॥ समेनषोडशैनैवसमाप्येतानिकारयेत॥ तेसुवर्णस्तुषोडशेतिमनुतैः षोडशमाषात्म
कसुवर्णेनैवेसर्थः॥ यद्वाषोडशधाविभक्तेनसुवर्णेनेति॥ विन्नानुरूपतोराजः कुर्यादाढ्यदरिद्रयोः॥ संपूज्यना
मभिस्तैस्तुपुष्पधूपनिवेदनैः॥ भक्तिनम्रःप्रणामार्घनिवेद्यस्तुपातनः॥ आहूयब्राह्मणान्राजन्पादौप्रक्षाल्य
पत्नतः॥ उपवेश्यासनेसर्वाश्चंदनेनानुलेपयेत॥ सुगंधकुसुमैश्चैववस्त्रपदीपैस्तथैवच॥ आछाद्यवस्त्रयुग्मेस्तु
यहरीचंद्रसूर्ययोः॥ अपनेविषुवेचैवद्वादश्यांतुविशेषः॥ उपोष्यैकादशीकार्यधर्मकाम्यंचसर्वशः॥ अन्यथा
नरकंयातीसवमाहपितामहः॥ याहकान्विष्णुरूपांस्तानर्चयेतविमत्सरः॥ एकैकंदेवरूपंतमेकैकस्मेसमर्पयेत॥
अथवाविदुषेसर्वान्दद्यात्संपूज्यमानवः॥ नाव्रतापकदाचिवेददद्यात्सांमंडिनतथा॥ दानमंत्रस्तु॥ देवरूपमया
विप्रकारितंकांचनंशुभं॥ तिरुहाराप्रसादेनप्रीयतांविश्वरूपधृक्॥ एतदुच्चार्यविप्रेभ्योहस्तेतोयंप्रक्षिपेत्स्वयं॥ प्र
दक्षिणाततोदेयासंपूज्यप्रविशेद्गृहं॥ अस्यदानस्यमाहात्म्यंवदाम्येकमुखःकथं॥ सहस्रास्यःशतास्योवायदिशक्तो
ऽभिभाषितुं॥ उद्देशतःप्रवक्ष्यामिभक्तानांभक्तिहेतवे॥ दशावतारदोराजन्विष्णोरैक्यंसगच्छति॥ क्षीरेक्षीरंयथा॥क्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तपयः संहरते नलः॥ तथा विस्मेः सरूपत्वं नरो याति न संशयः॥ ब्रह्महा च सुरापश्च तस्करो गुरुतल्पगः॥ यथा मुञ्जा
दिषीकां तस्तथा पापात्प्रमुच्यते॥ यः कांचनेन शुभलक्षणलक्षितांगं विष्णोः स्वरूपदशकं विधिवद्विधाय॥ द
द्याद्विजेषु जगदेव हि तेन दत्तं यस्मात्तु गन्मयवपुर्विभुरेषु देवः॥ इति दशावतारदानानि॥ ॥अथ लक्ष्मीनाराय
णदानं॥ चतुर्वर्गचिंतामणौ बौधायनः॥ लक्ष्मीनारायणं चैव सुवर्णेन प्रकल्पयेत्॥ तत्प्रतिमोक्षकामिके॥ पलेन
वा तदर्धेन तदर्धेनाथ वा पुनः॥ पद्मासनगतं कुर्याल्लक्ष्मीनाथं चतुर्भुजं॥ दक्षिणाधःकरे पद्मं शंखमूर्ध्वकरे न्यसे
त्॥ वामोर्ध्वे च भवेच्चक्रं लक्ष्मीपृष्ठे परः करः॥ वामोत्संगगता लक्ष्मीः रत्नपात्रकरा भवेत्॥ दक्षिणश्च भुजो देव्याः
पृष्ठे देवस्य च स्थिरः॥ इति॥ गरुडं राजतं कुर्याद्देवदेवस्य वाहनं॥ पक्षौ च तस्य सौवर्णौ सौवर्णी चैव नासिका॥
वस्त्रैरसंतत्सूत्रैः परिधाप्य तु कौतुकं॥ मुक्तादाम परिक्षिप्तं चंदनागरुलेपितं॥ अर्चयेत्कुसुमैर्युग्मं लक्ष्मीनारा
यणात्मकं॥ प्रसन्नं रमणीयं च गरुडोपरि संस्थितं॥ ततो विप्रं समाहूय सुशीलं लक्षणान्वितं॥ आचारवंतं धर्म
ज्ञं वेदवेदांगपारगं॥ प्रतिग्रहनिवृत्तं च श्रुतिस्मृतिपथे स्थितं॥ स्वपत्न्या समाहूय पूजयेद्वस्त्रकुंडलैः॥ कुंकुमा राम·
गरुकर्पूरैः सूपवीतांगुलीयकैः॥ सर्वोक्तेन विधिना होमं तत्र तु कारयेत्॥ मंत्रेणानेन तद्दद्यात्सर्वलोकनमस्कृतं ॥१८१॥

॥मंत्रस्तु॥ लक्ष्मीपते देवकीनंदनेश क्षीराब्धिशायन मनोवचसामगम्य॥ गोविंद दामोदर वात्तरक्षो विनाश
याशु क्षपितारिवर्गः॥ नैमित्तिकदानस्वभावे तु॥ गोविंददामोदरमेघसंघमिति स्वहोदानमंत्रे कार्यः॥ लक्ष्मी
नारायणस्यैवमर्चयित्वा दत्त्वाति भक्तितः॥ आरोग्यवान्सुखी नित्यं जायते नात्र संशयः॥ इति लक्ष्मीनारायणदानं॥ ॥
अथ घटदानं॥ ब्रह्मवैवर्ते॥ गुरुणा त्वननुज्ञातो यो वेदाध्ययनं चरेत्॥ स प्रज्ञया विहीनस्तु संसारे जायते नरः॥
॥वक्ष्यामि तत्प्रतीकारं शुद्धकांस्यमयी दृढा॥ शोभनां घटिकां छत्रां शुभरेखाविभूषितां॥ पलैस्तु कुर्यात्त्रिंशद्भिर्वि
शद्भिर्वा तदर्धतः॥ सुखरां ताम्रमतिश्लक्ष्णां पंचगव्येन धावयेत्॥ श्वेतवस्त्रेण संवीतां तंडुलोपरि विन्यसेत्॥
तंडुलानां परीमाणं द्रोणत्रितयमेव च॥ ते दधमथवा ग्रास्त्वपरिमाणं स्वशक्तितः॥ आचार्यः सर्वशास्त्रज्ञो वेदवे
दांगपारगः॥ धर्मशास्त्रे च कुशलः स्वाचारो विजितेंद्रियः॥ आहूय परया भक्त्या स्वयमेव गृहं गतः॥ तेनैव कारये
त्पूजां घटिकायाः शास्त्रनोदितैः॥ उपचारैः षोडशभिर्मंत्रेणानेन भक्तितः॥ आवाहयेत्तु वागीशां घटिकायां परमेश्व
रीं॥ एह्येहि देवि सर्वेशि घटिकायां सन्निधिं कुरु॥ सर्वसत्त्वोपकारित्वं ज्ञानमुद्रे परात्परे॥ इत्यावाहनमंत्रः॥ एवमा
वाह्य तां घटीं ब्राह्मणांश्चापि पूजयेत्॥ ब्रह्मज्ञानमंत्रेण घटीं संस्थाप्य तां वरां॥ मंत्राध्यायोक्तमार्गेण प्रतिष्ठाप्याथ भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰ प्र॰ क्षितः॥ होमंकुर्यात्प्रयत्नेनसमिदाज्यतिलैरपि॥ नैवेद्यंपायसंदद्याद्देवैचच्छल्लोणतथा॥ सरस्वतिप्रेदमेवमंत्रःस
र्वत्रसंमतः॥ मंत्रोयंवाजसनेयिप्रसिद्धः॥ गुरोरवज्ञयाचैवस्वाध्यायाध्ययनंकृतं॥ सरस्वतिजगन्मातर्गंगास्य
॥१८२॥ पहारिणि॥ साक्षाद्ब्रह्मकलत्रंत्वंविष्णुरुद्रादिभिःस्तुता॥ तन्ममाध्ययनंकृतंसाक्षाद्रूपाणिलोकपावनि॥ ए
वंदानंचदत्वाचततमाचार्यंक्षमापयेच्च॥ अन्येभ्यःशक्तितोदद्याद्ब्राह्मणेभ्यश्चभोजनं॥ ततःस्वबंधुभिःसार्धंस्नात्वा
भुंजीतमानवः॥ एवंयःकुरुतेदानंप्रज्ञाहीनोजडोथवा॥ मूर्खोवानजडोजंतुर्जायतेवाक्पतिर्यथा॥ जायतेवाकृ
प्रवाहश्चसाक्षाद्गंगाप्रवाहवत्॥ इतिघटदानं॥ ॥ अथसरस्वतीदानं॥ वायुपुराणे॥ वाङ्निरोधंगुरोःकृत्वाभवे
फफद्वाङ्वरः॥ तस्यवक्ष्येप्रतीकारंदानेनमकृत्त्रिभाषितं॥ पलेनाप्यथतदर्धेनतदर्धेनाथवापुनः॥ सरस्वतीं
तुप्रतिमांकुर्याद्भुजचतुष्टयं॥ वरदंचाक्षसूत्रंचबिभ्रतींदक्षिणेकरे॥ पुस्तकंचानघंवामेदधानांहंसवाहनां
॥ अभिशुभ्रांगौरीणाकंठःस्वर्णेनवाभवेत्॥ आसनंचप्रकुर्वीततस्योवर्णोपमंमुत्तमं॥ तस्योपरिचसंवेश्यदेवीं
वागीश्वरींपरां॥ मुक्तादामभूषितांचशुक्लांबरेणसंवृतां॥ वागीश्वरेणमंत्रेणपूजयेत्पीततंडुलैः॥ श्वेतपुष्पैः राम॰
श्वेतगंधैःसंस्तूयविधिपूर्वकं॥ वागीश्वरमंत्रःपावकानःसरस्वतीत्यादिः॥ ब्राह्मणाःसर्वशास्त्रज्ञाःकुशलाःसर्वस ॥१८२॥

मतः॥ मंत्रवादप्रवीणाश्चतेनहोमंचकारयेत्॥ पायसंजुहुयात्साज्यंघृतंशाल्लिमयंतथा॥ जुहुयात्समिधश्चापितथा
ज्यंतथाज्यंचतिलानपि॥ सरस्वतिप्रेदमवचेतिवामंत्रइष्यते॥ कृतेब्रह्मोदासनेतामाचार्यायनिवेदयेत्॥ मंत्रेणा
नेनविधिवत्प्राङ्मुखायप्युदङ्मुखः॥ संपूज्यब्राह्मणांसम्यग्वस्त्रालंकारभूषणैः॥ यावच्चंद्रब्रह्मरोदेवीपासावागी
श्वरीयरां॥ ब्रह्मविष्णुशिवेश्वाद्यैःपूजितासर्ववंदिता॥ तुष्टाभवतुदानेनदत्तेनानेनवाक्परा॥ वाग्विरोधंगुरोःकृ
त्वापन्मेगफदभाषणं॥ तत्सर्वंक्षपयक्षिप्रंब्राह्मीत्वंलोकपावनी॥ इतिदानमंत्रः॥ अनुज्ञाप्यब्राह्मणांतंस्वयंभुंजीत
मानवः॥ इतिसरस्वतीदानं॥ ॥ अथकुबेरमूर्तिदानं॥ हेमाद्रौवायुपुराणे॥ दरिद्रोजायतेमर्त्योदिनविभ्रमकरोतियः
॥ ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे॥ पलार्धेनतदर्धेनतदर्धेनातदर्धेनाथवापुनः॥ धनदस्यप्रतिकृतिंकुर्या
त्स्वर्णमयींशुभाम्॥ द्विभुजांवाहनोपेतांनयनानंदकारिणीं॥ श्रीपर्वनेत्र॥ ह्रस्वमापिंगनेत्रंचगदिनंपीतविग्रहं॥ पुष्प
कस्थंधनाध्यक्षंध्यायेच्छिवसखंसदेशुक्लं॥ स्वर्णवर्णांकुंतपाणिमश्ववाहंनिधीश्वरं॥ विचित्रणपाःप्रियप्रद्देवंकुबेरंत
महंभजे॥ इतिलक्षणालक्षितांकुर्यात्॥ पद्मशंखनिधिभ्यांचयुक्तांतांपार्श्वयोर्द्वयोः॥ श्वेतवस्त्रेणसंवेष्ट्यतंडुलोपरिवि
न्यसेत्॥ तंडुलानांपरीमाणंभवेद्द्रोणचतुष्टयं॥ तदर्धंवातदर्धंवातदर्धंवाविचक्षणाःस्थापनेकारयेत्॥ श्वेतमाल्यैःश्वेतगंधैरनुलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ प्यप्रयुंज्येत॥ आग्नेय्यां दिशि होमश्च समिद्भिस्तिलैर्भवेत्॥ मंत्रो राजाधिराजायेत्येषां योज्यः स्वलिंगकः॥ व्याहृत्या
तिलहोमश्च कर्तव्यो धनकांक्षिभिः॥ आचार्यः सर्वशास्त्रज्ञो विनीतः सर्वसंमतः॥ महाकुलप्रसूतश्च धर्मज्ञः
॥१८३॥ सत्यवाक् शुचिः॥ कारयेदर्चनं तेन धनदस्याति भक्तितः॥ तदेवं स्थापनमंत्रेण सचकामिश्चरो भवेत्॥ तस्मै होमं कृत
वते प्रदद्यात्सति मातुलं॥ मंत्रेणानेन विधिवत्प्राङ्मुखायोदङ्मुखः॥ दानमंत्रस्तु॥ उत्तराशाधिपते देव कुबेर नर
वाहन॥ पद्मशंखनिधीनां त्वं पति॥ श्रीकंठवल्लभः॥ अदानेन यथा प्राप्तं दारिद्र्यं मम दुःखदं॥ तत्सर्वमात्मदानेन
पापमाशु विनाशय॥ इति श्रीकंठवल्लभः॥ अदानेन यथा प्राप्तं दारिद्र्यं मम दुःखदं॥ तत्सर्वमात्मदानेन पापमाशु विना
शय॥ इति॥ एतत्कुबेरदानं यः करोति विधिपूर्वकं॥ धनदेन समो मर्त्यो धनैर्वाप्युप्रजायते॥ इति दारिद्र्यहरकुबेरदानं॥
॥ अथात्मप्रकृतिदानं॥ भविष्योत्तरे कृष्णः॥ आत्मप्रतिकृतिर्नाम यच्चोक्तं केशव चिप्र॥ तदहं संप्रवक्ष्यामि दा
नं मानविवर्द्धनं॥ दानकालैः सदात्मस्य मुनिभिः परिकीर्तितः॥ पुराणैः पुरा पार्थ प्राप्ते जीविते मले॥ हेमीं प्रति राम॰
कृतिं भक्त्या कारयित्वात्मनो नृप॥ अभीष्टवाहनगतां मिष्टालंकारसंयुतां॥ अभीष्टलोकसहितां सर्वोपस्करसंयुतां॥ ॥१८३॥
नेत्रपट्टपटीवपीवस्त्रेणाच्छादितां स्रग्विभूषितां॥ कुंकुमेनानुलिप्तांगीं कर्पूरागरुवासितां॥ स्वीये दद्यात्तिशायने स्थापितां

कारयेत्स्वयं॥ यद्यदिष्टतमं किंचित्तत्सर्वं पार्श्वतो न्यसेत्॥ उपकारकं स्त्रीणां पुरुषाणां च यद्भवेत्॥ तत्सर्वं स्थापयेत्सा
र्द्धं स्वयं संचिंत्य चेतसि॥ एतत्सर्वमल्पपितास्थेस्थाने नियोजयेत्॥ ततः शुक्लांबरस्नातो महितः कुसुमांजलिः॥ इ
ममुच्चारयेन्मंत्रं विविप्रस्य पुरतः स्थितः॥ स यथा॥ आत्मनः प्रतिमा चेयं सर्वोपस्कररोर्द्भुता॥ सर्वरत्नमयी कांत
भ्यं विप्र निवेदिता॥ आत्मज्ञो भुः शिवः सोतिः शब्दः शिवगौरीयुतं॥ तस्मादात्मप्रदानेन मम भवात्मा प्रसीदतु॥ इत्युच्चार्य
ततो दद्याद्ब्राह्मणाय युधिष्ठिर॥ ब्राह्मणस्त्वथ गृह्णीयात्कोऽदादिति च कीर्तयन्॥ कर्त्री प्रदक्षिणीकृत्य प्रणिपत्य वि
सर्जयेत्॥ विधिनानेन राजेंद्र दानमेतत्प्रयच्छति॥ यः पुमानथवा नारी शृणु यत्फलमाप्नुयात्॥ सायं वर्षशतं जी
वेत्सर्वभोगसमन्वितः॥ यत्रैवासौ घृतं जंतुः प्राप्य कर्मक्षयक्षमां॥ तत्रैव सर्वकामानां फलभाक्त भवेन्नृप॥ इष्टवं
धुजनैः सार्द्धं न वियोगं करोति न॥ प्राप्नोति पुरुषो राजन् स्वर्गे यानं तमभ्यु ते॥ यस्त्वात्मनः प्रतिकृतिं वरवाहनस्थां हे
मीं विधाय धनधान्यसमाकुलां च॥ सोपस्करां द्विजवराय ददाति भक्त्या चंद्रार्कवद्दिवि विभाति स राजहंसः॥ इत्यात्म
प्रकृतिदानं॥ ॥अथ चतुर्मूर्तिदानं॥ हेमाद्रौ ब्रह्मांडे॥ ब्रह्मोवाच॥ शृणु नारद भद्रं ते दानं सर्वाघनाशनं॥ चतुर्मू
- - - - - र्तीनां मंगलकारणां॥ धर्ममारोग्यमायुष्यं भुक्तिमुक्तिफलप्रदं॥ पुत्रदं श्रीकरं शापमभीष्टफलदं शुभं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ सर्वेषु पुण्यकालेषु चंद्रसूर्यग्रहादिषु ॥ देवागारादिदेशेषु गृहे वा दानमाचरेत ॥ चतुरस्रां समां भूमिं लिप्त्वा गोमय
॥१८४॥ वारिणा ॥ चतस्रस्तत्र लेखाः स्युः ॥ प्राच्योदीच्याश्चताः समाः ॥ नवकोष्ठानि तत्र स्युः कोणकोष्ठानि वर्जयेत ॥ तत्र
तेषु चतुर्मूर्तीश्चतुर्दिक्षु निवेशयेत ॥ प्राग्याद्युत्तरपर्यंतं जातरूपमयीः शुभाः ॥ श्वेततंदुलपद्मेषु पुष्पवत्सु नि
वेशयेत ॥ तत्र तेषु चतुर्मूर्तीश्चतुर्दिक्षु निवेशयेत ॥ प्राग्याद्युत्तरपर्यंतं जातरूपमयीः शुभाः ॥ श्वेततंदुलपद्मे
षु पुष्पवत्सु निवेशयेत ॥ पुरुषो वासुदेवं च संकर्षणमतः परं ॥ प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तीर्यथाक्रमं ॥१॥ शंख
चक्रगदापाणिं पीतवाससमच्युतं ॥ श्रीवत्सांकं चतुर्बाहुं केसरं मुकुटोज्वलं ॥२॥ नीलांबरधरं देवमनंतं मुसलायु
धं ॥ संकर्षणं चतुर्बाहुं करकादिविभूषितं ॥३॥ प्रद्युम्नश्चानिरुद्धश्च शंखचक्रगदाधरौ ॥ पीतश्वेतांबरधरं देव
मनंतं मुसलायुधं ॥ संकर्षणं चतुर्बाहुं करकादिविभूषितं ॥३॥ प्रद्युम्नश्चानिरुद्धश्च शंखचक्रगदाधरौ ॥ पीत
श्वेतांबरधरौ केयूरादिविभूषितौ ॥४॥ एवं कृत्वा चतुर्मूर्तीश्चतुर्बाहुं समर्चयेत ॥ पलस्यार्द्धात्सुवर्णेन यथाश राम॰
क्ति विनिर्मितं ॥ प्राग्याद्युत्तरपर्यंतं देवानामर्चनक्रमः ॥ स्वस्वमंत्रेण देवानामाराधनमनुक्रमात ॥ स्नानं वासो नु गंधा ॥१८४॥
र्घ्यं पाद्यमाचमनीयकं ॥ गंधं सुमनसो धूपं दीपं नैवेद्यमेव च ॥ धान्यत्रयं पृथुकं तले स्तांबूलं विनिवेदयेत ॥ परितो लो

कपालांश्च गंधादिभिरथार्चयेत ॥ त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ उद्गास्य विधानाराध्य रत्नान्मंत्रमुदी
रयेत ॥ नमोस्तु वासुदेवाय जगतीपतये नमः ॥ तव संकीर्तनाद्दानाच्छ्रेयः स्यात्तु सदा मम ॥ संकर्षण नमस्तेस्तु ज
गत्स्थितिसंतकर्मणे ॥ तव देव प्रदानेन सर्वपापक्षयो भवेत ॥ प्रद्युम्नायाखिलेशाय भक्तानां दुःखहारिणे ॥ स
दा नमोस्तु जगतः स्थितिकर्त्रे नमो नमः ॥ तव मूर्तिप्रदानेन मम पापं व्यपोहतु ॥ अनिरुद्धाय देवाय विश्वे परमा
त्मने ॥ त्वं हि वेद नामस्त्वं सर्वपापं प्रणाशयतु ॥ इति दानमंत्राः ॥ एवं दद्याच्चतुर्मूर्तीः श्रद्धायुक्तस्तु नारद ॥ नारी वा
पुरुषो वाथ यथोक्तं फलमश्नुते ॥ इत्याह नारदायैवं ब्रह्मा लोकपितामहः ॥ यथा मम पिता तत्सर्वं मम तुभ्यं मुनिसत्तमः
॥ इति चतुर्मूर्तिदानं ॥ ॥ अथ पंचमूर्तिदानं ॥ ब्रह्मांडे ॥ शृणु देवर्षे दानं तु सर्वपापप्रणाशनं ॥ दानमारोग्यमा
युष्यं श्रीकरं भुक्तिमुक्तिदं ॥ चंद्रसूर्यग्रहे वाथ विषुवत्ययनादिषु ॥ पुण्यकालेषु सर्वेषु गृहे तीर्थे यथाचरेत ॥ आ
चार्यं वरयेद्विप्रं तस्यानुज्ञामवाप्य च ॥ विधायाविनयं संयंत्र सर्वं तेनैव कारयेत ॥ लेपयेत्तु ततो भूमिं गोमयेनोदकेन च ॥ च
तस्रस्तत्र रेखास्युः प्राच्योदीच्यस्तताः समाः ॥ चिह्नितमात्रास्तास्सर्वास्तत्र स्युर्नवकोष्ठकाः ॥ तत्रैव पंचैव संख्यास्ताश्चतु
ष्कोणान्विवर्जयेत ॥ तेषु पंचसु कोष्ठेषु प्रत्येकं कमलं लिखेत ॥ श्वेततंदुलपुंजेन लक्षणत्रसकर्णिकं ॥ तेषु तंदुल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मेषु पंचमूर्त्तीर्निवेदयेत् ॥ ईशानं सौवर्णमासीनं केसरस्थं कुंदोज्वलं ॥ चतुर्बाहुमुदारांगं कस्तूर्यादिविभूषितं ॥ द
क्षिणोपरमुद्दहस्तं सव्येतु मृगपोतकं ॥ अभयं दक्षिणे सव्ये भस्मलेनेन त्र्यंबकं सेत् ॥ सद्योजातं वामदेवमघोरं तत्पुरुषं
तथा ॥ सुवर्णेनैव कुर्वीत प्रधानार्द्धमानतः ॥ सद्यं पश्चात्कुर्यान्त्रवामदेवं तथा दक्षिणे चाप्यघोरं पुरुषं तथा ॥ पु
सचसद्योजातं ॥ तच्छ्रेष्ठं पुरुषं एवं कोष्टे तेषां मध्ये चैव मीशानमेव ॥ स्नानं चार्घ्यपाद्यमाचमनीयं गंधपुष्प
धूपदीपो हविष्यं ॥ अभ्यर्चिताः पंचमूर्त्तीः क्रमेणामंत्रैः पंचभिर्ब्रह्मभिर्नामपर्वं ॥ पंचब्रह्मभिः सद्योजातादिभिस्ता
दि पंचवेदमंत्रैः ॥ संपूज्य चैवं विधिनोदितेन सद्यादिदेवांश्च तथा क्रमेण ॥ सद्योजातादिलक्षणं लिंगपुराणोक्तं ति
लपर्वतदाने हेमाद्रौ द्रष्टव्यं ॥ तेन च विप्रेण च सर्वमेव तत्काले वदानं स्वयमेव कुर्यात् ॥ दानकाले तु संप्राप्ते नारी वा पु
रुषोथवा ॥ स्नातः पित्तो गुरुणा तेन मंत्रपूतैः कुशोदकैः ॥ अभ्यर्च्य विप्रं गंधाद्यैर्मंत्रानेतानुदीरयेत् ॥ प्रत्येकमेकादशवा
रुद्रमूर्त्तिरनुक्रमात् ॥ नमोस्तु सद्योजाताय भवाय भवमंगिने ॥ मय भंगो भवेन्मस्य तवरूपप्रदानतः ॥१॥ सोमाय वाम
देवाय शिवाय शिवरूपिणे ॥ सदा मे शिवतास्तु तवरूपप्रदानतः ॥२॥ नमो घोराय घोराय जगत्संहृतिकर्मणा ॥ घोरां
त्वं प्रपन्नोहमघोरं कं मम शंकुरु ॥३॥ पुरुषाय पुराणाय शाश्वताय वरदाय च ॥ तव रूपप्रदानेन श्रेयसे स्तान्नमोस्तु ते ॥४॥

ईशानो जगतश्चेशो मीशस्त्वानामेभयंकरः ॥ रक्षस्व शेषमर्त्यानामीशोमां शरणागतं ॥५॥ त्रिः प्रदक्षिणमादाय पुष्पसहितं तु कुसुमां
जलिः ॥ प्रणिपत्य ततो दद्यादेभिर्मंत्रैर्यथाक्रमं ॥ मध्यमं गुरवे दद्यादन्यांश्चैव प्रदापयेत् ॥ दक्षिणां गुरवे दद्यात्तु वस्त्रां
चैव वाससी ॥ एतत्व्रतेयं वा नारी नारदेह समाचरेत् ॥ पुत्रं ते सर्वपापेभ्यः शिवसायुज्यमाप्नुयात् ॥ सूत उवाच ॥ इत्येवम
षयोदानं नारदाय चतुर्मुखः ॥ यथोवाच तथा प्रोक्तं मयावै पंचमूर्त्तिकं ॥ इति शिवपंचकमूर्त्तिदानं ॥ ॥ अथ द्वादशा
दित्यदानं ॥ ब्राह्मे ॥ शृणु नारद मंद्रं ते दानमादित्यसंस्थितं ॥ यथोक्तं लोककर्त्रा रुणा विष्णुना प्रभविष्णुना ॥ कर्तुः पापा
हरं पापमायुष्यं श्रीकरं शुभं ॥ आरोग्यं सर्वमंगल्यं दुःखप्रणाशनं नाशनं ॥ सर्वशांतिकरं सौख्ये तत्सर्वसिद्धिफलप्र
दं ॥ चक्षुष्यं दिव्यं सर्वरोगघ्नं भुक्तिमुक्तिफलप्रदं ॥ विषुवत्ययने राहुग्रहणे चंद्रसूर्ययोः ॥ जन्मर्क्षे सोमवारे पंचवदे
श्यर्कसंक्रमे ॥ सप्तम्यां वाथ नक्षत्रे सावित्रे अद्भुतदर्शने ॥ दुःस्वप्नदर्शने कुर्याद्दानमादित्यसंस्थितं ॥ देवालये नदीतीरे
तडागे वरुणालये ॥ अन्येषु पुण्यदेशेषु देवदानं समाचरेत् ॥ आलिप्य चैव द्वादशहस्ते देशे गस्थितं तथा गोमय
संयुताभिः ॥ तस्मिन्स्थिते तंदुलपुंजके च विस्तारयेद्द्वादश पंकजानि ॥ प्रादेशमात्राणि शुभानि तानि सकर्णिकाणि अ
ष्टदलेषु तेषु ॥ स्थिरापरूपाणि रवेर्विधाय यथाक्रमात्तन्त्रतो यवर्णाः ॥ प्रत्यङ्मुखान्याग्मुख एव देवान् दक्षिणांग यदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 भिरर्चयित्वा॥द्वादशपंसच्चंतंगुडार्घ्यं वस्त्रैरथा वेष्ट्य यथाक्रमेण॥प्रत्येकमेकं द्विजपुंगवानामाराध्यगंधादिभि
 रादरेण॥ संप्रीयतामित्यथ चक्रमेण प्रत्येकमुच्चार्य तदीयनाम॥धाता च मित्रश्च ततः क्रमेणामार्त्तंड नामा च
तथार्यमा च॥शक्रश्च देवो वरुणस्तथा सो भगो विवस्वाश्च वमत्तपेषां॥आदित्यनामा सविता तथान्यस्त्वष्टात
थैकादशाकमश्चते षां॥विष्णुस्तथा द्वादशमः स्वयं त्वेताराधये द्द्ववरान्द्विजांश्च॥पुरा देववरर्षेर्दानं प्रोक्तं कम
लयोनिना॥तथाभयापि भूष्माकं प्रोक्तं मुनिवरोत्तमाः॥द्वादशादित्यप्रतिमालक्षणांत्र लोडदानेउक्तं॥इति द्वादशा
दित्यदानं॥ ॥अथ चंद्रादित्यदानं॥विष्णुधर्मोत्तरे॥श्रीभगवानुवाच॥अतः परं प्रवक्ष्यामि दानराजं नराधिप॥यद
त्वानुवलीराजा शक्राडपमवाप्नुहि॥त्राकेश्च वलिरामं तु कत्वा पुनरवापह॥चंद्रसूर्योपरागे च अयने विषुवे तथा॥
चंद्रक्षये च षडशीत्यां वे ज्ञाश्च्यांउत्तरजन्मनि॥कार्त्तिक्यां च महामाघ्यां सप्तम्यां च तथा॥चंद्रादित्यौ तु दातव्यौ सूर्यः
सौवर्ण उच्यते॥शुद्धस्य राजतस्यैव मंडलं हि मरीचिषः॥द्वादशांगुलमंतं तु उभयोरपि मंडलं॥हस्तमात्र प्रमाणस्य समाका
रो मध्य चैव तु कर्णिका॥भानुं ताम्रमये पात्रे घृतपूर्णे तु निक्षिपेत्॥सोमं रौप्ये विक्षीरपूर्णे उपरि स्थापयेद्बुधः॥सूर्यं
तु रक्तकुसुमैः सोमं शुक्लैस्तथैव च॥आदित्याय प्रदीपं च धूपं चैव प्रदापयेत्॥सोमाय गुग्गुलं दद्यात् गंधः शुक्लस्तथैव च

कुंकुमं तु प्रदत्तं यत्प्रदीपं चैव घृतेन तु॥एवं संपूजयित्वा च चंद्रादित्यौ पृथक्कृतौ॥अमृतमूर्त्तये सोम नमोस्तेनैव पूजयेत्
॥खखोल्काय इति वै सूर्यं नमोस्तेन पुनः पुनः॥आहूय ब्राह्मणांश्च भक्त्या वेदवेदांगपारगं॥कुटुंबिनं दरिद्रं च आहिताग्नि
तथैव च॥रक्तेन वाससा च्छाद्य कुंकुमेनानुलेपयेत्॥संपूज्य पुष्पधूपैश्च द्विजं सूर्यमिवापरं॥रविबिंबं चंद्रबिंबं घृ
तस्थं तु निरीक्षयेत्॥समर्पयेद्ब्राह्मणाय मंत्रेणानेन भूमिप॥हस्तं च पुरुषांश्चैव परोक्ष्य करमेव च॥त्रयोविद्या च
सांगं तु यस्यांगं विश्वरूपिणः॥स वै दिवाकरो देवः प्रीयतां विप्र मा चिरं॥एवमुच्चार्य भानुं तु ब्राह्मणाय निवेदयेत्॥क्षी
रेंदुं देवदेवं तु द्विजराजं तथैव च॥अमृतमन्निशीतांशु प्रयच्छामि द्विजोत्तम॥ताय अपाचैव सूर्यस्य अर्द्धांशो जायते विभोः
॥सोमं तत्र स्वसमं दीप्ति पूजयोस्य स्वेतसा॥एवं चंद्ररवी दत्वा बलीराज्यमवापह॥सर्वं तेन तु दत्तं स्यात्सद्वीपां भास्क
रैः॥पूज्यते सिद्धगंधर्वैः स्वर्गलोके महीयते॥इति चंद्रादित्यदानं॥ ॥अथ कालपुरुषदानं॥भविष्योत्तरे॥श्रीकृष्ण
उवाच॥दानानि बहुरूपाणि कथितानि मया तव॥पुनरेव प्रवक्ष्यामि यच्च त्तितव कौतुकं॥महातीर्थेन सिध्यंति प्रय
च्छंति महत्फलं॥काम्यो दानं विधिरुत्तमः॥मध्यमस्तत्तदर्द्धेन ततर्द्धः पार्थ क्रियमाणो यथातथं॥फलाय मुनिभिः प्रोक्तो
विपरीतो भयावहः॥त्रैयं निष्कशतं पार्थ दानविधिरुत्तमः॥मध्यमस्तत्तदर्द्धेन तदर्द्धेनावरः स्मृतः॥एवं रक्षेरथं दद्याच्चधेनोः क्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मालिनस्पृच॥अत्रान्नेप्यपिह्रूतोयंपंचसौवर्णिकोविधिः॥अतोल्पमल्पेनयोदद्यान्महादानंनराधिप॥प्रतिगृह्णन्नपातिवान
स्पृष्टःस्वशोकभयावहं॥पुराणपदिनमथासाघमामिमागेसथोऽशुभे॥चतुर्दश्यांचतुर्थ्यांवाविष्ट्यांवापांडुनंदन॥विशिष्टिभेपुक
 रणां॥पुमान्कृष्णतिलैःकार्यस्तोपदंतःसुवर्णदृक्॥खड्गोद्यतकरोदीर्घोजपाकुसुमकुंडलः॥रक्तांबरधरःस्रग्वीशंखमाला
विभूषितः॥तीक्ष्णासिपत्रीबंधनविस्फारितकरोतरः॥असिपत्रीछुरिका॥उपानद्युगयुक्तांघ्रिःकृष्णकंबलपार्श्वकः॥गृ
हीतमांसपिंडश्चवामकरतलेतथा॥एवंविधनरंकृत्वागृहीतकुसुमांजलिः॥यजमानःप्रसन्नात्माइमंमंत्रमुदीरयेत॥सं
पूज्यागंकुसुमैर्नैवेद्यैर्विनिवेद्यच॥ॐसर्वंकलसेयस्मात्कालस्त्वंतेनचोच्यसे॥ब्रह्मविष्णुशिवादीनांत्वमेसाध्योसिसुव्र
त॥पूजितस्त्वंमयाभक्त्याप्रार्थितश्चतथासुखं॥यच्छुभंतेनतवविभोतस्तुभ्यंनमोनमः॥इति॥एवंसंपूज्यपित्वातत्रब्रा
णायनिवेदयेत॥ब्राह्मणंप्रथमंपूज्यवासोभिर्भूषणैस्तथा॥दक्षिणांभक्तितोदद्यात्प्राणिपत्यविसर्जयेत॥दक्षिणात्रपूर्वो
क्तानिष्कत्रयादिका॥अनेनविधिनायस्तुदानमेतत्प्रयच्छति॥नापमृत्युभयंतस्यनचव्याधिकृतंभवेत॥भवत्यव्याहतैश्वर्यं
कृतेनरोनूनंचिरंजीवेन्नसंशयः॥ ॥इतिकालचक्रदानं॥ ॥अथयमदानं॥हेमाद्रौमत्स्युंजये॥लोहपात्रेस्थितंकांस्य
तत्रपयस्यश्चर्यःसर्ववाधाविवर्जितः॥देहांतेसूर्यभवनंभित्वायातिपरंपदं॥पुराणश्रयादिहाभ्येत्यराजाभवतिधार्मिकः॥स

त्रयाज्ञीक्रियायुक्तःपुत्रपौत्रसमन्वितः॥संपूज्यकालपुरुषंविधिवद्द्विजायदत्वाशुभाशुभफलोपहेहेतुभूतं॥रोगातुरेस
कलदोषमयेत्रदेहेदेहीनमोहमुपगच्छतितत्प्रभावात्॥इतिकालपुरुषदानं॥ ॥अथकालचक्रदानं॥मत्स्युंजये॥
चक्रंकृत्प्यमयंकृत्वामुक्तारश्मिमयात्मिकं॥कृत्वामूर्ध्निशरच्चंद्ररश्मिमध्यगतस्थितं॥तमोशानेकरूपाणिगात्रेपंच
मंततः॥एवंध्यानवतस्तस्यसचंद्रःकृष्णतांव्रजेत॥ततोप्यनंतरंयश्वात्स्थित्वाविप्रःप्रदक्षिणं॥तंगृहीत्वाव्रजेद्दूरम
दृष्टत्वमपिव्रजेत॥स्वयंचामृतसंघातपर्णाकायइतिस्थितः॥कालचक्रमिदंनाम्नादानंमृत्युविनाशनं॥इमंतेराजतेचं
द्ररश्मिजालसमाकुलं॥अपमृत्युविनाशायददामीतिसमुच्चरेत॥सुवर्णदक्षिणायुक्तंब्राह्मणायनिवेदयेत॥
खंकृतेविनश्यतत्वपमृत्युर्नसंशयः॥तस्मादत्तत्समाददेयमपमृत्युभयार्दितैः॥ज्वरादिरोगग्रस्तैश्चमहापसतितै
रपि॥ततोग्रत्वाग्नौविधिनास्थापयेज्जातवेदसं॥जुहुयात्कालनाम्नातुशतमष्टोत्तरंतिलैः॥ततस्तन्नोभयेदुक्त्वाविप्रा
न्वादशसंख्यकान॥स्वयमक्षारलवणांभुंजीतसहदेवहि॥एवंकृतेनरोनूनंचिरंजीवेन्नसंशयः॥ ॥इतिकालचक्रदानं
॥ ॥अथयमदानं॥हेमाद्रौमत्स्युंजये॥लोहपात्रेस्थितंकांस्यतत्रपयप्रतुराजतं॥तस्मिन्कालेश्वरःस्वर्णात्तुरूपाका
रतांगतः॥यमरूपमुत्तंत्रेस्मांउदाने॥महामहिषेमारूढोदंडहस्तोमहाबलइत्यादि॥वस्त्रालंकारसंयुक्तोभयदास्त्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ सर्वतः॥ त्रिलोहाकारपुरुषैः कालइतैश्च पाश्वतः॥ भयदास्त्राणि॥ खड्गछुरिकादीनि॥ त्रिलोहं कांस्यताम्रपित्तलाख्यं॥
कालइताः पुरुषाकृतयो दंडहस्ताः स्वयं कार्याः॥ कृत्वा महिषपृष्ठे तं प्रदद्याद्ब्राह्मणाय मं॥ अष्टसंख्यां च चतुर्द्विरूपां कारोनुविधि
॥१८८॥ नातुयः॥ समुच्यते भुवनात्रा द्वाघृततघरोत्तरं॥ घृतघट उत्तरो दक्षिणास्थाने यस्येति दानविवेके॥ अग्नेमुवर्णाद्
क्षिणोसाहः॥ इतियमदानं॥ ॥ अथपापपुरुषदानं॥ स्कांदेनागरखंडे॥ आनर्त उवाच॥ मर्त्यलोके प्रमादाल्लोकामा
द्वालस्यतोपिवा॥ योनरः कुरुते पापं प्रायश्चित्तं करोति न॥ तस्य पापविशुध्यर्थं किंचिन्मे वद सत्तमं॥ येन मुक्तिर्भवेत्पापाद्
दितुष्टोसिमेप्रभो॥ भर्तृयज्ञ उवाच॥ अज्ञानाज्ञानतो वापि यत्पापं कुरुते नरः॥ पापंपुरुषदानेन मुच्यते नात्र संशयः॥
आनर्त उवाच॥ विधिना केन देवो सौ पापपिंडो महामुने॥ ततो विस्तरतो ब्रूहि येन यश्चाम्यहं द्रुतं॥ भर्तृयज्ञः॥ मन्वादि
द्विदिवसे प्राप्ते यदा सूर्यदिनं भवेत्॥ तदा स्वमूर्त्तिः कर्त्तव्या हेमी विप्राय तुष्टये॥ तुलापुरुषवत्कार्यः कुंडमंडपयोर्वि
धिः॥ परं होमः प्रकर्त्तव्यो गायत्र्या केवलेन च॥ संस्थाप्य पंचगव्येन ततस्तां तामभिपूजयेत्॥ संस्थाप्य प्रतिमामितिशेषः॥ पंच राम॰
विंशतिसंख्याभिः श्वेतपुष्पैर्नराधिप॥ ॐ पृथिव्यै नमः॥ जलाय नमः॥ तेजसे नमः॥ वायवे॥ आकाशाय॰ श्रोत्राय॰ त्व १८८॥
चे॥ चक्षुषे॰ जिह्वायै॥ घ्राणाय॰ शब्दाय॰ स्पर्शाय न॰ रूपाय न रसाय॰ गंधाय॰ वाचे॰ पाणिभ्यां॰ पायवे नः॰ उपस्थाय॰

मनसे॰ बुध्यै॥ अहंकाराय॥ आत्मने॥ परमात्मने नमइति॥ २५॥ एवं संपूज्य राजेंद्र कर्पूरं दीपमाहरेत्॥ ध्सरीस्यथमं
त्रेणास्यग्निर्ज्योतीतिदीपकं॥ दद्याद्युवासुवासेति वासांसि परिधापयेत्॥ ततो ब्राह्मणमासनेपि वेदवेदांगपारगं॥ प्रक्षा
ल्पचरणौ तेसवस्त्राणि परिधापयेत्॥ केयूरकटकैश्चैव गरत्वंगुलीयकभूषणैः॥ भूषयित्वा ततनुतस्पततो मूर्त्तिसमान
यत्॥ मंत्रेणानेन राजेंद्र ततस्तस्मै निवेदयेत्॥ मंत्रस्तु॥ एष आत्मा मया दत्तस्त्वं हेममयो द्विज॥ यत्किंचिद्विहितं पूर्वं
पापं मे नाशयाखिलं॥ ततस्तु ब्राह्मणो मंत्रमिमं राजन्समुच्चरेत्॥ यदेतद्विहितं पापं त्वया सर्वं मया हितं ते॥ ग्रहीतं सर्वं त्वं ते
जायास्त्वं पापवर्जितः॥ इति प्रतिग्रहमंत्रः॥ एवं दत्वा विधानेन ततो विप्रं विसर्जयेत्॥ एवं कृत्वा ततस्तस्य दत्वा यद्दक्षिणां त
था॥ यथातुष्टिं समभ्येति ततः पापान्न पत्यसौ॥ एवं कृते महाराज प्रत्यक्षलक्षणं भवेत्॥ शरीरे लघुतामेति ततो वह्निश्च
जायते॥ स्वप्ने च वीक्षते रात्रौ संतुष्टमनसः स्थिताः॥ स्त्रियः सितैर्वा वस्त्रैश्च श्वेतमाल्यानुलेपनैः॥ श्वेता गोश्च दद्यान
द्वा तीर्थानि विधानि च॥ एतत्ते सर्वमाख्यातं पापपिंडस्य दायकं॥ श्रवणादपि राजेंद्र यः सर्वपापैः प्रमुच्यते॥ अमत्रापि
महादानं पापपिंडो हरेश्वरः॥ एकजन्मकृतं पापं निजकायेन निर्मितं॥ शिवालये ततदेवाग्मसहस्त्रगुणितं हरेत्॥ इति पापपु
रुषदानं॥ ॥ अथोदकुंभदानम्॥ शौनकीये॥ मार्कंडेयं प्रति नारद उवाच॥ मार्कंडेय शृणुष्वेदं ब्रह्मलविस्मोः पुराऽनघ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰ प्र॰ यदाह भगवांच्छंभुर्द्वेयाः पृष्टस्तयोक्तथा॥ श्रूयतामुदकुंभाख्यं दानं वक्ष्यामि सुव्रते॥ यत्कृत्वा पुरुषः स्त्री वा न याति नरकं क्व-
चित्॥ स्वर्ग्यं यशस्यमायुष्यमारोग्यं पापनाशनं॥ मम प्रीतिकरं पुण्यं पवद्योश्च(?) प्रियं तथा॥ वैशाख्यां पौर्णमास्यां च का-
॥१८९॥ र्त्तिक्यामथ तद्दिने॥ स्वजन्मदिवसे कार्यं दुःस्वप्नाद्भुतदर्शने॥ भ्रमे रोगे भयत्रिमायामुदकुंभं न्यसेद्बुधः॥ पुष्पैः फलैश्च सं-
वेष्ट्य वस्त्रेणासिततत्पिधां॥ विधानेन तिलैर्मिश्रं गुडं प्रक्षिप्य तत्र वै॥ धर्मराजं न्यसेद्देवं सौवर्णं शक्तितः कृतं॥ चतुर्भुजं वा द्वि-
भुजं देवमासीनं दंडहस्तकं॥ वरदं हृष्टपापघ्नं भक्तानां हितकारकं॥ एवं संस्थाप्य घटान्ते तां गंधादिभिरथार्चयेत्॥ विप्रेभ्यो
दापयेत्कुंभानेभिर्मंत्रैर्यथाक्रमं॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय च॥ एवमा-
राध्य तान्कुंभान्दद्यादुदकपूर्वकं॥ प्रीयतां भगवान्धर्मः श्रोतः समुदाहरेत्॥ एवं कुंभप्रदानेन यमदेवस्तु तुष्यति॥ कर्त्री
कारयिता स्वर्गं प्राप्नोत्येव न संशयः॥ न याति नरके घोरं न प्राप्नोति भयं क्वचित्॥ यमस्तस्यापि भगवान्प्रीतो भवति तत्स्यपे॥
य उदकुंभदानं विप्रेभ्यो ददाति च यथाविधि॥ स गच्छेत्स्वर्गलोकं तु नात्र कार्या विचारणा॥ इत्युदकुंभदानं॥ ॥ अथ यमक- राम॰
कारदानं॥ हेमाद्रौ बौधायनः॥ कुर्याद्यमकरं सम्यग्यानं तं ताम्रमेव वा॥ पलत्रयेणार्धार्धेन वा यथा देकेन भुभाकृतिं॥ पृष्ठे ॥१८९॥
रत्नानि देयानि कटिं रूप्येण कारयेत्॥ नेत्रे स्वर्णमये कार्ये जिह्वां रूप्यां प्रकल्पयेत्॥ पादयोः पक्षिपेत्तस्य घृतपात्रे पुरो-

दयोः॥ कृष्णवस्त्रेण संवेष्ट्य चंदनागरुचर्चितं॥ ताम्रे तु जलपात्रे च स्थापयेद्यमकरं च तं॥ ब्राह्मणाहूतसंपन्नं दद्यादंतमलो-
यं॥ वस्त्रैः कटककेयूरैः पूजयेदंगुलीयकैः॥ होमो मंत्रा वारुणा दैवस्यैर्मंत्रोध्यायोक्तमार्गतः॥ ततस्तु दक्षिणां विप्रमकरं त-
न्निवेदयेत्॥ जलाधिदेवदेवेशाय श्वेमाशायते विभो॥ उदरस्थादिनाशं मे कुरु दानेन तोषितः॥ इति मकरदानविधिः॥ ॥
अथ लोकपालाष्टकदानं॥ ब्रह्मांडे॥ शृणु नारद भद्रं मे दानं सर्वाघनाशनं॥ सर्वमंगलमायुष्यमारोग्यश्रीकरं शुभं॥
दानानामुत्तमं त्वेतत्सर्वसिद्धिकरं परं॥ करोति दानं नारी वा सायुज्यं ब्रह्मणो व्रजेत्॥ विषुवत्समने राहुग्रहणे चंद्रसूर्य-
योः॥ अन्येषु पुण्यकालेषु जन्मर्क्षेषु विशेषतः॥ देवालये नदीतीरे गृहे वा दानमाचरेत्॥ पुरा पदेशेषु सर्वेषु पुण्यगोत्रे-
षु नारद॥ चतुरस्रां समां भूमिं लिप्तां गोमयवारिणा॥ षट्कां वाष्टहस्तां वा दशहस्तां वा करान्॥ प्राचुदीच्यप्लवकर्त्तव्या
रेखाश्चत्त्रिकाश्रिताः॥ नवकोष्ठानि तत्र स्युः श्वेततंदुलपुंजकं॥ सीतेरष्टदलैः पुक्तान्कमलान्विन्यसेत्क्रमात्॥ ज्ञातरू-
पमयं देवं जगत्कर्त्तारमव्ययं॥ तेषां मध्यमकोष्ठे तु कमलस्थं निवेशयेत्॥ इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा॥ वा-
युं सोमं तथेशानं प्रागादिषु क्रमान्न्यसेत्॥ जातरूपमयान्देवानष्टौ स्वायुधसंयुतान्॥ ब्रह्मणोभिमुखान्सर्वान्सर्वेषु
विनिर्मितान्॥ ब्रह्मणोभिमुखान्सर्वान्सर्वेषु विनिवेशयेत्॥ जातरूपं सर्वाशस्यं यथाशक्ति विनिर्मितान्॥ ब्रह्मणोभिमु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ खानुसर्वान्सर्वेषुविनिवेश्यवारिणा॥योसौकारयिताविप्रस्त्वेवमेतत्समाचरेत्॥दानकालेतुसंप्राप्तेदातास्नातिकुशोदकैः
॥१९०॥ ॥प्रसन्नचित्तवदनःपरमेष्ठिपुरोगमान्॥स्वनाममंत्रैरमितोनमोंतेराध्यगाधादिभिरादरेण॥विप्रास्तर्प्याभ्यर्च्ययथा
क्रमेणासंप्रायतामयमित्येवमुक्त्वा॥योसौकारयिताविप्रस्तस्मैदद्याच्चदक्षिणां॥सुवर्णसंख्यागणितांहिरण्यंचैव
वाससी॥प्रोक्तंदेवर्षेदानंलोकपालद्वयंमया॥किमन्यच्छ्रोतुमिच्छातेतदिदंवदसांप्रतं॥इतिलोकपालाष्टकसं
॥ ॥अथाजादिदानंमहाभारते॥अजांविकंचमहिषंदत्वाविप्रायशक्तितः॥घृतक्षीरवहानद्योयत्रतत्रसमोदते॥
तथा॥अजामलंकृतांदत्वावन्हिलोकेमहीयते॥तमेवलोकंप्राप्नोतिदत्वाजंविधिवन्नरः॥सर्वान्कामानवाप्नोतियेय
चेतसिसंस्थिताः॥इतिवा॥अथमेषीदानं॥भविष्योत्तरेभगवानुवाच॥श्रृणुपार्थपरंदानंसर्वकिल्बिषनाशनं॥यद्दत्वावि
विधंपापंसद्योविलयमृच्छति॥सुवर्णरोमांमांसोवर्णाप्रत्यक्षांवासमन्वितां॥सुवर्णतिलकोपेतांसर्वालंकारभूषितां॥को
शेयपरिधानांचदिव्यचंदनभूषितां॥दिव्यपुष्पोपहारांतुसर्वधान्यरसैर्युतां॥सप्तधान्यसमायुक्तांफलपुष्पवतीतथा॥ राम॰
घाखादिपरिभाषायामुक्तं॥शतेनकारयेन्नांतुसुवर्णस्यप्रयत्नतः॥यथाशक्त्याथवाकुर्याद्वित्तशाठ्यंनकारयेत्॥अय ॥१९०॥
नेविषुवेचैवग्रहणेशशिसूर्ययोः॥दुःस्वप्नदर्शनेचैवजन्मर्क्षेतिथिसंक्षये॥यदावाजायतेचित्तंवित्तंश्रद्धासमन्वितं॥अ

देवदानकालःस्याद्यतोऽनित्यंहिजीवितं॥दद्यात्तीर्थेगृहेवापियत्रवारमतेमनः॥तत्रसंस्थाप्यदेवेशानुमयासह
शंकर॥ब्रह्माणंसहगायत्र्यासश्रीकंचहरिंतथा॥रत्यासहथाऽनंगंलोकपालान्ग्रहांस्तथा॥शंकरादिस्वरू
पंतुविश्वकर्माह॥चर्मांबरश्चतुर्बाहुःशूलखड्गपाशभृत॥शेषांकःशंकरोगौरीवामोत्संगस्थितामवेत्॥ब्र
ह्मादिरूपमाहनारदः॥सावित्रीदक्षिणेपार्श्वेगायत्रीवामभागतः॥त्रिलोकयंसौम्यनारायणाक्षसूत्रकमंडलुं॥
लक्ष्मीनारायणरूपंहेमहस्तिदानेज्ञेयं॥अन्येषांपरिभाषायां॥एतानिशक्तिसुवर्णनिर्मितानिकुर्यात्॥मध्ये
चतिलकुंभोपरिएवंप्रोक्तप्रकारेणाघटितांमेषीमुक्तोपकरणैःसहसंस्थापयित्वागौरीशंकरादिभिःसहपूजयेत्॥
तांतुपूर्व विधानेनगंधपुष्पनिवेदनैः॥तदग्रेकारयेद्धोमंतिलाज्येनमहीतले॥अलंकृतःद्विजेंद्रोंतेवाशोभिःप
रिष्कृतश्च॥तल्लिंगमंत्रैर्होमश्चकर्तव्योज्वलितेनले॥ततस्तांतिलकुंभस्थालवणाभिमुखीस्थितां॥पूजयित्वा
विधानेनमंत्रमेतमुदीरयेत्॥लवणाभिमुखीमितिप्रतिमानःपश्चिमायांदिशिलवणासादनेनतदभिमुखत्वं
संपद्यते॥मंत्रस्तु॥रोमत्वंकांसमहान्जाद्यैःसर्वोपकरणैःसह॥जगतःसंप्रदेहेनासितामतःप्रार्थयेहरिंशिवं॥वाङ्मनः
कायजनितंयत्किंचिन्ममदुष्कृतं॥तत्सर्वंविलयंयातुत्वद्दानात्पुरुसेवितं॥एवमुच्चार्यतांदद्याद्ब्राह्मणायकुटुंबि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्॥नाभिभाषेत्ततोदत्वातन्मुखंनावलोकयेत्॥दुष्टप्रतिग्रहेतेविप्रोभवतियातकीनोरोगोर्दुदक्षिणा॥हीनादात
व्यानाविधानतः॥दक्षिणाविधिनाहीनाःदुःखशोकावहाभवेत्॥पुरादत्तमिदंदानंगौर्यादक्षिणहस्तया॥ते
नशंभुःपतिर्लब्धःसर्वदेवनमस्कृतः॥इंदुप्रभापार्श्वयाशोभाशांत्यातंदत्तंविधानतः॥पतिःस्वर्गेपितिर्लब्धःसावा
पिदिविमोदते॥नलेनदत्तमेतस्मिराज्यंकृत्वादिवंगतः॥रुक्मिणापिहपतिर्लब्धःसौभाग्यमतुलंतथा॥दानस्या
स्यप्रभावेनपुत्राबहुबलान्विताः॥अपुत्रोलभतेपुत्रमधनोलभतेधनं॥दत्वादानंशुभांकीर्त्तिंविपुलांचतथा
श्रियं॥यइमंशृणुयान्नित्यंदानकल्पमनुत्तमं॥अहोरात्रकृतात्पापान्मुच्यतेनात्रसंशयः॥भैषीमशेषकलुषं
परहरांसुरत्नांतांदानेनसदैवरसधातुयुतांसधामं॥तामादरेणकुरुतंनदनदेहिधर्मांचापास्तपापतिमिरःसवि
तेवभासि॥इतिभेषीदानं॥ ॥अथाजादानं॥सुमंतुः॥प्रजापतिस्तपस्तप्त्वास्वंजामुखाघयत्नतः॥यज्ञार्थं
तत्सृतंकल्पपशुंयज्ञस्यसिद्धये॥विरूपंविपुलंभूलस्थांहस्सारंयुवानकं॥असमाप्तेतुयज्ञानांसत्रारांपित
कर्मणां॥तत्समंविहितंदेवैस्तद्दानंचनिगद्यते॥अजापालोमहीपालोस्वंजादानेनदिवंगतः॥अयनेविषुवेचै
वयुगादौग्रहणेषुच॥अमावास्यामजादानंपौर्णमास्यांचशस्यते॥विधिंतस्यप्रवक्ष्यामिविश्वामित्रेणनिर्मितं॥

सर्वरत्नोपसंपन्नांसप्तधान्योपरिस्थितां॥वस्त्रमाल्योपमाल्यैस्तुभूषितांपभुजानकिं॥यत्तनेत्रांहेमशृंगींताम्रपृष्ठां
सुदोहनां॥सस्तुतांरौप्यपादांवकुक्षौदद्यात्तिलोदकं॥गोदानवत्प्रयुंजीतमंत्रेणानेनसंयतः॥मंत्राबासेऽजेभ्यःसो
यज्ञसंपत्करेशुभे॥सर्वाशास्त्वंहरमेपापंजन्मांतरशतैःकृतं॥इत्यनुमंत्रणं॥एवंसमुच्चरेद्भक्त्याद्विजहस्तेजलंक्षिपेत्
॥प्रीयतांयज्ञनाथायवासुदेवायवैनमः॥एवंप्रदक्षिणीकृत्यसर्व्यंसमयलोकयेत्॥ततश्चगच्छेत्त्वगृहंहरिसंस्म
रमानवः॥यद्वैवाल्येचेकृतादोषाःकामतोवाप्यकामतः॥यौवनेवार्द्धकेयत्रप्रसंगेनापिपातकं॥अजादानस्यमाहा
त्म्यात्त्रिष्यापोऽज्ञायतेनरः॥पुत्रपौत्रसमायुक्तःसदाचारमतिश्चिरं॥विष्णुधर्मान्नरोतस्मादजांप्रयच्छत्वंततःसर्व
मवाप्स्यसि॥मंत्रेणानेनविधिवद्दलंकृत्वास्वशक्तितः॥त्वंसर्वंब्रह्मणासृष्टापवित्रंभवतीपरं॥त्वयस्तस्तेतोस्थिता
यज्ञास्तस्माच्छांतिकरीभव॥इतिदानमंत्रः॥प्रतिग्रहीताततांचैवपृष्ठदेशेविशेन्नमः॥एवंप्रदाययज्ञास्तस्माच्छांतिक
रीभव॥विप्रायसर्वपापैःप्रमुच्यते॥अश्वमेधफलंप्राप्यमोदतेवैस्मवैपरे॥इत्यजादानं॥ ॥अथमेषदानं॥हेमा
द्रौबौधायनः॥अग्निमांद्यंभवेत्तस्ययस्यताग्निविनाशकः॥वक्ष्यामितस्यनीकारंयथोक्तंब्रह्मणापुरा॥पलार्द्धेन
तदर्द्धेनतदर्द्धेनाथवापुनः॥राज्ञंतंकारयेत्सौम्यंसम्यग्वैवाहनमुत्तमं॥सौवर्णास्तत्तवराःकार्याःश्वेतवस्त्रेणवेष्टयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प्र॰ श्वेतमाल्यैः श्वेतगंधैर्धूपंदद्यान्मयस्त्वकं ॥ तंडुलोपरिसंस्थाप्यपुनस्तांस्त्ज्जयेत्सुधीः ॥ तंडुलानांपरीमाणंद्रोणाद्
॥१९२॥ यमुदाहृतं ॥ आग्नेय्यांदिशिहोमश्चसमिद्भिर्घृततिलैरपि ॥ आचार्येणाविनीतेनसर्वशास्त्रार्थवेदिना ॥ कर्त्तव्येन
चकर्त्तव्यस्तत्रमंत्रानिमांश्छृणु ॥ अग्निर्मूर्द्धेतिमंत्रेणासमिद्धोमःप्रशस्यते ॥ अग्नेनयेत्याज्यहोमोप्यग्निनाग्निस्ति
लाश्चतेः ॥ अक्षताययवाः ॥ मंत्राध्यायोक्तमंत्रेणाग्निसंस्थापनंभवेत् ॥ अग्नेःप्राग्दक्षिणेदेशेकुंभंकुंभनिवेशयेत् ॥
प्रणीतामोक्षणयंतंकृत्वास्नानंविधीयते ॥ आपोहिष्ठेत्यादित्रचंहिरण्यवर्णात्रचं ॥ पवमानानुवाकेनमार्जयेद्द्विमि
णांततः ॥ शान्त्रोवास्तानुवाकेनशांतिचापिप्रकल्पयेत् ॥ तस्मैहुत्वतेरागोग्राह्यमुक्त्वाथडुद्ध्रुरवः ॥ पूजितायपथाशा
तयारदद्यात्तुसदक्षिणां ॥ दानमंत्रस्तु ॥ दिवानांपमुखंवहव्यवाहनःसर्वपूजितः ॥ तस्मात्त्वंवाहनंपूज्यंदेवैःकेंद्रमहर्षि
भिः ॥ अग्निमांघंसर्वकर्मविपाकोस्यतुयन्मम ॥ तत्सर्वंनाशयाक्षिप्रंअठराग्निप्रवर्द्धय ॥ एवंविधायपयोदद्याद्गुर्वीह
नमुत्तमं ॥ बलवानग्निवान्मर्त्योजीवेद्वर्षशतंनरः ॥ ततःस्वबंधुभिर्विप्रैःस्नात्वाभुंजीतवाग्यतः ॥ इत्यग्निमांद्यहरल्प राम॰
प्यमेषदानं ॥ ॥ अथमहिषीदानं ॥ भविष्योत्तरे ॥ कृष्णउवाच ॥ महिषीदानमाहात्म्यंकथयामियुधिष्ठिर ॥ प्रणांपवि ॥१९२॥
त्रमायुष्यंसर्वकामसुखप्रदं ॥ चंद्रसूर्यग्रहेपुण्येकार्त्तिक्यामयनेतथा ॥ शुक्लपक्षेचतुर्दश्यांसूर्यसंक्रांतिवासरे ॥ यत्रवा

ज्ञायतेवित्तंचित्तंचकुरुनंदन ॥ तद्देवदेयामहिषीसंसारभयभीरुणा ॥ सुपयोधरासुजघनासुभृंगीसुखुरातथा ॥
प्रथमप्रसूतातरुणीसुशीलादोषवर्जिता ॥ सुवर्णशृंगीतैलाक्ताघंटाभरणभूषिता ॥ रक्तवस्त्रेणसंवीतारम्यातांम्रदो
हनकान्विता ॥ पिण्याकपिंडकोपेतासहिरण्याचशक्तितः ॥ सप्तधान्ययुतादेयाब्राह्मणायवेदपारगे ॥ पुराणपाठकेतद
ज्ञातिः शास्त्रविदेतथा ॥ देयानवेदरहितेनवकव्रतकेक्वचित ॥ द्ध्येरभिःसमाक्रान्ताप्रस्यान्हिविधिपूर्वकं ॥ दद्यान्मं
त्रेणराजेंद्रप्रणिपत्यतेनतु ॥ इंद्रादिलोकपालानांयाराज्ञमहिषीशुभा ॥ महिषीदानमाहात्म्यात्सास्तुमेसर्वकाम
दा ॥ धर्मराजस्यसाहाय्येयस्याःपुत्रःप्रतिष्ठितः ॥ महिषासुरस्यजननीयासाःस्तुवरदामम ॥ इतिदानमंत्रः ॥ दद्यात्पर
क्षिणीकृत्यब्राह्मणायपयस्विनी ॥ प्रतिग्रहःस्मृतस्तस्याःपृष्टदेशेस्वयंभुवा ॥ अनेनविधिनादत्वामहिषीद्विज
पुंगवे ॥ सर्वान्कामानवाप्नोतिइहलोकेपरत्रच ॥ यत्नेपापीभवेद्विप्रःक्षत्रियोविजयीभवेत् ॥ वैश्यस्तुधनवांश्शूद्रः
सर्वकामार्थसंयुतः ॥ तस्मात्त्वरेणादातव्यामहिषीविभवेसति ॥ पुत्रपौत्रार्थमात्मनःशुभमिच्छतातेनवै ॥ दत्ताधेनुसमां
राजन्महिषीनारदोब्रवीत् ॥ विंशत्केनुसमंगावासःसर्वदानोत्तमांकृविः ॥ सगरेणाककुत्स्थेनधुंधुमारेणगाधिना ॥
दत्ताःसत्कृत्यविप्रेभ्योमहिष्यःसर्वकामदः ॥ महिषीदानमाहात्म्यंयःश्रृणोतिसदानरः ॥ सर्वपापविनिर्मुक्तःशि

वलोकद्वयंसंजयतीतिकिमत्रचित्रं॥ विश्वामित्रः॥ महिषीसुप्रजाराजन्रक्षाराध्यांप्रवंतीतथा॥ दत्वाचैवतुकार्त्तिक्यां
धेनूपस्करसंयुतां॥ दत्वाधेनुप्रदानेनतत्फलंतत्समश्नुते॥ प्राप्नोतिपुत्रपौत्रांश्चसूर्यलोकंसगच्छति॥ इतिमहिषी
दानं॥ ॥अथकृष्णाजिनदानं॥ मात्स्ये॥ कृष्णाजिनप्रदानस्यविधिकालौममानघ॥ ब्राह्मणांश्चसमाचक्ष्वतत्रमेसंश
योमहान्॥ मत्स्यउवाच॥ वैशाख्यांपौर्णमास्यांचग्रहणेचंद्रसूर्ययोः॥ पौर्णमास्यांतुयामाघ्यांआषाढीकार्त्तिकीतथा॥ उ
त्तरायणद्वादशीचतस्यांदत्तंमहाफलं॥ आहिताग्निर्द्विजोयस्तुदेयंवैतस्यपार्थिव॥ यथायेनविधानेनतन्मेनिगदतः
शृणु॥ गोमयेनोपलिप्तेतुशुचौदेशेनराधिप॥ आदावेवसमास्तीर्यशोभनंवस्त्रमाविकं॥ ततःसशृंगंसखुरमास्तीर्यैतत्कृष्ण
मार्गेणं॥ कर्त्तव्यंरुक्मशृंगंचरूप्यदंतंतथैवच॥ लांगूलंमौक्तिकैर्युक्तंतिलच्छन्नंतथैवच॥ तिलैःकृत्वासमंकृत्वावा
ससाच्छादयेद्द्विजः॥ आत्मसममिति॥ उपविष्टस्यात्मतुल्यंप्रमाणमित्यर्थः॥ सुवर्णनाभंतत्कुर्याद्दलंकुर्याद्द्विशे
षतः॥ रत्नैर्गंधैर्यथाशक्त्यातस्यदिक्षुचविन्यसेत्॥ कांस्यपात्राणिचत्वारिदिक्षुदद्याद्यथाक्रमं॥ मन्मयेषुचपात्रे
षुपूर्वादिषुक्रमेणतु॥ घृतंक्षीरंदधिक्षौद्रमेवंदत्वायथाक्रमं॥ सुवर्णनाभिविस्तारादिसत्त्वालंकरणसाधनाकांक्षायांर
त्नैर्गंधैरित्यस्यसन्निहितत्वात्तत्साधनतयान्वयेननिराकांक्षत्वाच्चकांस्यपात्रैःसंबंधः॥ ततश्चतेषुचतुर्षुमन्मयपात्रेषु

पूर्वादिक्रमेणघृतादिद्रव्यादितिकल्पतरुकारमतोर्थः॥ सरत्नानिकांस्यपात्राणिचतुर्दिक्षुविन्यस्यान्यानिमृन्मयानिपात्रा
णिघृतादिपूर्णानियथाक्रमंपूर्वादिदिक्षुस्थाप्यानीतिहेमतोर्थः॥ चंपकस्यतथाशाखामव्रणांकुंभमेवच॥ शालो
पस्थानकंकृत्वाशुभचित्तोनिवेदयेत्॥ जीर्णवस्त्रापीतेनसर्वांगानिचमार्जयेत्॥ शाखोपस्थानकमिति॥ शाखे
दानदेशाद्बहिरुपसमीपस्थानंयस्यसतथोक्तः॥ निवेदयेद्दानांतेरंस्तोमार्थमितिशेषः॥ मार्जयेद्दानानंतरंस्ना
त्वापीतेनजीर्णवस्त्रेणांगानिप्रोंछयेदित्यर्थः॥ धातुमयानिपात्राणिपादेष्वस्यप्रदापयेत्॥ वक्ष्यमाणप्रकारेणाप्रण
ष्टंपातुममाशुवै॥ तिलपूर्णांतुतत्कृत्वावामपादेनिवेदयेत्॥ पानिपापान्यकामानिकामोत्थानिकृतानिच॥ कांस्यपात्र
प्रदानेनप्रणश्यंतुसदाममः॥ तिलपूर्णांतुपरापवादेयेभक्ष्याद्दुष्टमांसस्यभक्षणात्॥ तच्चोत्थितंचमेपापंताम्रपात्रान्न
शात्वपतु॥ कन्यानृतंगवांचैवपरदारप्रधर्षणं॥ रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमे॥ ऊर्ध्वपादेत्विमेकार्येताम्रस्य
रजतस्यच॥ ऊर्ध्वपादेस्त्रग्रपादयोः॥ अत्रैकत्वमविवक्षितं॥ अनेनपूर्वोक्तयोर्लोहकांस्यपात्रयोःपश्चिमपादयोःस्था
पनमित्यर्थाल्लभ्यते॥ अनयोश्चपूर्वपात्रयोर्दक्षिणावामचक्रमेणाभासः॥ जन्मजन्मसहस्रेषुकृतंपापंकुबुद्धिना॥ सुव
र्णपात्रदानात्तुनाशयामुजनार्दनः॥ अत्रसुवर्णपात्रस्यस्थानानुक्तेर्मध्यपात्रेतरेश्चवर्णनान्मध्यदेशएवस्थापनं॥ एत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा०न०प्र० ग्रीवास्तनौ स्थापनीयमित्याहुः॥ हेमयुक्तं विद्रुमं च दाडिमं बीजपूरकं॥ प्रशस्तपत्रे श्रवणे रत्नवस्त्रे भृंगारकानि च॥ एवं
॥१९४॥ कृत्वा पृथ्वीं कृष्णां सर्वत्र मकफलानि च॥ तत्प्रतिग्रहविधानाहिताग्निर्द्विजोत्तमः॥ स्नातो वस्त्रयुगछन्नः स्वशक्त्या वा
प्यलंकृतः॥ प्रतिग्रहस्ततस्तेनः पुच्छे देशे महीयते॥ ततस्तु एवं समीपे तु मंत्रमेतमुदीरयेत॥ कृष्ण कृष्ण विभो देवकृ
ष्णाजिनानघ प्रभो॥ त्वद्दानात्कृतपापस्य त्रायतां हि भवमध्यजा॥ अनेन विधिना दद्याद्यथावत्कृष्णमार्गकं॥ न स्पृशेत्पुनः सं
द्विजो राजन्नित्येवं समोहिसः॥ दाने च श्राद्धकाले च दूरतः परिवर्जयेत॥ स्वगृहे विष्णुं तं विप्रं मंडले स्नानमाचरेत॥
कृष्णाकुंभेन राजेंद्र स्नात्वा यांचपकस्य च॥ कृत्वाचाचार्यकलत्रं मंत्रेणानेन मूर्द्धनि॥ आप्यायस्व समुद्रज्येष्ठा इत्येतत्प्रा
स्तु षोडश॥ ताभ्याश्चाप्ययस्वेत्यादयेष्टौ॥ समुद्रज्येष्ठा इत्यष्टौ॥ अथ जीर्णाविधौ शांगप्रोक्षणं॥ अहते वाससी वीत आचां
तस्तु चितामियात॥ वीतः कृतपविधानः॥ तद्वत्त्वाकुंभसहितं नीलाक्षेप्यं चतुष्पथे॥ इदं च दानवाक्यं सर्वकार्यं॥ तद्यथा
॥ ॐ अद्येत्याद्यमुकगोत्रायैतास्युत्कादइदं कृष्णाजिनं कुशोपरिगतं कंबलोपरिस्थितं वस्त्रयुग्मप्रच्छादितं तिलराशौ सु द०म०
वर्णभृंगं रौप्यखुरं रत्नपदं तं मुक्ताफललांगूलं सुवर्णलांगूलं पंचरत्नालंकृतं गंधपुष्पान्वितं चतुर्दिग्वस्थितघृतक्षी ॥१९५॥
रदधिमधुपूर्णपात्रचतुष्टयसहितं सधान्यपात्रं त्रिवदेवतं अमुककामस्त्वमहं प्रददे न मम इति पात्रहस्ते जलं दद्यात॥

एतत्कृष्णाजिनदानप्रतिष्ठार्थं दक्षिणामिदं सुवर्णं प्रददे न मम इति॥ गारुडे॥ शतनिष्कसमोपेतं तदर्द्धम
थापि वा॥ अतो न्यूनं न दातव्यमधिकेन फलमर्जितं॥ उत्तमं तु शतेनैव मध्यमं तु तदर्द्धतः॥ तदर्द्धेन कनिष्ठं तु दे
यं कृष्णमृगाजिने॥ शतेन निष्कानामिति शेषः॥ न वित्तशाठ्यं कुर्यात्तु फलहानेश्च कारणात॥ मा तस्य फलमु
क्तं॥ कृतेनानेन याहाष्टिर्भ स्यान्नाक्यासुरैरपि॥ वक्तुं च न पतिश्रेष्ठ तथाप्युद्देशतः शृणु॥ समग्रं भूमिदानस्य फ
लमाप्नोति मानवः॥ सर्वलोकांश्च वरति कामचारी विहंगमः॥ आभूतसंप्लवं यावत्स्वर्गमाप्नोति संशय॥
न पिता पुत्रमरणं वियोगं भार्यया सह॥ धनदेशपरित्यागं नैवेह प्राप्नुयात्क्वचित॥ कृष्णमक्षतं कृष्णमृगस्य चर्म
दत्वा द्विजेंद्राय समाहिताय॥ यथोक्तमेतन्मरणेन शोचेत्प्राप्नोत्यभीष्टं मनसः फलं तत॥ कालिकापुराणे तु
॥ पयस्विन्यामादिपात्रे च हुत्वा वह्निं ददंति वै॥ तिलद्रोणसमायुक्तं वस्त्रयुग्मेन वेष्टितं॥ पलार्द्धेमथार्द्धं वा
विभवाद्धेमसंयुतं॥ सूक्ष्मवस्त्रयुग्मेन अथवाच्छादयेद्बुधः॥ सोदकं चापरं कुंभं सतिलं न्यस्य तत्करे॥ त
तः कृष्णाजिनं दद्यात्तिलद्रोणान्वितं च तत॥ दत्वा तु भोजयेत्तं च नत्वा चैव विसर्जयेत॥ आदित्यपुराणे॥ वैशा
ख्यां पौर्णमास्यां च तिलदानं ददेति ये॥ कृष्णाजिनं च संपूर्णं प्रस्थानपात्रे तिलस्य वै॥ सुवर्णशृंगं रौप्यखुरं मु

४दान॰प्र॰ मुक्तालांगूलभूषितं॥श्वेतवस्त्रयुगोपेतं कृष्णचैलाम्बलंकृतं॥लोहपात्रचतुष्कं च घृतक्षौद्रप्रपूरितं॥दधि
॥१९५॥ क्षीरं तथा चैव संपूर्णां चततःपरं॥ परीक्षितेगुणाधारे ब्राह्मणे गुणसमाहिते॥ अग्निहोत्रपरे शांते देवद्विजप
रायणे॥ तस्मिंस्तद्दीयते दानं कृष्णाजिनमनुत्तमम्॥ इति कृष्णाजिनदानं॥ ॥अथ गर्भिकृष्णाजिनदानं॥
विष्णुधर्मोत्तरे॥ वैशाख्यां पौर्णमास्यां च कार्त्तिक्यां विषुवे तथा॥ अयने ग्रहणे वापि दद्यात्कृष्णमृगाजिनं॥ भूमौ
गोमयलिप्तायां दर्भानास्तीर्य मानवः॥ तत्राविकं तथा वस्त्रं प्राग्ग्रीवं च प्रसारयेत्॥ आविकं वस्त्रकंबलम्॥ तस्मिन्कृ
ष्णाजिनं भूपतिर्माससं प्रसारयेत्॥ प्राग्ग्रीवमुत्तरमुखं संगं सखुरं तथा॥ प्राग्ग्रीवं प्राकृसिरस्कं॥ उत्तरदि
ङ्मुखं तदुपरि लोमकं प्रसारयेत् इत्यन्वयः॥ स्वर्णशृंगं रौप्यखुरं मुक्तालांगूलभूषितं॥ अत्र सुवर्णशृं
गस्थापादिकं यथाशक्ति कार्यं॥ तिलैः संछादयेत्कृष्णं यथाशक्त्या यथाविधि॥ सौवर्णं क्षीरपात्रं तु पूर्वस्यां दिशि
निधापयेत्॥ राजतं दधिपात्रं तु दक्षिणस्यां निधापयेत्॥ घृतपूर्णं ताम्रपात्रं पश्चिमायां निधापयेत्॥ त्राखंसुनाभं दान॰
सुमुखं क्षौद्रपूर्णं तथोत्तरे॥ चतस्त्रश्च तथा दिक्षु चत्वारो गार्षिकाः क्रमात्॥ दर्भैः सकृत प्रस्तीर्णा गोः॥ ततस्तु कृ ॥१९५॥
ष्णं तु राजेन्द्र तिलानाच्छाद्य वाससा॥ पश्चिमे तु तथा भागे विधिना स्थाप्य पावकं॥ तिलान्घृताक्तान्जुहुयाद्व्याहृतिभिः

समाहितः॥ आहिताग्निं ततो विप्रमव्यंगांगं सुपाठकं॥ प्रवक्तारं ख्यातिकं च दातारं स्मृतिविस्तरे॥ स्नातश्च वस्त्रयुग्मेन स्व
लंकारैश्च शोभितं॥ दिशः संप्रोक्ष्य गायत्र्या तिलमिश्रेण वारिणा॥ कृष्णाजिनं द्विजश्रेष्ठः सहिरण्यं गर्षिभिर्युतं॥ दद्याद्वि
प्रतिगृह्णीयात् विप्रो यतो धर्मराडिति॥ नाभिस्पृष्टं ततो नितयेत्प्रतिग्रहीता स्वाल्पसाविति॥ नितयेत्प्रतिगृह्णीयात्॥ अदिति
र्घोशितिन्नैयत्त्र सावेनादिनातेतः॥ गोभूहिरण्यसंयुक्तं भागी भवत ददातियः॥ स सर्वपापकर्मापि सायुज्यं ब्रह्मणो
व्रजेत्॥ गोभूहिरण्यमादि यथाशक्ति गवादि वृक्षगरुडप्रदाणोक्तं दक्षिणासहितं चेत्यर्थः॥ पुलस्त्योक्तमपि कृ
ष्णाजिनदानमनेन समानार्थं प्रोक्तं विशेषः॥ दिक्षु चतुष्टयस्थाप्य सौवर्णादि पात्रस्थानेषु प्रागादिक्रमात्ताम्र
कांस्यरौप्यसौवर्णपात्राणि क्षीरदधिघृतक्षौद्रपूर्णानि स्थापयेत्॥ हिरण्यनाभिलं कुर्यात्॥ सर्वगुणविशिष्टं कृ
ष्णाजिनं दद्यामीति नाभिसंस्थं तद्दद्यात्॥ प्रतिग्रहीता चादितये कृष्णाजिनं प्रतिगृह्णाम्यसाविति स्वनामगोत्रादिक
मुच्चरेत्॥ अन्यत्सर्वं समानं॥ इति गर्भिकृष्णाजिनदानं॥ ॥अथार्द्रकृष्णाजिनदानं॥ विष्णुधर्मोत्तरे॥ श्री भगवानुवा
च॥ मुंडितेन तु यापीक्ष्याप्रापश्चित्तिः पराभवत्॥ हत्वा यो ब्राह्मणा सेवतां प्रवक्ष्यामि नारद॥ भूमिं प्रीकृ प्रवणां भुक्तां गो
मयेनानुलेपयेत्॥ तस्यां हरितदर्भास्तु घनानास्तीर्यपत्रतः॥ मध्ये कृष्णाजिनं राजन्नार्द्रं सर्वांगिकं दृढं॥ आस्तीर्य भू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान०प्र० गसहितं प्राग्ग्रीवं त्रिरसासह ॥ वेतितं ब्राह्मणानां सर्वं पात्रलक्षणान्वितं ॥ केतितं निमंत्रितमित्यर्थः ॥ प्रक्षाल्य पादौ
तस्यैव दद्यात्कुसेनतु वाससी ॥ सौवर्णौ कुंडले देयं कंठाभरणमेव च ॥ स्वगृह्यमभिस्तसं प्रजुअश्रृंगयोर्मध्यदेशतः ॥
॥१९६॥ प्राप्य खं ब्राह्मणांस्थाप्यमग्रे सौ वद्द्यात्कुसेनतु वाससी ॥ सौवर्णौ कुंडले देयं कंठाभरणमेव च ॥ स्वगृह्यमभिस्तसं
प्रजुअश्रृंगयोर्मध्यदेशतः ॥ प्राप्य खं ब्राह्मणांस्थाप्यमग्रे सौवर्णश्रृंगकं ॥ तिलैः प्रच्छादयेत्कृत्स्नं ब्राह्मणांत्रिरसास
ह ॥ यस्त्रिशिरो ब्राह्मणास्यमग्रे भवति स्नुजं ॥ जपेद्वै मूलमंत्रं तु गायत्रीं वा समाहितः ॥ पापं संचितमनसा हनने
ब्राह्मणात्तु ॥ नाभिमात्रे समुद्धृत्य तिलैः संछादयेत्पुनः ॥ संछादितं पुनर्विप्रे जपेन्मंत्रं तु पूर्ववत् ॥ पुनरुद्धृत्य विप्रं तु नाभि
यीवत्तु पार्थिव ॥ पुनः संछादयेत्तस्य शिरः कृष्णैस्तिलैस्तथा ॥ त्रिकृत्वस्त्वनिमज्ज्यैव दानं दद्यान्मृगाजिनं ॥ पात्रं
मनसि संचिंत्य तोयमप्सु विनिक्षिपेत् ॥ प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृक् ॥ एवं कृष्णाजिनं दत्वा ब्रह्म
हत्यां व्यपोहति ॥ पापिष्ठोपरमं स्थानं याति यत्र न शोचति ॥ इति गरुडस्वामिप्रख्यातं दानं सर्वाघनाशनं ॥ मुंडितेन तु वत्सा राम०
पब्राह्मणो घातिते सति ॥ स हंसः दक्षिणां दद्याद्ब्राह्मणाय तु ॥ इत्यादि कृष्णाजिनदानं ॥ ॥ अथ कालविशेषवि ॥१९६॥
हितदानानि ॥ वन्हिपुराणे ॥ यो ददाति द्विजेभ्यस्तु तत्तोयायामुपानहौ ॥ वैशाखे शुक्लपक्षे तु ततो याम्यां विशोधतः ॥

यद्ददाति नरश्रेष्ठ तदक्षय्यं समश्नुते भविष्यपुराणे माघमासेत्वमायायां गुडस्य पलवणस्य च ॥ दानं श्रेयस्करं राजन्नस्त्रि
यां पुंसां तथैव च ॥ तथा सामेव प्रकृतस्य ॥ यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु ॥ तत्सर्वमक्षयं प्रोक्तं तेनेयमक्षया
स्मृता ॥ यो सां ददाति करकान्वारिपूर्णान्नेनकाः ॥ स याति पुरुषो वीरलोकं वैहेल्लिमालिनः ॥ विष्णुधर्मोत्तरे ॥ सादश्यां
चैवमुत्स्य चित्रेव स्वप्रदो नरः ॥ अक्षयं फलमाप्नोति नागलोकं च गच्छति ॥ वाराहे ॥ मार्गशीर्षे च वैशाखे तो मा
सौ मम वल्लभौ ॥ अनयोर्मासयोर्यस्तु द्वादश्यां नियतात्मवान् ॥ द्वादशानां तु विप्राणां प्रददाति वसुंधरे ॥ एकैकस्य तु
गां श्रेष्ठां सर्वोपस्करसंयुतां ॥ वस्त्रोपानद्युगे चैव कर्णालंकारमेव च ॥ आतपत्रं पादुके च अंगुलीयमेव च ॥ त्रिवि
प्यचोपवीतं च मां ध्यायन्भक्तिसंयुतः ॥ दद्याद्दक्षिणां पंचानां त्रयाणां च द्वयोरथ ॥ अशक्तो त्वथ वैकस्य दद्याद्दवि
देविधिं ॥ मन्वंतराणां कोट्यस्तु दश सप्त च पंच च ॥ मच्छरीरात्तथा वै सर्वद्वंद्वविवर्जितः ॥ यद्यपि सुग्रहाः सर्वे म
च्छिलिंगे शान्तीश्वरः ॥ सर्वे ते सौम्यतां यांति द्वादश्यां विधिना सुना ॥ यमः ॥ माघां यश्कारद्वादश्यां तिलैर्हुत्वा हुताशने ॥ ति
लान्दत्वा च विप्रेभ्यः सर्वपापैः प्रमुच्यते ॥ विष्णुधर्मोत्तरे ॥ वैशाख्यां पौर्णमास्यां तु ब्राह्मणान्सप्त पंच वा ॥ क्षौद्रयुक्तैस्ति
लैः कृष्णैर्वाचयेद्यदि वा नरः ॥ प्रीयतां धर्मराजेति यद्वा मनसि वर्तते ॥ तिलैर्दत्तेति शेषः ॥ पाकदीर्वहृतात्पापात्स्त्रया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान•प्र•
॥१९७॥

देवमुच्यते॥ तत्रैव॥ सोपवासस्तथाज्येष्ठे पौर्णात्र्याशिल्लक्षणे॥ उपानहौ तथा छत्रं दत्वातपं तं सुखी भवेत्॥ आषाढ्यामन्न
दानेन प्राप्नोत्यन्नं तथा बहु॥ जलधेनुप्रदानेन श्रावण्यां स्वर्गमाप्नुयात्॥ गोदानं पौष्ठपद्यां च पौर्णमास्यां महाफलं॥
आश्वयुज्यां कांस्यपात्रं घृतपूर्णं द्विजातये॥ ससुवर्णं तथा दत्वा दीप्ताग्निर्जायते॥ कार्त्तिक्यां चैव वर्णाभमम
वर्णामथापिवा॥ रत्नैर्गंधैस्तथा धान्यैर्बीजैर्वस्त्रैस्तथैव च॥ एतैर्युक्तामितिन्द्रोषे॥ कृत्वा चोक्तमयोस्मारां दत्वादी
पं समंततः॥ चंद्रोदये नरो दत्वा सर्वपापैः प्रमुच्यते॥ कांतारे यममार्गे तु तेन सोक्तजातेसु खं॥ प्राप्नोति पुत्रपौत्रांश्च स्व
र्गलोकं च गच्छति॥ मार्गशीर्षे तथा मासि पूर्णायां च शशिलक्षणे॥ महाराज ततः चूर्णं नवास सातु महीपते॥ आच्छाद्य कांस्य
पात्रे तु कृत्वा सोमं समाहितः॥ शशिलक्षणे चंद्रे॥ महाराज तं हरिद्रालाक्षाया॥ चंद्रलक्ष्मणा परिभावायां तेर्ये॥ लवणास्य
ते मुख्यस्य संपूर्णो कृष्णमार्गकं॥ मुख्यं सैंधवादि॥ कृष्णमार्गकं कृष्णाजिनं॥ दत्वा सुवर्णनाभस्य तस्मिन्नेव द्विजात
ये॥ सौभाग्यरूपलावण्ययुक्तो भवति मानवः॥ गौरसर्षपकल्केन पोषउत्सादितो जनः॥ नवाग्रेणातकुंभेन सोऽभिषि
क्तोऽश्वेत तं परं॥ तद्दितिप्रकृत्तकुंभाद्रिवं पराम नृपते॥ घृतेन स्नापितं विष्णुं संत्यासं पूजयेन्नरः॥ घृतं च तुष्ट्या च देवो
घृतं दद्याद्विजातये॥ स्त्रियास्तिथौ त्रायनं दत्वा फाल्गुन्यां ग्राल केत्रैवस्त्रयुगं दत्वा फाल्गुन्यां ग्राल घ्रातसोपवासः स

राम•
॥१९७॥

माहितः॥ कर्मणानेन धर्मेण सर्वपापैः प्रमुच्यते॥ माघ्यां कृष्णतिलैः श्राद्धं कृत्वा पापैः प्रमुच्यते॥ स्वातीर्योगान्नायनं दत्वा
फाल्गुन्यां ग्राल शापच॥ रूपद्रविणसंयुक्तां भार्यां पक्षवतीं तथा॥ तेन प्राप्नोति धर्मज्ञ श्रियं चैव तयोत्तमां॥ पक्षवती
पित्रादिबंधुवर्गोयेतां॥ तेन प्राप्नोति अपित्नुप्राप्नोत्येव॥ तथानायं पि भार्त्तारं नात्र कार्या विचारणा॥ भविष्योत्तरे॥
पौर्णमास्यां हृषोत्सर्गं कारयित्वा विधानतः॥ चंद्ररजसि निष्पन्नं पलेनैकेन चोभनं॥ पूजयित्वा च कुसुमैर्नैवेद्यैर्वि
निवेद्य च॥ दद्याद्विप्राय सत्कृत्य वासोभ्यां कारमभ ब रौ॥ मंत्रेणानेन राजेन्द्र तन्निबोध मयोदितं॥ क्षीरोदार्णवसंभू
त त्रैलोक्यगणादीपक॥ उमापतिशिरोरत्न शिवाय भ्यनमो नमः॥ दानेनानेन नरपतिर्जीयते चंद्रवद्दिवि॥ अप्स
रोभिः परिवृतो यावदाभूतसंप्लवं॥ विष्णुधर्मोत्तरे॥ यानि चान्यानि दानानि दत्तानिसु बहून्यपि॥ युगादिषु महाराज
त्र्यक्षयाणि भवंति हि॥ अस्पमल्पमपि यत्किंचित्स्वर्दद्यान्निर्धनोपि सन्॥ अक्षयं तद्भवेत्सर्वं युगादिषु न संशयः॥ इति अत्र ग्रंथ तदित
तिथिप्रयुक्त दानानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा॰न॰प्र॰ अथवारप्रयुक्तदानानि॥ ब्रह्मपुराणे॥ ग्रहानस्वर्णमयान्कृत्वायोविप्रेभ्यः प्रयच्छति॥ तद्दिनेषु यथान्यायं स्तासर्वान्का
मान्संविंदति॥ ग्रहप्रतिमालक्षणंपरिभाषायांतेयं॥ स्कांदेपि॥ आदित्यादिषु वारेषु सहिरण्याः सदैवतु॥ यः प्रय
॥१९८॥ च्छतितन्मूर्तीस्तस्यतुष्यंतिवैग्रहाः॥ ॥अथनक्षत्रप्रयुक्तदानानि॥ विष्णुधर्मोत्तरे॥ कृत्तिकासु सुवर्णस्य तु॥
घृतस्यतु तथापुष्ये गंधानामथसर्पभे॥ क्षेत्रस्य च तथाज्ञा केमहत्फलस्य च॥ हेम्नश्चमधु युक्तस्य दानमाश्लेमहत्फ
लं॥ वैश्वदेवेऽन्नपानस्य श्रवणेवसनस्य च॥ धान्यस्य वासवे विप्रा वारुणे चौषधस्य च॥ आजैपुराणा वीजानां सस्या
नां तद्वनंतरे॥ गोरसानां तथा पौष्णे यानानामथचाश्विने॥ तैलादिद्रावशानां स्नानानां॥ तिलानांच महानं भरणीमहा
फलं॥ इतिनक्षत्रादिदानानि॥ ॥अथयोगादिदानानि॥ विष्णुधर्मोत्तरे॥ विष्कंभेसर्वधान्यानां दानं सर्वाघनाशनं॥ प्री
तौतथान्नपानानामायुष्मतिघृतस्य तु॥ आत्मानस्य च सौभाग्ये पवरान्नं च शोभने॥ अतिगंडे च वस्त्राणां पायसस्य सु
कर्मणि॥ धृतौ रत्नतदानं च भस्मलेभस्मलादिदानकं॥ गंडे मंडनदानं च हेमश्चगो दानमिष्यते॥ ध्रुवे च पंचरत्नानां व्याघा
तेकारितस्य च॥ हर्षणेगंधदानं स्याद्वज्रे द्यान्धरानपि॥ सिद्धौसिद्धार्थकादेयाव्यतीपाते च कांचनं॥ वरीयसितिल ॥द॰प्र॰
लान्दद्याद्वस्त्राणिपरिघेतत्कारितस्य च॥ हर्षणेगंधदानं स्याद्वज्रे द्यान्धरानपि॥ सिद्धौसिद्धार्थकादेयाव्यतीपा ॥१९८॥

जलकुंभाः शिवेदेयाः सिद्धेसिद्धान्नमिष्यते॥ साध्ये रलंकरणानांच घ्र दानंशुभेशुभं॥ शुक्ले चौपानहोदानं ब्राह्मे त्वग्नस
णीसर्पिषः॥ ऐंद्रेच दीपकं दद्याद्वैधृतौ कनकाहितं॥ दानान्येतेषु योगेषु यथोक्तानि द्विजोत्तमाः॥ भक्त्यायुक्तोद्विजः
त्वाल्लोकेवसति च त्रिणाः॥ इतियोगदानानि॥ ॥अथकरणदानानि॥ विष्णुधर्मोत्तरे॥ करणेषु प्रवक्ष्यामि दानानि द्वि
जसत्तमाः॥ बवे पायसदानं स्यात्सक्तुदानं च बालवे॥ कौलवे गोरसान्दद्यान्निलांस्तैतिलनामनि॥ गराभिधाने लवणं
वणिजे दध्यंबरं॥ विष्टौ च घरिकान्नानि शकुनौ सर्पिरेवच॥ मधुदानं चतुष्पादे रत्नं गोचवाससं॥ दानं प्रियंगोः किं
स्तुघ्ने श्रेष्ठमुक्तं द्विजोत्तमाः॥ इतिकरणदानानि॥ ॥अथसंक्रांतिदानानि॥ विश्वामित्रः॥ मेषसंक्रमणे भानोर्मेषदा
नंमहाफलं॥ वृषसंक्रमणेदानं गवां प्रोक्तं तथैवच॥ वस्त्रान्नपानदानानि मिथुने विहितानि तु॥ घृतधेनुप्रदानं च कर्कटे
परिशस्यते॥ ससुवर्णं छत्रदानं सिंहे हैवविहितं सदा॥ कन्याप्रवेशे वस्त्राणां सुरभीणां तथैवच॥ तुलाप्रवेशे धान्यानां वीजाना
मेवकीर्तितं॥ कीटप्रवेशे वस्त्राणां वेश्मनां दानमेवच॥ कीटवृश्चिकः॥ धनुःप्रवेशे वस्त्राणां यानानां च महाफलं॥ सघप्रवे
शे दारुकाष्ठानां दानमग्रे स्तथैवच॥ कुंभप्रवेशे दानं तु गवामंबुतृणस्य च॥ मीनप्रवेशे स्नानानां माल्यानां मपि चोत्तम॥ दानान्येते
ताभियतो विजेंद्राः प्रोक्तानि कालेषु नरः प्रदाय॥ प्राप्नोति कामान्मनसस्त्वभीष्टांस्तस्मात्प्रयत्नं संपिहि काले दानं॥ इतिसंक्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान-प्र॰ तिदानानि॥ ॥अथमासदानानि॥वामने॥माघेमासितिलाःदत्तास्तिलधेनुश्चदानव॥इंधनादयश्चापिमाधवःप्री
णानायतु॥फाल्गुनेव्रीहयोगावोवस्त्रंकृष्णाजिनान्वितं॥गोविंदप्रीणनार्थायदातव्यंपुरुषर्षभैः॥चैत्रेविचित्रवस्त्राणि
॥१९९॥ शयनान्यासनानिच॥विष्णोःप्रीत्यर्थमेतानिदेयानिब्राह्मणेतथा॥गंधाश्चमाल्यानितथावैशाखेसुरभीणिच॥देयानि
द्विजमुख्येभ्योमधुसूदनतुष्टये॥उदकुंभाम्बुधेनुंश्चतालवृंतंसुचंदनं॥त्रिविक्रमस्यप्रीत्यर्थंदातव्यंसाधुभिःसदा॥
उपानद्युगलंछत्रंलवणामलकानिच॥आषाढेवामनप्रीत्यैदातव्यानितुभक्तितः॥घृतंचक्षीरकुंभाश्चघृतधेनुःफ
लानिच॥श्रावणेश्रीधरप्रीत्यैदातव्यानिविपश्चिता॥मासिभाद्रपदेदद्यात्पायसंमधुसर्पिषा॥हृषीकेशप्रीणना
र्थायलवणंसगुडोदनं॥तिलास्तुरंगवृषभंदधिताम्रायसादिकं॥प्रीत्यर्थंपद्मनाभस्यदेयमाश्वयुजेनरैः॥रजतंक
नकंदीपान्मणिमुक्ताफलादिकं॥दामोदरस्यप्रीत्यर्थंप्रदद्यात्कार्तिकेनरः॥खरोष्ट्राश्वतरनागाश्छकटोक्षमजादि
कं॥दातव्यंकेशवप्रीत्यैमासिमार्गशिरेनरैः॥प्रासादनगरादीनिगृहप्रावरणानिच॥नारायणस्यतुष्ट्यर्थंपौषेदे राम॰
यानियत्नतः॥दासीदासमलंकारमन्नंषड्रससंयुतं॥पुरुषोत्तमतुष्ट्यर्थंप्रदेयंसार्वकालिकं॥देवीपुराणे॥मार्गशिरसो ॥१९९॥
त्तमंदद्याद्घृतंपौषेमहाफलं॥रसोन्नंमलवणं॥तिलान्माघेमुनिश्रेष्ठसप्तधान्यानिफाल्गुने॥विचित्राणिचवस्त्राणिचै

त्रेदद्याद्द्विजोत्तम॥वैशाखेद्विजगोधूमाःज्येष्ठेतोयान्नंतखरं॥आषाढेचंदनंदेयंसकर्पूरंमहाफलं॥नवनीतंनभोमासिघ
त्रंप्रौष्ठपदेस्मृतं॥गुडशर्करवर्णा॥ढ्यांस्तुकान्ताश्विनेमुने॥दीपदानंमहापुण्यंकीर्तिकेयःप्रयच्छति॥सर्वान्कामानवा
प्नोतिहैमेगोदमुदाहृतं॥व्रतांतेगांसुभांदद्यात्सवत्सांकांस्यदोहनां॥सप्तगांसत्वजंवत्सरायथेद्विधिनामुना॥देवी
विरंचिंनसूर्यविष्णुंवाथयथाविधि॥स्वमावभुक्षोविधिवत्जपित्वाद्विजोत्तमे॥दातव्यंवीतरागेनुकामक्रोधविवर्जित॥
व्रतांतेमासदानसमाप्तौ॥इतिमासदानानि॥ ॥अथर्तुदानानि॥विष्णुधर्मोत्तरे॥स्नानानुलेपनादीनांवसंतेदानमि
ष्यते॥पानकानांतथाग्रीष्मेछत्राणांतदनंतरे॥शारघत्रसधर्मत्वस्त्राणामपिहेमते॥वह्निदानंनरःकृत्वासूर्यप्रोद
यनंप्रति॥शिशिरेसततंवह्नितर्पयित्वातथातिलैः॥कुल्माषसघृतंदत्वायथाशक्त्याद्विजातिषु॥कायाग्निदीप्तिप्राकाम्यं
याप्नुनाशंचविंदति॥कुल्माषःस्विन्नधान्यं॥यमः॥कृशरंभोजयित्वातुस्वर्चांत्याशिशिरेद्विजान्॥दीप्ताग्नित्वमवाप्नोति
स्वर्गलोकंचगच्छति॥इत्यृतुदानानि॥ ॥अथायनदानं॥स्कांदे॥धेनुंतिलमयींराजन्दद्याद्यश्चोत्तरायणे॥सर्वकामा
नवाप्नोतिविंदतेपरमंसुखं॥विष्णुधर्मोत्तरे॥उत्तरेत्वयनेविप्रावस्त्रदानंमहाफलं॥तिलपूर्णमनड्वाहंदत्वापापैःप्रमु
च्यते॥इत्ययनदानं॥ ॥अथसंवत्सरदानानि॥विष्णुधर्मोत्तरे॥संवत्सरेतुदातव्यांतिलदानंमहाफलं॥पापिसर्वमत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानं यः वाद्विजसत्तम॥ परिसर्वेपरिवत्सरे॥ एवमग्रेपि॥ इदाप्सर्वे च वस्त्राणां धान्यानां चानुसर्वके॥ इद्वत्सरे रजतस्यापि दानं प्रोक्तं महाफलं॥ एते संवत्सरादयः पंच प्रोक्ताः ज्योतिःशास्त्रप्रसिद्धाः॥ इति श्रीमद्विद्वज्जनकृपापात्रीभूतेनानंताचार्येणाविधानपारिजाते निबंधे कालविशेषविहितदानानि॥ छ॥ ॥ अथ प्रकीर्णकदानानि॥ तत्रारोग्यदानं॥ नंदिपुराणे॥ धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः॥ अतस्त्वारोग्यदानेन नरो भवति सर्वदः॥ आरोग्यशालां कुर्वीत महौषधपरिच्छदां॥ विदग्धवैद्यसंयुक्तां भृत्यावसथसंयुतां॥ तथा॥ सम्यगारोग्यशालायामौषधैः स्नेहपावनैः॥ व्याधितं नीरुजीकृत्य सम्यक्करुणाप्रतः॥ प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतः॥ सौरपुराणे॥ रोगिणां रोगशांत्यर्थमौषधं यः प्रयच्छति॥ रोगहीनः सदीर्घायुः सुखी भवति सर्वदा॥ स्कांदे॥ औषधं कमान्नं विविधं सुस्वस्थीकृत्य प्रयत्नतः॥ प्राप्नोति सुमहापुण्यमनंतं क्षयवर्जितं॥ तथा॥ आकाशस्य यथानंतः सुरैरप्युपलभ्यते॥ तद्वदारोग्यदानस्यानंतो विद्यते क्वचित्॥ इत्यारोग्यदानं॥ ॥ अथ रत्नदानं॥ मदनरत्ने विश्वामित्रः॥ यः प्रयत्नेन रत्नानि विप्रेभ्यः संप्रयच्छति॥ स सर्वगुणसंपन्नान्पुत्रान्विंदति नंदति॥ संवर्त्तः समुद्रजानि रत्नानि नरो विगतकल्मषः॥ दत्त्वा विप्राय महतो प्राप्नोति महतीं श्रियं॥ स्कंदपुराणे॥ प्रीतिरत्नफलमुक्तं॥ विद्रुमाणां प्रदानेन रुद्रलोकं व्रजेन्नरः॥ सर्वपातकनिर्मुक्तो दानेन जीवते

॥ लोकमाप्नोति दानेन नरो वज्रस्य वज्रिणः॥ तथा प्रदत्तैर्गोमेदैर्मोदते नंदने वने॥ सर्वे ग्रहाः प्रतुष्यंति पुष्यरागस्य दानतः॥ गारुत्मतैर्मरुत्वंतं नियतं जयति श्रियं॥ श्रियायुक्तः स देवो जायते भुविमिति॥ स्कांद एवं प्रकाशांतरागरत्नदानमुक्तं॥ सर्वेषामेव दानानां रत्नदानं महाफलं॥ सर्वसिद्धिकरं प्रोक्तं मुनिभिर्लोमशादिभिः॥ विधानं तस्य वक्ष्यामि शृणु शौनक यत्नतः॥ इंद्राणीपाह पुराचीर्णमिंद्रस्य प्रियकाम्यया॥ शापादिंद्रे पुरा नष्टे बृहस्पतिसमीरितं॥ पुलोमजोवाच॥ बृहस्पते सुराचार्य ऋषिपत्नीसमागमात्॥ स ह स्वभगतां प्राप्य लज्जितः सुरनायकः॥ मेरौ सरसि तापाव्ये पुष्करे च समाश्रितः॥ तत्र छिन्नः प्रवसति नहुषो नाम लोक्षति॥ इंद्रत्वं प्रापितो देवैः किं कार्यं व तमे प्रभो॥ बृहस्पतिरुवाच॥ सुरेशः स्वापराधेन तप्तः कृते वसति ध्रुवं॥ तद्दोषपरिहारार्थं दानमेकं समाचर॥ अश्वमेधः क्रतुश्रेष्ठः ज्योतिः श्रेष्ठो दिवाकरः॥ द्विपदां ब्राह्मणाः श्रेष्ठा देवश्रेष्ठो यथा हरिः॥ स्वर्नदीसरितां श्रेष्ठा शास्त्रश्रेष्ठा यथा श्रुतिः॥ दानानामुत्तमं दानमिदं वक्ष्ये पुलोमजे॥ मुक्ताफलमिति ख्यातं ब्रह्मणा॥ श्रेष्ठो देवश्रेष्ठो यथा हरिः॥ स्वर्नदीसरितां श्रेष्ठा शास्त्रश्रेष्ठा यथा श्रुतिः॥ दानानामुत्तमं दानमिदं वक्ष्ये पुलोमजे॥ मुक्ताफलमिति ख्यातं ब्रह्मणा नारदाय च॥ सर्वपापक्षयकरं संपत्प्रदायकं बहु॥ नहुषश्च विनश्यति॥ तत्रोपायस्त्वया कार्यो नहुषस्य प्रणाशने॥ मुनिभिर्विहितं यानं समाख्याय च मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिति॥ नान्यथा नौ हिंसंगं स्यादिति वाच्यो हि सत्वया॥ ऋषिभिः स्थापितो पापाद्योगतिमनुत्तमां॥ पायात्सुरेशः स्व
पदमिति मे निश्चितो मतिः॥ इंद्राण्युवाच॥ कथं विधेयं तद्दानं कस्मिन्काले द्विजोत्तम॥ कश्चास्य विधिरुद्दिष्टस्त
त्सर्वं ब्रूहि मे गुरो॥ बृहस्पतिरुवाच॥ शुभे काले शुभे देशे चंद्रताराबलान्विते॥ व्रतानामुत्तमं कार्यं श्रीमुक्ताफलना
मकं॥ स्वस्तिवाच्य द्विजाः पूर्वं कर्म संकल्पपूर्वकं॥ मनोरथानां संसिध्यै सर्वारिष्टनिवृत्तये॥ आचरिष्ये व्रतमिदं
श्रीमुक्ताफलसंज्ञितं॥ इति संकल्पमंत्रः॥ सश्रीकं विष्णुमावाह्य शंखचक्रगदांबुजैः॥ चतुर्भुजं तार्क्ष्यसंस्थं प्रद्यु
म्नसहितं विभुं॥ प्रतिमायां सुवर्णस्य पूजयेदुपचारकैः॥ पुष्पमंडपमध्ये च छत्रचामरसंयुते॥ एकादशांश्च संपूज्य
द्याद्द्वंपादानमाचरेत्॥ मुक्ताफलानि प्राग्दद्यात्त्रयस्त्रिंशतिसंख्यया॥ यद्वा षोडशसंख्याकं स्ववित्तस्यानुसारतः॥
अतो मुक्ताफलं दानमित्याहुर्मुनयस्त्विदं॥ द्वितीये हीरकं दद्याद्देवमे शुभानने॥ तृतीये चेंद्रनीलं स्यात्पद्मरागं तु च
तुर्थके॥ प्रवालं पंचमे प्रोक्तं षष्ठे वै पुष्परागकं॥ गारुत्मतं सप्तमे तु वैडूर्यं चाष्टमे स्मृतं॥ प्रवालेन नवमे दद्याद्दशमे व एम॰
ज्रसंज्ञितं॥ एकादशे पंचरत्नं द्वादशे नवरत्नकं॥ एवं द्वादशमासेषु देयं पूर्वविधानतः॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्य ॥२०१॥
वस्थिताः॥ तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः॥ इति मंत्रेणायो दद्यात्सर्वोक्तविधिपूर्वकं॥ क्षेत्रे कालांतरे वापि सर्वान्का

मानवाप्नुयात्॥ एवमेव फलानां तु च्युतादीनां विधिः स्मृतः॥ दक्षिणाधान्यसहितं सर्वं देयं न चान्यथा॥ सूत उवाच॥ बृहस्पतेर्मु
खाद्देवं श्रुत्वेंद्राणी कृतं व्रतम॥ श्रीमुक्ताफलसंज्ञं तु सर्वसिद्धिप्रदायकं॥ रत्नांतरप्रदाने तु तच्छब्दं प्रयोजयेत्॥ समस्तरत्नदाना
नामशक्तौ शक्तितो वदेत्॥ अभीप्सितं यथेंद्राण्या व्रतादस्माद्दशस्य मे॥ तथान्येषामनुष्ठानाद्व्रतस्यास्य भविष्यति॥ इति मु
क्ताफलादि दानानि॥ ॥अथालंकारदानं॥ ब्रह्मवैवर्ते॥ द्विजातिभ्यस्तु यो दद्यादलंकारान्समुज्वलान्॥ सोऽलंकृतः स्वर्गलो
ले केलीकोऽप्सरसां गणैः॥ अलंकारप्रदानेन सुरूपः सुभगो भवेत्॥ तथालंकारदानेन दीर्घायुश्चैव विंदति॥ अलंकारास्तु
नानाविधाः॥ ग्रंथगौरवभीत्या न लिख्यते॥ इत्यलंकारदानं॥ ॥अथ वस्त्रदानं॥ नंदिपुराणे॥ वस्त्रं यश्चार्थिने दद्यात्सु
भं चापि यदृच्छया॥ स भवेद्रूपवान्श्रीमान्बृहस्पतिपुरे वसेत्॥ विष्णुधर्मोत्तरे॥ वासो हि सर्वदैवत्यं सर्वप्रायोऽप्युच्यते॥ वस्त्रप्रदा
नात्तु वेषः स्याद्रूपद्रविणसंयुतः॥ शुक्लौ लाववणसो भार्यैर्दिवि रागश्च तथा द्विज॥ तथा॥ दत्वा कार्पासिकं वस्त्रं स्वर्गलोके म
हीयते॥ दत्वा सरोमं तत्रापि फलं दशगुणं लभेत्॥ आविकं वसनं दत्वा गंधर्वलोकमाप्नुयात्॥ क्षौमं दत्वा चांगिरसः क्षे
मं दत्वा बृहस्पतेः॥ वस्त्रं लोकमाप्नोति कुशकौशेयवाससी॥ कृमिजं च तथा दत्वा सोमलोके महीयते॥ अग्निष्टोममवा
प्नोति दत्वैव मृगलोमिकां॥ तथा॥ सर्वदेवत्वः प्रोक्तो यतः सर्वत्र वस्त्रवान्॥ अग्निप्रमाप्नोति धर्मज्ञास्तद्वितस्यादिदीयते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० अथ भविष्यपुराणे॥ यो वस्त्रं ब्राह्मणे दद्याद्देहं तच्च महाधनं॥ स हेलिलोकमासाद्य वसते त्रिदशैरपि॥ आदित्यपुराणे॥ व
॥२०२॥ स्त्रं वस्त्रप्रदानेन चन्द्रलोकं प्रपद्यते॥ नंदिपुराणे॥ वासांसि तु विचित्राणि सारवंति शुभानि च॥ स्नापितानि त्रिवेदाढ्ये के
शानि नवानि च॥ यावत्तद्वस्त्ररूपाणि परिमाणं विधीयते॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ स्नापितानि क्षालिता
नि॥ विकेशानि नरकेशाररहितानि॥ वाराहे॥ क्षौमं च शणं यो दद्यात्सते शणानि वा च किरौ॥ कार्पासजानि वा दद्याद्धृतानि वि
त्तानुसारतः॥ तद्वत्सयावंत तंतवस्तत्र परमाणवः॥ तावद्वर्षसहस्राणि विष्णुलोके महीयते॥ देवीपुराणे॥ अंगं शैवीजनैर्वा
पि वस्त्रैरभ्यर्च्य शैलजां॥ सं भक्ष्याभरणैः राजत्वं चक्रवर्ति त्वमाप्नुयात्॥ नंदिपुराणे॥ उष्णीषदायिनो मर्त्या जायंते मुकुटोज्ज्वलाः
॥ विस्तीर्णा राजवंशेषु सितछत्राग्रलक्षणाः॥ नारदीये॥ निक्षिप्तेष्वेव दीनम्य्पोः शीतवातमहातपैः॥ आर्द्रितेभ्यः करुणया याव
त्स्वमोर्णां ददाति यः॥ न तस्य मुक्तं तव कुशाक्यं ते त्रिदशैरपि॥ आधिव्याधिविनिर्मुक्तः क्षो क्षयं सुखमश्नुते॥ इति वस्त्रदा
नानि॥ ॥ अथ शय्यादानं॥ महाभारते॥ शय्यां मास्तरणोपेतां सुप्रछादनसंयुतां॥ प्रदद्याद्यस्तु विप्राय श्रणु तस्या
पि यत्फलं॥ सुरूपः सुभगः श्रीमान् स्त्रीसहस्राभिसंवृतः॥ दशावर्षसहस्राणि स्वर्गलोके महीयते॥ स्कांदे रेवाखंडे॥ श राम०
य्यां दद्यात्प्रयत्नेन श्लक्ष्णां तूलवतीं शुभां॥ प्रछादनपटैर्युक्तां गंधधूपाधिवासितां॥ तस्यां संस्थापयेद्धेमं हरिं लक्ष्म्या सम ॥२०२

न्वितं॥ उच्छीर्षके न्यस्तं कलशं परिकल्पयेत्॥ विज्ञेयः पादुकश्रेष्ठ सनिद्रा कर्ता बुधैः॥ तांबूलकुंकुमक्षोदक
र्पूरागरुचंदनं॥ दीपको पानहच्छत्र चामरासनभोजनं॥ पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि॥ शयान
स्य भवति यदन्यदुपकारकं॥ भृंगारकरकाद्यं तु पंचवर्णवितानकं॥ शय्यामेवं विधां कृत्वा ब्राह्मणाय प्रपा
दयेत्॥ सपत्नीकाय संपूज्य पुराणेन्हि विधिपूर्वकं॥ प्रागग्नितामेमधीवास्य प्रातर्होमं समाचरेत्॥ पुरुषसूक्तेन होतव्यं
तिलाज्यैर्यवमिश्रितैः॥ स्नातः शोभनं रचैवं ततः शय्यां प्रदापयेत्॥ दानमंत्रः॥ यथा न कृष्णशयनं शून्यं सागरजा
तया॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च॥ तथा ममाप्यशू
न्या स्तु शय्या जन्मनि जन्मनि॥ इति॥ दत्त्वैवं तत्सम मल्लं प्रणिपत्य विसर्जयेत्॥ एवं शय्याप्रदानस्य विधिरेष प्रकी
र्तितः॥ स्वर्गे पुरंदरगृहे सूर्यपुत्रालयेथवा॥ सुखं वसत्यसौ जंतुः शय्यादानप्रभावतः॥ मृतस्यैकादशाहेपि विधि
रेष प्रकीर्तितः॥ दशाति पदिक्षमीत्थं बाधवो बांधवे मृते॥ विशेषं चात्र राजेंद्र कथ्यमानं निशामय॥ तेनापि भुक्तं यत्कि
चित्सर्वं गृहे धृतं॥ तत्फात्रलग्नं च तथा वह्नवाहनमाजनं॥ यद्यदिष्टं च तस्यापि सीत्तत्सर्वं परिकल्पयेत्॥ तमेव पुरु
षं हैमं तस्यां संस्थापयेत्तदा॥ पूजयित्वा प्रदातव्या मृतशय्या यथोदिता॥ एवं कृते मृतो जातु यमलोकं न गच्छति॥ हेमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान०प्र० द्रोपयासः॥सुगंधिविचित्रास्तरणोपपन्नंदद्याच्छयनंद्विजाय॥रूपान्वितांपक्षवतीमनोज्ञांतथाप्यमयत्नोयनतांलभे
॥२०३ त्सः॥विष्णुसंहितायांच॥शय्यादानंचयोदद्यात्सर्पापिभ्रष्णुविस्तर॥सर्वकालेषुदातव्यातथापुण्यदिनेषुच॥गजदंतैः
प्रबालैर्वासुवर्णरजतेनवा॥कार्यागात्राणिपादश्चवल्लभ्यश्चसलक्षणाः॥अलाभेपिचकर्तव्यातुल्याकाष्टमयी
शुभा॥संध्याभ्रपटलाकारैराकीर्णापरितःशुभैः॥शिरोधरैःसवीतानैःप्राकारैर्वस्त्रनिर्मितैः॥मणिसौवर्णपात्रैश्च
रौप्यैस्ताम्रमयैश्चसंयुतैः॥फलमूलैःसगंधैश्चतांबूलाद्यैःसुविस्तरैः॥दर्पणैश्चपदत्राणैर्नानाद्रव्यैर्विभूषणैः॥
चतुष्कोणेषुसंस्थाप्ययथाशक्तिपुविशिष्टिरा॥घृतकुंकुमगोधूमपूर्णपात्रेजलस्यतु॥शय्यांसंपूज्ययत्नेनमङ्गलो
मत्सरापराः॥कृतांजलिपुटोभूत्वाकुर्याच्चस्यांप्रदक्षिणां॥नारायणायदेवेतुप्रणाम्यचतुर्दिशं॥ब्राह्मणायप्रद्दि
द्यात्श्रुताध्ययनशीलिने॥तथात्मज्ञानविदुषेशय्यांदद्याद्विचक्षणः॥तस्यदानस्यपुण्येनविमानंकलकोज्ज्वलं॥
नानापुरुषसंकीर्णनानापुष्पसमन्वितं॥नानादिव्याप्सरःसेव्यंनानारत्नैःसमन्वितं॥नानाद्रव्योपसंयुक्तंविमानम दान०
धितिष्ठति॥अथाइंद्रपुरंगच्छेत्सेव्यमानोप्सरोगणैः॥षष्टिवर्षसहस्राणिक्रीडयित्वायथासुखं॥इंद्रलोकात्सस्त्रिष्ट ॥२०३॥
इहलोकेनपोभवेत्॥षष्टियोजनविस्तीर्णस्वामीभवतिमंडले॥धर्मज्ञोजितमत्सरश्चतेजस्वीरूपवांस्तथा॥शय्याप्रद

नममलंतवपांडुपत्रसंकीर्णितंसकलसौख्यविताननद्धं॥योवैददातिविधिवत्स्वयमेवनाकेकल्पंविकल्परहितःसवि
भातिमर्त्यः॥इतिशय्यादानं॥ ॥अथदेवशय्यादानं॥शिवधर्मे॥हंसतूलसमायुक्तांमहीरवप्रामलंकृतां॥सर्वोपकर
णोपेतांशिवशय्यांनिवेदयेत्॥शिवदेवीसमायुक्तांपौष्पीकृत्वानिवेदयेत्॥शिवदत्तानार्थतत्वज्ञेआचार्येवानिवेद
येत्॥तत्तूर्णतूलवस्त्राणांपरिसंख्यातुयावती॥तावद्वर्षसहस्राणिरुद्रलोकेमहीयते॥विष्णवेप्येवमेवस्यात्तच्छय्या
दानंमहाफलं॥इतिदेवशय्यादानं॥ ॥अथासनदानं॥लिंगपुराणे॥आसनंशयनंचैवयोददातियशस्विने॥
सर्वेषुभूतेषुतस्यदुःखंनविद्यते॥स्कांदे॥आसनंयःप्रयच्छेत्तसंवीतंब्राह्मणायवै॥सराज्यस्थानमाप्नोतितेजस्
स्वीविगतज्वरः॥आदित्यपुराणे॥सुगंधिचित्राचित्राभरणोपशोभितंयस्त्वासनंवेदविदेप्रदद्यात्॥ग्रामाधिप्रसंस
लभेतशीघ्रंकुलेमहल्लभतेसमग्रं॥इत्यासनदानं॥ ॥अथदर्पणस्यदानं॥मार्कंडेयपुराणे॥दर्पणंयोनरोद
द्यान्निर्मलंचद्विजातये॥सचंद्रलोकेमासाद्यमोदतेशरदांशतं॥नंदिप्रोक्ते॥शिवस्यपुरतोदद्याद्दर्पणंचाहनिर्म
लं॥पर्यंतशोभितंकृत्वाश्वेतमाल्यैःसुचंदनैः॥चंद्राभुनिर्मलःश्रीमान्सुभगःकामरूपधृक्॥कल्पायुतसहस्रा २
णिरुद्रलोकेमहीयते॥ब्रह्मलोकेमहीयते॥पुराणे॥चंद्रमंडलसंकाशंनक्षत्रेविष्णुदैवते॥दद्याद्दर्पणंपुण्यका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेवाविष्णुसंपरूपमन्वितः॥दर्पणं यो नरो दद्यात्तत्त्वकूचंदनविभूषितं॥रूपवान्सुभगः श्रीमान्ज्ञानवान्जायते नरः॥इति
दर्पणदानं॥ ॥अथव्यजनदानं॥भविष्यपुराणे॥तालवृंतं द्विजेभ्यस्तु यः प्रयच्छति भक्तितः॥स दिव्यभोगसंभोगसं
योगः सर्वदा भवेत्॥महातपपरिश्रांतिघर्मभिर्मलनक्षमं॥न तालवृंतपवनादपरं सुखकारणं॥अतो दद्यात्तालवृं
तं घर्मश्रमनिवृत्तये॥भारतेपि॥यो ददाति द्विजाग्र्येभ्यो व्यजनं श्रमनाशनं॥स नंदनामोदमोदमानमनानरः॥वसेद
शेषकल्पांतपर्यंतं स्वर्गलोकके॥इति व्यजनदानं॥ ॥अथचामरदानं॥महाभारते॥यस्तु दद्याद्द्विजाग्र्येभ्यो भक्त्या
मरमुत्तमं॥स भूपत्वमवाप्नोति निःशेषवनिमंडले॥वायुपुराणे॥चामरं चामरेशाय यः शिवाय निवेदयेत्॥स सर्वका
मसंपूर्णः स्वर्गलोके ततः वसेत्॥मायूरं चामरं योपि विष्णवे विनिवेदयेत्॥स विमानवरारूढो दीप्यते सुरसंगणैः॥
इति चामरदानं॥ ॥अथवितानस्य॥कालिकापुराणे॥चंद्रोदयं सुविस्तीर्णं वर्णकैर्मिश्रितं तथा॥प्रलंबिमुक्तास्तब
कैः शोभितं श्लक्ष्णमुत्तमं॥सुरक्तपट्टसूत्रादिबद्धसंबद्धचत्वरं॥सर्वतोभद्रमुख्यानां मंडलानां विभक्तिभिः॥लिखित
मिश्रपुरतो महाविस्मयकारकं॥एवंविधं वितानं यो विधायाथ द्विजन्मने॥शिवाय विष्णवे वाथ पुराणे प्रतिपादये
॥स समुद्धरते नूनमात्मनः पुरुषत्रयं॥स्वयं शिवपुरे रम्ये भोगान्भुक्त्वा मनोरमान्॥कुमारागत्य लोकेस्मिन्सुखी ज्ञानी

धनी भवेत्॥इति वितानदानं॥ ॥अथगंधस्य॥संवर्त्तः॥गंधान्पानामरणाघ---पः प्रयच्छति॥स सुगंधो युक्तो
सौपत्रपत्रोपजायते॥तत्र सुगंधि देहत्वं गंधदानादवाप्नुयात्॥मृगदर्पप्रदानेन यशस्वी भुवि जायते॥यक्षकर्द
मदानेन साम्राज्यं प्राज्यमश्नुते॥इति गंधदानं॥ ॥अथतांबूलदानस्य॥भविष्ये॥तांबूलं यो नरो दद्यात्त्रस हनियमा
न्वितः॥देवेभ्योथ द्विजातिभ्यः स महाभाग्यमश्नुते॥इह संसारिणां नृणां मनुष्यत्वं सुदुर्लभं॥तांबूलदानान्नूनं तां
मनायासेन ज्ञाते॥ब्रह्मांडे॥तांबूलमुज्वलं दद्याद्यो द्विजेभ्यः समाहितः॥शिवाय विष्णवे वाथ नाकलोके महीयते॥
विष्णुधर्मोत्तरे॥तांबूलस्य प्रदानेन सौभाग्यमपि विंदति॥दत्वा जातीफलं विप्रे सफलां विंदते क्रिया॥मुखवासप्रदाने
न मुखसौगंध्यमाप्नुयात्॥इति तांबूलदानं॥ ॥अथपुष्पस्य॥महाभारते॥मनो ह्लादयते यस्माच्छ्रियं चापि ददायत
॥तस्मात्सुमनसः प्रोक्ता नरैः सुकृतकर्मभिः॥देवताभ्यः सुमनसो यो ददाति नरः शुचिः॥स सर्वकामानाप्नोति प्रेत्य
स्वर्गे महीयते॥नंदिपुराणे॥धूपदः सुरभिर्नित्यं पुष्पदः सुभगः सदा॥तस्माद्देवाय विप्राय दातव्यं तेभ्य स्वार्थिभिः॥
लिंगे॥पुष्टिर्भवेत्सदा कालं प्रदानात्कंधमालयोः॥देवता पुष्पदानेन जायते श्री समन्वितः॥ऊर्ध्वां गतिमवाप्नोति य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान०प्र० स्वधूपप्रदो नरः॥ विश्वामित्रः॥ देयाः सुमनसो नित्यं नरैः पुण्यफलार्थिभिः॥ किमस्ति दैवतं तादृक् यत्पुष्पैर्न तु
॥२०५॥ ष्यति॥ इति पुष्पदानं॥ ॥अथ गीतस्य॥ नंदिपुराणे॥ यो गानवाद्यं दद्यात्तु ब्राह्मणाय सुबुद्धिमान्॥ सगंधर्वपु
रं गच्छेद्वसेत्तत्र युगत्रयं॥ स्कांदे॥ गायन्त्यातिपिबन्त्यातिखादन्त्यातिगृहे तथा॥ यो भोजनस्य वेलायां विप्राणां गे
यमाचरेत्॥ विष्णुधर्मोत्तरे॥ देवतायतने यस्तु ब्राह्मणानां गृहेषु वा॥ गानं गीतस्य मधुरं गंधर्वाणां पुरे वसेत्॥ आ
तोद्यविधया राजन् प्रीणयन्द्विजदेवताः॥ स स्वर्गलोकमासाद्य देवतैर्विनोद्यते॥ देवताग्रे द्विजाग्रे वा यो नित्यं सं
म्यगाचरेत्॥ विनोदयति तं स्वर्गे नित्यमप्सरसां गणाः॥ यो गीतनृत्यवाद्यानि मूल्यं दत्वा तु कारयेत्॥ स तत्र भवने ति
ष्ठेद्यावदाभूतसंप्लवं॥ यो वापि मुखवाद्येन विनोदयति देवता॥ स धौतकल्मषमलः स्वर्गं याति न संशयः॥ वचनेन
प्रियेणापि यः प्रीणयति मानवान्॥ विमत्सरमना भक्त्या यः स्तौति गुणिनो गुणान्॥ स्वीयैः परकृतैर्वापि यः स्तोत्रैः स्तौ
ति देवतां॥ तस्य पुण्यवतः पुण्यमगण्यं केन गण्यते॥ तत्तु॥ शंखचक्राद्यंकितं च नृत्यगीतादिकं तथा॥ एकजातेरयं दान०
धर्मो न सतां स्याद्द्विजन्मन इति॥ तत्तु वृथा हस्यर्थत्वेनाधिनकर्तव्यमित्येतत्परं॥ विहिते निषेधानवकाशात्॥ अतएव॥ ॥२०५॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रोथ प्रतिलोमजः॥ शिवस्य विष्णोः प्रीत्यैव गानान्नृत्यान्दिवं व्रजेदिति विष्णुधर्मोत्तरेऽक्तं॥ इति
गीतदानं॥ ॥अथ छत्रोपानहदानं॥ बृहस्पतिः॥ असिपत्रवने मार्गे क्षुरधारासमन्विते॥ तीक्ष्णातपस्तातरति छ
त्रोपानत्प्रदो नरः॥ आदित्यपुराणे॥ निदाघकाले वर्षे वा छत्रं यः संप्रयच्छति॥ नास्य कश्चिन्मनोदाहः कदाचिद
पि जायते॥ भारते॥ उपानहौ प्रयत्नाद्यो ब्राह्मणेभ्यः प्रयच्छति॥ मर्दते कंटकान्सर्वान्विषमान्संतरत्यपि॥ शकटं द
म्यसंयुक्तं रत्नं तत्र भवति तेन वै॥ यानं चाश्वतरीयुक्तं तस्य स्वर्गे विधीयते॥ उपतिष्ठति कौंतेय रौप्यकांचनशोभि
तं॥ तत्रैव सत्यै राजन्मद्यग्रहपदेशे॥ तस्मात्तु षष्ठविप्रेभ्यश्छत्रोपानहमुत्तमं॥ धर्मस्तु सुमहान्भावी न संज्ञास्ति वि
चारणा॥ देवलः॥ छत्रं दद्यात्प्रयायाति यानेनोपानहमुत्तमं प्रदः॥ इति छत्रोपानहदानं॥ ॥अथ पात्रस्य॥ स्कां
दे॥ भाजनं यः प्रयच्छेत्तु हैमं रत्नविभूषितं॥ सोप्सरःशतसंकीर्णो विमानैर्दिवि मोदते॥ राजतं यः प्रयच्छेत विप्रेभ्यो भाज
नं शुभं॥ ताम्रं वा भाजनं दद्याद्ब्राह्मणेभ्यो विशेषतः॥ स भवेद्यक्षराजस्य प्रभुर्बलसमन्वितः॥ ब्रह्मपुराणे॥ औदुंबरा
णि पात्राणि यो दद्यादायसानि वा॥ महतीं वृद्धिमाप्नोति तुले भांत्रिदशैरपि॥ अत्रिः॥ श्राद्धकालेषु यो दद्याद्भाजने
षु पानयोः॥ तस्यैव विपुलं पुण्यं पंचाश्वदानफलं लभेत॥ कालिकापुराणे॥ रौप्यं क्षीरान्वितं पात्रं दधिपूर्णं च राजते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र द्विजेभ्यो यः प्रयच्छेत्तत्सप्तगुणमनंतकं॥ वायवीये॥ स्वर्णास्त्यमयं भांडं देवतार्थे ददाति यः॥ कुबेरलोकमासाद्य
॥२०६॥ मोदते बहुवत्सरं॥ इति पात्रदानं॥ ॥ अथापाकदानं॥ भविष्योत्तरे॥ भगवानुवाच॥ आपाकाख्यं महादानं
कथयामि युधिष्ठिर॥ दत्तेन येन कामानां पुमान्भवति भाजनं॥ ग्रहताराबलं लब्ध्वा कुंभकारं प्रपूजयेत्॥ वा
सोभिर्भूषणैश्चैव पुष्पैश्चागरुचंदनैः॥ ब्रूयात्तं च दशामाम्यं यथा तुष्टोभिजायते॥ त्वं मे भांडानि पात्राणि गुरू
णिगुरूणि च लघूनि च॥ अलिंजराः प्रतिघटाः मंथनीकउहानि च॥ एवमन्यच्च यत्किंचिदुपभोगं भवेद्गृहे॥ सं
पादय महाभाग विश्वकर्मा त्वमेव च॥ भार्गवोपि प्रयत्नेन भांडोघे रचिते शुभे॥ आपाकं कल्पयेद्देवं विधिदृष्टेन क
र्मणा॥ भार्गवः कुंभकारः॥ सहस्रमेकं भांडानां स्थापयित्वा विचक्षणः॥ संध्याकाले मथित्वा तु दध्ना दध्यहुता
शनं॥ रात्रौ जागरणं कुर्यात्गीतमंगलनिस्वनैः॥ ततः प्रभाते विमले तात्वानि दीपितत्वानैः॥ रक्तवस्त्रैः समाधाय पुष्प
मालाभिरर्चयेत्॥ यजमानस्ततः स्नात्वा भुक्तांबरधरः शुचिः॥ हेमरौप्याणि भांडानि ताम्रलोहमयानि च॥ परितः स्था
पयित्वा च स्वशक्त्या चापि षोडश॥ तानि च त्वारिम्यसेत्सर्वादितः क्रमात्॥ पूजयित्वा प्रयत्नेन कृत्वा चापि प्रदक्षिणां॥ राम॰
नार्यश्चाविधवास्तत्र समानीय प्रपूजयेत्॥ प्रदक्षिणां ततः कृत्वा मंत्रेणानेन मंत्रयेत्॥ आपाक ब्रह्मरूपोसि भांड ॥२०६॥

नीमानि जंतवः॥ प्रदानात्तेन प्रजा पुष्टिः स्वर्गश्चास्तु ममाक्षयः॥ भांडरूपाणि पान्यत्र कल्पितानि मया किल॥ भ
क्त्यानुरूपाणि उपतिष्ठंतु तानि वै॥ अत्रेदं दानवाक्यं॥ ॐ अद्येत्यादिकीर्तनांते इममापाकं नानाभांडनिर्मितं य
थाशक्तिहेमादिपात्रसहितं विष्णुदैवतं सौभाग्यावैधव्यसर्वगुणोपेतगृहप्राप्तिपुत्रपौत्रसंततिसदाभर्त्र
वियोगसमसुखोत्तमरूपावाप्तिकामोहं नानाजनेभ्यः समुत्सृजामि तुत्सृज्य यथाशक्त्या सुवर्णादिदक्षिणां द
या॥ अथवा योषद्धीभांडेनतस्मेतत्प्रतिपादयेत्॥ स्वेच्छया चैव गृह्णंतु न निवार्यस्तु कश्चन॥ अनेन विधिना
यस्तु दानमेतत्प्रयच्छति॥ विश्वकर्मा भवेत्तुष्टस्तस्य जन्मत्रयं भवेत्॥ नारी च दत्वा सौभाग्यमतुलं प्रतिपद्यते॥
गृहं सर्वगुणोपेतं सस्मित्रजनैर्युतं॥ अवियोगं सदा भर्त्रा रूपं चात्युत्तमं लभेत्॥ प्रदानमेतत्त्रिविधं प्रकारे
णात्तवानघ॥ विद्यते बहुभिर्भेदैर्भिन्नैरेषा नरोत्तम॥ निष्पाद्य भांडनिचयं प्रवरं प्रयत्नादापाकदानमिह या कुरु
ते वरस्त्री॥ सा पुत्रपौत्रपशुहर्म्यसुखानि लब्ध्वा प्रेत्यापि भर्तृसहिता सुखिनी सदास्ते॥ इत्यापाकदानं॥ ॥ अथान्न
दानं॥ स्कांदे॥ अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः॥ तस्मादन्नप्रदानेन सर्वदानफलं लभेत्॥ धर्मार्थकाममो
क्षाणां देहः परमसाधनं॥ स्थितिस्तस्याप्यन्नपानाभ्यामतस्तत्सर्वसाधनं॥ अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ दान॰प्र॰ यं॥तस्मादन्नसमंदानंनभूतंनभविष्यति॥ब्रह्मवैवर्ते॥तस्मात्सर्हदेयमन्नमेभिविचक्षणैः॥अपरीक्ष्यैवसर्वेभ्योइति
स्वायंभुवशासनं॥तथा॥आममन्नंगृहस्थाययेनैवपक्वंकदाचन॥नाध्वगायनिषिद्धंतद्दितिदेवोब्रवीद्धरिः॥श्राद्ध
॥२०७॥ पत्तेगृहस्थायदेयमन्नंविशेषतः॥विष्णुधर्मोत्तरे॥नात्रपात्रपरीक्षास्यान्नकालनियमस्तथा॥नचदेशःप
क्ष्योत्रदेयमन्नंसदैवतत्॥श्वभ्यश्चश्वपचेभ्यश्चपतितेभ्यस्तथैवच॥कृमिकीटपतंगेभ्योदेयमन्नंसदैवतु॥
यस्माद्वेनोदरस्थेनब्राह्मणोम्रियतेद्विजाः॥तांतुयोतिमवाप्नोतिनात्रकार्याविचारणा॥भक्ष्यदःस्वर्गमाप्नोति
शक्रलोकंतुभोज्यदः॥लेह्यदोप्सरसांलोकंवसूनामपिचोष्यदः॥वारुणांल्लोकमाप्नोतितथापानप्रदोनरः॥
परमान्नप्रदानेनतृप्तिर्भवतिशाश्वती॥ब्रह्मांडे॥यस्मादन्नपानपुष्टांगंकुरुतेपापसंचयं॥अन्नप्रदातुस्तार्धकर्तुश्चा
र्द्धनसंशयः॥ब्रह्मवैवर्ते॥सर्वोपस्करमनुष्येणन्यायेनात्रमुपार्जितं॥कार्यंतस्यान्नप्रसादत्तदेवपरमागतिरन्नमस
स्वन्नंसमश्नातिब्राह्मणानांशतंसदा॥हृष्टेनमनसादत्तंनसतिर्यग्गतिर्भवेत्॥ब्राह्मणानांसहस्राणिदशभोज्य
नरर्षभ॥नरोधर्मात्प्रमुच्येतपापेभ्योपिरतःसदा॥भोजयित्वाप्रशान्नंच॥नानाविधैर्महाभक्ष्यैःशिवलोकेमहीय दान॰
ते॥देवलः॥मृष्टमन्नंस्वयंभुक्त्वापश्चात्कदन्नानंलघु॥ब्राह्मणान्भोजयेन्मर्त्यांनिरयेचिरमावसेत्॥गृहस्थोभिर ॥२०७॥

भुक्तभिक्षायति॥ग्रासमात्रान्नवेद्विश्वानित्पायत्रदीयते॥तद्गृहंगृहमप्यत्तुश्मशानमिवदृश्यते॥व्यासः॥यत्त्वेकं
तेयाविषमंददातिस्नेहरूपाचायदिवार्थहेतोः॥देवैस्तद्दृष्टंमुनिभिःप्रगीतंब्रह्मसामुनयोवदंति॥इत्यन्नदानं
॥ ॥अथामान्नदानं॥ ॥अथामान्नदानं॥विष्णुधर्मोत्तरे॥धान्यानामुत्तमंदानंकथितंद्विजपुंगवाः॥धान्येभ्यो
पिवरंदानंरक्तशालेःप्रकीर्तितं॥षष्टिकान्नप्रदानेनलोकंनैऋतकंलभेत्॥स्वीनचशाकंदत्वावारुणांलोकमा
प्नुयात्॥वायव्यंचमसूरामिराजमाषामिषानतंदं॥धानंदंकौबेरं॥अन्येषांविविधान्यानांदानात्स्वर्गमवाप्नुया
त्॥इक्षुमन्नेकोयोर्दानात्संसौभाग्यमाप्नुयात्॥कलमानांप्रदानेनचान्द्रलोकेमहीयते॥काष्ठशालिंतथा
दत्वास्वल्पकायांसमोदते॥रक्तशालिंततोदत्वासूर्यलोकेमहीयते॥दत्वातथासुगंधाढ्यंगंधर्वैःसहमोदते॥
यवप्रदानेननरःशाक्रलोकेमहीयते॥तथागोधूमदानेनवसूनांलोकमाप्नुयात्॥प्रियोभवतिलोकस्यप्रियंगु
पःप्रयच्छति॥ददातिपस्तस्येपामोकांतस्यप्रीयातिदेवताः॥मुद्गदःशक्रलोकंतुयमलोकंतुमाषदः॥यथेष्टंलो
कमाप्नोतितथाविप्रास्तिलप्रदः॥पक्वान्नदानात्फलंदिविलोकेभुक्त्वान्नमन्नंहितदापमस्यात्॥यज्ञातियज्ञेभ्यत
तोद्विजेंद्रास्तस्मात्सर्वापतंमप्रदिष्टं॥इत्यामान्नदानं॥ ॥अथोदकदानं॥स्कांदे॥त्रपाणामपिलोकानामुदकंजीवनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्दा॰न॰प्र॰ स्मृतं॥पवित्रममृतंयस्मात्तद्देयंपुराणमिछता॥भविष्योत्तरे॥ग्रीष्मेचैववसंतेचपानीयंयःप्रयछति।वन्तुंजिव्हासहस्रे
॥२०८॥ णातस्यपुण्यंनशक्यते॥नंदिपुराणे॥योपिकल्पथातोयजलयानंप्रयछति॥सनित्यंफल्गुवसतिस्वर्गेयुगशतंन
रः॥गारुडे॥मूल्येनक्रीत्वाघर्मांतेजलदानंप्रयछति॥प्रयातिचंद्रसालोक्यंभुममालोभ्युकाश्रतः॥क्षीरकुल्यास्तमायांति
तथायांतिमधुस्रवाः॥घृतदध्युदकास्तस्यसमुद्रावशवर्तिनः॥देवलः॥संतोयांपथिकेविप्रेयोददात्करपात्रिकां॥कलंसकूप
खातस्यनूनमाप्नोतिमानवः॥महाभारते॥पिपासयानम्रियतेसोयच्छदम्भ्रजायते॥नैवामुयात्क्व्यसनंकरकाम्भःप्रयछ
ति॥आदित्यपुराणेपि॥योददातिघटीपात्रंकुंडिकांकरकांस्तथा॥तथान्नोस्तुतथाघर्मेलभतेशीतलंजनं॥ ॥अथध
र्मघटदानं॥विष्णुः॥शीतलेनसुगंधेनवारिणापूरितंघटं॥शुक्लंचंदनदिग्धांगंपुष्पमालोपशोभितं॥स्थापयेन्नभ्रते
कुर्यात्छत्रावतस्यचोपरि॥उपानछत्रसंयुक्तंधर्मात्म्यंकल्पयेद्घटं॥पुष्पाक्षतंगृहीत्वातुइमंमंत्रमुदीरयेत॥ॐन
मोविष्णुरूपायनमःसागरसंभव॥अपांपूर्णोद्धरास्मात्त्वंदुःखसंसारसागरात॥उदकुंभोमयादत्तोग्रीष्मकालेदिने
दिने॥उदकुंभप्रदानेनप्रीयतांमधुसूदनः॥भविष्योत्तरे॥प्रत्यहंधर्मघटकोवस्त्रसंवेष्टितोनवः॥ब्राह्मणस्यगृहे राम॰
नेयःशीतामलजलःशुचिः॥वसंतेग्रीष्मयोर्मध्येयंयःपानीयंप्रयछति॥पलेपलेसुवर्णस्यफलमाप्नोतिमानवः॥नारी ॥२०८॥

शीर्षात्समारभ्यउदकुंभंतुयोददेत॥दिनेदिनेसहस्रस्यगवांपुण्यफलंलभेत॥तस्यैवोद्यापनंकार्यंमासिमसिनरोत्तमः॥सं
डकावेष्टकाभिश्चपक्वान्नैःसार्वकामिकैः॥उद्दिश्यशंकरंविष्णुंब्रह्माणमथवापितृन्॥सतिलंप्रोक्ष्यदत्वातुमंत्रेणानेनमा
नवः॥एषधर्मघटोदत्तोब्रह्माविष्णुशिवात्मकः॥अस्यप्रदानात्सततंममसंतुमनोरथाः॥अनेनविधिनायस्तुधर्मकुं
भंप्रयछति॥वसंतग्रीष्मसमयेप्रयादानफलंलभेत॥इतिधर्मघटदानं॥ ॥अथाश्वत्थसेवनं॥भविष्योत्तरे॥उदकुं
भप्रदानेनापिस्वच्छात्सोपःपुमान्भवेत॥तेनाश्वत्थतरोर्मूलंसेव्यंनित्यंयथात्मना॥सर्वपापप्रशमनंसर्वदुःखप्रनाश
नं॥सर्वरोगप्रशमनंनिसंसंतिवर्द्धनं॥अश्वत्थरूपोभगवान्प्रीयतांमेजनार्दनः॥इत्युच्चार्यनमस्कृत्यप्रसह्यपापना
शनं॥यःकरोतितरोर्मूलसेकंमासचतुष्टयं॥सोपितत्फलमाप्नोतिश्रुतिरेषासनातनी॥इत्यश्वत्थसेवनं॥ ॥अथत
रुपुत्रकविधिः॥नंदिपुराणे॥तरुपुत्रंतुयःकुर्याद्विधिवद्वह्निसन्निधौ॥समहापातकैर्मुक्तःसमुद्धरत्कुलत्रयं॥नरके
भ्योनरोयातिप्रजापतिपुरंशुभं॥पद्मपुराणे॥अपुत्रस्यचपुत्रत्वंपादपाइहकुर्वते॥यछंतिरोपकेभ्यस्तेसतीर्थतर्प
णादिकं॥तीर्थेपुत्रसहस्राणामेकएवकरिष्यति॥पुत्रसहस्राणांकर्तव्यमितितद्गोषः॥धनीचाश्वत्थवृक्षेणास्वच्छोकःशो
कनाशनः॥प्लक्षोयज्ञप्रदःप्रोक्तःक्षीरीचायुःप्रदास्मृतः॥जंबुःकन्याप्रदःप्रोक्तोभार्यादोदाडिमीतथा॥अरलूरोगनाशाय

४ दान.प्र पालाशी ब्रह्मलद् स्तथा॥ प्रेतत्वं जायते तस्य रोपयेद्यो विभीतकं॥ कंकोलः कुलवृद्ध्ये स्यात् खदिरस्त्वाघरोगता॥ निबं प्र

॥२०१॥ रोपकोप क्तत स्य तु दिवाकरः॥ श्रीवृक्षे शंकरो देवः पाटला पातु पार्वती॥ शिंशपाया मप्सरसः कुंदेगंधर्वसत्तमाः

॥ तितिलीके दासवर्गो बकुलो दस्युहस्तथा॥ पारावतो रायकश्चैव चंदनः पनसस्तथा॥ सौभाग्यदश्चंपकः स्या

त्करीरः पारदारिकः॥ अपत्यनाशकस्तालो निर्दोषः कुलवर्द्धनः॥ बहुभार्या नारिकेली चक्षुः सर्वांगसुंदरः॥

रतिप्रदा तथा केला मोचकी शत्रुनाशनी॥ एवमन्येपि ये वृक्षास्तेपि नानाफलाः स्मृताः॥ प्रतिष्ठां ते गमिष्यंति ये

नरा वृक्षरोपकाः॥ स्कांदे॥ महादेवो महादेवीमिदं वचनमब्रवीत्॥ शृणु देवि येन विधिना गृह्यते वनिजः सु

ताः॥ प्रतिष्ठां ते गमिष्यंति ये नरा वृक्षरोपकाः॥ स्कांदे॥ महादेवो महादेवीमिदं वचनमब्रवीत्॥ शृणुष्व येन वि

धिना गृह्यते वनिजः सुतः॥ अवनिजो वृक्षः॥ सुपुत्रार्थमहमिह दत्तं ग्रहीष्यामीति पार्वती॥ सोपवासा भवेन्नारी शु

चिर्विप्रा शुचिव्रता॥ ततश्चैव सहस्रांशो वृत्तभागं गते सति॥ उदिते विमले वापि तत्रैव दर्विडसंनिभे॥ विप्रानामंत्रयेद्ध

र्मे श्रावनान्वेदवादिन॥ शुचिनामंत्रयेद्द्वात्रशुचिवस्त्रान् शुचिव्रतान्॥ चापीत सनमस्कारा सदर्भा भूमिमाश्रिता॥ गामयि ॥२०१॥

त्वा यथा तां रात्रिं सवितर्युदिते सति॥ भक्ष्यभोज्यं समादाय ब्रजेद्यत्र भवेत्तरुः॥ तत्र चं तं स्नापयित्वा तु सातपत्रं समर्चयेत्॥

ततस्तरोः प्रदक्षिणं ततश्छायानुगामिनः॥ यथोपपन्नमंत्रैः तान् भोजयित्वा द्विजांस्ततः॥ पुण्याहं वाचयित्वा तु ऋत्विग्भिरथ

वात्मना॥ त्वमानां ब्राह्मणानां वेतत्त्वेनाहूतमात्मना॥ निवेदयेत्तं तमुद्दिश्य सद्भावेन पराग्रहः॥ पुण्याहं वाचयित्वा तु स

त्विग्भिरथवात्मना॥ त्वमानां ब्राह्मणानां वेतत्त्वेनाहूतमात्मना॥ निवेदयेत्तं तमुद्दिश्य सद्भावेन परागहः॥ अपुत्रा भग

वंतो हं पुत्रप्रतिग्रहीतं तरुं॥ ग्रहीष्यामि ममानुज्ञां कर्तुमर्हथ सत्तमाः॥ पुत्रप्रतिग्रहणतिपुत्रसरत्वं॥ ततस्तैरभ्यनुज्ञातं ततस्त

रुं तरुणापुत्रं॥ भूमिदेव समक्षं वै गृहीत्वा पातनयं प्रिये॥ अनेन विधिना यस्तु गृहीतस्तरुपुत्रकः॥ पितृणां निरयस्थानां

मधुधारांस वर्षति॥ गृहीतो विधिनानेन पुत्रभूमिरुहात्मजः॥ शुभावहः स भवति विपरीते दुःखदः॥ स सुत्रो गृह्य

ता ह्यपि पीन श्रोणि यथा धरा॥ एको पि भूरुहः श्रेष्ठः पुत्रः स्वेकल्मितः शुभः॥ इति नंदिपुराणोत तरुपुत्रकग्रहणविधानं

॥ ॥ अथाश्वत्थोपनयनं॥ शौनकीये॥ शौनको हं प्रवक्ष्यामि त्वश्वत्थस्योपनायनं॥ स्थापनादष्टमे वर्षे द्वादशे

कादशे ऽथवा॥ शास्त्राः कालास्त्वयत्ते षु कुर्यान्नस्योपनायनं॥ तत्रो त्तरायणं श्रेष्ठं गुरौ शुक्रे प्रकाशिते॥ माघफाल्गुना

योः कुर्याच्चैव वैशाखमासयोः॥ क्षयमासाधिमासे च न कुर्यान्मौंजिबंधनं॥ तत्र स्थानीयते यातत्तदर्शातापतो तत्तदर्शाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ द्वा·न·प्र· डुसंस्कारकालस्यैवोचितत्वात् ॥ अतएव भ्रूणादियजमानके अश्वत्थसंस्कारे पौराणिकाराम प्रतिष्ठामात्रमेव कर्तव्यं
॥ नचोपनयनं ॥ भ्रूणसंबंधिनस्तस्य प्राग्जन्मायेनोपनयनसंस्कारानर्हत्वादिसंभिन्नज्ञा आहुः ॥ न कुर्यादि छेदितां
॥२१०॥ अश्वत्थाविघुदाद्यग्निनाहते ॥ उपनीतिं प्रकुर्वीत स्कंधपर्णांकुरान्विते ॥ शुक्लपक्षे शुभनक्षत्रे सुवारस्योपलक्षणे ॥
अपरात्स्योपनीतः पुनःसंस्कारमर्हति ॥ त्रिविक्रमोक्तेः ॥ दंतानां धावने हेमशलाकात्तोस्वालासचेलकं ॥ कृत्वैव नित्यकर्मा
णि सद्वापित्वेष्टदेवतां ॥ नांदीश्राद्धं प्रकुर्वीत गृहे पुण्याहपूर्वकं ॥ तस्मिन्नेव दिने कर्ताचात्र हेमफलादिभिः ॥ कृत्वा
शीर्षवंदनं गच्छेत्ततो गच्छेत्समाहितः ॥ तूर्यघोषैश्च विविधैः पुण्यस्त्रीभिः समन्वितः ॥ पुण्यस्त्रीतिं कृचितपाठः ॥ ब्रा
ह्मणैर्वेदघोषैश्च पुण्यवादित्रनिःस्वनैः ॥ वस्त्रयज्ञोपवीतादिनैमौंजीदंडाजिनादिकान् ॥ पूजाद्रव्यं होमद्रव्यं चरुं गृहीत्वा
ऽश्वत्थस्य सन्निधौ ॥ गत्वा प्रक्षालितांघ्रिश्च स्वाचम्योपविशेद्भुवि ॥ त्रिपंचदशहस्तं वा गोमयेनोपलिप्य च ॥ धातुपिष्टेन
संपूज्य रंगमालिं कुर्यात्तथा ॥ अश्वत्थस्येशानदिग्भागे कृत्वा पुण्याहवाचनं ॥ आचार्यं वरयेत्सम्यग्ब्राह्मणं वेदपारगं ॥ आचा
र्यवंतं धर्मज्ञं कुलीनं च कुटुंबिनं ॥ सर्वावयवसंपूर्णं रोगदोषविवर्जितं ॥ शांतं तपस्विनं दांतं सर्वप्राणिहिते रतं ॥ वस्त्रोप रा·म·
वीतगंधाद्यैरंगुलीयककुंडलैः ॥ कर्तातं पूजयेद्भक्त्या विनेशाद्यंनकारयेत् ॥ तेनैव कारयेद्विद्वानश्वत्थस्योपनायनं ॥ ॥२१०॥

कुर्यात्पंचामृतैः स्नानं तत्तन्मंत्रैः पृथक्पृथक् ॥ अश्वत्थस्य च दिग्भागे होमं कुर्यात्स्वशाखया ॥ उपलेपादि पतंत्रं च वक्ष्य
तं प्रकल्पयेत् ॥ वस्त्रयुग्मं ततो दद्याद्युवं वस्त्राणि मंत्रतः ॥ यज्ञोपवीतं दद्यात्तु यज्ञोपवीतमित्यपि ॥ मेखलां च त्रिरावेष्ट्य
प्रवेष्टयामेति मंत्रतः ॥ तद्दंमीजिकसमाजिनं दंडं प्रदद्यात् यथाक्रमं ॥ गंधपुष्पाक्षतैः शुक्लैरश्वत्थस्य च पश्चिमे ॥ अश्वत्थस्यो
निषदनमित्यृचा सज्जयेत्सुधीः ॥ ॐ भूर्भुवः स्वः पूर्वोक्तु ८ गायत्रीं विर्जयेद्वुधः ॥ निरीक्षयेत्तथाश्वत्थं देवस्यत्वेति मंत्रतः ॥
आ त्वेति ध्रुवसूक्तेन मा हृति त्रितयेन वा ॥ अश्वत्थनाम चोद्धर्य विभक्त्यातु द्वितीयया ॥ शालाकयासुवर्णस्य स्वाय यामि
पदं पठेत् ॥ हुत्वा स्विष्टकृतं पश्चात्होमशेषं समापयेत् ॥ गंधाक्षतैः शुक्लपुष्पैः धूपदीपोपहारकैः ॥ भक्त्याद्यैः फलतांबूलै
स्तथाश्वत्थं प्रपूजयेत् ॥ पुरस्तादुपरिष्टाच्च हुत्वा व्याहृतिभिः क्रमात् ॥ जुहुयादाज्यमग्नौ तु अग्रआपष्य उक्रमात् ॥ या ओ
षधीर्याः फलिनीरश्वत्थेवइतित्वय ॥ वनस्पतेत्त्रात्तवलोक्यासुपर्णाइतिक्रमात् ॥ समिद्भिश्चरुणा चैव पालाशोभिः पृथ
क्पृथक् ॥ हुत्वा वा दशभिः सम्यग्वंह्नेत्वा समाहितः ॥ गंधाक्षतैः शुक्लपुष्पैर्धूपदीपोपहारकैः ॥ भक्ष्याद्यैः फलतां
बूलैस्ततोऽश्वत्थं प्रपूजयेत् ॥ अश्वत्थपश्चिमे देशे प्राङ्मुखश्चोपविश्य च ॥ दक्षिणेन वहस्तेन स्पृष्ट्वाश्वत्थं समाहितः
॥ धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकां ॥ अश्वत्थाच्छादनं वस्त्रमाचार्याय प्रदापयेत् ॥ अन्येषामपि विप्राणां स्वशक्त्या प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दा०न०प्र० जेन्ते ततः॥ब्रह्मरोदस्त्रिरांदस्याष्टेमं विज्ञानुसारतः॥ब्राह्मणान्भोजयेत्स्वाशैस्मुंजीयांद्बंधुभिः सह॥एवं यः कुरुते प्रम
॥२११॥ त्याश्वस्थस्य स्थापनायनं॥कुलकोटिसमुद्धृत्य विष्णुसायुज्यमाप्नुयादिति श्रीनकीयेश्वत्थोपनयनं विधिः॥ ॥अ
थास्य प्रयोगः॥यजमानः कृतनित्यक्रियो मंत्र पूर्वकं दंतधावनं कृत्वा जिह्वामुल्लिख्य सचैलं नद्यादौ स्नात्वा शुक्लांब
रधरः कृताचमनद्वयः शुद्धासने उपविश्य कुशजलतिलयवानादायाद्येत्यादि संकीर्त्य नाते सकलपापक्षयपूर्वकं कु
लकोटिसमुद्धारविष्णुसायुज्यकामोऽश्वत्थोपनयनमहं करिष्ये॥इति संकल्प्य पुण्याहवाचनं नांदीश्राद्धं स्वगृहे कृत्वा
तस्मिन्नेव दिने पूर्वाह्ले तूर्यघोषवेदघोषसहितः स्वगृह्याग्निना सह सर्वसंभारानादायाश्वत्थसन्निधिं गत्वा प्रक्षालि
तपाणिपादः अश्वत्थस्येशानदिग्भागे त्रिहस्तं पंचहस्तं दशहस्तं वा स्थलं गोमयेनोपलिप्य धातुपिष्टेन रंगमालिकपालं
कृत्य पुण्याहवाचयित्वाऽऽचार्यमुक्तगुणं वृत्वा तं ब्राह्मणांश्च गंधाक्षतपुष्पैरभ्यर्च्य वस्त्रोपवीतालंकारादिभिस्तानर्चयेत॥अथाचा
र्यः अश्वत्थस्योपनयनं यजमानानुज्ञातः करिष्ये इति संकल्प्याश्वत्थपश्चाद्भागे प्राङ्मुख उपविश्य दर्भादिप्रकारेण के
: पंचामृतमंत्रैः पृथक्पृथक्पंचामृतैरश्वत्थं संस्नाप्य शुद्धोदकेन स्नापयित्वा गंधपुष्पादिभिरलंकृत्याश्वत्थपूर्वदिग्भागे राम०
होमार्थं स्थंडिलं विधाय होमसामग्रीमासाद्य स्वशाखोक्तविधिनोपलेपनोल्लेखनादि कृत्वाऽग्निं प्रतिष्ठाप्यान्वाधानं कृ ॥२११॥

त्वाज्यभागांतं कुर्यात्॥ आश्वत्थपश्चाद्भागे प्राङ्मुख उपविश्य आ
चार्यो युवं वस्त्राणीति मंत्रेण वस्त्रद्वयेनाश्वत्थं नावेष्ट्य यज्ञोपवीतमिति मंत्रेण यज्ञोपवीतं प्रति मुर्या अथावेवा मेति
मंत्रेण मेखलां त्रिरावेष्ट्य तस्मै मजिनं दंडं च दत्वा अश्वत्थवो निषदनमिति मंत्रेणाश्वत्थं गंधपुष्पाक्षतैर्माल्यैः सं
अस्य प्राणप्रतिष्ठां कृत्वा ... पंचदश ... सावित्रीं त्रिवारं जप्त्वा देवस्य त्वेति मंत्रेणाश्वत्थनिरीक्ष्यात्वाहार्षमिति ध्रुवसूक्तं पठित्वा ॐ भू
र्भुवः स्वरित्युक्त्वा अश्वत्थं स्थापयामीति स्वर्णशलाकया संस्पृशेत॥ततः स्वांजलिमेसाज्येन ॐ भूः स्वाहा॥इदम
ग्नये न मम॥ॐ भुवः स्वाहा इदं वायवे०॥२ ॐ स्वः स्वाहा इदं सूर्याय०॥३ ॐ अग्न आयूंषि० इषं चोर्जं ... ॥इदमग्न
ये पवमानाय०॥ ४ ॐ अग्निर्ऋषिः ... महागयं स्वाहा॥सर्वत्र त्यागः॥५॥ ॐ अग्ने पवस्व स्वपा अस्मे ... स्वाहा॥सर्वत्र॥
६ ॐ या ओषधीः ... स्वाहा॥इदमोषधीभ्यो०॥७॥ याः फलिनीः ... स्वाहा॥त्यागः सर्वत्र॥८॥ ॐ अश्व
त्थे वः ... स्वाहा॥सर्वत्र॥९॥ वनस्पते शतवल्शो ... स्वाहा॥इदं पिप्पलाय०॥१०॥ ... पर्णा० ... इति
स्वाहा॥इदं पिप्पलायन मम॥११ ॐ भूर्भुवः स्वः स्वाहा॥इदं प्रजापतये न०॥१२॥ एतैरेव मंत्रैः पालाशीभिः समिद्भि
श्चरुणा पृथक्पृथक् हुत्वा स्विष्टकृदादि होमशेषं समाप्याश्वत्थपश्चिमे देशे गंधाक्षतस्वर्णपुष्पधूपदीपनैवेद्य

४ दान॰प्र॰ फलतांरसैलैरश्वस्यैव इति मंत्रेण संप्रजयेत्॥ अथ यजमानस्तस्यैवोपविश्य दक्षिणाहस्तेनाश्वस्य स्पृष्ट्वा प्रणम्य
स्वदक्षिणातः उपविष्टायोदङ्मुखायाचार्यायोपगंगां दद्यात्सवस्त्रां॥ कृत्वैतदश्वस्योपनयनं प्रतिष्ठासिद्ध्यर्थं यथाशक्त्या
॥२१२॥ लंकृतां सवत्सां गां रुद्रदेवतां अमुकगोत्रायामुकशर्मणे तुभ्यमहं संप्रददे इति प्रयोगेण दत्वाऽश्वस्थाने छादनवासोप
यं तस्मै दत्वा ब्राह्मणेभ्योऽप्यश्वब्राह्मणेभ्यः पूजापूर्वकं यथाशक्ति दक्षिणां दत्वा सूर्यादिदेवताप्रीतये शेषब्राह्मणान्भो
जयित्वा दीनानाथान्संतोष्य बंधुभिः सह स्वयं भुंजीत॥ एवं कुर्यात्कुलकोटिसमुद्धृत्य विष्णुसायुज्यमाप्नुयादिति साह भ
गवांछौनकः॥ इत्यश्वस्योपनयनप्रयोगः॥ ॥ अथागलंतिकादानं॥ भविष्योत्तरे॥ वसंतसमयं प्राप्ते त्वाषाढे वा
लयं परं॥ यत्र स्थाप्य भुवं लिंगमार्षं वा देवपूजितं॥ तस्याग्रभंगरहां तस्य घटं तोयेन संभृतं॥ कुर्यात्सुरभिगंधैश्च वासि
तं वस्त्रगालितं॥ स्रवंतं च दिवारात्रं तत्तल्लिंगमूर्द्धनि॥ एवं यः कारयेत्कुंभं श्रद्धाभक्तिसमन्वितः॥ शिवस्य विश्वे
र्कस्य इष्टदेवस्य वा पुनः॥ स्रावं तं कारयेत्कुंभमच्छिद्रं देवमस्तके॥ अनेन विधिना दत्वा नरो मासचतुष्टयं॥ ततः
कर्कटके प्राप्ते देवं पंचामृतेन तु संस्नाप्य पूजयेत्पंचैर्नैवेद्यैश्च मनोरमैः॥ प्रतिपत्सु महेशानं मंत्रमेतमुदीरये दान॰
त्॥ ॐ नमः शंकरः शंभुर्भवो धाता त्रिवाहरः॥ प्रीयतां मे महादेवो जलकुंभप्रदानतः॥ एवं संकल्पदाता तु पश्चाद ॥२१२॥

गत्य वेश्मनि॥ वरोदखाय संस्नोह विकारितः॥ लोहशाद्योत्रधातुमात्रपरः॥ चंदनेन च तांबूलैर्नैवेद्यैः संपूज्य भक्तितः॥ घृता
दिद्रव्यसंपूर्णं ● हेमगर्भं सवस्त्रकं॥ प्रतिष्ठाप्य तु तस्याग्रे ब्राह्मणाय निवेदयेत्॥ ततः शक्त्या सुवर्णानु प्रतिष्ठार्थं द्विजाय
वै॥ सर्वेषां चैव दानानां सुवर्णं दक्षिणोच्यते॥ चंद्रलोके वसेत्तावद्यावदिंद्राश्चतुर्दश॥ घृतं च नवनीतं च दधि दुग्धं तथैव
च॥ शर्करा घृततैलानि तिला मधु जलं तथा॥ लवणं फलजातं च रत्नरससमन्वितं॥ एवं चतुर्दशाद्भुतं दानं विधिनान्वया॥
चतुर्दशाद्भुतमिति॥ चतुर्दशभिर्घृतादिद्रव्यैः पूर्णानि पात्राणि इत्यादि त्वर्थः॥ घृतमिति जातावेकवचनं॥ गुणाधिकाय वि
दुषे ब्राह्मणाय यज्ञपात्रये॥ उद्धरेद्दुर्गमात्तघोराद्भवसंसारसागरात्॥ आत्मनः सकलं वंशं नयेत्स ब्रह्मणो गतिं॥ पाद्मे॥ सर्वे
षामेव दानानामुत्तमं पात्रमिष्यते॥ यथाविधि प्रदातव्यं वित्तशाठ्यं विवर्जितं॥ असंतं निर्द्धनो योपि सोपि दद्याद्यथाविधि
॥ चतुर्दशार्द्धमर्द्धं वा दद्यादिति फलेप्सया॥ अथ मत्रपात्रदानप्रयोगः॥ स्वशक्त्यनुसारेण संपादितपात्रादिसंभारः कर्त्ता
गोमयोपलिप्ते शुभे देशे प्रागग्रेषु दर्भेषु घृतादिपात्राणि पुरस्कं संस्थाप्य तिक्रमात्स्थापयित्वा ग्रंथोक्तफलप्राप्त्यर्थमेतावंति
पात्राणि दास्य इति संकल्प्य पात्राणां पासादनकर्मणा प्रतिष्ठाप्य एवं कं यथावदभ्यर्च्य प्रतिगृहीत्रब्राह्मणान्वेदविदो वस्त्रगं
धमाल्यादिभिर्वरणामभ्यर्च्य घृतादिपात्राणि घृतादि दानमंत्रैर्दत्वा दानप्रतिष्ठार्थं यथाशक्ति वा दक्षिणां दद्यात्॥ आज्ञादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ ॥२१३॥

मंत्रास्तान्तत्र वक्ष्यंते॥ वाराहे॥ षोडशपापान्याप्युक्तानि॥ यथा॥ अथातः संप्रवक्ष्यामि पात्रदानमनुत्तमं॥ कृत्वा ताम्र
मयं पात्रं यथाविभवविस्तरं॥ उमया सहितं शंभुं हरिं सश्रीकमेव च॥ कृत्वा तु कांचनीं दिव्यां संपूज्यावाहनादिभिः॥ प्रति
माद्वा ब्राह्मणाय निवेदयेत्॥ एकं मधुमयं पात्रं द्वितीयं तु तिलस्य च॥ तृतीयं घृतपात्रं तु चतुर्थं गुडसंयुतं॥ पंचमं
लवणौघपूर्णं षष्ठं गोक्षीरपूरितं॥ सप्तमं रसपात्रं च नावनीतं तथाष्टमं॥ नवमं शर्करापात्रं दशमं दधिपूरितं॥ एका
दशं तैलपात्रं क्षौद्रं द्वादशं दुग्धपूरितं॥ त्रयोदशं वस्त्रपात्रं अन्नपात्रं चतुर्दशं॥ फलपात्रं पंचदशं कार्यासं षोडशं स्मृतं॥
स्नातः सौ सप्तजन्मांतरे भवेत्॥ सुभगो दर्शनीयश्च नारी वा पुरुषो भवेत्॥ इति पात्रदानं॥ ॥ अथ कल्पदानानि॥ मा
त्स्ये॥ मत्स्य उवाच॥ कल्पानुकीर्तनं वक्ष्ये सर्वकामफलप्रदं॥ यस्यानुकीर्तनादेव वेदपुण्येन युज्यते॥ प्रथमः श्वे
तकल्पस्तु द्वितीयो नीललोहितः॥ वामदेवस्तृतीयस्तु ततो रथंतरः परः॥ रौरवः पंचमः प्रोक्तः षष्ठः प्राण इति स्मृतः
॥ सप्तमोथ बृहत्कल्पः कंदर्पोष्टम उच्यते॥ सद्योथ नवमः प्रोक्त ईशानो दशमः स्मृतः॥ ध्यान एकादशः प्रोक्तस्तथा म॰पु॰
सारस्वतः परः॥ त्रयोदश उदानस्तु गारुडोथ चतुर्दशः॥ कौर्मः पंचदशः प्रोक्तः पौर्णमासः स्मृतो हि सः॥ षोडशो नारसिं
हस्तु समानस्तु ततोपरः॥ आग्नेयोष्टादशः प्रोक्तः सोमकल्पस्तथा परः॥ मानवो विंशतितमस्तत्पुमानिति चापरः॥ माहे ॥२१३॥

श्वरस्ततः प्रोक्तस्त्रिपुरोपत्र घातितः॥ पितृकल्पस्तथांत्यः स्यात् घकुहूर्ब्रह्मणः स्मृता॥ इत्येवं ब्रह्मणो मासः सर्वपातकना
शनः॥ आदावेव हि माहात्म्यं यस्मिन् यस्य विधीयते॥ तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा॥ यत्तद्दद्यादिमान्कल्पान्हे
माम्पर्वणि पर्वणि॥ ब्रह्मविष्णुपुरे कल्पं मुनिभिः पूज्यते दिवि॥ सर्वपापहरा नित्यमारोग्यश्रीफलप्रदाः॥ अत्रापि दा
नप्रयोगः॥ पूर्ववद्बोद्धव्यः॥ इति कल्पदानानि॥ ॥ अथ नानादानानि॥ मनुः॥ वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्न
दः॥ तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं॥ भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः॥ गृहदोग्र्याणि वेश्मानि
रूप्यदो रूपमुत्तमं॥ वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वदः॥ अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपं॥ यान
शय्याप्रदो भार्यामैश्वर्यमभयप्रदः॥ धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टितां॥ ब्रह्मसमानगतिः स भवति सार्व
॥ यत्पाता विसादृश्यं सुवर्णदाता विनिदूषं॥ यमः॥ दत्वा प्रतिश्रयं लोके तथा दैवेवधामयं॥ गां च दत्वा तथा विप्रे ब्रह्मलो
के महीयते॥ प्रतिश्रयः प्रवासिनां माश्रयः॥ छत्रदो गृहमाप्नोति गृहदो भागरं तथा॥ उपानहोः प्रदानेन शरीरारो
ग्यमाप्नुयात्॥ इंधनानां प्रदानेन दीप्ताग्निर्भुवि जायते॥ गवां ग्रासप्रदानेन सर्वपापैः प्रमुच्यते॥ संवर्तः॥ नानाविध
द्रव्याणि धर्मशास्त्रोदितानि तु॥ आत्मकामेन देयानि स्वर्गमक्षय्यमिच्छता॥ गुडमिक्षुरसं चैव लवणं व्यंजनं शुचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रभीताश्च वासांसि दत्त्वा संततं सुखी भवेत्॥ देवीपुराणे॥ स्नायतो स्नापयानां निशा काम्यपिनयोत्तम॥ तानि देयानि देयात्म
कन्यका यो बित्तस्तथा॥ विष्णुपुराणे॥ यद्यदिष्टतमं लोके यच्चास्य दयितं भवेत्॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छता॥
नारसिंहपुराणे॥ एकविंशत्समीस्वर्गानि विष्टामेरुमर्द्धनि॥ आह सद्दानकर्त्तारो यज्ञानां तपसां तथा॥ एतेषु निवसंति
मनराः क्रोधविवर्जिताः॥ एकविंशतिस्वर्गानाह॥ अत्वप्रवेश्रीचानंदं प्रमोदवह्निसाहसो॥ भृगुप्रपातो सौख्यं तु रणे
चैवानुनिर्मले॥ अनशनेन तु समासेमतोग्रश्चैत्रिविष्टपं॥ ऋतुयाजी नाकपृष्ठमग्निहोत्री च निर्वृतिं॥ तडागकूपकर्त्ता
च लभते पौष्टिकं द्विजः॥ सुवर्णदायी सौभाग्यं लभते सुमहात्तयाः॥ शीतकाले महावह्निप्रज्वालयति यो नरः॥ सर्वस
त्वहितार्थाय स्वर्गमप्सरसां लभेत्॥ हिरण्यदानेगोदाने कन्यादाने च मंगलं॥ द्विजानां तर्पणं शांतं फलादत्वा वस्त्राणि भक्ति
तः॥ श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचति॥ कपिलागोप्रदानेन परमार्थं महीयते॥ एकान्नभोजी यो मर्त्यो नक्तभोजी च
नित्यशः॥ उपवासी त्रिरात्रं दीर्घात स्वर्गे महीयते॥ एकान्नभोजी एककालभोजी॥ एकाहारी जितक्रोधो ब्रह्मचारी दृढ
व्रतः॥ निर्मलं स्वर्गमाप्नोति तथा स्तुतिहितेरतः॥ विद्यादानेन मेधावी निरहंकारमाप्नुयात्॥ येन येन हि भावेन यद्यद्दानं प्रय
छति॥ तत्तत्स्वर्गमवाप्नोति यद्यदिच्छसि मानवः॥ यस्तु सर्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति॥ स प्राप्य न निवर्त्तेत स्वर्गं शां

तमनामयं॥ विष्णुधर्मोत्तरे॥ आयुधानां प्रदानेन शत्रुनाशमवाप्नुयात्॥ राजलिंगप्रदानेन राजा भवति भूतले॥ राजलिं
गं छत्रचामरादि॥ देवमाल्यायनयनं देवागारसमूहनं॥ मार्जनं सर्वदेवानां गोप्रदानसमं स्मृतं॥ याज्ञवल्क्यः॥ शातं
संवाहनं रोगिपरिचर्या सुरार्चनं॥ पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानसमं॥ इति नानादानानि॥ ॥ अथ यत्या
दिवपनदानं॥ विश्वामित्रः॥ ब्रह्मचारियतिभ्यश्च वपनं यस्तु कारयेत्॥ नखकर्माणि कुर्वाणश्चक्षुष्मान् जायते नरः॥
तथा॥ यतिभ्यो ब्रह्मचारिभ्यः पथिकेभ्यस्तथैव च॥ अन्येषामपि दीनानां प्रकुर्वन्केशलुंचनं॥ नखानां धावनं चैव बहु
त्वा रूपयुतो भवेत्॥ यस्तु सर्वजनार्थीयके शश्मश्रुनखादिकी॥ क्रियां समुद्दिश्य मतिं नापितायप्रयच्छति॥ देवागारे
षु तीर्थेषु श्रीपापरसयाप्युतः॥ सवाहनाश्वगोलोके वीतशोकः प्रजायते॥ इति यत्यादिवपनविधिः॥ ॥ अथाश्वत्थ
विवाहविधानं॥ मदनमहार्णवे॥ शातातपप्रोक्तेः॥ प्रतिमायाभंगको त्व प्रतिष्ठः प्रजायते॥ संवत्सरस्त्रयं सिंचेदश्व
त्थं सोनुवासरं॥ उद्वाहयेत्तमश्वत्थं समंशाम्याविधानतः॥ अश्वत्थश्चात्र सेवकादिस्वकीयपरोपितश्च वाज्ञेयास्त्वः॥
न तु स्वयंप्रतिष्ठितः॥ यदि स्वामी स्वतः समीपे स्थिता तत्र दातयासह पितुमंदनवाविवाह्यः॥ अथ यदि न लभ्यते तदा रे
वोत्सर्गइव वत्सां स्वामी शाखोत तदभावे कुशात्त्वं वा समानियस्वशाखोक्तविधानतो विवाहः कार्यः॥ शिष्टाचारप्राप्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान-प्र० विधानं चैतत्॥ शुभे दिने चंद्रताराबलान्विते अश्वत्थसमीपे पश्चाद्भूमिं गोमयादिना शुद्धां कृत्वा ब्राह्मणानुपवेश्य
स्वस्तिवाचनं कृत्वा नांदीश्राद्धं विधायाश्व सिक्त्वा हरिद्राकुंकुमगंधपुष्पवस्त्रयज्ञोपवीतादिभिरश्वत्थं शमीं चालं
॥२१५॥ कृत्य मधुपर्कं दत्वाग्निं प्रतिष्ठाप्य व्याहृतिभिस्तिलामंचाज्याहुतीर्देशेनाष्टपृथगष्टोत्तरसहस्रमष्टोत्तरशतं वाहु
त्वा गृह्योक्तविधिना शमीं तस्मै भार्यात्वेन प्रतिपाद्य ब्राह्मणान्भोजयित्वा यथाशक्ति दक्षिणां दत्वा परमेश्वरमस्म मर्थ
येदिति॥ एवमश्वत्थोद्वाहं विधाय तत्र विनायकमश्वत्थमूले संस्थापयेदित्याह॥ तत्र संस्थापयेद्देवं विघ्नराजं
सुपूजितं॥ इति॥ तत्राश्वत्थमूलसमीपे विनायकमूर्तिं दारुपाषाणादिभिर्निर्माय यथाविभवमालयं विधाय स्था
पयेत्॥ तत्राश्वयं प्रयोगः॥ देशकालौ स्मृत्वाश्वत्थमूले विनायकस्थापनं करिष्ये इति मंत्रे गंधपुष्पाक्षतैः प्रति
मायां विनायकमावाह्य विनायकप्रकाशकमंत्रैः षोडशोपचारैः संपूज्य तिलान्नाज्यं चरुं जुहुयात् यथाशक्ति व्याहृतिभि
रिति विनायकप्रतिष्ठा॥ तत्राश्वत्थविवाहो विनायकप्रतिष्ठा चेति द्वे कर्मणी मिलितेवा प्रतिसिद्धिर्हरेः॥ अस्तु द्वया राम०
र्थेलेतु प्रत्येकमभ्युदयहेतुः॥ द्वितीयहोमेऽग्निः पूर्वस्थापित एव॥ अयं विवाहसंस्कारोऽश्वत्थस्य पूर्वं वृहंतोपनय ॥२१५॥
नसंस्कारस्यैव॥ उपनयनप्रयोगः प्रागभिहितः॥ इत्यश्वत्थविवाहविधानं॥ ॥ अथ शालग्रामदानविधानं॥ पाद्मे शाल

ग्रामशिलाचक्रं यो दद्याद्दानमुत्तमं॥ भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं॥ हृदि सूर्ये जले वाग्नौ प्रतिमास्थंडिलेषु च
॥ सम्यगर्च्य हरिं यांति नरास्तद्वैष्णवं पदं॥ अथवा सर्वपापप्रणाशनं॥ तच्च पुराणप्रदं वैष्णवपर्वं शाममपि ख्यातिदं॥ यः
पूजयेद्धरिं चक्रे शालग्रामसमुद्भवे॥ राजसूयसहस्राणां तेनेष्टं प्रतिवासरं॥ यदामनंति वेदांता ब्रह्म निर्गुणमच्युतं॥
तत्प्रसादो भवेन्नृणां शालग्रामशिलार्चनात्॥ महत्काष्ठे स्थितो वह्निर्मथ्यमानः प्रकाशते॥ तथा हि सर्वव्यापी शालग्रा
मे प्रकाशते॥ अपि पापसमाचाराः कर्मण्यनधिकारिणः॥ शालग्रामार्चका वै तु पनैव यांति यमालयं॥ न तथा रमते लक्ष्म्यां
न तथा स्वपुरे हरिः॥ शालग्रामशिलाचक्रे यथा स रमते सदा॥ अग्निहोत्रं हुतं तेन दत्ता पृथ्वी ससागरा॥ येनार्चितो
हरिश्चक्रे शालग्रामशिलोद्भवे॥ शिलाद्वादशभोवैत्रपशालग्रामसमुद्भवाः॥ विधिवत्पूजिता येन तस्य पुण्यं वदामि
ते॥ कोटिद्वादशलिंगैस्तु पूजितैः स्वर्णपंकजैः॥ यत्स्याद्द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत्॥ यः पुनः पूजयेद्भक्त्या
शालग्रामशिलाशतं॥ उषित्वा स सुरैर्लोके चक्रवर्ती ह जायते॥ कामक्रोधैस्तु विविधैर्व्याप्तो यस्तु नराधमः॥ सोपि याति
हरेर्लोकं शालग्रामशिलार्चनात्॥ विना तीर्थैर्विना यज्ञैर्विना दानैर्विना मतिं॥ मुक्तिं याति नरो वै तु पशालग्रामशिलार्च
नात्॥ नरकं गर्भवासं च तिर्यक्त्वं कृमियोनिषु॥ न याति वै तु पापोपि शालग्रामेऽच्युतार्चकः॥ स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितः॥ शालग्रामशिलातोयैर्योभिषेकंसमाचरेत्॥ गंगागोदावरीरेवानद्योमुक्तिप्रदास्तुयाः॥ निवसंतितीर्थैस्ताःशालग्रामशि
लाजले॥ नैवेद्यैर्विविधैःपुष्पैर्धूपदीपैर्विलेपनैः॥ गीतवादित्रस्तोत्राद्यैःशालग्रामशिलार्चनात्॥ कुरुतेमानवोयस्तुक
लौभक्तिपरायणः॥ कल्पकोटिसहस्राणिरमतेसन्निधौहरेः॥ लिंगैस्तुकोटिभिर्दृष्टैर्यत्फलंपूजितैर्भवेत्॥ शालग्रा
मशिलायांतुयःश्राद्धंकुरुतेनरः॥ पितरस्तस्यतिष्ठंतितृप्ताःकल्पशतंदिवि॥ येपिबंतिनरानित्यंशालग्रामशिलाजलं॥
पंचगव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनं॥ शालिग्रामशिलाचक्रंद्वारकाचक्रसंयुतं॥ पद्मध्वजांशखयुतंतयोर्घासवरी
द्विजः॥ तस्यपुण्यस्यसंख्यानंनालंवक्तुंचतुर्मुखः॥ ब्रह्महत्यासहस्राणिदादातुर्नश्यंससंशयति॥ ॥ अथमूर्तिलक्षणं
॥ शालग्रामशिलाद्वारगतचक्रंद्विलग्नधकु॥ शुक्लाभोवासुदेवाख्यःसेव्यःश्रीगदाब्जधरः॥ लग्नद्विचक्रोरक्ताभःसर्वभा
गेसुपुष्करः॥ संकर्षणोथप्रद्युम्नःसूक्ष्मचक्रस्तुपीतकः॥ सदीर्घश्चसुषिरश्छिद्रोपोनिरुद्धस्तुवर्तुलः॥ नीलोद्वारेत्रिरे
खश्चाथनारायणोसितः॥ मध्येगदाकृतीरेखानातिचक्रोमहोन्नतः॥ पृथुचक्रेणसिंहाख्यःकपिलोवात्रिविंदुकः॥ अथ
वापंचविंदुस्तत्पूजनंब्रह्मचारिणः॥ वराहःशक्तिलिंगोभ्यांविषमद्वयचक्रकः॥ नीलस्त्रिरेखःस्थूलोथकूर्ममूर्तिःसविंदु
मान्॥ कृष्णःसर्ववर्तुलावर्तःपातुचोन्नतपृष्ठकः॥ श्रीधरःपंचरेखोवनमालीगदांकितः॥ संकीवामनोवर्तुलोह्रस्वोवामवः

सुरेश्वरः॥ नानावर्णोनेकमूर्तिर्नागभोगीत्वनंतकः॥ स्थूलोदामोदरोनीलोमध्येचक्रःसुनीलकः॥ संकीर्णद्वारकोणोव्याद
धपद्मस्तुलोहितः॥ सदीर्घरेखःसुषिरःएकचक्रांबुजःपृथुः॥ पृथुच्छिद्रःस्थूलचक्रःकृष्णोविंदुश्चविल्ववत्॥ ह
यग्रीवोंकुशाकारःपंचरेखःसकौस्तुभः॥ वैकुंठोमणिरत्नाभएकचक्रांबुजोसितः॥ मत्स्योदीर्घांबुजाकारोद्वाररेखःस
पातुवः॥ वामचक्रोदक्षरेखःश्यामोवाथत्रिविक्रमः॥ शालग्रामेद्वारकायांस्थितायगदिनेनमः॥ एकेनलक्षितोयःसा
द्यैकेरातुसुदर्शनः॥ लक्ष्मीनारायणोद्वाभ्यांत्रिभिर्मूर्तिस्त्रिविक्रमः॥ चतुर्भिश्चचतुर्व्यूहोवासुदेवस्तुपंचभिः॥ प्रद्यु
म्नःषड्भिरेवस्यात्संकर्षणाइतेस्ततः॥ पुरुषोत्तमोष्टभिःस्यान्नवव्यूहोनवांकितः॥ दशावतारोदशभिरनिरुद्धोवतादश॥
द्वादशात्माद्वादशभिरतऊर्ध्वमनंतकः॥ विष्णोर्मूर्तिमयंस्तोत्रंयःपठेत्सदिवंव्रजेत्॥ इतिगारुडे॥ अथनारदीये॥ श्यामवर्णा
चपीताचनीलवर्णातथैवच॥ पांडुरारक्तवर्णाचकपिलाचेतिवर्णकाः॥ पतीहरास्यात्कपिलानीलालक्ष्मीप्रदायकाः॥ प्रवि
वधिप्रदाश्यामासुक्षामोक्षप्रदायिनी॥ पीताधनकरीज्ञेयारक्ताराज्यप्रदायिनी॥ श्वेतारक्तारोगदाचैकस्य॥ कीर्तिप्रदाशुभ
॥ पापघ्नीपांडुराभिसंस्हृक्षाचोद्वेगकारिणी॥ स्यानिहंतिचैवाशुवंशनाशप्रदायिनी॥ स्निग्धासिद्धिप्रदाभव्यावन्निःष्फला
स्यात्स्थूलाछत्रा॥ कपिलाबद्धचक्राचविकोणाबंधुनाशकृत्॥ अधोमुखक्षरकंठऊर्ध्वमुखाद्वारनंगरतं॥ अग्निप्रभहरतेशुभं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ दान॰प करालं कुलनाशनं ॥ दृष्टे स्फुटितं रूक्षं त्रिकोणं च विवर्जयेत् ॥ अथ स्फुटितचक्रं च बद्धचक्रं तथैव च ॥ बहुरेखां बहुच्छि-
॥२१७॥ द्रां तिर्यग्वक्त्रां तथा त्यजेत् ॥ ध्वजवज्राङ्कुशैः पीतो वामे चक्रं सुवर्तुलं ॥ शालग्रामशिलायुक्तं तत्क्षेत्रं वैष्णवं ध्रुवं ॥ अय-
ने विषुवे चैव व्यतीपाते दिनक्षये ॥ चंद्रसूर्योपरागे च एकादश्यां विशेषतः ॥ वैष्णवेषु च तीर्थेषु कार्त्तिक्यां वै तीर्थराजके ॥ शाल-
ग्रामशिलां दद्यात्सर्वलक्षणसंयुतां ॥ पात्रघंटादिसंयुक्तां द्वारकाचक्रसहितां ॥ असंभवे शिलामात्रं विदुषे ब्राह्मणाय च ॥
वैष्णवाय सुशान्ताय सात्वताध्ययनाय च ॥ वेदशास्त्रविदे चैव विष्णुभक्तिरताय च ॥ एवंविधं समाहूय पूजयेद्गंधभूषणैः ॥ वा-
सोभिरुपवीतेन आत्मवित्तानुसारतः ॥ शिलां तु पूजयेत्सर्वमुपचारैस्तु षोडशैः ॥ पादद्वादशाक्षरमंत्रेण पुष्पगंधसुदीपकैः ॥ नै-
वेद्यैरार्त्तिकाभिश्च ब्राह्मणाय शिलां ददेत् ॥ महाकोशनिवासेन चक्राद्यैरुपशोभितं ॥ शालग्राम तत्प्रदानान्मम संतु म-
नोरथाः ॥ शालग्रामशिलाचक्रे भुवनानि चतुर्दश ॥ यस्माद्वसंति तद्दानात्सर्वं दत्तं मिहास्तु मे ॥ इति मंत्रं समुच्चार्य दद्याद्वि-
प्रकरे जलं ॥ ततो वै दक्षिणां दद्याद्यथासंभवमादरात् ॥ संपूर्णपृथिवीदानाद्यत्फलं समवाप्यते ॥ पृथिवीदानतुल्यं ता- राम॰
दत्तं पुण्यफलं ध्रुवं ॥ अस्य दानस्य माहात्म्यं वक्तुं वर्षशतैरपि ॥ चतुर्मुखोपि नालं स्यात्किमन्ये द्विधियोजनाः ॥ इति ॥ ॥ अथ ॥२१७॥
तस्य प्रयोगः ॥ यथासंभवं शालग्रामशिलादि संपाद्याभीष्टकाले संप्रदानीभूतं विप्रमाहूय पंचपुरुषसूक्तेन पादद्वादशाक्षरेण मंत्रे-

ण शालग्रामशिलां षोडशोपचारैः संपूज्य ॥ अद्येत्याद्युक्त्वामुकशर्मा सोऽहं सर्वपापक्षयपूर्वकश्रीविष्णुलोकप्राप्त्यर्थं कूर्म-
पुराणोक्तविधिना शालग्रामशिलाचक्रदानमहं करिष्ये इति संकल्प्य ॥ ब्राह्मणाय वरणं कृत्वा वस्त्रोपवीतगंधपुष्पधूपदी-
पालंकारैस्तं संतोष्य पुनः षोडशोपचारैः शिलां संपूज्य ॥ अमुकगोत्रायामुकशर्मणे तुभ्यममुकगोत्रोऽमुकशर्माहं सर्व-
पापक्षयपूर्वकविष्णुलोकप्राप्त्यर्थमिदं शालग्रामशिलाचक्रं गंडकीसमुद्भूतं वज्रकीटनिर्मितं विष्णुदैवतं यथासं-
भवोपस्कारसहितं संप्रददे न मम इति ब्राह्मणहस्ते जलं दत्वा ॐ महाकोशनिवासेनेत्यादि सर्वं दत्तमिहास्तु मे इत्यंतं मंत्रं प-
ठेत् ॥ ब्राह्मणस्तु पंचोपचारैः शिलां संपूज्य प्रदक्षिणीकृत्य प्रणम्य गायत्र्या गृहीत्वा इदं शालग्रामशिलाचक्रं गंडकीसमु-
द्भूतं वज्रकीटनिर्मितं विष्णुदैवतं विष्णुप्रीत्यर्थं प्रतिगृह्णामि ॐ स्वस्ति ॥ देवस्य त्वेति वदेत् ॥ ततो दाता शालग्रामशि-
लाचक्रे जगदेतत्प्रतिष्ठितं ॥ तस्मिन्दत्ते तु दत्तं स्यात्त्रैलोक्यं सचराचरमिति प्रार्थयित्वा हते तेतच्छालग्रामशिलाचक्रदानप्र-
तिष्ठासिद्ध्यर्थं सुवर्णादिदक्षिणां दत्वा स्तुवीत ॥ त्रिलोकनाथ देवेश सर्वभूतदयानिधे ॥ दानेनानेन तुष्टः सन् यथोक्त-
फलदो भव ॥ इति शालग्रामशिलाचक्रदानविधानं ॥ ॥ अथ विष्णुप्रतिमादानविधानं ॥ कूर्मपुराणे ॥ एवमेव चरेद्दानं
प्रतिमाया हरेः खलु ॥ मंदिरं कारयित्वा तु ब्राह्मणाय समर्पयेत् ॥ दानमंत्रस्तु ॥ त्वया जगद्धार्यमिदं समस्तं त्वां विष्णुरितवदंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४दान॰प्र॰ संतः॥ त्वत्स्थानि सर्वाणि वदंति देवं त्वयाध्यंतं विश्वमनंतमंत्रे॥ त्वत्प्रदानाद्दनघो भवानि यथा जगत्कारण कारणेन॥ तथा
॥२१८॥ कुरुत्वं शरणं प्रपन्नं मपि प्रभो देववर प्रसीद॥ इति विष्णुप्रतिमादानविधानं॥ ॥अथ लिंगदानविधानं॥ शिवधर्मे॥ पा
र्वत्युवाच॥ देवदेव महादेव लिंगदानविधिं वद॥ लिंगदानफलं चापि वद मे घहपानिधे॥ श्रीशिव उवाच॥ कांतमि
रकांचनादीनि लिंगानि विविधान्यपि॥ देयान्यत्यंतयत्नेन मत्प्रीत्यर्थं मुमुक्षुभिः॥ शैवेभ्य एव देयानि दत्तेस्यानं स
मिक्षुभिः॥ शिवरात्रौ सोमवारे ग्रहणे चंद्रसूर्ययोः॥ संक्रांतिष्वपि कर्तव्यं शिवक्षेत्रे विशेषतः॥ उपोष्य पूर्वदिवसे शैवा
न संपूज्य सादरं॥ प्रार्थनीयाः स्त्वदानीं वा लिंगदानार्थमादरात॥ ततो देयानि लिंगानि क्षीराज्यै र्विधिपूर्वकं॥ अभिषिच्या
र्चनीयानि बिल्वपत्रादिभिः शिवे॥ सौवर्णे राजते वापि ताम्रे वा भाजने नतवे॥ नववस्त्रसमास्तीर्णे शिवलिंगं निवेशयेत॥ त
तः पुनः प्रयत्नेन भस्मबिल्वदलादिभिः॥ संपूज्य क्षीरपक्वान्नं नैवेद्यानि समर्पयेत॥ रात्रौ जागरणं कार्यं भक्तिश्रद्धापुरःसरं
॥ नैवेद्यं देयमभलं मत्स्वयामचतुष्टये॥ ततः प्रातः समुत्थाय स्नातो विप्रं समर्च्य च॥ ततः सुवर्णसहितवस्त्रयुग्मसमन्वितं दा॰प्र॰
॥ यात्यं स्पाते हस्ते न शिवलिंगं सदानमकं॥ शिवलिंगे शिवाकारे भुवनानि चतुर्दश॥ तस्मादस्य प्रदानेन प्रीयतां भगवान्छि ॥२१८॥
वः॥ इति मंत्रसमुच्चार्य मद्भक्ताय प्रदापयेत॥ देवस्य त्वेति राजा त्वेति मंत्रांस्ततः परं॥ प्रतिगृह्णीयात्पत्नेन पठनीयाः यथाक्रमं॥

दक्षिणां च ततो दद्याच्छैवे सर्वं समर्पयेत॥ एकस्मिन्छिवलिंगेपि दत्ते दत्तं जगत्त्रयं॥ बहूनां तु फलं वक्तुं लिंगानां कः क्षमो भवेत॥ एवं
यः कुरुते भक्त्या लिंगदानं यथाविधि॥ स महापापसंघेभ्यः सद्य एव प्रमुच्यते॥ धर्ममर्थं समुद्दिश्य लिंगदानं करोति यः॥ संततं
तमर्थं प्राप्नोति मत्प्रसादान्मनोरमे॥ लिंगदानसमं दानं नास्ति कुत्रापि शैलजे॥ तस्मात्सर्वप्रयत्नेन लिंगदानं समाचरेत॥
एवमेव महर्चाया दानमुक्तं मनाचरेत॥ मंत्रस्तु बोध देवेशि सकाशात्कथितो मम॥ ॐ देवासुराणाममृतं विषाय हालाहलं
संहृतमेव यस्मात॥ यथासुराणां त्रिपुरं च दग्धमेकेषुणा लोकहितार्थमीश॥ त्वद्रूपदानादहमप्यशेषाद्दोषैर्विमुक्तं स
च्छरणं प्रपद्ये॥ तथा कुरुत्वं शरणं प्रपन्नं मपि प्रभो देववरे प्रसीद॥ इत्युक्त्वा मामकी मूर्तिं दद्याद्दक्षिणासंयुतां॥ एवमेव गा
णेशास्कंदगौर्याः सूर्यवधोः॥ अन्येषामपि देवानां प्रतिमां प्रतिपादयेत॥ तत्तल्लोकमवाप्नोति सर्वं तत्त्वं यमाप्नुयात॥ भग्नां वा
खंडितां वापि दत्वा दोषमवाप्नुयात॥ तस्मात्सलक्षणां संपन्नां प्रतिमां सर्वदा यथेत॥ महदैश्वर्यमाप्नोति स्वर्गलोके महीयते॥
इति श्रीमदनंताचार्यविरचिते दानपारिजाताभिधे निबंधे शालग्रामविष्णुमूर्तिलिंगशिवमूर्तिदानविधानानि॥ ॥[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 14:52
,TRANSFERRED=2019/08/09 at 15:45:47
,PAGES=217
,TYPE=STD
,NAME=S0001432
,Book Name=M-805-DANPARIJATA=-
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection